3·5

शा

य प

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीविशिष्टाद्वैतवैजयन्ती ॥

चतुस्तंत्रपारीणैः अद्वैतविद्याचार्यैः

श्रीमदप्पयदीक्षितैः

विरचिता

विशिष्टाद्वैतसिद्धांतानुसारिणी

श्रीशारीरकब्रह्मसूत्राधिकरणार्थसंग्रहरूपा

॥ नयमयूखमालिका ॥

श्रीमच्छ्रीनिवासरामानुजमहादेशिकचरणनळिनवरिवस्याधिगत-

वेदान्तयुगीरहस्येन

(ओप्पिलियप्पन् सान्निधि)

व. न. कृष्णमाचार्येण

नानादेशानीतश्रीकोशपरिशीलनपुरस्सरं विद्वद्वरैस्सह

यथामति परिशोध्य

कुम्भघोणे

रा. गुरुराजाचार्यस्य

“ श्रीगोपालविलासमुद्राक्षरशालायां ”

मुद्रयित्वा प्रकाशिता.

1916

॥ श्रीः ॥

विज्ञापना ।

विदितमेव विश्वेषां विदुषां यदिमे करतलामलकीकृतनिखिलसंत्राः श्रीमदप्पयदीक्षिताः 'चतुरधिकशतप्रबन्धनिर्वाहकाचार्य' इत्यादिबिरुदावलिसूचिततावत्प्रबन्धनिबन्धनाः महावैयाकरणानां भट्टोजिदीक्षितानां वेदान्ताध्यापकाः, कुवलयानन्दचित्रमीमांसादिग्रन्थानां, श्रीमन्निगमान्तमहादेशिकानुगृहीतयादवाभ्युदयादिकाव्यरत्नव्याख्यानस्य च निर्माणेन आत्मन आलङ्कारिकचूडामणितामाविष्कुर्वाणाः द्वासप्ततिं वत्सरान् भुवनतलमिदमलंकुर्वाणाः, परित्यक्तप्राकृतशरीरा अपि निजनिर्मितनिबन्धमयेन वपुषा भारतभूमिमिमामद्यापि भूषयन्तीति ॥

एते च आंग्ले १५५४-वत्सरे कृतावताराः १६२६-वत्सरात्प्रागेव वसुन्धरामिमामुत्सृष्टवन्तश्चेति विमर्शकानां सरणिः ॥

एतैश्च प्रणीतस्य चतुर्मतसाराख्यप्रबन्धस्य परिच्छेदचतुष्टयपरिमितस्य द्वितीयः परिच्छेद एव व्यपदिश्यते प्रकृतनयमयूखमालिकानाम्ना ॥

एषा च श्रीभगवद्रामानुजानुगृहीतगभीरतमभाष्यफक्किकानुसारिण्या पूर्वमीमांसाशिक्षितन्यायकलापसंवलनपरिष्कृतया प्रत्यधिकरणसमाप्तिप्रणीतनिर्गळितार्थसंग्रहकारिकासंवलितया षट्पञ्चाशदुत्तरशताधिकरणार्थविन्यासधोरण्या तादृशभाष्यपरिचिचीषूणामतीव साहायकमाचरतीति निश्चप्रचम् ॥

इयञ्च न केनापि मुद्रणपथमेतावता कालेनावतारिता ॥

अत्र च विशिष्टमातृकाप्रदानेन प्रसन्नानां विपश्चिदपश्चिमानां महामहोपाध्यायबिरुदभूषितानां तिरुविशनल्लूर्. श्रीरामसुब्रह्मण्यशास्त्रिणां, मैलापुरस्थसंस्कृतकलाशालाप्रधानाध्यक्षाणां श्रीवेङ्कटसुब्रह्मण्यशास्त्रिणां, गदाधरपुरं श्रीवत्साङ्कं चक्रवर्ति श्रीनिवासाचार्याणां, कावेरिपाकं श्रीशंपाद्रिनाथाचार्याणां, विल्लियंपाकं चक्रवर्ति श्रीकृष्णमाचार्याणाञ्च निरतिशयमुपकारं न कदापि विस्मरेयम् ॥

इति

श्रीभूमिदेवीदयितपदपंकजोपजीवी

ओप्पिलियप्पन् सन्निधि वे. न. कृष्णमाचार्यः.

॥ श्रीः ॥

अधिकरणनामकारादिक्रमेणानुक्रमणिका ॥

॥ श्रीः ॥

॥ श्रीभूमिदेवीसमेतश्रीनिवासपरब्रह्मणे नमः ॥

॥ श्रीलक्ष्मीहयवदनपरब्रह्मणे नमः ॥

श्रीमदप्पयदीक्षितविरचिता

श्रीशारीरकब्रह्मसूत्रव्याख्या

नयमयूखमालिका ॥

प्रथमस्याध्यायस्य प्रथमः पादः ॥

हेपारवैर्यश्श्रुतिब्रह्मनिर्भरैः स्वीयां व्यनक्ति स्वरसो दितां पुरा ।
निश्वासपङ्क्तिं निखिलामपि त्रयीमश्वाननः पातु स वश्चिरं हरिः ॥

श्रेयसान्निधिमिव श्रियःपतिं प्रेप्सतां प्रियहिताध्वदर्शिनी ।
लक्ष्मणार्यहृदयानुसारिणी लिख्यते नयमयूखमालिका ॥

'अथातोधर्मजिज्ञासे' त्यारभ्य 'अनावृत्तिश्शब्दादनावृत्तिश्शब्दा' दितिपर्यंतं विंशतिलक्षणमेकं शास्त्रं, तत्र कर्मविचारार्था द्वादशलक्षणी देवताविचारार्था चतुर्लक्षणी च वृत्ता । ब्रह्मविचारार्था चतुर्लक्षण्यारभ्यते । तत्रादौ ब्रह्मविषयव्युत्पत्त्यभावप्रतिपत्तिदौस्थ्यमानान्तरसिद्धत्वफलराहित्यरूपतदनारम्भहेतुचतुष्टयनिरासेन तदारम्भसमर्थनार्थतया शास्त्रोपोद्घातरूपाणि समन्वयाधिकरणपर्यन्तानि चत्वार्यधिकरणानि । तेषु व्युत्पत्त्यभावशंकानिराकरणार्थमिदमाद्यमधिकरणम् ॥

अथातो ब्रह्मजिज्ञासा ॥१॥

ब्रह्मविचारात्मकमिदं शास्त्रमारम्भणीयं नवेति संशयः । तदर्थं ब्रह्मणि वेदान्ताः प्रमाणं नवेति संशयः । तदर्थञ्च सिद्धरूपे ब्रह्मणि व्युत्प-

त्तिस्संभवति नवेति संशयः। सिद्धे शब्दव्युत्पत्त्यसम्भवे ब्रह्मणि वेदांता नप्रमाणमिति, वेदांनरूपप्रमाणमुखेन कर्तव्यतयाऽभिमतो ब्रह्मविचारो नकर्तव्य इति, तदर्थमिदं शास्त्रं नारम्भणीयमिति, पूर्वपक्षे फलफलिभावः। शब्दानां सिद्धे व्युत्पत्तिसम्भवे वेदान्तानां ब्रह्मणि प्रामाण्यमुपपद्यत इति, तन्मुखेन ब्रह्मविचारात्मकमिदं शास्त्रमारम्भणीयमिति, सिद्धांते फलफलिभावः। तत्रोत्तमगध्यनवृद्धव्यवहाराभ्यां बालस्य कार्य एव व्युत्पत्तिग्रहात् उपजीव्यकार्यव्युत्पत्तिग्रहानुसारेण तदुपजीविषु 'पुत्रस्तेजात' इत्यादिपाश्चात्यव्यवहारेषु कार्यपदाध्याहारावश्यंभावात् सर्वे शब्दाः कार्यएव व्युत्पत्तिमन्त इति पूर्वपक्षः। सिद्धांतस्तु– आद्यव्युत्पत्तिग्रहस्य कार्यविषयत्वनियमेऽपि पाश्चात्येषु सिद्धार्थव्यवहारेषु न कार्यपदाध्याहारः कार्यः। तथाहि– किमाद्यव्युत्पत्तिग्रहकाले गामानयेत्यादिवाक्यगतानां सर्वेषां पदानां कार्यवाचित्वमवगतमिति तदनुसारेण द्वितीयादिप्रयोगेषु श्रुतैरपि सर्वैः पदैः कार्यसामान्ये बोधिते तद्विशेषजिज्ञासया कार्यविशेषवाचिक्रियापदाध्याहार इष्यते, उत आद्यव्यवहारस्य क्रियापदघटितत्वदर्शनमात्रेण। नाद्यः। गोपदसमभिव्याहारात् कर्मकारकस्येव क्रियापदसमभिव्याहारात् कार्यस्य प्रतीत्युपपत्त्या कर्मकारक इव कार्येऽपि तेषां शक्तेरकल्पनीयत्वात्। नापिद्वितीयः। 'दण्डेनगामानये' त्याद्यव्युत्पत्तिग्रहे करणश्रवणेऽपि 'अग्रे घटं पश्ये' त्यादौ करणानध्याहारवत् कार्यानध्याहारस्याप्युपपत्तेः। अन्यथा आद्यव्युत्पत्तिग्राहकवाक्यस्य आनयनकार्यघटितत्वे द्वितीयादिप्रयोगेष्वपि तस्यैवाध्याहारापत्तेः। अग्रे कार्यान्तरघटितवाक्यश्रवणात् आनयननियमस्त्यज्यते चेत्, कार्यवाचिपदरहितसिद्धार्थवर्णनपरवाक्योपलम्भबाहुल्यात् कार्यनियमोऽपि त्यक्तव्यः। अपिच सिद्धार्थविषयोऽप्याद्यव्युत्पत्तिग्रहो दृश्यते। यथा मातापित्रादयो बालान् शब्दार्थं ग्राहयन्तः शशिपशुप्रसूनीनंगुल्या निर्दिश्य तत्तद्वाचकशब्दान् प्रयुञ्जते, बालाः तथाभूतांगुळिनिर्देशसहितैः तत्प्रयोगैः शब्दार्थसम्बन्धं निश्चिन्वन्तीत्यनुभवसिद्धमेवेतत्। ननु अंगुळिनिर्देशसहितशब्दप्रयोगदर्शनमात्रेण कथं बालः अस्य

शब्दस्य अयमर्थ इति निश्चिनुयात् । नह्यर्थविशेषाभिमुखांगुलिनिर्देशसहितशब्दविशेषप्रयोगस्तयोर्वाच्यवाचकभावप्रत्यायनार्थ इति बालस्य व्युत्पत्तिग्रहोऽस्ति, नवा तथा नियमोऽस्ति, बहुजनसमाजे चैत्रमपश्यन्तं तमन्विच्छन्तं प्रति तदभिमुखांगुलिनिर्देशसहितचैत्रशब्दप्रयोगस्य वाच्यवाचकभावप्रत्यायनार्थत्वाभावात् । यत्तु तत्तदर्थानंगुल्या निर्दिश्य तत्तद्वाचकशब्देषु बहुशः प्रयुक्तेषु बालानां तत्तदर्थाभिमुखांगुलिनिर्देशशब्दविशेषप्रयोगसाहचर्यदर्शनजनितवासनाबाहुल्यात् तत्तच्छब्दश्रवणानन्तरंतत्तदर्थविषयस्वबुद्ध्युदयेन तत्रतत्रार्थेन तत्तच्छब्दस्य वाचकत्वरूपसंबन्धनिश्चयो भवेत्, संबन्धं विना शब्दादर्थबोधासम्भवात् संबन्धान्तराभावाच्चेति । नैतद्युक्तं – यदि तत्तदर्थविषयांगुलिनिर्देशशब्दप्रयोगसाहचर्यरूपसंबन्धान्तराधीनो बालस्य शब्दादर्थप्रत्ययः, किमर्थं वाचकत्वरूपसंबन्धान्तरस्यापि कल्पना, साहचर्यसंबन्धेनैव अर्थप्रत्ययसिद्धेः । नहि संबन्धान्तरेण सिद्धे अर्थप्रत्यये तदुपपादकत्वेनान्योपि संबन्धः कल्प्यः, कल्प्यमानोऽपि न प्रागनिष्पन्नार्थप्रत्ययस्योपपादकः, ज्ञातोहि संबन्धोऽर्थप्रत्ययहेतुर्भवति, नच पश्चात्संबन्धकल्पनया अर्थप्रत्ययात्पूर्वं संबन्धज्ञानमुपपादितं भवतीति चेत्, उच्यते दृश्यते तावन्मातृकृतांगुलिनिर्देशादिसहितशब्दविशेषप्रयोगभूयोदर्शनवन्तो बालाः तयोर्वाच्यवाचकभावं प्रतिपद्य शब्दश्रवणे तदर्थं स्मृत्वा तदनुसारेण चेष्टन्ते, अर्थदर्शने तद्वाचकशब्दं स्मृत्वा प्रयुञ्जते चेति, तेन तद्दर्शिनामित्थमवधारणं जायते, शब्दार्थसंबंधानभिज्ञान् प्रति अंगुलिनिर्देशचेष्टाविशेषसहितशब्दप्रयोगो वाच्यवाचकभावसंबन्धप्रत्यायनार्थः, अतएव तेन बालाः प्रतिलब्धवाच्यवाचकभावज्ञानास्तदनुकूलं व्यवहरन्तीति, एवमवधारणवन्त एव जन्मान्तरे शैशवं प्रतिपद्य मात्रादिभिर्व्युत्पाद्यन्त इति तेषां पूर्वजन्मसंस्कारानुवृत्त्या मात्रादिकर्तृकार्थविशेषाभिमुखशब्दविशेषप्रयोगस्य शब्दार्थसंबन्धप्रत्यायनार्थत्वस्मरणं भवतीति ततो वाच्यवाचकभावरूपसंबन्धनिश्चयः । यद्वा पूर्वपूर्वजन्मसु मात्रादिकृतांगुलिनिर्देशसहितशब्दप्रयोगाधीनव्युत्पत्तिग्रहज-

नितसंस्कारबलादेव बालानामुत्तरोत्तरजन्मसु तेन व्युत्पत्तिग्रहः, अवश्यञ्च 'पुत्रस्तेजात' इत्यादिव्यवहारेषु व्युत्पत्तिग्रहेऽपि जन्मान्तरसंस्कारोपजीवनमपेक्षितम्। नखलु तत्र आद्यव्युत्पत्तिग्रहं वदतां शिशुजननं। 'चैत्र पुत्रस्ते जात' इति वाक्यश्रवणानन्तरं चैत्रस्य स्नानदानादिकञ्च दृष्टवतोऽपि बालस्य जातशिशुश्चैत्रस्य पुत्र इति वा, पुत्रजन्म हर्षकारणमिति वा, पुत्रजन्मनि स्नानाभ्युदयादिकं कुर्वन्तीति वा, स्वतएव ज्ञानमस्ति। अतः पुत्रजन्मश्रवणे हृष्टाः स्नानदानादिकं कुर्वन्तीत्येतद्विषयजन्मान्तरसंस्कारोद्बोधेन स्मृत्वैव, जातशिशुश्चैत्रस्य पुत्रः 'चैत्र पुत्रस्ते जात'इति शब्दस्यापि चैत्रपुत्रजननमर्थः, अतएव मदृष्टपुत्रजन्मश्रवणानन्तरकर्तव्यं स्नानदानादिकमयं करोतीति निश्चिनोतीत्येवोपपादनीयं। पुत्रपादांकितपटप्रदर्शनपूर्वकेऽपि 'पुत्रस्ते जात' इति वाक्ये श्रुते लाटदेशे पुत्रपादांकितपटप्रदर्शनपूर्वकं पुत्रजननवार्तां वदन्तीत्येतद्विषयजन्मान्तरसंस्कारोद्बोधापेक्षाऽस्त्येव। तस्मात्सिद्धे पदानां व्युत्पत्तिसत्त्वात् वेदान्तानां ब्रह्मणि प्रामाण्यमुपपद्यतएवेति सिद्धं। सूत्रस्यत्वयमर्थः। अथ=वेदपूर्वभागार्थकर्मविचारानन्तरं। अतः=कर्मविचारस्य पूर्ववृत्तत्वादेव हेतोः। वेदोत्तरभागार्थब्रह्मविचारः कर्तव्य इति। यद्यपि जिज्ञासापदं ज्ञानेच्छाप्रतिपादकं, तथाऽपि अध्याहृतस्य कर्तव्यत्वस्य स्वतःप्राप्तायामिच्छायामनन्वयात् तद्विशेषणे विचाररूपे ज्ञानेऽन्वयः, यथा 'दध्ना जुहोती' त्यत्र उत्पत्तिविधिप्राप्तं होमं विहाय तद्विशेषणे दध्नि विधेरन्वयः। यद्यपि विचारोऽपि रागतः प्राप्नुयात्, तथाऽपि सिद्धव्युत्पत्त्यभावशङ्कया प्रतिबन्धपरिहारेण तदुत्तंभनार्थं तत्र कर्तव्यतान्वयो युक्तएव। ननु वृत्तस्य कर्मविचारस्य कथं वर्तिष्यमाणे ब्रह्मविचारे हेतुत्वं। कर्मणामावृत्तिविधानाद्यवगम्य अल्पास्थिरफलत्वावगमनेन ब्रह्मप्राप्त्यर्थोपासनापेक्षितकर्मस्वरूपाधिगमनेनच हेतुत्वमितिचेत्। तथाऽपि बादरायणकर्तव्यब्रह्मविचारशास्त्रप्रतिपाद्यविरुद्धार्थाभिधानेन जैमिनिना प्रवर्तितस्य कर्मविचारस्य हेतुत्वं नयुज्यते, जैमिनेः ब्रह्मसन्यासाद्यपलापेन तद्विरुद्धार्थाभिधायित्वञ्च भगवता बादरायणेनैव 'शेषत्वात्

षत्वात्पुरुषार्थवादोयथाऽन्येष्विति जैमिनिः, परामर्शं जैमिनिरचोदनाचाऽपवदती' त्यादिभिस्सूत्रैर्दर्शितमिति चेत्। मैवं। जैमिनेरन्याश्रमवादस्तेषुसूत्रेषुअनूदितः, अतएव तस्य ब्रह्मसन्यासाभ्युपगमः 'साक्षादप्यविरोधं जैमिनिः' 'तद्भूतस्यतुनातद्भावोजैमिनेरपी' त्यादिसूत्रैर्दर्शितः। अथापि स्यात् ब्रह्मसन्यासापलापाभ्युपगमादिना जैमिनेः 'विप्रतिषेधाच्चासमञ्जस' मिति सांख्यादिपक्षोक्तदोषभाक्त्वमेव सूचितम्, एवमपि जैमिनिकृतकर्मविचारोपजीवने दोषो नापतति, नहि तत्कृते कर्मविचारशास्त्रे ब्रह्मसन्यासादिनिराकरणं सूत्रितमस्ति, ततोबहिर्विरुद्धार्थवादित्वमस्तिचेदसौ नदोषः। वेदप्रामाण्यप्रतिक्षेप्तृभिरपि कृतस्य काशिकावृत्त्यादेः 'युक्तियुक्तं वचो ग्राह्यं नतुपूरुषगौरवमि' ति न्यायेन परिग्रहात्। ननु बादरायणीये देवताधिकरणे जैमिनीयदेवताऽधिकरणकृतं देवताप्रत्याख्यानं दूषितम्। 'आम्नायस्य क्रियार्थत्वा' दित्यादिसूत्रेण वेदस्य क्रियार्थत्वेनैव प्रामाण्यं वक्तव्यमिति अविशेषेण अकार्यार्थानामप्रामाण्यमाशंक्य तेषां विध्येकवाक्यतया तदर्थत्वोपपादनेन प्रामाण्यसमर्थनं जैमिनिना कृतं, तदपि बादरायणेन समन्वयसूत्रे ब्रह्मविषयाणां वाक्यानामक्रियार्थानां स्वातंत्र्येण प्रामाण्यसमर्थनेन प्रत्याख्यातम्। एवं विरुद्धयोः कथमेकशास्त्रत्वमिति चेत्। उच्यते-जैमिनिना स्वकीये देवताधिकरणे देवतास्वरूपनिराकरणं कण्ठतो न कृतं। नच आभिप्रायिकतत्कल्पनं युक्तम्, तिर्यगधिकरणे तेन देवताभ्युपगमस्य स्फुटीकृतत्वेन तद्विरोधापत्तेः। तत्रहि 'नदेवता देवतांतराभावा' दिति सूत्रेण देवताः कर्मसु नाधिक्रियन्ते, इन्द्रादिदेवतानां हविस्त्यागोद्देश्येन्द्रादिदेवतांतराभावात्, स्वात्मने संकल्प्यमानस्य द्रव्यस्य स्वस्वत्वत्यागासंभवेन यागाद्यनिर्वृत्तेरित्युक्तम्। ननुच तथापि जैमिनिबादरायणयोः देवतानां कर्मसु गुणत्वप्राधान्याभ्युपगमाभ्यामपरिहार्यो विरोधः। तथाहि- जैमिनिना विप्रतिपत्ता' वित्यष्टमाध्यायाधिकरणे 'विप्रतिपत्तौ हविषा नियम्येत कर्मणस्तदुपाख्यत्वा' दिति सूत्रेण ऐन्द्रपुरोडाशेषु पुरोडाशरूपहविस्सामान्यादग्नेययागधर्म्मः, नैन्द्रत्वसामान्यादैन्द्रयागधर्म्मा-

विध्यन्तः । हविस्त्यागरूपस्य यागकर्मणो हविष्युपलभ्यमानत्वात् दृश्यमानत्वात्, हविषा हि त्यज्यमानेन यागः क्रियमाणो दृश्यते नत्वप्रत्यक्षया उद्देश्यमात्ररूपयेति प्रतिपाद्य यागस्य देवताराधनरूपत्वात् देवतैव प्रसन्ना फलदात्री प्रधानभूतेति तत्सामान्यं हविस्सामान्याद्बलीय इति शङ्कानिराकरणार्थं सूत्रितम्, 'गुणत्वेन देवताश्रुति'रिति । तथा नावमिकेदेवताऽधिकरणे 'देवतावा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वा'दिति सूत्रेण यथाऽतिथिपूजनात्मकमातिथ्यं अतिथिप्रीत्यर्थं सत् अतिथिप्रधानं, एवं देवपूजनात्मकं यजनमपि देवताप्रीत्यर्थं सद्देवताप्रधानमिति पूर्वपक्षमुक्त्वा 'अपिवा शब्दपूर्वत्वाद्यज्ञकर्मप्रधानं स्यात् गुणत्वे देवताश्रुति'रिति सूत्रेण न देवताप्रधानं यजनं, तदेव अपूर्वद्वारा फलजनकं, न तु हविषा प्रीता देवता, तस्यान्तु द्रव्योद्देश्यतया यागोपसर्जनत्वेनैव श्रुतिरिति सिद्धान्तमभिधाय 'अतिथौ तत्प्रधानत्वमभावः कर्मणि स्यात् तस्य प्रीतिविधानत्वा'दिति सूत्रेण अतिथिवैषम्यन्दर्शितम्, आतिथ्यं=अतिथिप्रीतिविधानं, यथाऽतिथिः प्रीयते तथा कर्तव्यतया विहितमिति तदतिथिप्रधानं युज्यते, कर्मणि तु नास्ति प्रीतिविधानं, अतो न देवताप्रधानं यजनमिति । बादरायणेन तु 'फलमत उपपत्ते'रिति सूत्रेण परमेश्वराराधनरूपतया सर्वं कर्म परमेश्वरप्रधानं तत्तत्कर्माराधितात्परमेश्वरादेव फलं नापूर्वव्यापारात्कर्मण इति स्वमतमुक्त्वा 'धर्मं जैमिनिरतएवे'ति सूत्रेण कर्मैव अपूर्वद्वारा फलदायकमिति जैमिनिमतं पूर्वपक्षं निर्दिश्य 'पूर्वन्तु बादरायणो हेतुव्यपदेशा'दिति सूत्रेण परमेश्वर एव सर्वकर्मफलदाता, 'स एवैनं भूतिं गमयती'त्यादिकर्मविधिवाक्यशेषेषु वाय्वादिरूपस्य परमेश्वरस्यैव फलहेतुत्वव्यपदेशात्, क्षणविनाशिनः कर्मणः फलजनने द्वाराकांक्षायां वाक्यशेषार्पितां देवताप्रीतिमपहाय द्वारांतरकल्पनायोगादिति जैमिनिमतप्रतिक्षेपकयुक्तिप्रदर्शनेन स्वमतं निर्द्धारितम् । एवं परस्परविरुद्धार्थयोः कथमैकशास्त्र्यमुपपद्यते । उच्यते नाय विरोधः एकशास्त्र्यविरोधी, अनुष्ठानविरोधाभावात् । ... वाक्यार्थयथार्थ्याभावमात्रस्य पूर्वतन्त्रेऽप्यध्याय-

भेदेनदर्शनात्।तत्रहिदर्शपूर्णमासयोः'उपस्तृणात्यभिघारयति द्विर्हविषोवद्यति चतुरवत्तं जुहोती' ति श्रुतिवाक्यचतुष्टयमध्ये चतुरवत्तवाक्ये अवत्तहोमविधिः, ततोऽर्थप्राप्तमवदानमनूद्य व्यवदानवाक्ये हविषो द्विरवदातव्यमिति विधिः। चतुरवत्तवाक्ये तु चतुश्शब्द उपस्तरणाभिघारणव्यवदानवाक्यगतप्रचयशिष्टसंख्यानुवाद इति 'संयुक्ते तु प्रक्रमात्तदङ्गं स्या' दिति पाञ्चमिकाधिकरणे निरूपितम्। व्यवदानवाक्ये द्वित्वविशिष्टहविरवदानविधिः, उपस्तरणाभिघारणव्यवदानविधिप्राप्तं चतुरवत्तमनूद्य होममात्रविधिरिति प्रकारान्तरं 'उत्पत्तितादर्थ्यात् चतुरवत्तं प्रधानस्ये'ति दाशमिकाधिकरणे निरूपितम्। तत्राधिकरणयोः परस्परविरोधमाशंक्य उभयथाऽप्यनुष्ठाने विशेषाभावान्नायं विरोधो दोष इति प्रसाधितं तन्त्ररत्ने। न च वाच्यं 'यां देवतां वषट्करिष्यन् स्यात्तां मनसा ध्याये' दिति विहितं देवताध्यानं यागदेशं समागत्य हविर्गृह्णातीति, ततः प्रसन्ना च फलदात्रीति, एवंविधार्थविषयं बादरायणमते कर्तव्यम्, जैमिनिना तु उदाहृतं देवताध्यानविधानं तत्तद्देवतावाचिशब्दध्यानविषयमिति निरूपितं सङ्क्षेपे, अतस्तन्मतयोरप्यनुष्ठानेऽपि विरोधोऽस्तीति, यतो वृत्तिकारेण 'संहितमेतज्जैमिनीयेन षोडशलक्षणेने' ति कर्मविचारार्थया द्वादशलक्षण्या देवताविचारार्थया चतुर्लक्षण्या चैकतन्त्र्यं प्रतिपादितमित्युदाहृतं भाष्ये, तत्र कर्मविचारभागे द्वादशानां लक्षणानां धर्मप्रमाणतद्भेदतच्छेषशेषिभावाद्यर्थभेदस्सुलभसिद्धः। देवताविचारभागे चतुर्णां लक्षणानामर्थभेदमित्थमाहुः, 'स्वरूपमादौ तद्भेदस्तदुपासनपूर्वकं। फलञ्च देवताकाण्डे देवतानांतु कथ्यत' इति॥ कर्मदेवतोपासनयोश्च विद्यासहकारित्वेन निश्श्रेयसार्थतया ब्रह्मविचारेण सहैकफलत्वात्, व्याख्येयवेदरूपविषयैक्याच्च, मीमांसापूर्वोत्तरभागयोरैकशास्त्र्यं सिद्धं। अतएव 'पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः। वेदाः स्थानानि विद्यानां धर्मस्यच चतुर्दश॥ अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश'

त्यादिस्मृतिषु विद्यास्थानपरिगणने मीमांसैकविद्यास्थानत्वेन परिगणिता पूर्वोत्तरमीमांसा, भेदेतु संख्याऽतिरेकस्स्यादित्यलं प्रपञ्चेन ॥

सङ्ग्रहकारिकाः ॥

सिद्धं ब्रह्म न वेदान्ताः प्रतिपादयितुं क्षमाः ।
कार्यएव हि शब्दानां लोके व्युत्पत्तिरादिमा ॥
तस्माद्वेदाक्षरप्रायान् वेदांतानवलंब्य वा ।
ब्रह्ममीमांसनं व्यर्थमिति प्राप्तेऽभिधीयते ॥
अंगुल्या निर्दिशन्तोऽर्थान् वृद्धाश्शब्दान् प्रयुंजते ।
व्युत्पद्यन्ते ततोबालास्ते शब्दास्तत्परा इति ॥
इत्थं सिद्धेऽपि बालानां लोकानुभवसम्मते ।
व्युत्पत्तिग्रहणे कस्मात् कार्ये शक्तिर्नियम्यते ॥
उक्तरूपांगुळेश्चेष्टा शक्तिं ग्राहयितुं कृता ।
इति बोधे तु बालानां गतिः प्राग्जन्मवासना ॥
तिर्यञ्चोऽपि हि लोके पुंध्वनिचेष्टाविशेषाणां ।
तत्तत्कार्यार्थत्वं विजानते पूर्वजन्मवासनया ॥
अथवाऽङ्गुळिनिर्देशतत्तच्छब्दप्रयोगयोः ।
साहचर्यात्तु तद्वीक्षाजातसंस्कारदार्ढ्यतः ॥
तत्तच्छब्दश्रुतौ तत्तदर्थबुद्ध्युदये सति ।
तत्तच्छब्दार्थयोगात्मा शक्तिर्लोकैः प्रतीयते ॥

इति जिज्ञासाऽधिकरणम् ॥१॥

एवं व्युत्पत्त्यभावमूलानारम्भशङ्कानिराकरणे सिद्धे प्रतिपत्तिदौस्थ्यमूलानारम्भशङ्कां तत्प्रतिपत्त्यर्थलक्षणसमर्थनेन निराचिकीर्षुः किं पुनस्तद्विचार्यं ब्रह्मेत्याकांक्षायां तल्लक्षणमाह–

जन्माद्यस्य यतः ॥२॥

भगवौ...कामि: ब्रह्म पितरमुपससार अधीहि भगवो ब्रह्म इत्यारभ्य

'यतोवा इमानि भूतानि जायन्ते येन जातानि जीवंति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद्ब्रह्मे'ति श्रूयते । किमेतद्वाक्यं ब्रह्म लक्षणतः प्रतिपादयितुं शक्नोति उत नेति सृष्ट्यादीनां त्रयाणां विशेषणत्वेन उपलक्षणत्वेन च लक्षणत्वासम्भवसम्भवाभ्यां संशये पूर्वपक्षः । विशेषणत्वपक्षे ब्रह्मैक्यं न सिद्ध्यति, विशेषणभेदेन विशेष्यभेदापत्तेः, भेदकं हि विशेषणं, भेद्यं विशेष्यम्, अतो 'खण्डो मुण्डः पूर्णशृङ्गो गौरश्वो महिष' इत्यादिष्विव अनिवार्यो विशेष्यभेदः । 'श्यामो युवा लोहिताक्षो देवदत्त' इत्यत्र तु देवदत्तैक्यस्य प्रमाणान्तरसिद्धत्वात् न तत्र विशेष्यानेकत्वं, प्रमाणान्तरसिद्ध्यभावे तु तत्रापि विशेषणभेदेन तद्भेदस्स्यादेव । अतोऽत्रानेनैव लक्षणेन लिलक्षयिषितस्य ब्रह्मणः प्रमाणान्तरेण ऐक्यानवगतेः विशेषणभेदाद्बहुत्वमवर्जनीयम् । एतेन 'एकमेवाद्वितीय' मित्यादिभिरपि तदैक्यसिद्धिर्निरस्ता । तत्राप्येकत्वादिविशेषणभेदेन विशेष्यबहुत्वप्रतीतेः तदनुसारेण एकमित्यादिना एको व्रीहिरितिवत् साजात्यविषयतोपपत्तेः । नवात्रैव 'तद्ब्रह्मे'त्येकवचनात्तदैक्यसिद्धिः, गोस्वरूपं जिज्ञासमानं प्रति 'खण्डो मुण्डः पूर्णशृङ्गो गौ'रित्यत्र वाक्ये गोशब्दगतैकवचनस्येव जातिविषयत्वोपपत्तेः । नह्येकएव गौः खण्डो मुण्डः पूर्णशृङ्गश्च भवति, खण्डत्वादीनां परस्परविरुद्धत्वात्, तत्रैकवचनं जातिविषयञ्चेत्, इहापि स्रष्टृत्वादीनां भेदकस्वभावानां विरुद्धत्वादेकवचनं जात्येकविषयं वाच्यमिति तुल्यम् । अपि च स्रष्टृत्वसंरक्षकत्वयोस्संहर्तृत्वेन अन्यथाऽस्ति विरोधः, न हि पुत्रमुत्पाद्य यत्नेन तत्संरक्षकः पिता तस्य संहर्ताऽपि भवति । एतेन उपलक्षणत्वपक्षोऽपि निरस्तः, विरुद्धधर्माणामेकोपलक्षणत्वासम्भवात् । किञ्च आकारांतराप्रतिपत्तेरपि उपलक्षणत्वं न सम्भवति । उपलक्षणेन लक्ष्यप्रतिपत्तौ हि उपलक्षणं उपलक्ष्याकारः उपलक्ष्यस्य प्रतिपन्नाकारश्चेति आकारत्रयमपेक्षितं, यथा 'यत्रायं शरारिः पक्षिविशेषस्समित्रकेदार' इत्यत्र हि शरारिसम्बन्धउपलक्षणं, मित्रस्वामिकत्वं उपलक्ष्यं, केदारत्वं पूर्वप्रतिपन्नाकारः । शाखाग्रचन्द्र इत्यत्र शाखासम्बन्ध उपलक्ष[illegible]

ध्वदेशसंबन्ध उपलक्ष्याकारः, चन्द्रस्वरूपं पूर्वप्रतिपन्नाकारः । अस्मिन् ज्योतिर्मण्डले कश्चन्द्र इति पूर्वप्रतिपत्तिसाध्यायां बुभुत्सायामेव शाखाग्रचन्द्र इति उत्तरावतरणात् प्रत्यक्षप्रतीतः प्रकृष्टप्रकाशादिर्वा पूर्वप्रतिपन्नाकारः । ननु च अत्रापि सत्यज्ञानादिवाक्यतः प्रतिपन्नं पूर्वप्रतिपन्नोपलक्ष्याकारोऽस्तीति चेन्न । तत्रापि सत्यज्ञानादीनां विशेषणानां भेदेन विशेष्यभेदापत्त्या विशेषणत्वासंभवात्, आकारान्तराप्रतिपत्त्या उपलक्षणपक्षस्याप्यसम्भवात्, 'यतोवा इमानी' त्यादिवाक्यप्रतिपन्नाकारान्तरसमाश्रयणे परस्पराश्रयापत्तेः, अतो विशेषणोपलक्षणपक्षद्वयस्याप्यसम्भवात् न ब्रह्म लक्षणेन प्रतिपत्तुं शक्यमिति । एवं प्राप्ते सिद्धान्तः– लक्षणमुखेन ब्रह्म प्रतिपत्तुं शक्यमेव । न च अभेदेऽपि विशेषणभेदायत्तविशेष्यभेदप्रतीतिस्तत्प्रतिपत्तिबाधिका, 'श्यामो दीर्घ' इत्यादाविव विशेषणभेदेऽपि विशेष्याभेदोपपत्तेः । ननु विशेषणभेदे विशेष्यभेद औत्सर्गिकः, 'खण्डो मुण्ड' इत्यादौ दर्शनात्, 'श्यामो दीर्घ'इत्यादौ मानान्तरसिद्धविशेष्यैक्यप्रतीतिस्तद्बाधिकेत्युक्तमिति चेत् सत्यमुक्तम् । दुरुक्तन्तु तत्, विशेषणभेदेऽपि विशेष्यैक्यमौत्सर्गिकं, 'खण्डो मुण्ड' इत्यादौ विशेषणानां विरोधस्तद्बाधकइत्येव उत्सर्गापवादव्यवस्थाकल्पनौचित्यात् । किमत्र विनिगमकमिति चेत्, ऐक्यस्य औत्सर्गिकत्वकल्पने लाघवं, भेदस्य औत्सर्गिकत्वकल्पने गौरवमित्येतद्विनिगमकं, 'श्यामो दीर्घ'इत्यादौ श्यामत्वादीनां गौरादिभेदकत्वेन विशेषणत्वमुपपद्यते, एवं 'तद्ब्रह्म' त्येकवचनावगतविशेष्यैक्यमपि विशेषणभेदायत्तविशेष्यभेदबाधकं, एकवचनस्य हि व्यक्त्यैक्यविषयत्वमौत्सर्गिकम् । 'खण्डो मुण्ड' इत्यादौ तु विशेषणानां विरोधात्तत्त्यागः, तत्रापि विशेषणानां विशेष्यभेदकत्वं 'खण्डो मुण्ड' इत्यादावौत्सर्गिकं 'श्यामो युवाऽय' मित्यादौ मानान्तरतो विशेष्यैक्यावगत्या तत्त्याग इति, विपरीतोत्सर्गापवादव्यवस्थाकल्पनप्रतिक्षेपे व्यक्त्यैक्यविषयतौत्सर्गिकत्वकल्पने लाघवं अन्यथा गौरवमित्येव विनिगमकमनुसन्धेयम् । एवं लोकसाधारणमिदं विनिगमकं, विशिष्यचात्र, 'यतोवे'त्यादिवाक्यस्य यच्छब्द-

योगेन 'सन्मूलास्सोम्येमास्सर्वाः प्रजास्सदायतनास्सत्प्रतिष्ठा' इति श्रुत्यन्तरसिद्धसृष्ट्यादिकारणानुवादकत्वप्रतिपत्तेः श्रुत्यन्तरसिद्धसर्वविज्ञानप्रतिज्ञानुरोधात् एककारणविषयत्वावश्यम्भावेन पुरोवादप्रतिपन्नैककारणविषयत्वं वाच्यमिति अन्यद्विनिगमकं। तथा च यथा 'यदि रथन्तरसामा सोमस्स्यादैन्द्रवायवाग्रान् ग्रहान् गृह्णीयात् यदि बृहत्सामा शुक्राग्रा'निति ज्योतिष्टोमप्रकरणाम्नातरथन्तरसामत्वबृहत्सामत्वविशेषणयोः तत्प्रकरणाम्नातगायत्राऽमहीयवादिसामान्तरव्यावर्तकत्वं नास्ति, एवमिहापि सृष्टिकारणत्वस्य पुरोवादप्रतिपन्नस्थितिलयकारणत्वव्यावर्तकत्वं नास्तीति युक्तमुत्पश्यामः। न च उत्पाद्य संरक्षितवतस्संहर्तृत्वं विरुद्धमिति शङ्कनीयं, उत्पादनसंरक्षणयोरिव संहारस्यापि कालभेदेनाविरोधात्। स्वयमुत्पाद्य संरक्षितानां सस्यानां कालान्तरे लवनदर्शनात्, तत्तत्सृज्यकर्मानुसारिण ईश्वरस्य तत्तत्संहारे वैषम्यनैर्घृण्यदोषानापत्तेर्वक्ष्यमाणत्वाच्च। एवञ्च उपलक्षणपक्षेऽपि न दोषः। यथा दृष्टान्ते शरारिरुपलक्षणं, मित्रकेदारत्वमुपलक्ष्याकारः, केदारत्वसामान्यं पूर्वप्रतिपन्नाकारः, एवमिहापि जगज्जन्मस्थितिलयकारणत्वमुपलक्षणं, तदुपलक्ष्याकारो लक्ष्मीपतित्वं, उपलक्षणस्य जन्मादिकारणत्वस्य अनूद्यमानस्य पुरुषसूक्तरूपपुरोवादानुसारेण 'ह्रीश्चते लक्ष्मीश्च पत्न्या'विति तत्रत्यमन्त्रप्रतिपन्ने लक्ष्मीपतौ पर्यवसानात्। न हि 'सन्मूला' इति छन्दोगश्रुतिरेव पुरोवादः, विनिगमनाविरहेण कारणवस्तुसमर्पकाणां पुरुषसूक्तादीनामपि पुरोवादत्वानिवारणात्। ब्रह्मत्वं पूर्वप्रतिपन्नाकारः। तद्धि केदारत्वं प्रत्यक्षतोऽनेककेदारसाधारण्येनेव बृहतेर्धातोरर्थानुगमेन 'यस्माद्बृहति ब्रह्मयति तस्मादुच्यते परंब्रह्मे'ति श्रुत्या 'बृहत्त्वाद्बृह्मणत्वाच्च तद्ब्रह्मेत्यभिधीयत' इति स्मृत्या च भगवति पुरुषोत्तमेऽवगम्यमानं मंत्रार्थवादावगतनानाविधमहिमशालिब्रह्माद्यनेकदेवतासाधारण्येन प्रतिपन्नं, एवं लक्षणमुखेन पुरुषोत्तम एव ब्रह्मत्वपर्यवसानात् 'नारायणपरंब्रह्मे'त्यादिश्रुतिः। ननु बृहतिधातोर्मनिन्प्रत्ययान्तस्य बृहत्त्वमर्थः, [illegible] वर्ण्यते। उच्यते—

ब्रह्मणत्वं हि स्वसङ्कल्पेन चेतनाचेतनस्थूलपरिणामहेतुत्वं, तदपि स्वरूपतो गुणतो विभूतितश्च बृहत्त्ववाचिना ब्रह्मशब्देन क्रोडीकृतमेव । ननु लक्षणस्य विशेषणोपलक्षणत्वपक्षद्वयं परस्परविरुद्धं कथं परिगृहीतं, ज्ञाप्यान्वयिव्यावर्तकं विशेषणं, तदनन्वयिव्यावर्तकमुपलक्षणमिति भेदमाहुः । सत्यं। इहापि उपासनाभेदेन जन्मादिकारणत्वस्य अन्वयानन्वयाभ्यां पक्षद्वयोपपत्तिः, यथा शांडिल्यविद्यायां– 'सर्वं खल्विदं ब्रह्म तज्जला' नित्युपास्यकोटावन्वितं तद्विशेषणं, व्याहृतिशरीरकाक्ष्यादित्यमण्डलस्थपुरुषोपासनायां उपास्यब्रह्मस्वरूपप्रदर्शकतयोपलक्षणम् । यदि 'कारणन्तु ध्येय' इत्यथर्वशिखावचनं सर्वेषु उपासनेषु कारणत्वस्य उपास्यत्वसमर्पणार्थमिष्यते, तदानीमनन्तकल्याणगुणाकरस्य ब्रह्मणस्सर्वोपासनानुगता गुणा विशेषणानि, केषुचिदेवोपासनेषु व्यवस्थिता गुणाः ते तदन्योपासनेषु उपलक्षणानीति शिष्यशिक्षार्थं जन्मादिकारणत्वे स्थित्वा पक्षद्वयं भाष्यकारैर्दर्शितं । यद्यपि जन्मकारणत्वादिकमेकैकमप्यनतिव्याप्तं लक्षणं भवितुमर्हति, तथाऽपि ब्रह्मविष्णुरुद्राः कारणपुरुषाः परस्परभिन्नाः प्रत्येकं जन्मादिषु कारणानीत्यनादिप्रवादप्राप्तशङ्काव्यावृत्त्यर्थं समुदितलक्षणाश्रयणमिति सर्वमनवद्यं । सत्यज्ञानादिवाक्योक्तब्रह्मलक्षणान्तरस्योपयोगः तदर्थश्च 'आनन्दादयः प्रधानस्ये' त्यधिकरणे दर्शयिष्यते ॥

सङ्ग्रहकारिकाः ॥

जन्माद्यस्येति यतस्तद्ब्रह्मेति न लक्षणं युक्तं ।
तच्चेद्विशेषणतया लक्ष्म ब्रह्मापि भिद्येत ॥
औत्सर्गिकं विशेषणमखिलान्यविशेषधर्मजातस्य ।
व्यावर्तकमिति हेतोस्तद्भेदे तद्विशेष्यभिदा ॥
उपलक्षणता नभवत्युपलक्ष्याकारवैधुर्यात् ।
अवगतकिञ्चिद्रूपे रूपान्तरबोधकं खलु तत् ॥
केदारतया दृष्टे धर्मिणि तद्बोद्धृवाक्येन ।
[illegible] ॥

तस्माल्लक्ष्ममुखेन ज्ञातुं न ब्रह्म शक्यमुद्दिष्टम् ।
इति शंकाऽपाक्रियते पक्षद्वयमप्युरीकृत्य ॥
श्यामो युवा लोहिताक्षो देवदत्त इतीरिते ।
विशेषणानां भेदेऽपि विशेष्ये नहि भेदधीः ॥
खण्डो मुण्डः पूर्णशृङ्गो गौरित्यत्रतु भेदधीः ।
खण्डत्वादिविरोधेन नत्वत्रास्ति विरोधिता ॥
उपलक्षणता वाऽस्तु प्रतिपन्ने बृहत्तया ।
मन्त्रार्थवादादिवशात्प्रतिपन्नाहि तत्र सा ॥
बहुषु प्रतिपन्ने तैर्बृहत्त्वं द्रुहिणादिषु ।
तेषु ब्रह्म विनिश्चेतुं लक्षणोक्तिरियं श्रुतौ ॥
यथा साधारणेनैव केदारत्वेन निश्चिते ।
मित्रकेदारताबुद्धिर्व्यक्तिभेदे शरारिणा ॥
एवं ब्रह्मादिसामान्यबृहत्त्वेन विनिश्चिते ।
श्रीपतौ कारणत्वेन निराघाटा बृहत्त्वधीः ॥
सर्वकारणवाक्यानां वैशेषिकवचोबलात् ।
पशुच्छागनयस्थित्या तस्मिन्नेव हि विश्रमः ॥
इति जन्माद्यधिकरणम् ॥२॥

अथ ब्रह्मणो मानान्तरसिद्धिमूलशास्त्रानारम्भशङ्कानिराकरणार्थं तृतीयमधिकरणं—

शास्त्रयोनित्वात् ॥३॥

यतोवेत्यादिवाक्यं तत्पुरोवादसहितं जगत्कारणं ब्रह्म प्रतिपादयतीत्युक्तमनुपपन्नम् । ब्रह्मणोऽनुमानगम्यत्वेन तत्र शास्त्रस्य प्रामाण्यासंभवात् इत्याक्षेपिकी अवान्तरसङ्गतिः । ब्रह्मणि शास्त्रस्य प्रामाण्यं सम्भवति न वेति, तस्यानुमानगम्यत्वतदगम्यत्वाभ्यां संशये पूर्वपक्षः । न सम्भवति तत्प्रामाण्यं, यतः क्षित्यादिकं सकर्तृकं कार्यत्वात् घटवदिति सावयवत्वात्-

मितकार्यत्वलिङ्गकस्य नैयायिकोक्तस्य तदनुमानस्य जागरूकत्वात् । कार्यत्वलिङ्गं सावयवत्वं न सांशत्वमात्रं, येन कालवियदादिसांशत्ववादिनां तेषु व्यभिचारस्स्यात् । यदवयवाः ततः परस्माच्च पुरुषयत्नेन वियोजनार्हाः तत्सावयवमिति विवक्षितं, अतोनकापि व्यभिचारशङ्का । एवं मानांतरप्राप्तेऽर्थे शास्त्रस्य प्रामाण्यं न सम्भवति । ननु निमित्तमात्रेश्वरसाधकेनानुमानेन अभिन्ननिमित्तोपादानत्वरूपस्य शास्त्रार्थस्य प्राप्तिर्नास्तीतिचेत्—न । अनुमानविरोधेन तस्मिन्नर्थे शास्त्रस्याप्रामाण्यात् । ननु बलवत्प्रमाणेन शास्त्रेण विरोधात् अनुमानमेवाप्रमाणमितिचेन्न । ईश्वरानुमानमनपेक्ष्य शास्त्रप्रामाण्यस्यैव निर्वोढुमशक्यत्वात् 'मन्त्रायुर्वेदवच्चतत्प्रामाण्यमाप्तप्रामाण्या' दिति न्यायसूत्रकृता शास्त्रस्य प्रामाण्यमीश्वरनिर्मितत्वेनैव प्रसाधितं, तत्प्रसाधनं शास्त्रप्रामाण्यसिद्धेः प्रागेव अनुमानेनेश्वरसिद्धिमपेक्षत इति उपजीव्यविरोधात्, उपादानत्वांशे उपजीव्यतः प्राप्तार्थत्वात् निमित्तत्वांशेच शास्त्रमप्रमाणम् । न च ईश्वरनिर्मितत्वमनपेक्ष्य महाजनपरिग्रहादेव शास्त्रस्य प्रामाण्यमुपपद्यत इति वाच्यं । अन्धपरम्पराशङ्कानिराकरणाय महाजनपरिग्रहे गुणवद्वक्तृकत्वरूपमूलदार्ढ्यापेक्षणात् । एवं शास्त्रस्य अनुमानापेक्षप्रवृत्तिकत्वादेव 'तत्तेजोसृजत' त्यादिवाक्यैः यदीक्षापूर्वकस्रष्टृत्वरूपं कर्तृत्वमुक्तं, तदनुमानमूलमिति व्यञ्जयितुमेव 'अन्नेन शुङ्गेनापोमूलमन्विच्छ अद्भिस्सोम्यशुङ्गेन तेजोमूलमन्विच्छ तेजसासोम्यशुङ्गेन सन्मूलमन्विच्छे'ति कारणानुमानं प्रदर्श्य 'सन्मूलास्सोम्येमाः प्रजा' इत्याद्युक्तं । ननु ईश्वरस्य कर्तृत्वांशमनूद्य उपादानत्वांशार्थप्रतिपादनार्थं शास्त्रमस्तु, बहुभवनसङ्कल्पेन कर्तृत्ववदुपादानत्वस्यापि प्रतीतेः, नहि ईश्वरानुमानमुपादानत्वप्रतिक्षेपकं, येनोपजीव्यविरोधस्स्यात्, किंतु कर्तृमात्रविषयमिति चेन्न । घटादिषु कुलालादेः यादृशं कर्तृत्वं दृष्टं, तादृशकर्तृत्वाधिकरणत्वेनैव हि ईश्वरोऽनुमानेन साधनीयः । कुलालादिषु मृत्पिण्डादिसकलाचेतनदृष्टकारणाधिष्ठातृत्वरूपमेव कर्तृत्वन्दृष्टमिति, दृष्टानुरोधात् तथाभूतकर्तृत्वेनेश्वरानुमानं निमित्तोपादानभेदग्राहि कथमुपादानत्वांशे शास्त्रप्रामाण्यप्रतिक्षेपकं

न स्यात्। तस्माल्लक्षणोक्तिमात्रेण चारितार्थ्याभावात् लक्ष्ये तस्य लक्षणवैशिष्ट्ये च प्रामाण्यस्य वक्तव्यत्वात्। इह च अभिन्ननिमित्तोपादानस्वरूपे लक्षणे वेदान्तानां प्रामाण्यासम्भवात् वेदांतमुखेन कर्तव्यतयाऽभिमतो ब्रह्मविचारो न कर्तव्य इति तदर्थमिदं शास्त्रन्नारम्भणीयमिति। एवं प्राप्ते सिद्धान्तः– महीमहीधरमहार्णवादीनामेकेन कर्त्रा युगपत्कृतत्वेनैव सकर्तृकत्वं निर्वाह्यमित्यत्र प्रमाणन्नास्ति। महतो देवालयस्य प्रासादमण्डपगोपुरप्राकारादीनामिव तेषां क्रमेण बहुभिः कृतत्वेनापि सकर्तृकत्वोपपत्तेः। प्रत्युत महीमहीधरादिकमनेककर्तृकं, यावत्संप्रतिपन्नैककर्तृकघटादिभ्यो महाकार्यत्वात्, गोपुरप्राकारवदिति बहुकर्तृकत्वस्यैव अनुमातुं शक्यत्वाच्च। न च लाघवात्कर्त्रैक्यसिद्धिः, नहि प्रसिद्धसंसारिविलक्षणा बहवः कर्तारः कल्प्यन्ते, किंतु तेष्वेव केचित्कर्मोपासनाविशेषैरुपचितपुण्यविशेषाः क्षित्यादिषु कस्यचित्कस्यचित्कालविशेषेषु कर्तारः कल्प्यन्ते। प्रसिद्धं हि अगस्त्यविश्वामित्रादीनां विन्ध्यस्तंभनमहार्णवचुळकीकरणस्वर्गान्तरसृष्ट्यादिकं सामर्थ्यं, अद्यतनेष्वंकुरादिष्वपि सूक्ष्मव्यवहितविप्रकृष्टार्थज्ञानादिमन्तस्तत्र सन्तो योगिनः कर्तारस्सम्भवन्ति। अतः क्षित्यादिसकलोपादानगोचरापरोक्षज्ञानचिकीर्षादिमतः संसारिविलक्षणस्य कस्यचित्कर्तुः कल्पन एव धर्मिकल्पनागौरवम्। एवं च घटादिदृष्टान्तेन क्षित्यंकुरादीनां शरीरजन्यत्वसिद्धिरप्यनिवारिता भवति। किं च लाघवादेकः कर्ता सिध्यन् प्रसिद्धसंसारिविलक्षणः सिद्ध्यतीति कोऽर्थः। किं वस्तुतः एकः कर्ता सिद्ध्यतीति, उत एकत्वविशिष्टस्सिद्ध्यतीति। नाद्यः। एकत्वाविषयत्वे वस्तुत एकः कर्ता विषय इति निर्णेतुमशक्यत्वात्। न द्वितीयः। एकत्वस्य संख्यारूपत्वे प्रत्येकन्तद्वैशिष्ट्यसत्त्वेन तत्सिद्धेः बहुकर्तृकत्वाविरोधित्वात् अनेककर्तृकत्वाभावविशिष्टं सकर्तृकत्वं साध्यमिति चेन्न। गोपुरादिषु व्यभिचारात्, लघुविषयोपनायकतया त्वदभिमतस्य लाघवस्य बहुविषयोपनायकत्वापत्तेश्च। नह्येवं संप्रतिपन्नं प्रमाणानुग्राहकमस्ति, यदग्रे वस्तुलाघवसिद्ध्यर्थं स्वानुग्राह्यप्रमाणस्य विषयगौरवमापादयेत्, तथासति इष्ट-

पुरोवर्तिज्ञानस्य प्रवृत्तिकारणतां गृह्णतः प्रमाणस्य अनुग्राहको लाघवतर्कः, भ्रमस्थले व्यधिकरणप्रकारकज्ञानस्य अकल्पनया अग्रे वस्तुलाघवसिद्ध्यर्थं भेदाग्रहमेव कारणतावच्छेदकत्वेनोपनयेत्, न तु ज्ञानवित्ति वेद्यतयोपस्थितं वैशिष्ट्यम्, अतो लाघवात्कर्त्रैक्यसिद्धिरित्ययुक्तमेव। एतेन साध्यमानस्य कर्तुः कर्तृतोपयुक्तानां अपरोक्षज्ञानचिकीर्षाकृतीनां लाघवात्प्रत्येकमेकत्वासिद्धौ तदाश्रयकर्त्रैक्यसिद्धिरित्यपि निरस्तम्। कर्त्रैक्यसिद्धिपक्षोक्तविकल्पमुखदूषणानामत्रापि सत्वात्, कस्यचिज्ज्ञानं कस्यचिच्चिकीर्षा कस्यचित्कृतिरित्येवमाश्रयभेदसिद्धिनिवारणाय पुनस्तदाश्रयैक्यस्यापि साधनीयत्वापत्तेः। न हि ईश्वरज्ञानादीनां त्वन्मते नित्यानां जन्यजनकभावोऽस्ति, येन समानाधिकरणानामेव तेषां जन्यजनकभावदर्शनात् तदाश्रयैक्यं सिध्येत्, एवं च तेषामेकैकत्वहेतुकनित्यत्वासिद्धेः, एवं च योगिनामपरोक्षज्ञानादिभिरपि सिद्धसाधनमनिवार्यम्। न च क्षित्यंकुरादिजननपूर्वक्षणे तत्र तत्र तेषां सन्निधानमक्लृप्तमिति वाच्यम्। 'धर्मिकल्पनातो वरं धर्मकल्पने' ति न्यायेन योगशास्त्रादिप्रमाणकानां तेषां सन्निधानमात्रस्य कल्पनौचित्यात्। ननु अनुमानेन कर्तृमात्रसिद्धौ 'द्यावाभूमी जनयन् देव एक' इत्यादिश्रुतितस्तदैक्यसिद्धिरस्त्वितिचेत्, तर्हि अनुमानेन अप्रत्याख्यातानां भगवतो निरतिशयानन्दाद्यनन्तकल्याणगुणानां नित्यविग्रहस्य 'तदैक्षते' त्यादिश्रुतिसिद्धतत्तत्स्रष्ट्र्यादिसङ्कल्पाद्यनित्यत्वस्यच ततस्सिद्धिर्ननिवार्येति, न नित्यानुवर्तमानशरीररहितनित्यापरोक्षज्ञानादिविशेषगुणत्रययुक्तनैयायिकाभिमतेश्वरसिद्धिरिति, न तदनुमानसिद्धेश्वरानुवादकत्वादिना शास्त्रस्याप्रामाण्यप्रसक्तिरिति, प्रमाणभूतेन शास्त्रेण जगत्कारणत्वसत्यसङ्कल्पत्वाद्यनन्तकल्याणगुणाधारपुरुषोत्तमाभिधपरब्रह्मसिद्धिरप्रत्यूहेति सिद्धम्॥

सङ्ग्रहकारिके॥

जगतः कारणं ब्रह्म सिद्ध्यत्येवानुमानतः।
अतो विचार्या वेदान्ता न तत्सिद्धानवादिनः॥

नैतत्साध्वनुमानाद्धि कर्त्रैक्यादि न सिध्यति ।
अतस्तत्कारणं ब्रह्म वेदान्तैकप्रमाणकम् ॥
इति शास्त्रयोनित्वाधिकरणम् ॥३॥

एवं मानान्तरसिद्धिमूलाप्रामाण्यशङ्कानिमित्तकशास्त्रानारंभशङ्का-निवारिता– अथ अफलत्वनिबंधनतदनारंभशङ्कानिराकरणार्थं चतुर्थमधि-करणम्––

तत्तुसमन्वयात् ॥४॥

वेदान्तानां सिद्धरूपे ब्रह्मणि मानान्तराप्रवृत्तावपि प्रामाण्यं न सम्भवति, सिद्धरूपब्रह्मपरवाक्यस्य प्रवृत्तिनिवृत्तिपरवाक्यस्येव पुरुषार्थ-पर्यवसायित्वासम्भवेन श्रोतॄणां तत्र बुभुत्सा नोदेतीत्यबुभुत्सिते श्रोतॄणां प्रमित्यनुदयेन तेषां प्रामाण्योक्तेर्निरालम्बनत्वात् । न च यथा केनापि हे-तुना रथ्यायां पतितस्य किरातैस्संवर्धितस्य किरातपुत्रोऽहमित्यभिमन्यमा-नस्य राजकुमारस्य 'न त्वं किरातपुत्रः, किं तु राजकुमारः, तव पिता महाराजस्तरुणो निरतिशयभोगशाली राज्यं परिपालयन्नास्त' इति सिद्धार्थ-वाक्यश्रवणेन हर्षो जायते, एवमिहापि 'तव अन्येषां च पितृस्थानी-यो निखिलहेयप्रत्यनीकसर्वज्ञत्वसत्यसङ्कल्पदयादाक्षिण्यमहोदारत्वाद्यनन्त-कल्याणगुणशाली भगवानास्त ' इति वाक्यश्रोतुर्महान् हर्षोजायते, 'स च तत्प्राप्त्युपायमन्विष्य तं प्राप्नोती' त्येवं सिद्धार्थवाक्यस्यापि हर्षहेतुत्वेन पुरुषार्थपर्यवसानमुपपद्यत इति वाच्यं । तस्य हर्षस्य रा-जकुमारहर्षस्येव तात्कालिकत्वेन मुक्तेः स्थिरपुरुषार्थत्वाभावापत्तेः । न च तं प्राप्तस्य तदीयनिरतिशयानन्दानुभवस्सदा वर्तमानोभवति, सस्थिर-पुरुषार्थस्स्यादिति वाच्यम् । परकीयानन्दज्ञानस्य परं प्रत्यपुरुषार्थत्वादिति पूर्वपक्षः । सिद्धान्तस्तु–तात्कालिकहर्षस्तावदस्त्येव । ब्रह्मनिरतिशयानंद-साक्षात्कारश्च ब्रह्मणा सह भोगसाम्यसहितः स्थायी पुरुषार्थः, नतु तत्र तदीयत्वमपेक्षितं, साक्षात्कारत्वाविशेषणे अतीतस्वकीयसुखादिस्मरण-

स्यापि सुखसाक्षात्कारवत्पुरुषार्थत्वप्रसङ्गात्, तद्विशेषणे ततएवातिप्रसङ्ग-निवारणेन स्वकीयत्वविशेषणानपेक्षणादिति—

संग्रहकारिके ।

तथाऽपि सिद्धरूपेऽस्मिन् वेदान्तानां नमानता ।
प्रवृत्त्यादिपरत्वस्याभावादफलशालिनां ॥
मैवं स्वमन्दिरान्तस्थनिधिबोधकवाक्यवत् ।
तादृग्ब्रह्मावबोधित्वात्ते स्वतःफलशालिनः ॥

इति समन्वयाधिकरणम् ॥४॥

एवं शास्त्रानारम्भहेतुशंकाचतुष्टयनिराकरणक्रमेऽध्यायक्रमोहेतुः, तत्र सिद्धरूपे ब्रह्मणि व्युत्पत्तिसमर्थनं समन्वयाध्यायोपयोगि, विशेषणा-नामविरोधसमर्थनमविरोधाध्यायोपयोगि, अनुमानतस्सिद्धिनिराकरणं सा-धनाध्यायोपयोगि, अनुमानवस्सिद्धौ हि अनुमानसिद्धज्ञानादित्रयव-त्तया संख्यादिपञ्चकवत्तया च ब्रह्मोपासना सिध्येत्, नत्वानन्दादिगुणव-त्तया । पुरुषार्थपर्यवसानवर्णनन्तु फलाध्यायोपयोगीति स्पष्टमेव । एवं उ-पोद्घाताधिकरणचतुष्टयेन शास्त्रारम्भे समर्थिते सति ईक्षत्यधिकरणमारभ्य शास्त्रं प्रतायते ॥

ईक्षतेर्नाशब्दं ॥५॥
गौणश्चेन्नात्मशब्दात् ॥६॥
तन्निष्ठस्य मोक्षोपदेशात् ॥७॥
हेयत्वावचनाच्च ॥८॥
प्रतिज्ञाविरोधात् ॥९॥
स्वाप्ययात् ॥१०॥
गतिसामान्यात् ॥११॥

श्रुतत्वाच्च ॥१२॥

शास्त्रकाण्डद्विकाध्यायपादसंगतयस्स्फुटाः। पेटिकासंगतिर्वाच्या तथाऽवान्तरसङ्गतिः॥ वेदार्थविचारत्वात् शास्त्रसङ्गतिः, वेदान्तविचारत्वाद्ब्रह्मकाण्डसङ्गतिः, कारणविषयत्वात् द्विकसंगतिः, कारणवाक्यसमन्वयविषयत्वादध्यायसंगतिः, स्पष्टतरप्रधानजीवलिंगवाक्यविषयत्वात्पादसंगतिरिति पञ्चसङ्गतयस्स्फुटाः। पेटिकासङ्गतिरवान्तरसङ्गतिश्च वक्तव्योच्यते– ब्रह्म जगतः कारणमेव नभवति, किन्तु प्रधानजीवाकाशादिकमिति शङ्कानिरासेन ब्रह्मकारणत्वायोगव्यवच्छेदः, उपोद्घाताधिकरणचतुष्टयानन्तरप्रथमपादशेपरूपपेटिकार्थ इति पेटिकासङ्गतिः। कारणत्वाक्षिप्ताः ब्रह्मणस्सर्वज्ञत्वसत्यसङ्कल्पत्वादिगुणास्तत्क्रतुन्यायेन मुक्तप्राप्या गुणाः, तस्य महाभोगशालित्वगुणः 'निरञ्जनः परमं साम्यमुपैति'। 'भोगमात्रसाम्यलिंगाच्चे' ति श्रुतिस्मृत्यनुसारेणापि मुक्तप्राप्योगुणः, ब्रह्मणोनिरतिशयानन्दस्तु मुक्तस्य स्वयमप्राप्योऽपि सदाऽऽस्वाद्य इत्यनन्तकल्याणगुणाकरस्य निरतिशयमहानन्दशालिनः परब्रह्मणः प्रतिपादनं पुरुषार्थपर्यवसायि भवत्येवेति हि समन्वयाधिकरणे विवक्षितं, तदयुक्तं, सर्वेषां कारणवाक्यानां प्रधानविषयत्वादित्याक्षेपिकी अवान्तरसङ्गतिः। छान्दोग्ये श्रूयमाणा 'सदेवसोम्येदमग्र आसी' दित्यादिरूपा सद्विद्या खलु कारणवाक्येषु सारभूता, सा तावन्न ब्रह्मप्रतिपादिनी। किंतु सांख्यानुमानसिद्धप्रधानानुवादिनी, 'सदेवसोम्येदमग्रआसी' दिति प्रतिज्ञानिर्देशेन यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यादिति दृष्टांतोपादानेन च अनुमानसिद्धार्थानुवादकत्वस्य स्वयमेव श्रुत्या स्फुटीकरणात्। नच अचेतनस्य प्रधानस्य ईक्षणं नसम्भवतीति 'तदैक्षते' ति श्रवणमनुपपन्नं स्यादिति वाच्यम्। 'वृष्टिप्रतीक्षाश्शालयः। वृष्ट्या मोदमानाश्शालयः कन्दळन्ती' त्यादिव्यवहारेषु अचेतनानामपि चेतनवदुपचारदर्शनात्, 'कूलंपिपतिषती' त्यत्र कूलस्य पतनकार्योन्मुख्ये गौणे

व्यवहारवत् सतः तेजस्सृष्टिकार्यौन्मुख्ये गौणेक्षणव्यवहारोपपत्तेः, 'तत्तेज ऐक्षत। ता आप ऐक्षन्ते' ति गौणेक्षणप्रायपाठेन सदीक्षणस्यापि गौणत्वानिर्णयाच्चेति पूर्वपक्षः। सिद्धान्तस्तु—प्रतिज्ञातावत् प्रत्यक्षाद्यवगतार्थबोधनसाधारणी, दृष्टान्तनिर्देशोऽपि प्रतिज्ञातार्थस्य बुद्ध्यारोहार्थतया अन्यथासिद्धः, तत्साधारण एव। अन्यथा 'येनाश्रुतं श्रुतं भवती' ति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा बुद्ध्यारूढा नस्यात्, हेतुवचनमात्रमनुमानासाधारणन्तदिह न श्रूयते। ननु 'अन्नेन शुङ्गेनापोमूलमन्विच्छ अद्भिस्सोम्यशुङ्गेन तेजोमूलमन्विच्छ तेजसा सोम्य शुङ्गेन सन्मूलमन्विच्छे' ति वाक्येषु अन्नादिकार्यरूपलिङ्गेन कारणानुमानमुपन्यस्तं दृश्यते—सत्यं— 'उपक्रमोपसंहारावभ्यासोऽपूर्वताफलं। अर्थवादोपपत्ती च लिंगं तात्पर्यनिर्णय' इति श्रुतितात्पर्यनिर्णायकलिङ्गेषु परिगणितमुपपत्तिरूपमिदं लिङ्गं, नत्वत्र प्रधानसाधकत्वेन सांख्याऽभिमतस्य कस्यचिल्लिंगस्य निर्देशोऽस्ति, सर्वं कार्यं सुखदुःखमोहात्मकद्रव्यप्रकृतिकं, तत्समन्वितत्वात्, सामान्यव्याप्तौ घटादिवदित्यादिकं हि सांख्यानां प्रधानसाधकमनुमानमभिमतं, नतदिहश्रुत्या कटाक्षेणापि वीक्षितमस्ति। गौणेक्षणप्रायपाठस्तु नसदीक्षणस्य गौणत्वापादकः, सन्निध्याम्नानलक्षणप्रायपाठरूपपञ्चमप्रमाणस्य ईक्षणश्रुतितद्वाच्येक्षणलिंगबाधकत्वायोगात्। किञ्च 'ऐतदात्म्यमिदं सर्वं तत्सत्यं सआत्मे' ति सर्वस्य प्रपञ्चस्य सदात्मकत्वोक्तिः तदुद्देशेन सतआत्मत्वोक्तिश्च अचेतने प्रधाने नघटते। एवञ्च सर्वस्य प्रपञ्चस्य आत्मभूतं तेजःप्रभृतिशरीरकं सदेव 'तत्तेज ऐक्षते' त्यादिषु ईक्षितृत्वेन विवक्षितमिति नगौणेक्षणप्रायपाठशङ्काऽपि। अपि च मुमुक्षोः श्वेतकेतोः 'तत्त्वमसी' ति सदात्मकत्वानुसन्धानमुपदिश्य 'तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथसंपत्स्य' इति तत्फलतया शरीरपातानन्तरं मोक्षउपदिश्यते। न च प्रधाननिष्ठस्य मोक्ष इति सांख्यानामप्यभिमतं, तेषामपि मुमुक्षूणां हेयमेव हि तदभिमतं, अतोहेयत्वावचनादपि न सत्प्रधानं। सर्वविज्ञानप्रतिज्ञाविरोधादपि नसत्प्रधानं, नहि प्रधानज्ञानेन तत्कार्यतया तदभिमत महदा-

दिकार्यवर्गस्य ज्ञातत्वसम्भवेऽपि चेतनवर्गस्य ज्ञातत्वमुपपद्यते। अपिच सुप्तपुरुषस्य 'सता सोम्य तदा सम्पन्नोभवती'ति सत्सम्पत्तिमुपादिश्य 'स्वमपीतोभवती' ति तस्याः स्वाप्ययरूपत्वं सङ्कीर्तितमिदं सद्ब्रह्मेति पक्षे घटते, पुरुषः सुषुप्तेः प्राक् ज्ञानविकासादिरूपस्थूलाकारविशिष्टजीवशरीरकः कार्यरूपः परमात्मा सुषुप्तौ तमाकारं परित्यज्य ज्ञानसङ्कोचरूपसूक्ष्माकारविशिष्टजीवशरीरके स्वस्मिन् कारणरूपे लीनो भवतीति। अपिपूर्वकस्य इण्धातोर्लयार्थत्वात् 'सर्वस्य प्रभवाप्ययौ हि भूताना' मित्यादिश्रुत्यंतरेषु 'भवाप्ययौ हि भूताना' मित्यादिगीतावचनेषु च तस्य तादर्थ्यदर्शनात्, सच्छब्दस्य च अत्र कारणवस्तुपरस्य सूक्ष्मचिदचिद्वस्तुशरीरकपरमात्मपरतायालक्षणसूत्रे दर्शितत्वात्। सत्प्रधानमिति पक्षेतु स्वाप्ययसङ्कीर्तनं नघटते, प्रधाने स्वशब्दस्य स्वीयपरतयोपपत्तावपि जीवं तच्छरीरकपरमात्मानञ्च प्रति अकारणे तस्मिन् तयोर्लयासम्भवात्। किञ्च 'आत्मावा इदमेकएवाग्रआसीत्'। 'आत्मन आकाशस्संभूत' इत्यादिश्रुत्यन्तराणां परमात्मनएव सर्गाद्यकाले अवस्थानं आकाशादिस्रष्टृत्वञ्च प्रतिपादयन्तीनां या गतिः प्रवृत्तिः तत्सामान्यं सद्विद्यायामप्यस्ति 'सदेवसोम्येदमग्रआसी'दिति। ततोऽपि नसत्प्रधानं, श्वेताश्वतरोपनिषदि 'सहस्रशीर्षा पुरुषः पुरुषएवेदं सर्वं' मिति पुरुषसूक्तमन्त्राभ्यां तत्प्रतिपाद्यं भगवंतं प्रस्तुत्य 'सकारणं करणाधिपाधिपोनचास्य कश्चिज्जनिता नचाधिप' इति तस्य साक्षादेव जगत्कारणत्वप्रतिपादनेन सद्विद्यायास्तदैकार्थ्यावश्यम्भावादिति सत् भगवान् पुरुषोत्तमः परंब्रह्मैवेति ॥

सङ्ग्रहकारिकाः ॥

सद्विद्यायां कारणं सत्पदोक्तम्
सांख्यैरुक्तं लिङ्गगम्यं प्रधानं।
हेत्वाक्षेपाद्वर्णिताभ्यां प्रतिज्ञा-
दृष्टान्ताभ्यां न्यायवाक्यांशकाभ्यां ॥

मैवं सर्वेषु मानेषु प्रतिज्ञा न निवार्यते ।
बुद्ध्यारोहेऽपि दृष्टान्तस्तद्धेत्वाक्षेपकौ न तौ ॥
तस्मादीक्षतिलिङ्गादात्मश्रुतितो मुमुक्षुवेद्यत्वात् ।
गतिसामान्यादिभिरपि सच्छब्दं कारणं ब्रह्म ॥

इति ईक्षत्यधिकरणम् ॥५॥

आनन्दमयोऽभ्यासात् ॥१३॥

विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥१४॥

तद्धेतुव्यपदेशाच्च ॥ १५ ॥

मान्त्रवर्णिकमेव च गीयते ॥१६॥

नेतरोऽनुपपत्तेः ॥१७॥

भेदव्यपदेशाच्च ॥१८॥

कामाच्च नानुमानापेक्षा ॥१९॥

अस्मिन्नस्य च तद्योगं शास्ति ॥२०॥

यदिसतो मुख्यमीक्षणं वाच्यं, तर्हि चेतनत्वान्मुख्येक्षणार्हो जीवएव जगत्कारणमस्त्विति पूर्वपक्षोत्थानादनन्तरसङ्गतिः, तैत्तिरीयाः आनन्दवल्ल्यां 'ब्रह्मविदाप्नोतिपर' मित्युपक्रम्य किन्तद्ब्रह्म कीदृशन्तद्वेदनं कीदृशंतद्वेदनफलमित्याकांक्षायां 'सत्यं ज्ञानमनन्तं ब्रह्म । योवेद निहितं गुहायां परमेव्योमन् । सोऽश्नुते सर्वान्कामान् सह ब्रह्मणा विपश्चिता' । इति मन्त्रेण ब्रह्मणस्स्वरूपं तद्वेदनप्रकारं तत्प्राप्य फलस्वरूपञ्चोपवर्ण्य 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत' इत्यादिना तस्मादेव ब्रह्मणआकाशादिसकलजगदुत्पत्तिमुक्त्वा तस्य सुखप्रतिपत्त्यर्थं स्थूलारुन्धतीन्यायेन अन्नप्राणमनोबुद्धिषु क्रमेण तद्बुद्धिमवतार्य 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्माऽऽनन्दमय' इति आनन्दमयमुपक्रम्य तस्मिन्नेव प्रस्तुतजगत्कारणब्रह्म-

बुद्धिस्समापिता, तदनन्तरं 'तस्माद्वा एतस्मादानंदमयादन्योऽन्तर आत्मे'ति आत्मान्तरोपदेशाभावात्। स किमानन्दमयो जीवः, उत परमात्मेति संशये पूर्वपक्षः—जीव एवायं, 'एष एव शारीर आत्मे' ति शारीरत्वश्रवणात्, 'तस्य प्रियमेव शिरः। मोदो दक्षिणः पक्षः। प्रमोद उत्तरः पक्षः आनन्द आत्मा। ब्रह्मपुच्छं प्रतिष्ठे'ति प्रियमोदप्रमोदानन्दशब्दितेष्टवस्तुदर्शनतल्लाभतदुपयोगजन्यसुखतदनन्तरानुवर्तमानतृप्तिसुखसम्बन्धलिंगात्, यत्नसम्पादनीयभोग्यस्य जीवस्यैव नित्यावाप्तसमस्तकामस्य ईश्वरस्य इष्टवस्तुलाभजन्यसुखविशेषाणामाशङ्काऽनास्पदत्वात्, 'तस्माद्वा एतस्मादात्मनआकाशस्संभूत' इत्यत्र तस्मादित्यनेन परामृष्टस्य प्रकृतस्य ब्रह्मणो जीवरूपत्वप्रतिपत्त्यर्थं 'एतस्मा' दिति निर्देशेन इदानीमनुभूयमानतायाः 'आत्मन' इति निर्देशेन लोकवेदप्रसिद्धात्मशब्दवाच्यतायाश्च स्फुटीकरणात्, तदनन्तरं लौकिकानामहंबुद्धिगोचरत्वेन आत्मशब्दवाच्यत्वशङ्कास्पदेषु अन्नप्राणमनोबुद्धिषु स्थूलारुन्धतीन्यायेन तद्बुद्ध्यवतारणाच्च, अन्नप्राणादिषु लौकिकानां ब्रह्मबुद्ध्यभावेन तेषु ब्रह्मविषयस्थूलारुन्धतीन्यायानवतारणात्। नच जीवस्य सर्गाद्यकाले स्वशरीरसृष्टेः प्राक् शरीराभावेन तत्साध्यसृष्टिसङ्कल्पानुपपत्तेः स्वशरीरसृष्ट्ययोगात् तन्मूलस्ज्यान्तरसृष्ट्यसम्भवश्शङ्कनीयः, तदानीमप्यनादिलिङ्गशरीरसत्त्वेन ततएव सृष्टिसङ्कल्पस्य तन्मूलस्रज्यवर्गस्य चोपपत्तेः, 'अभावं बादरिराह ह्येव' मित्यधिकरणे मुक्तानां शरीराभावदशायां सङ्कल्पजपित्रादिस्रष्टृत्वस्य ततएव उपपादयिष्यमाणत्वात्। ननु आनन्दमयोक्त्यनन्तरं 'ब्रह्म पुच्छं प्रतिष्ठे' ति ततोऽन्यदेव ब्रह्म श्रूयत इति चेन्न। 'प्रियमेव शिर' इत्यादिना जीवानन्दावयवानां मुक्त्यनन्तरं तदीयाखण्डानन्दस्य संसारदशायामावृतस्य तत्र ब्रह्मशब्देनाभिधानात्, तस्यैव च अखण्डानन्दस्य मुक्तिदशायामभिव्यक्तिः तद्वेदनफलत्वेन 'ब्रह्मणा विपश्चिते' ति ब्रह्मशब्देन प्रदर्शिता, तत्र हि भोग्यसाहित्ये तृतीया, न भोक्तृसाहित्ये, भोक्तृकर्तृकभोगस्य आनन्दमयोपासनाफलकोटौ निर्देशायोगात्। नच पुच्छब्रह्मणोजीवान्यत्वाभावे 'असन्नेव

सम्भवति 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनन्ततो विदु' रिति ब्रह्मसत्त्वासत्त्व-वेदनोक्तिर्नयुज्यते, जीवसत्त्वस्य सुप्रसिद्धत्वेन तस्यासत्त्वशङ्कानर्हत्वादिति वाच्यम् । अन्नमयादिश्लोकानां पुच्छवद्विषयत्वेन आनन्दमयपर्यायश्लोकस्यापि पुच्छवदानन्दमयविषयतायाएव युक्तत्वात्, आनन्दमयस्य प्रियमोदादिमत्तया प्रसिद्धावपि ब्रह्मशब्दोक्ताखण्डानन्दवत्तया प्रसिद्ध्यभावेन सत्त्वासत्त्ववेदनयोस्तद्विषयतोपपत्तेः। तस्मादानन्दवल्ल्यां जीवएव जगत्कारणत्वेन प्रतिपाद्यते, न तु तदतिरिक्तं ब्रह्म, एवंच तदनुसारेण कारणवाक्यान्तराण्यपि जीव एव पर्यवस्यन्ति । अतएव सद्विद्यायां सच्छब्देन उपक्रान्तं जगत्कारणं वस्तु 'तत्त्वमसी' ति जीवरूपतयोपसंहृतमिति। एवं प्राप्ते सिद्धांतः—'यतोवाचोनिवर्तन्ते अप्राप्य मनसा सह । आनन्दं ब्रह्मणोविद्वान्नबिभेतिकुतश्चने' ति निरतिशयदशाशिरस्कत्वेन अभ्यस्यमानो महानन्दो जीवेऽल्पसुखभागिनि असम्भाव्यमानः तदितरमीश्वरमाश्रयमासाद्यैव निर्वृणोति। एवंभूतमहानन्दभागानन्दमय ईश्वर एव, न जीवः, जीवस्याप्येवंभूत आनन्दोभ्युपेयत इत्युक्तमितिचेत्, सत्यमुक्तं दुरुक्तं तु तत्। 'युवास्यात्साधु युवाध्यायकः आशिष्ठो द्रढिष्ठोबलिष्ठः 'तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुषआनन्द' इत्युक्तलक्षणमानुषानन्दप्रभृतिप्राजापत्यानन्दान्तसकलप्राणिवर्गानन्दजातादधिकतमतया'ते ये शतं प्रजापतेरानन्दाः । सएकोब्रह्मणआनन्द' इति कीर्तितस्य आनंदमयानन्दस्य पूर्ववाक्येषु तदपेक्षया अतिक्षुद्रानन्दभाक्त्वेन कीर्तिते जीववर्गे संभावनानर्हत्वात् । किञ्च 'तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तरआत्मानंदमय' इति विज्ञानमयशब्दिताज्जीवादन्यत्वेनोपक्रांतस्य आनंदमयस्य कथं जीवत्वाशङ्का । न च विज्ञानमयशब्दोबुद्धिपरश्शङ्कनीयः, 'योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योति' रित्यादिश्रुत्यन्तरेषु जीव एव प्रयोगात् विज्ञानमयपर्याये 'विज्ञानं देवास्सर्वे ब्रह्मज्येष्ठमुपासत' इति केवलविज्ञानशब्दोऽपि श्रूयत इति चेत्—तस्यापि 'योविज्ञाने तिष्ठ' न्नित्यादिश्रुत्यन्तरेष्विव जीवपरत्वात्, विज्ञानं यज्ञं तनुते कर्माणि तनुतेऽपिचे' ति तस्य यज्ञा-

दिषु कर्तृत्वश्रवणात्, बुद्धेस्तेषु करणत्वेन कर्तृत्वाभावात्। अपि च जीवमानंदमयं वदता तत्र मयडर्थः कइति वक्तव्यं, न विकारः, 'मयड्वैतयोर्भाषायामभक्ष्याच्छादनयो' रिति सूत्रेण भाषायामेव विकारावयवार्थयोर्मयड्विधानात्, कथन्तर्हि 'यस्य पर्णमयीजुहूर्भवती'त्यादिवैदिकप्रयोगः, 'द्व्यचश्छन्दसी'ति विधानांतरात्। इदं हि छन्दसिमयटोऽप्राप्तस्य च प्राप्त्यर्थं विधानं, कथंतर्हि वैदिको विज्ञानमयशब्दः, नात्रविकारार्थोमयट्प्रत्ययः, किन्तु विज्ञानशब्दोक्तबुद्धिवृत्तिप्राचुर्यार्थः, तस्माद्विकारार्थत्वासंभवात् आनंदमयेऽपि मयट्प्राचुर्यार्थएव वाच्यः। प्राचुर्यार्थत्वञ्च प्रागुदाहृतानंदमीमांसावाक्यशेषोपदर्शितप्रकारेण मानुषादिप्राजापत्यांतसकलजीववर्गसुखापेक्षया आधिक्यरूपमिति न कस्यापि जीवस्य आनन्दमयत्वशङ्कावकाशः। एतेन आनंदप्राचुर्यार्थकआनंदमयशब्दो जीवेऽप्युपपद्यते, सांसारिकदुःखलवभाजि मुक्त्यभिव्यंग्यमहानन्दवति जीवे समानाधिकरणदुःखाल्पत्वापेक्षाऽऽनन्दाधिक्यरूपप्राचुर्यार्थसंभवात्। प्राचुर्यार्थशब्दस्य उत्तरत्वे समानाधिकरणविजातीयाल्पत्वापेक्षमेव हि प्राचुर्यमर्थः, न तु 'प्रचुरब्राह्मणो ग्राम' इत्यत्रेव व्यधिकरणसजातीयाल्पत्वापेक्षं, तथैव व्युत्पत्तेरिति निरस्तम्। वाक्यशेषे व्यधिकरणसजातीयाल्पत्वापेक्ष एव प्राचुर्ये कीर्त्यमाने विधान्तरेण प्राचुर्यग्रहणायोगात्। अव्यवस्थितपौर्वापर्यस्य प्रचुरशब्दरूपस्य नामपदस्य उत्तरत्वे तथा व्युत्पत्तावपि 'तत्प्रकृतवचने मयडि' ति सूत्रविहितस्य नियतोत्तरभावस्य मयट्प्रत्ययस्य उत्तरत्वे तथा व्युत्पत्तिकल्पकाभावाच्च। तस्मादानन्दमयोब्रह्मैव। अत एव तस्योपक्रमे जीवोपास्यत्वनिर्देशः, 'योवेद निहितं गुहाया' मिति जीवासंभावितविविधद्रष्टृत्वरूपसार्वज्ञ्यनिर्देशः, 'सह ब्रह्मणा विपश्चिते' ति वाक्यशेषे च 'कोह्येवान्यात् कः प्राण्यात्—यदेषआकाशआनंदोनस्यात्—एषह्येवानन्दयाती' ति जीवानन्दयितृभावव्यपदेशः, 'सोकामयत बहुस्यां प्रजायेये' ति हिरण्यगर्भादिजीवासंभावितप्रधानानपेक्षस्वतन्त्रसृष्टिकामनाव्यपदेशः, 'रसोवैसः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवती 'ति जीवास्वादनी-

यत्वव्यपदेशश्च। एतैरप्युपक्रमोपसंहारगतहेतुभिरानन्दमयो न जीवः, किंतु ब्रह्मैवेति प्रधानस्येव जीवस्यापि न सद्विद्यानंदवल्ल्यादिकारणवाक्यप्रतिपाद्यत्वमिति सिद्धम् ॥

संग्रहकारिकाः ॥

आनन्दमयस्तावज्जीवश्शारीरताश्रवणात् ।
स्रष्टाऽऽकाशादीनामात्मा यः प्रागुपक्रांतः ॥
आतस्सदपि सएव स्यादीक्षत्यादिसंभवात्तत्र ।
अतएव हि तत्वमसीत्युक्ता जीवात्मता तस्य ॥
मैवमभ्यस्यमानोहि जीवे शतगुणोत्तरः ।
आनन्दो नैव घटते परमात्मैव तेन सः ॥
विज्ञानमयपदोक्ताज्जीवादन्यत्ववचनाच्च ।
तद्भेदकधर्माणामाम्नानाद्वाक्यशेषेच ॥
शारीरव्यपदेशस्तत्वमसीति च विनिर्देशः ।
लभते सर्वशरीरे परमात्मन्यपि समञ्जसताम् ॥

इत्यानन्दमयाधिकरणम् ॥६॥

अन्तस्तद्धर्मोपदेशात् ॥२१॥

भेदव्यपदेशाच्चान्यः ॥२२॥

जगत्कारणं वस्तु ईक्षणश्रवणात् 'तत्वमसी' त्युपसंहाराच्च माभूत्प्रधानं माभूच्चजीवसामान्यं ततोभेदकनिर्देशात्, तथाप्युपचितपुण्यविशेषाणां ब्रह्मेन्द्रचन्द्रसूर्यादीनां विश्वामित्रादीनामृषीणाञ्च मध्ये यः कश्चिज्जीवविशेषः कल्पभेदेन स्यात्, तत्रानन्दवल्ल्युक्तजीवसामान्यव्यावर्तकसकलमहिमोपपत्तेरिति प्रत्यवस्थानात्सङ्गतिः। तत्र स्थालीपुलाकन्यायेन किञ्चिद्देवताविषयं वाक्यमुदाह्रियते–छान्दोग्ये–'अथ यएषोऽन्तरादित्ये हिरण्मयः पुरुषोदृश्यते हिरण्यश्मश्रुर्हिरण्यकेशआप्रणखात्सर्वएव सुवर्णः तस्य यथा

कप्यासं पुण्डरीकमेवमक्षिणी तस्योदितिनाम सएषसर्वेभ्यः पाप्मभ्यउदित्तः उदेति ह वै स सर्वेभ्यः पाप्मभ्योयएवं वेद तस्य ऋक्च सामच गेष्णा । वित्यादिना आदित्यमण्डलस्यांतरुपास्यः पुरुषोऽभिहितः, 'अथ य एषोऽन्तरक्षिणि पुरुषोदृश्यते सैव ऋक् तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यैतस्य तदेव रूपं यदमुष्यरूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामेत्यादिना अक्ष्यन्तरुपास्यःपुरुषोऽभिहितः । अस्मिन् विद्याद्वये उपास्यः पुरुषः पुण्यविशेषेण आदित्यमण्डलाधिष्ठातृदेवतापदं प्राप्तोजीवविशेषइति सएव आनन्दवल्ल्युक्तसकलमहिमशाली समस्तकारणवाक्यविषयस्स्यात्, उत ततोऽन्यः परमात्मेति सएव कारणवाक्यानां विषयइति संशयः । आनंदवल्ल्यां 'भीषास्माद्वातः पवतेभीषोदेति सूर्यः' इति सूर्यभयहेतुत्वेन ततोभिन्नआनन्दमयः प्रदर्शितः, इह कथं सएवानन्दमयइति पूर्वपक्षस्यावकाशः । उच्यते—स्थालीपुलाकन्यायेन इह आदित्यजीवउदाहरणमित्युक्तं । ब्रह्मेन्द्रादयोऽपि वस्तुतइहोदाहरणानीति कल्पभेदेन यत्तेषां जगत्कारणत्वं पूर्वपक्ष्याभिमतं, तदासाद्य सूर्यभयहेतुत्वसमाम्नानञ्चरितार्थं स्यात् । इन्द्रादिभयहेतुत्वसमाम्नानस्यापि उपपत्तिरेवमेवानुसंधेया । अधिकरणव्युत्पाद्यन्यायस्य ब्रह्मेन्द्रादिसाधारण्येऽपि सिद्धांते मण्डलाभिमानिजीवातिरिक्तं ब्रह्म जगत्कारणं सिध्यत्, पुण्डरीकाक्षत्वलिङ्गेन भगवान् पुरुषोत्तम एवेत्यपि, एकयत्नेन सिध्यत्वित्यभिसन्धाय सूत्रकृता अन्तश्शब्देन अन्तरादित्यविद्याऽन्तरक्षिविद्याद्वयमिहोदाहरणमिति सूत्रितं । पूर्वपक्षस्तु— मण्डलाभिमानी जीव एवायं, नतु ततोऽन्यत्सिद्धान्त्यभिमतं ब्रह्म, शरीरश्रवणात्, कर्मनिमित्तंहिशरीरं, कथं कर्मरहितत्वेन सिद्धांताभ्युपगतस्य ब्रह्मणस्तदुपपद्यते । नच 'सएषसर्वेभ्यः पाप्मभ्यउदित' इति सर्वपापरहितत्वेन श्रुतस्य कथं कर्मनिमित्तं शरीरं स्यादिति शंकनीयं, त्रिविधं हि शरीरं, केवलपुण्यारब्धं सुखैकायतनं देवानां, केवलपापारब्धं दुःखैकायतनं स्थावरादीनां, पुण्यपापोभयारब्धं सुखदुःखोभयायतनं मनुष्यादीनां, एवं च 'न हवै देवात् पापं गच्छती' ति श्रुतेः देवानां अपापत्वेऽपि पु-

ण्यमात्रारब्धशरीरे न काचिदनुपपत्तिः । ननु सिद्धांत्यभिमतस्य ब्रह्मणोऽप्यन्तर्यामिभावेन जीवकर्मनिमित्तशरीरेषु हृदयदेशे अवस्थानलक्षणं शारीरत्वमुपपद्यत इति चेत्, उपपद्यतान्नाम, तद्यथाकथञ्चित्, इह न तथाभूतं शारीरत्वमुच्यते किंतु अतिरमणीयतया शरीरिणः स्पृहणीयं तस्य दिव्यभोगायतनं तेनाऽऽकेशमानखाग्रमनुप्रविष्टं यच्छरीरं तेन शरीरेण शरीरवत्त्वमुच्यते । अत्र 'हिरण्मयः पुरुष' इत्यादि 'एवमक्षिणी' इत्यन्तं तस्यातिरामणीयकं वर्णयदुदाहृतश्रुतिवचनमेव साक्षि, तस्मादत्यन्तोपाचितपुण्यविशेषलभ्यमिदं शरीरं जीवस्यैव संभवतीत्येवंरूपशरीरश्रवणादयं जीवएव, न तदतिरिक्ते ब्रह्मणि प्रमाणमस्तीति सएवानंदमयः । अतएव आनन्दवल्ल्यां श्रूयते 'सयश्चायं पुरुषे यश्चासावादित्ये सएक'इति । सिद्धांतस्तु-नेह श्रूयमाणं शरीरं कर्मनिमित्तं, शरीरिणस्सर्वपापोदयश्रवणात् सर्वेभ्यः पाप्मभ्य उदितत्वं । उदितत्वं हि नीडादुद्गतस्य शकुन्तस्य सर्वथा नीडसंबन्धराहित्यवत् सर्वपाप्मसंबंधराहित्यरूपं गौणं, मुख्यस्य पाप्मापादानकोद्गमनस्यासंभवात्, नच सर्वपापात्यन्ताभाववतः कर्मनिमित्तं शरीरं संभवतिं, नच पापाभावेऽपि पुण्यनिमित्तं शरीरं स्यादिति वाच्यं, इह पाप्मशब्दस्य पुण्यपापोभयसाधारणत्वात् । 'नैनं सेतुमहोरात्रे तरतः न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानो अतो निवर्तंत' इति ब्रह्मप्रकरणे पाप्मशब्दस्य सुकृतसाधारण्यश्रवणात्, मुमुक्षुं प्रति दुष्कृतवत् सुकृतस्यापि 'एते वै निरयास्तात स्थानस्य परमात्मन' इति भगवत्पराशरोक्तरीत्या अनिष्टफलत्वेन तस्यापि पाप्मशब्देन ग्रहणौचित्यात्, अलौकिकानिष्टफलसाधनत्वस्यैव पाप्मशब्दप्रवृत्तिनिमित्तत्वेन मुमुक्षुं प्रति तस्यापि पाप्मशब्दार्थत्वानिवारणाच्च । अथापि स्यात्–वेदांतेषु न पाप्मशब्दस्य जरामृत्युशोकसुकृतदुष्कृतसाधारण्यनियमोऽस्ति, 'न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतोनिवर्तंत' इत्येवं सङ्कीर्तनवत्येव दहरविद्याप्रकरणे 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोक' इति पाप्माभावमुक्त्वाऽपि पृथक् जरामृत्युशोकाभाव-

प्रतिपादनादिति, तथाऽपि 'स एष सर्वेभ्यः पाप्मभ्य उदित' इत्यत्र पाप्मशब्दस्सुकृतसाधारण एव वाच्यः, 'उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेदे' ति सर्वपापोदयस्य तत्क्रतुन्यायानुसारिविद्याफलत्वश्रवणात्, सुकृतनिवृत्तेरपि विद्याफलत्वस्य चतुर्थाध्याये वक्ष्यमाणत्वात्। तस्मादिह श्रूयमाणं शरीरं न कर्मनिमित्तमिति, अकर्मनिमित्तातिरमणीयदिव्यमङ्गलविग्रहवत्त्वेन जीवे क्वचिदपि असम्भावितेन अयं मण्डले श्रूयमाणः पुरुषो जीवादन्यद्ब्रह्मैव, तच्च ब्रह्म पुण्डरीकाक्षत्वलिङ्गेन भगवान् पुरुषोत्तम एव। यद्यपि यास्केन वाक्यकारेण च 'तस्य यथा कप्यासं पुण्डरीकमेव मक्षिणी' इत्यस्य यथा कप्यासं सूर्यमण्डलं हृदयपुण्डरीकं च तस्योपासनास्थानं, एवमक्षिणी अपि तस्योपासनास्थानमिति पुण्डरीकाक्षत्वलिंगास्पर्श्यपि अर्थान्तरमुक्तं, तथापि वैभवार्थं तत्क्लिष्टार्थान्तरवर्णनं। 'यएषएतस्मिन्मण्डले पुरुषः यश्चायन्दक्षिणेक्ष' न्निति बृहदारण्यके दक्षिणस्यैवाक्ष्णस्तदुपासनास्थानत्वप्रसिद्धेः पुण्डरीकाक्षत्वालिंगस्पर्श्यैवार्थस्तस्याप्यभिमतः, तत्र तस्मिन्नर्थे च 'कप्यास'मित्यस्य तेन त्रेधार्थो वर्णितः। कं उदकं। स्वरंध्रैः पिबतीति कपिः— नाळः। तत्रास्त इति कप्यासम्। अभग्नकृमिकीटाद्यदष्टनाळमित्येकोऽर्थः। कपाइति सोमपाशब्दवत् प्रक्रियायां कपीति सप्तम्यन्तं भिन्नं वा पदम्। के जले प्यास्त इति' जलादनुद्धृतमित्यन्योऽर्थः। आसधातोः अपिपूर्वत्वे 'वष्टिभागुरिरल्लोपमवाप्योरुपसर्गयो' रित्यकारलोपे च सति प्यास्तइति रूपम्। कं उदकं रश्मिभिः पिबतीति कपिस्सूर्यः, तस्यासं विकास्यं, रविकरविकसितमित्यपरोऽर्थइति। अमुं त्रिविधमप्यर्थं गृहीत्वा वेदार्थसंग्रहे भाष्यकारैरस्यवाक्यस्यार्थोवर्णितः, 'गंभीरांभस्समुद्भूतसुमृष्टनाळरविकरविकसितपुण्डरीकदळामलायतेक्षण' इति। ननुएवंभूतोविग्रहः कथं अकर्मनिमित्तइत्यभ्युपगन्तव्यं, शरीराणां कर्मजन्यत्वनियमस्य लोके दृष्टत्वादिति चेत्, उच्यते— इहैव पापात्यन्ताभाववत्त्वेनोक्तस्य पुण्यपापोभयारब्धं शरीरन्तावद्वक्तुमशक्यं, पुण्यमात्रारब्धमुच्यते चेदपि लोकदृष्टस्य पुण्यपापोभयारब्धत्वनिय-

मस्य 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति । अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत' इति श्रुत्युपबृंहितस्य उल्लङ्घनमनिवार्यं । तथाऽसति 'न भूतसङ्घसंस्थानो देहोऽस्य परमात्मनः ।' 'न तस्य प्राकृता मूर्तिः' 'जगतामुपकाराय न सा कर्म निमित्तजे' त्याद्युपब्रह्मणानुसारेण भगवतो दिव्यमङ्गलविग्रहो ऽप्राकृतः अकर्मनिमित्त इत्येव न्यायविद्भिरभ्युपगन्तुं युक्तं । लोकदृष्टनियमादुपब्रह्मणस्य बलवत्त्वात् । ननु उक्तन्यायः अन्तरादित्यवाक्यमात्रे वक्तुं शक्यः, नतु ब्रह्मेन्द्रादिमहामहिमप्रतिपादक वाक्येष्वपि, नहि हिरण्यगर्भपुरन्दरादिलोकेष्वपि आदित्यमण्डल इव भगवद्दिव्यमङ्गलविग्रहसन्निधानं प्रसिद्धश्रुतिष्वस्ति । उच्यते– ब्रह्मादिष्वन्यतम एव एकस्मिन् कल्पे पुण्यविशेषेण एवंभूतमैश्वर्यं प्राप्तो जगत्सृष्ट्याद्यपि करोतीति भाष्यवाक्यं ब्रह्मेन्द्रादिमहिमप्रतिपादकविषयवाक्यान्तरेष्वपि जीवपूर्वपक्षतदतिरिक्तब्रह्मगोचरसिद्धान्तौ प्रवर्तनीयावित्याशयेन प्रवृत्तं न भवति, किंतु यथाऽस्मिन्विषयवाक्ये आदित्यदेवतापदं प्राप्तो जीवः प्रतिपाद्य इति पूर्वपक्षः, एवमस्मिन्नेव विषयवाक्ये शक्रः प्रतिपाद्यः, हिरण्यगर्भः प्रतिपाद्य इत्येवं रूपेण पूर्वपक्षान्तरमपि प्रवर्तनीयमित्याशयेन, तद्वा कथं सङ्गच्छते, इत्थं–' यदद्य-कच्चवृत्रहन्नुदगा अभिसूर्य । सर्वं तदिन्द्र ते वश ' इति मन्त्रवर्णात् आदित्यमण्डलाधिष्ठाता शक्र इति प्रतीयते । ' असदेवेदमग्र आसीत्तत्सदासीत्तत्समभवत्तदाण्डं निरवर्तत तत्संवत्सरस्य मात्रामशयत तन्निरभिद्यत ते आण्डकपाले रजतं च सुवर्णं चाभवतां । तद्यद्रजतं सेयं पृथिवी यत्सुवर्णं सा द्यौर्यज्जरायु ते पर्वताः यदुल्बं स मेघो नीहारो याधमनयस्ता नद्यो यद्वास्तेयमुदकं स समुद्रः। अथ यत्तदजायत सोऽसावादित्यस्तं जायमानं घोषा उलूलवोऽनूदतिष्ठन् सर्वाणि च भूतानि सर्वे च कामास्तस्मात्तस्योदयनं प्रति प्रत्यायनं प्रति घोषा उलूलवोऽनूत्तिष्ठन्ति सर्वाणिच भूतानि सर्वे च कामा'इति छान्दोग्यवाक्यसन्दर्भादादित्य जीवो हिरण्यगर्भ इत्यपि प्रतीयत इति । अपिच ' येचामुष्मात्पराञ्चो लोका-

स्तेषां चेष्टे देवकामानां च यैचैतदस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामा-नाञ्चे' ति सकललोकेश्वरत्वसकलदेवमनुष्याभीप्सितत्वफलप्रदानशक्तत्वश्र-वणादपि नायमक्ष्यादित्यान्तर्वर्त्तिपुरुषोजीवः, यद्यपि देवलोककामेश्वरत्वम-नुष्यलोककामेश्वरत्वञ्च अक्ष्यादित्यस्थानभेदेन विभज्य श्रुतं, तथापि स्था-नद्वयमेकएव पुरुषोऽधितिष्ठतीति तत्प्राप्नुवत द्विविधलोककामेश्वरत्वं सर्वलो-ककामेश्वरत्वरूपतया पर्यवस्यति एवं ऋक्सामगेष्णत्वश्रवणादपि नायं जी-वः, गेष्णशब्दोगानवाची, गानं द्विविधं, शब्दकर्मकमेकं यथा पद्यं गायतीति अर्थकर्मकमेकं यथा राजानं गायतीति, इहार्थकर्मकगानरूपत्वमृक्सामयो-र्विवक्षितं, तच्चात्र सामरूपगीतिक्रियाभिव्यंग्यं ऋक्साध्यगुणिनिष्ठगुणाभि-धानरूपस्तुत्युपायत्वमृक्सामसाधारणं, एवञ्च आदित्यपुरुषस्य स्तुतौ ऋ-क्साक्षात्साधनं, साम ऋगभिव्यक्तिद्वारा, 'साम्नास्तुवीते' ति साम्नोपि स्तुतिसाधनत्वश्रवणात् इत्युभयोरपि क्रमिकस्तुतिसाधनतया गानत्वमित्या-दित्यपुरुषस्य ऋक्सामसाध्यस्तुति विषयाग्नीन्द्रसोमादिरूपतया सार्वात्म्यसि-द्धिः । यद्यपि प्रस्तावादिसामभक्त्यवयवरूपे सामगानां पर्वस्येव प्रसिद्धे साम्नामपच्छेदे गेष्णाख्या तेषां प्रसिद्धा, औत्थिक्याख्ये सामपर्वलक्ष-णग्रंथेपि तथैव व्यवहारः, तथापि क्रमिकस्तोत्रसाधनत्वसादृश्यात् ऋक्सा-मयोर्गेष्णद्वयतोपचारः, तस्मादृक्सामगेष्णत्वप्रतीतसार्वात्म्यासंभवात्, 'य-आदित्ये तिष्ठ' न्नित्याद्यन्तर्यामिब्राह्मणे भेदव्यपदेशाच्च, नादित्यपुरुषोजीवः, किंतु तदतिरिक्तं ब्रह्मेत्यभ्युपगन्तव्यमिति ॥

संग्रहकारिकाः ॥

अन्तर्मार्त्तण्डवर्त्ती तनुमधिवसति श्मश्रुकेशादियुक्तां
तादृक्कर्मानुबन्धात्खलु भवति तनुस्तेन तावत्स जीवः ।
एवं चानन्दवल्ली परिपठितजगत्कारणं जीव एव
स्यात्तस्यामेव तेन स्फुटतरमभिदा तस्य यत्प्रत्यणादि ॥
न खलु सुकृतपापान्युत्तरे कोऽपि जीवो
विधुतसकलपापो यद्यपि स्यादमर्त्यः ।

उपनिषदुपगीतः पाप्मशब्दोऽभिधत्ते
सुकृतमपि निमित्ता भेदतः पापतुल्यम् ॥
तत्सर्वपाप्मोदयलिङ्गदर्शनाद्देवोन्तरादित्यगतः परः पुमान् ।
अप्राकृतं रूपममुष्य विश्रुतं व्यूहावतार प्रमुखाश्च तादृशाः ॥
इति अन्तराधिकरणम् ॥

एवं सद्विद्यानन्दवल्लीप्रतिपाद्यं जगत्कारणं वस्तु जीव इति तल्लिङ्गावलम्बनपूर्वपक्षावान्तरपेटिका वृत्ता, अथ तज्जगत्कारणं वस्तु आकाशादिकमेव, न ततोऽन्यज्जगत्कारणं ब्रह्मनामास्तीति श्रुत्यवलम्बनपूर्वपक्षमवान्तरपेटिकान्तरं प्रस्तूयते ॥

आकाशस्तल्लिङ्गात् ॥२३॥

पूर्वमादित्यपुरुषस्य वैशेषिकलिङ्गात् वेदान्तवेद्यजगत्कारणत्वमुक्तम् ; तदयुक्तम् । लिङ्गतः प्रबलया श्रुत्या भूताकाशस्यैव जगत्कारणत्वादित्याक्षेपेणोत्थानादवान्तरसङ्गतिः । छांदोग्ये — 'अस्य लोकस्य कागति' रिति पृष्टवन्तं दाल्भ्यं प्रति 'आकाश इति होवाचे' ति जैवलेरुत्तरमुपक्रम्य श्रूयते 'सर्वाणि ह वा इमानि भूतान्याकाशादेवसमुत्पद्यन्ते, आकाशं प्रत्यस्तं यन्ति आकाशो ह्येवैभ्यो ज्यायानाकाशः परायण'मिति। किमयमाकाशोभूताकाशः, उत तदतिरिक्तः परमात्मेति भूताकाशस्य श्रूयमाणसर्वभूतोत्पत्तिस्थितिलयकारणत्वयोग्यत्वायोग्यत्वाभ्यां संशयः । तत्र पूर्वः पक्षः । भूताकाशएवायं, आकाशश्रुतेस्तत्ररूढत्वात्, अतो 'यतोवा इमानि भूतानि जायन्त'इत्यादिलक्षणलक्षितजगत्कारणं ब्रह्म भूताकाशएव, सर्वभूतोत्पत्तिस्थितिलयकारणत्वस्य तत्रोक्तलक्षणस्यैव अत्र 'सर्वाणि ह वा इमानि भूतानी' त्यादिना भूताकाशपर्यवसानवर्णनात्, तस्य क्वचिद्विशेषे पर्यवसानसाकांक्षत्वाच्च । ननु भृगुवल्ल्यामेव 'आनन्दाद्ध्येव खल्विमानि भूतानि जायन्त' इत्यादिनाऽऽनन्दरूपे विशेषे पर्यवसानमुक्तम् । मै-

वं—तत्रहि 'को ह्येवान्यात्कः प्राण्यात्। यदेष आकाश आनन्दोनस्या.' दि
त्यानन्दशब्द आकाशशब्दसमानाधिकरणश्श्रुतः, ततश्च विरुद्धार्थयो स्तयो-
रुभयोरपि मुख्यतया सामानाधिकरण्यायोगात्। किं मानन्दशब्दो गौणः
उत आकाशशब्दइत्यत्र विनिगमनाश्रवणात्। तत्र जगत्कारणत्वस्य
लक्षणस्य क्वविशेषे पर्यवसानमिति नास्ति निर्णयइत्याशङ्क्य आकाशश्रुत्या
भूताकाशएव जगत्कारणमिति निश्चिते तत्र आनन्दशब्दो गौणइतीहैव
निर्णयः। ननु अचेतनस्य भूताकाशस्य जगत्कारणत्वं कथमिहाशङ्क्यते,
सच्चिदानन्दवल्लीश्रुतचेतनलिङ्गबलादानन्दमयशब्दोक्तं जगत्कारणं वस्तु चे-
तनविशेषएवेति हि प्राक् स्थितं, सत्यम्। सदानन्दशब्दौ चेतनेऽपि यो-
जयितुं शक्यौ, लिङ्गानुसारेण तथा योजितौ, इह तु भूताकाशे रूढाकाश-
श्रुतिः लिङ्गानुसारेण योजयितुं न युक्ता। ईक्षितृत्वादिलिङ्गमेव 'कूलं पि-
पतिषती'त्यादिन्यायेन भूताकाशे योज्यमित्याक्षेपः। ननु 'आत्मन आका
शस्सम्भूत' इत्युत्पत्तिमत्त्वेन श्रुतस्य भूताकाशस्य कथं सर्वभूतस्थितिलय-
कारणत्वरूपलक्षणसम्बन्धोपपत्तिः, इत्थं— तत्र 'आत्मन' इति स्वस्मा-
देव शब्दतन्मात्ररूप सूक्ष्मावस्थात् स्थूलावस्थोभूताकाशस्सम्भूतइति तद-
र्थः। आत्मशब्दस्य शरीरप्रतिसंबंधिनि चेतनइव 'मृदात्मकोघटइत्यादिषु
स्वरूपेऽपि प्रयोगात्, आत्मा जीवे धृतौ देहे स्वभावे परमात्मनी' त्यादि-
कोशेषु तस्य नानार्थत्वानुशासनात्। तस्मात् भूताकाशस्यैव जगत्कारण-
त्वरूप ब्रह्मलक्षणपर्यवसाननिर्णये यत् सच्चिदानन्दवल्ली भृगुवल्लीषु जग-
त्कारणवस्तुपरं ब्रह्मपदं श्रुतम्, तत्सर्वभूताकाशपरमेव। अतएव 'आका-
शोहवै नाम नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्मे' ति वाक्यान्तरे त-
स्मिन् ब्रह्मपदंश्रूयतइति। एवं प्राप्ते सिद्धांतः— अयमाकाशोभूताकाशाद-
न्यः परमात्मैव, भूताकाशासंभावितसर्वभूतकारणत्वश्रवणात्, तद्धिसर्वप्रा-
णिवर्गकारणत्वं, 'यतोवा इमानि भूतानिजायंते येन जातानि जीवंती'ति
लक्षणवाक्यार्थैकरूप्यात्। न च भूताकाशस्य अचेतनवर्गकारणत्वसंभवेपि
चेतनकारणत्वमुपपद्यते॥ न च परायणत्वं चेतनानां परमप्राप्यत्वमचेतन-

स्यं अपुरुपार्थस्य हेयस्य भूताकाशस्य घटते । न वा सर्वतोज्यायस्त्वं, तद्धिकल्याणगुणैस्सर्वेभ्योनिरतिशयोत्कृष्टत्वं, न च जगत्कारणविशेषाकांक्षायामाकाशशब्देन विशेपसमर्पणात् इदं सर्वं भूताकाशएव यथाकथञ्चिद्युक्तम्यमिति वाच्यं । 'सर्वाणि ह वे'ति वाक्येन ह्यत्र कारणत्वं न विधीयते, हवैशब्देन प्रसिद्ध्यर्थकेन वाक्यांतरप्रसिद्धार्थानुवादत्वद्योतनात्, अतः पुरोवादाकांक्षायां 'सन्मूलास्सोम्येमास्सर्वाः प्रजा' इत्यादिवाक्यमेव पुरोवादत्त्वेनावतिष्ठतइति तत्रेक्षितृत्वादिभिश्चेतनत्वेन सिद्धं सच्छब्दाभिधेयं कारणं वस्विह आकाशशब्देन परामृश्यतइति वक्तव्यत्वात्, 'आत्मनआकाशस्संभूत' इत्यत्र आत्मशब्दस्य शरीरप्रतिसंबंधिनि चेतने प्रसिद्धिप्राचुर्येण 'तस्यैपएव शारीरआत्मे' ति शारीरत्वश्रवणेन च चेतनपरत्वावश्यंभावात्, स्वस्मादेव आकाशउत्पन्नइत्यर्थानुपपत्त्या भूताकाशस्य सर्वभूतकारणत्वान्वयायोग्यत्वाच, न भूताकाशोयं, किंतु तदतिरिक्तं ब्रह्मैवेति तस्मिन्नेव आकाशशब्दस्य आसमन्तात्काशत इत्यादिरूपेण योगवृत्तिरास्थेया, पुरोवादानुसारेण अनुवादे रूढिभङ्गस्य अदोपत्वात्, योग्यार्थश्रुतिमूललिङ्गात् अयोग्यार्थपदरूढिभङ्गस्य गङ्गाघोपादौ दृष्टत्वाच्चेति ॥

सङ्ग्रहकारिकाः ॥

अव्यक्तं जीवो वा माभूज्जगतोऽस्य कारणमथापि ।
आकाशस्स्यादेव छान्दोग्ये स हि तथाऽऽम्नातः ॥
आत्मन आकाश इति स्वात्मन एवेत्यनन्यजनितोक्ता ।
प्रथमश्रुत्यनुसाराचत्रानन्दश्रुतिर्गौणी ।
मैवं छान्दोग्यश्रुतिरनुवादः खलु ह वै शब्दात् ।
सतु सत्कारणमेव प्रतिपन्नं सेवते पुरोवादात् ॥

इति आकाशाधिकरणम् ॥८॥

अत एव प्राणः ॥२४॥

छान्दोग्ये कस्यचिद्राज्ञः क्रतौ समागतस्य उषस्तेः प्रस्तावभक्तिदेवताप्रश्ने तामजानानेन प्रस्तोत्रा 'कतमा सा देवते' ति पृष्टस्य उषस्तेः 'प्राणइति होवाचे' ति उत्तरमुपक्रम्य श्रूयते 'सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशंति प्राणमभ्युज्जिहते सैषा देवता प्रस्तावमन्वायत्त' ति अतिदेशाधिकरणस्यास्य पूर्वाधिकरणवत् पूर्वोत्तरपक्षौ। प्राणश्रुतेः प्राणवायुरेव सर्वभूतलयोत्पत्तिकारणमिति प्राप्ते। ह वै शब्देन तदनुवाद्यत्वद्योतनात् पुरोवादानुसारेण योग्यतानुसारेण च प्राणवाय्वतिरिक्तः परमात्मैव सर्वभूतलयोत्पत्तिकारणभूतः प्राणइति। अतिदेशस्य तु सर्वस्य भूतजातस्य प्राणाधीन स्थितिप्रवृत्त्यादिदर्शनात् प्रसिद्धएव वायुः सर्वभूतलयोत्पत्तिकारणतामर्हति, साक्षाच्च बृहदारण्यके 'यदा वै पुरुषस्स्वपिति प्राणन्तर्हि वागप्येति प्राणश्चक्षुः प्राणं श्रोत्रं प्राणं मनः सयदा प्रबुध्यते प्राणादेवाऽथ पुनर्जायत' इति स्वापप्रबोधयोः प्राणवायुस्सर्वभूतलयोत्पत्तिस्थानमिति श्रवणाच्चेत्यधिकाऽऽशङ्कानिरासः प्रयोजनम्। तन्निरासस्तु चेतनवर्गं प्रति प्राणवायोः कारणत्वाऽयोगात्, आनंदवल्ल्यां चेतनविशेषोत्पन्नादाकाशादुत्पन्नत्वेन श्रुतस्य तस्य सर्वाचेतनकारणत्वायोगाच्च, न तस्य सर्वभूतलयोत्पत्तिस्थानत्वनिर्देशार्हता। अत एव बृहदारण्यकोक्तप्राणोऽपि परमात्मैवेति॥

सङ्ग्रहकारिका॥

एवं तस्यां प्राणवाक्यादनूक्तेः प्राणेपिस्यान्नैवतत्कारणत्वं।
प्राणाधीनं दृश्यतां देहमात्रं नैवं भूतं जीववर्गादिदृष्टम्॥

इति प्राणाधिकरणम्॥९॥

एवं केवलश्रुत्यवलम्बनपूर्वपक्षावान्तरपेटिकावृत्ता— अथ कारणत्वाक्षेपकलिङ्गानुगृहीतश्रुत्यवलम्बनमवान्तरपेटिकान्तरं प्रस्तूयते॥

ज्योतिश्चरणाभिधानात्॥२५॥

छन्दोभिधानान्नेति चेन्न तथा चेतोर्पणनिगमात्तथा हि दर्शनम् ॥२६॥

भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥२७॥

उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥२८॥

छन्दोगास्समामनन्ति । 'अथ यदतः परो दिवो ज्योतिर्दीप्यते । विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेपूत्तमेषु लोकेष्विदं वावतद्यदिदमस्मिन्नन्तःपुरुषे ज्योति' रिति । अत्र आकाशप्राणवाक्ययोः स वाय्वाकाशसर्वभूतकारणत्वश्रवणवत् इह सज्योतिष्कसर्वकार्यकारणत्वाश्रवणेन विरोधाभावात्, विरोधभावे श्रुत्यवलंबनायोगात्, प्रसिद्धमादित्याद्येव ज्योतिरस्त्विति आक्षेपेणोत्थानादवान्तरसङ्गतिः । ननु यदीहप्रसिद्धमादित्याद्येव ज्योतिरिति पूर्वपक्षः क्रियते, कस्तेन सिद्धान्तस्योपमर्दश्शङ्कितो भवति । न हि ज्योतिरिह जगत्कारणं श्रूयते, येनादित्याद्येव जगत्कारणं न ततोऽन्यज्जगत्कारणं ब्रह्मास्तीति सिद्धान्तोपमर्दश्शङ्कितस्स्यात् । अथोच्येत— निरतिशयदीप्तियोग इह श्रूयमाणः कारणत्वाक्षेपकं लिङ्गं, 'न तत्र सूर्यो भाति' 'तस्य भासा सर्वमिदं विभाती'ति प्रकरणे 'तथाक्षरात्संभवतीह विश्व'मिति निरतिशयदीप्तियुक्तवस्तुनः कारणत्वश्रवणादिति । यदि सूर्यचन्द्राद्यभिभावकं प्राकृततेजोरूपं मुण्डके श्रुतं, जगत्कारणं वस्त्विह निरतिशयदीप्तियुक्तज्योतिः ज्योतिश्शब्दार्थः पूर्वपक्षिणा गृह्यते, कथन्तर्हि आदित्यादिकमिह ज्योतिरिति पूर्वपक्षः क्रियते, नह्यादित्यादिरेव आदित्याद्यभिभावकज्योतिरित्येतद्घटते । उच्यते— 'न तत्र सूर्यो भाती' ति मन्त्रेण सूर्याद्यभिभावकत्वन्नोच्यते, किंतु सूर्याद्यभास्यत्वं, 'नतद्भासयते सूर्यो न शशांको न पावक' इति गीतावचनेनैव सूर्याद्यभास्यत्वञ्च सूर्यादेरपि संभवतीति पूर्वपक्ष्याशयः । इह ज्योतिः किमादित्यादि उत तदतिरिक्तं ब्रह्मेति प्रसिद्धिभूतचरणत्वाभ्यां संशये पूर्वपक्षः । आदित्याद्येव ज्योतिः, प्रसिद्ध्यतिलङ्घनायोगात्, 'इदं वा य तद्यदिदमस्मिन्नन्तः पुरुषे ज्योति'

रिति जाठरैक्योपदेशाच्च । प्राकृतज्योतिष्येवहि तत्साजात्याभिप्रायेण तदैक्योपदेशोघटते । नच 'विश्वतः पृष्ठेषु सर्वतः पृष्ठेष्वनुत्तमेषु लोकेष्वि' ति श्रुतसर्वोत्तरात्युत्तमलोकप्रसृमरदीप्तिमत्वमादित्यादेर्न घटत इति वाच्यं । विश्वतः पृथिवीलोकात् सर्वतोन्तरिक्षलोकाच्च उपरितनेष्वत्युत्तमेषु द्युलोके ष्वादित्यस्यापि रश्मिप्रसृतिसद्भावात्, तस्मान्निरतिशयदीप्तिरूपलिङ्गाक्षिप्तं जगत्कारणत्वमादित्यादिज्योतिष एवेति न ततोन्यज्जगत्कारणं ब्रह्म नामास्तीत्येवं प्राप्तेसिद्धांतः— ज्योतिरिह प्रसिद्धज्योतिरतिरिक्तं ब्रह्मैव, पूर्वत्र 'पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतंदिवी' ति सर्वभूतपादत्वाभिधानात् तस्य च प्रसिद्धज्योतिष्यसंभवात्, पूर्वत्र यस्य सर्वभूतपादत्वमभिहितं तदेवेह ज्योतिश्शब्देन परामृश्यतइति द्युसंबन्धप्रत्यभिज्ञानेनावगमात्। जाठरैक्योपदेशस्तु फलाय तदात्मकत्वानुसन्धानविधानार्थः । 'तदेतद्दृष्टञ्च श्रुतञ्चेत्युपासीत चक्षुष्यश्श्रुतो भवती' त्यग्रे तथा विधानदर्शनादिति न तेन तस्य प्राकृतज्योतिष्ट्वसिद्धिः । ननु पूर्वत्र 'गायत्री वा इदं सर्वं' मित्युपक्रम्य 'सैषा चतुष्पदे' ति तस्याश्चतुष्पदत्वमभिधाय 'तदेतदृचाभ्यनूक्तं तावानस्य महिमा— ततोज्यायांश्च पूरुषः पादोऽस्य सर्वाभूतानि त्रिपादस्यामृतन्दिवी' त्युक्तार्थे प्रमाणत्वेन अस्य मन्त्रस्योदाहृतत्वात् गायत्रीविषयोऽयं मन्त्रः, अतो नैतद्गतेन सर्वभूतपादत्वाभिधानेन तथाभूतपरमात्मसिद्धिरिति चेत् । मैवं— न गायत्रीशब्देन छन्दोमात्रमिहाभिधीयते, छन्दसस्सर्वभूतपादत्वासंभवात्, अपितु ब्रह्मणि गायत्रीसादृश्यानुसन्धानमिहफलायोपदिश्यते, अस्तिच 'पादोस्य सर्वाभूतानि त्रिपादस्यामृतंदिवी'ति चतुष्पादत्वेनाम्नातस्य ब्रह्मणश्चतुष्पदया गायत्र्या सादृश्यं, अस्ति हि चतुष्पदापि गायत्री । 'इन्द्रश्शचीपतिः । बलेन पीडितः । दुश्च्यवनो वृषा । समित्सु सा सहि'रिति तथा ह्यन्यत्रापि गायत्रीसादृश्यात् छन्दोऽभिधायि शब्दः अर्थान्तरे प्रयुज्यमानो दृश्यते । यथा संवर्गविद्यायां 'ते वा एते पञ्चान्ये पञ्चान्ये दश सन्त ' इत्यारभ्य ' सैषा विराडि' त्युक्तं, अत्र हि वायुस्सूर्यश्चन्द्रोऽग्निराप इत्येते पञ्च, प्राणो वाक्चक्षुश्श्रोत्रं मन

इत्येते पञ्च, इत्येतेषु दशसु संख्यासाम्यात् विराट् छन्दोरूपत्वमुक्तं, दशाक्षरं हि विराट्छन्दः। किञ्च भूतपृथिवीशरीरहृदयानि निर्दिश्य 'सैषा चतुष्पदे'ति भूतादिचतुष्टयपादत्वव्यपदेशादपि गायत्रीशब्दोक्तः परमात्मैव। छंदसस्तथात्वानुपपत्तेः। ननु अस्तु यत्किञ्चित्सर्वभूतपादं वस्तु पूर्वत्राभिहितं, तथापि न तस्येह प्रत्यभिज्ञानं, 'दिवि' 'दिव'इति निर्देशभेदादिति चेन्न। निर्देशभेदेऽपि अर्थविरोधाभावात्, वृक्षाग्रस्थिते श्येने वृक्षात्परश्श्येनइत्यपि व्यपदेशदर्शनात्, तस्मात् 'तावानस्य महिमे' ति मंत्रप्रत्यभिज्ञापितपुरुषसूक्तप्रतिपाद्यं 'आदित्यवर्ण तमसस्तु पार' इति निरतिशयदीप्तियुक्तदिव्यमङ्गळविग्रहवत्वेन तत्र प्रतिपन्नं यत्परमपुरुषाख्यं परं ब्रह्म तदेवात्र निरतिशयदीप्तियुक्तं ज्योतिरिति निर्दिश्यते। ननु, पुरुषसूक्तेनैव सकलचेतनाचेतनप्रपञ्चविलक्षणः तस्य सर्वस्यापि कारणभूतः परमपुरुषः परंब्रह्मेति सिद्ध्यतीति किमर्थोऽयमयोगव्यवच्छेदार्थः पादः। उच्यते– बहुषु श्रुत्यन्तरेषु प्राणाकाशज्योतिरिन्द्रादिशब्दैः कारणवस्तुनिर्देशे जाग्रति पुरुषसूक्तमात्रेण तत्प्रतिपाद्यं परमपुरुषो जगत्कारणं ब्रह्मेत्येतत् न दृढीभवतीति तद्दृढीकरणार्थ एवायमयोगव्यवच्छेदार्थो विचारः॥

संग्रहकारिका॥

परं ज्योतिस्साम्निश्रुतमुदरवह्न्यात्मकतया
परं ज्योतिष्टं च प्रथितमिह नः कारणगतम्।
अतो भानुर्लिङ्गाद्भवतु जगतां कारणमिति
प्रवास्या शङ्केयं पुरुषचरणोक्त्या विशदया॥

इति ज्योतिरधिकरणम्॥१०॥

प्राणस्तथानुगमात्॥२९॥

न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन्॥३०॥

शास्त्रदृष्ट्यातूपदेशो वामदेववत् ॥३१॥

जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् ॥ ३२ ॥

कौषीतकिनामुपनिषदि 'प्रतर्दनो हवै दैवोदासिरिन्द्रस्य प्रियं धामोपजगामे' त्युपक्रम्य 'वरं वृणीष्वे' त्युक्तवति इन्द्रे 'त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस' इति मनुष्याय मह्यं हिततमं वरं त्वमेव जानासि, अतस्तादृशं वरं त्वमेव विचिंत्य मह्यन्देहीति प्रतर्दनेन प्रार्थितस्येन्द्रस्य वचनं श्रूयते– 'सहोवाच प्राणोऽस्मि प्रज्ञात्मा तं मामायुरमृतमुपास्वे'ति । तत्र संशयः– किमिह हिततमोपासनकर्मभूतइन्द्रप्राणशब्दनिर्दिष्टः प्रसिद्धेन्द्रजीवः, उत तदतिरिक्तः परमात्मेति । तत्र पूर्वः पक्षः– 'प्राणाकाशवाक्ययोस्तत्तद्वाक्यएव प्राणाकाशश्रुतिविरोधिसर्वभूतकारणत्वश्रवणवत् ज्योतिर्वाक्ये प्राक् ज्योतिःश्रुतिविरोधिसर्वभूतपादत्वश्रवणवच्च नेह स्ववाक्ये ततः पूर्वं वा इन्द्रश्रुतिविरोधिश्रवणमस्ति, प्रत्युत इन्द्रवाक्योपक्रमएव इंद्रस्य हिततमशब्दोक्तामृतत्वप्राप्त्युपायोपासनाकर्मत्वश्रवणमस्ति, तथाभूतोपासनाकर्मत्वञ्च जगत्कारणत्वव्याप्तं लिंगमिति 'तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ संपत्स्य' इति सद्विद्यावाक्यावगतं, तस्मादिन्द्राख्यो जीवविशेषएव जगत्कारणं, न तदतिरिक्तः परमात्माऽस्ती'ति । एवं प्राप्ते सिद्धांतः– अयमिन्द्रप्राणशब्दनिर्दिष्टो न जीवमात्रं, अपितु जीवादर्थान्तरभूतं ब्रह्म 'सएष प्राणएव प्रज्ञाऽऽत्माऽऽनंदोऽजरोऽमृत'इति इन्द्रप्राणशब्दाभ्यां प्रस्तुतस्य सकलजीवासंभावितधर्मनिर्देशात् । ननु उपक्रमे 'मामेव विजानीहीं' ति इन्द्रस्सावधारणं स्वात्मानमेव उपास्यमुपदिदेश, तदुपपत्त्यर्थं 'त्वाष्ट्रमहनं अरुन्मुखान्यतीन् सालावृकेभ्यः प्रायच्छं बहीस्सन्धाअतिक्रम्य दिवि प्राह्लादीनतृणहं अन्तरिक्षे पौलोमान् पृथिव्यां कालकञ्जान् तस्य मे न लोमच मीयत'इति त्वाष्ट्रवधादिभिरकृत्यैः स्वस्य लोमाऽपि नहिंस्यत इति महामहिमवत्त्वेन स्वात्मानं तुष्टाव । तस्मादुपक्रमे जीवविशेष उपास्य इति निर्णये सति तदनुसारेण औपसंहारिकं आनन्दाजरामृतत्वश्रवणं स्तावकतया

नेतव्यमितिचेत् मैवं । सकलजीवासंभाविताध्यात्मसंबन्धभूयस्त्वं हि अस्मिन् प्रकरणे दृश्यते । तथाहि– प्रथमं 'त्वमेव वरं वृणीष्व यं त्वं मनुष्याय हिततमं मन्यस' इति पृष्टवन्तं प्रति 'मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये यन्मां विजानीया' दिति परमात्मासाधारणमोक्षसाधनोपासनकर्मत्वं इन्द्रप्राणशब्दनिर्दिष्टस्योच्यते, तदुपपादकश्च पुष्करपलाशवाक्यप्रतिपन्नं सर्वपापाश्लेषफलमुपवर्ण्यते 'सयोमां विजानीयात् नास्य केन च कर्मणा लोको मीयते न मातृवधेन न पितृवधेन न स्तेयेन न भ्रूणहत्यये' ति । अथापि स्यात् इन्द्रस्यैव एवंभूतफलप्रदानसामर्थ्यमस्त्विति हि पूर्वपक्षः क्रियते– 'इन्द्रोराजा जगतोय ईशे इन्द्रोराजा जगतश्चर्षणीनां । इन्द्रोयातोवसितस्य राजा न त्वावामन्यो दिव्यो नपार्थिवो नजातोनजनिष्यत' इत्यादिषु महामहिमत्वञ्च तस्य श्रूयते, का तस्यामृतत्वसाधनोपासनाकर्मत्वानुपपत्तिरिति । तथाऽपि 'तद्यथा रथस्यारेषु नेमिरर्पिता नाभावरावर्पिताएवमेवैताभूतमात्राः प्रज्ञामात्रास्वर्पिताः प्रज्ञामात्राःप्राणेऽर्पिता' इति भूतमात्राशब्दोदितानामचेतनानां प्रज्ञामात्राशब्दोदितेषु चेतनेषु प्रतिष्ठितत्वमभिधाय यत्तेषामपि प्राणे प्रतिष्ठितत्वमभिधीयते तत् 'प्राणोऽस्मी'त्यादेः प्रसिद्धेन्द्रातिरिक्तपरमात्मविषयतामन्तरेण नोपपद्यते । न हि देवताऽधिकरणन्यायेन मुक्त्यर्थीन्द्रः कश्चिदुपासनेन अप्रसाद्य स्वयं मुक्तिं लभेत, अतः प्रसिद्धेन्द्रातिरिक्तपरमात्मोपासनमेव इन्द्रेण 'मामुपास्वे'त्युपदिष्टं, तेन स्वक्रियमाणमुक्त्यर्थोपासनावान्तरफलभूतः सर्वपापाश्लेषः 'त्रिशीर्षाण' मित्यादिनोपन्यस्त इत्येव श्लिष्टतरं । एवञ्च 'सन साधुना कर्मणा भूयान्नोएवासाधुना कनीयान् एषह्येव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषति एष उएवासाधु कर्म कारयति तं यमधो निनीषते एषलोकाधिपतिरेष लोकपाल एष लोकेश' इति मध्यगतान्यपि सकलजीवासंभावितसाध्वसाधुकर्मप्रयुक्त भूयस्त्वकनीयस्त्वराहित्यादिवचनानि सङ्गच्छंते । तस्मान्मामुपास्वेति उपासनकर्मतया उपदिष्टः इन्द्रजीवातिरिक्तः परमात्मैव । कथन्तर्हीन्द्रेण मामुपास्वेत्युपदिष्टं 'एष सर्वभूतान्तरात्मा अपह-

तपाप्मा दिव्यो देव एको नारायण' इत्यादिशास्त्रदृष्ट्या स्वान्तर्यामिण उपास्यत्वाभिप्रायेण, यथाऽहमादिपदानां तत्तच्छरीरकपरमात्मपर्यंतत्वं जानता वामदेवेन स्वांतर्यामिणः स्वात्म्याभिप्रायेण अहं मनुसूर्यादिसर्वात्मभाव उपदिष्टः। तथाहि श्रूयते— 'तद्धैतत्पश्यन् ऋषिर्वामदेवः प्रतिपेदे अहं मनुरभवं सूर्यश्चे' त्यादि। ननु कथमिह अध्यात्मसंबन्धभूयस्त्वं, 'न वाचं विजिज्ञासीत वक्तारं विद्यात्, त्रिशीर्षाणं त्वाष्ट्रमहनं, यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायु' रित्यादिजीवमुख्यप्राणलिंगानामत्र सत्त्वादिति चेत् उच्यते— परमात्मन एव त्रिविधमिहोपासनं विवक्षितं। तत्र 'आनंदोऽजरोऽमृत' इति स्वरूपेणोपासनं, जीवलिंगवाक्यैः चिद्विशिष्टतयोपासनं, मुख्यप्राणलिंगैरचिद्विशिष्टतयोपासनञ्चेति। अन्यत्रापि त्रिविधमुपासनं दृश्यते, यथा आनन्दवल्ल्यां— 'सत्यं ज्ञानमनंतं ब्रह्मे' त्यादौ स्वरूपेणोपासनं 'तत्सृष्ट्वा तदेवानुप्राविशत् तदनुप्रविश्य सच्चत्यच्चाभवत् निरुक्तञ्चानिरुक्तञ्च निलयनञ्चानिलयनञ्च विज्ञानञ्चाविज्ञानञ्चे' त्यादिषु चेतनविशिष्टत्वेन अचेतनविशिष्टत्वेन चोपासनं, एवमिहापि परमात्मनस्त्रिविधोपासनसमाश्रयणमुपपद्यत इति सर्वमनवद्यम्।

संग्रहकारिका।

स्यादिंद्रस्त्विहकारणं हिततमोपास्यैककर्मत्वतो
नैतत्साध्वजरामृताद्यनुगमादग्रे तदुक्त्यात्मकात्।
इन्द्रस्य स्वशरीरकेश्वरदृशा मामित्युपास्यास्पदे
निर्देशो घटते ततोऽस्य चिदचिद्भिन्नं परं कारणम्॥

इति इन्द्रप्राणाधिकरणम्॥११॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य

प्रथमः पादः॥

प्रथमे पादे समस्तचिदचिद्विलक्षणश्रीपुरुषोत्तमाख्यवेदान्तवेद्यजगत्कारणास्तित्वं प्रसाधितं, तथाऽपि कानिचिद्वेदान्तवाक्यानि चिदचिदन्तर्भूतवस्तुविशेषप्रतिपादकानि दृश्यंत इत्याशङ्कानिरासः क्रियते । किञ्च जन्मादिसूत्रे ब्रह्म कारणमेव ब्रह्मैव कारणमिति अयोगान्ययोगव्यवच्छेदौ लक्षणस्य असम्भवातिव्याप्तिपरिहाराय विवक्षितौ, तत्र अयोगव्यवच्छेदः प्रथमपादेन सिद्धः, अन्ययोगव्यवच्छेदार्थस्त्रिपाद्यारम्भइति च विभागः । तत्र स्पष्टतरजीवलिङ्गकानि वाक्यानि प्रथमे पादे विचारितानि, अस्पष्टजीवलिंगकानि द्वितीये विचार्यन्ते, स्पष्टजीवलिङ्गकानि तृतीये, प्रधानादिप्रतिपादनच्छायानुसारीणि चतुर्थ इति प्रायिकोऽयं पादार्थविभागः ॥

सर्वत्र प्रसिद्धोपदेशात् ॥१॥

विवक्षितगुणोपपत्तेश्च ॥२॥

अनुपपत्तेस्तु न शारीरः ॥३॥

कर्मकर्तृव्यपदेशाच्च ॥४॥

शब्दविशेषात् ॥५॥

स्मृतेश्च ॥६॥

अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न
निचाय्यत्वादेवं व्योमवच्च ॥७॥

संभोगप्राप्तिरिति चेन्न वैशेष्यात् ॥८॥

छन्दोगास्समामनंति– 'सर्वं खल्विदं ब्रह्म तज्जलानिति शांतउपासीत अथ खलु क्रतुमयः पुरुषो यथाक्रतुरस्मिन् लोके पुरुषो भवति तथेतः प्रेत्य भवति सक्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूपः सत्यसङ्कल्प ' इत्यादि । अत्र 'सर्वं खल्विदं ब्रह्म तज्जलानिति शांतउपासीते' त्यनेन सर्वात्मकं ब्रह्म शांतस्सन्नुपासीतेति विधीयते, 'सक्रतुं कुर्वीते' ति तस्यैवोपासनस्य मनोमयत्वाद्यग्रिमगुणविधानार्थोऽनुवादः ।ननु उत्पत्तिशिष्टसार्वा-

त्म्यगुणावरुद्धे कथं मनोमयत्वादिगुणांतरविधानं घटते । अथोच्येत—'सर्वं खल्विदं ब्रह्म तज्जलानि' त्यंतं भिन्नं वाक्यं, सर्वशब्दयोगेन 'सर्वं खल्वि' त्यस्य 'शान्तउपासीते' त्येतदेकवाक्यत्वनिवारणादिति । नैतद्युक्तं । तथाऽपि 'शान्तउपासीते'त्यत्र अन्यार्थसन्निहितस्य ब्रह्मण उपास्यत्वेनैव तथाभूतस्य सार्वात्म्यस्यापि उपास्यगुणत्वेन अन्वयानिवारणात् , शतपथे अग्निरहस्यब्राह्मणे 'सत्यं ब्रह्मेत्युपासीते' ति शाण्डिल्यविद्याविधौ उपास्यब्रह्मणः सत्यत्वविशेषणश्रवणेन अत्रापि तदैकार्थ्येन तादात्म्यगुणविधानौचित्याच्च ॥

उभयोरैकार्थ्यञ्च 'सच्चत्यच्चाभव' दिति श्रुत्यनुसारेण सत्यशब्दस्य परोक्षापरोक्षात्मकसकलवस्त्वात्मकत्वपरतया सूपपादं । एवञ्च कथं सार्वात्म्यगुणावरुद्धे मनोमयत्वादिगुणान्तरविधानमिति चेत् उच्यते—उत्पत्तिशिष्टो गुणः स्वविरोधिनमेवोत्पन्नशिष्टं न सहते, न तु गुणांतरमात्रं । न हि सोमद्रव्यमुत्पत्तिशिष्टमिति द्रव्यांतरमिव देवतादिगुणांतरमपि प्रतिक्षिपति । ननु तथाऽपि उपास्यब्रह्मगुणतया मनोमयत्वादिविधानमित्येतन्न युज्यते, 'सक्रतुं कुर्वीत मनोमयः प्राणशरीर' इत्यादिसामानाधिकरण्येन मनोमयत्वादीनामुपासकविशेषणत्वप्रतीतेरितिचेत् , उच्यते—अग्निरहस्ये समानप्रकरणे मनोमयत्वादिकमुपास्यविशेषणमाम्नायते । तत्रहि 'सर्वं खल्विदं ब्रह्म तज्जलानिति शांतउपासीते' तिस्थाने सत्यत्वविशिष्टब्रह्मोपासनां विधाय 'अथ खलु क्रतुमयोऽयं पुरुषः सयावत्क्रतुरयं अस्माल्लोकात्प्रैति एवंक्रतुर्हिामुं लोकं प्रेत्याभिसंभवती' ति तत्क्रतुन्यायप्रदर्शनपूर्वकं 'सआत्मानमुपासीत मनोमयं प्राणशरीरं भारूपमाकाशात्मानं कामरूपिणं मनोजवसं, सत्यसङ्कल्पं सत्यधृतिं सर्वगन्धं सर्वरसं सर्वा अनुदिशः प्रभूतं सर्वमिदमभ्यात्तमवाकमनादर' मिति मनोमयत्वादीनामुपास्यविशेषणत्वं स्पष्टमाम्नातं । ननु तदनुसारेणाप्यत्र प्रथमांतानां मनोमयादिपदानां 'क्रतुं कुर्वीते' त्यत्र कथमुपास्यगुणसमर्पकतया अन्वय उपपादनीयः, प्रथमांतानां षष्ठ्यन्ततया विपरिणामेनोपपादनीयः । यद्वा 'क्रतुं कुर्वीते' त्यनूदितसर्वात्मब्रह्मोपासनां प्रति प्रकारसमर्पको 'मनोमयः प्राणशरीर' इत्यादिः

'एतमितः प्रेत्याभिसम्भवितास्मी'त्यन्तः, तदनंतरमितिकरणबलात् । अनेन प्रकारेण क्रतुं कुर्वीतेत्यन्वयप्रतीतेः, तथाऽन्वये सत्येव 'एषमआत्माऽन्तर्हृदय' इति वाक्यसामञ्जस्याच्च । तस्योपासनाप्रकाराभिनयपरत्वं विना स्वतंत्रश्रुतिवाक्यत्वे 'म'इत्यस्यान्वयसामञ्जस्याभावात्, तथासत्येवच 'एषमआत्माऽन्तर्हृदय' इति वाक्यानां त्रिःपाठस्य 'सर्वकर्मा सर्वकाम' इत्यादीनां द्विःपाठस्यचोपपत्तेः । तथासति हि 'प्रायणीयं प्रथममहः चतुर्विंशं द्वितीयं चत्वारोऽभिप्लवाष्पडहाः एकः पृष्ठ्यष्पडहः समासः सद्वितीयः सतृतीयः सचतुर्थः सपंचमः त्रयोऽभिप्लवाष्पडहाएकः पृष्ठ्यष्पडह' इत्यादौ गवामयनसत्रगताहःक्लृप्तिवाक्ये अभिप्लवपडहादिशब्दानां असकृत्पाठस्य तत्रतत्रस्थाने षडहाद्यनुष्ठानाभ्यासार्थत्वेनेव तत्रतत्रस्थाने हृदयांतर्वर्तित्वानुसन्धानाभ्यासार्थत्वेन असकृत्पाठः साफल्यमश्नुते, तेषां वाक्यानामुपास्ये तत्तद्धर्मसद्भावमात्रबोधकश्रुतिवाक्यत्वे तद्वैफल्यं स्यात् । एवंच विहितोपासनानुवादेन मनोमयत्वाद्यनेकगुणविधाने वाक्यभेद इत्यपि शङ्का निरस्ता भवति । तेषामितिकरणोक्तेन प्रकारभावेनैकेन रूपेण विधेयत्वात्, विधेयताऽवच्छेदकरूपैक्ये विधेयपदार्थभूतरूपांतरभेदेन वाक्यभेदाप्रसङ्गात् । अतएव 'गौश्चाश्वश्चाश्वतरश्च गर्दभश्चाजाश्चावयश्च व्रीहियवाश्च तिलाश्च मापाश्च तस्य द्वादशशतं दक्षिणे' ति ज्योतिष्टोमदक्षिणाविधिवाक्ये गवादीनां रूपभेदे सत्यपि तेषां दक्षिणात्वेनैकेन रूपेण विधेयत्वान्नवाक्यभेदइति गवात्मकैकदक्षिणाविधानाङ्गीकारेण वाक्यभेदः परिहृतः । यद्वा श्रुतावितिशब्दः क्रमरूपं मनोमयत्वादीनां प्रकारमाचष्टे-मनोमयत्वाद्यनुसन्धानक्रमेण क्रतुं कुर्वीतेति । तथा च विततिरूप एकः क्रम एवात्र विधेय इति न वाक्यभेदः, मनोमयत्वादीनामुपास्यगुणानां विधानं तु तत्क्रमविधानादाक्षेपतो लभ्यते, यथा 'विश्वजित्सर्वपृष्ठोऽतिरात्र' इत्यत्र पृष्ठगतसर्वताविधानात् पृष्ठसाम्नां रथन्तरादीनामित्यलं प्रपञ्चेन । एवं 'उपासीते' त्यन्ते वाक्ये सर्वात्मकब्रह्मोपासनाविधिः, क्रतुवाक्ये मनोमयत्वाद्युपास्यगुणविधिरिति स्थिते संशयः । किमिह ब्रह्मशब्देन उपास्य-

तया निर्दिष्टो जीवः, उत परंब्रह्मेति, तत्र जीव इति पूर्वपक्षः । तस्यैव सर्वपदसामानाधिकरण्यनिर्देशोपपत्तेः, सर्वपदनिर्दिष्टं हि ब्रह्मादिस्तंबपर्यंतं जगत्, ब्रह्मादिभावश्च जीवस्यैव अनादिकर्मप्रवाहविपाकानुसारिणा जन्म-भेदेनोपपद्यते, परस्य तु ब्रह्मणः समस्तमङ्गळगुणाकरस्य निरस्तसमस्तहेय-सम्बन्धस्य अतिहेयसर्वभावो नोपपद्यते । न च परिच्छिन्ने जीवे ब्रह्मश-ब्दायोगः, इदं ब्रह्मागच्छतीति श्रुत्यन्तरे तत्रापि तत्प्रयोगात्, तद्व्यावर्त-नार्थं परमात्मनि परंब्रह्मेति तत्र तत्र सविशेषनिर्देशदर्शनाच्च । जीवस्य च निर्मुक्तसंसारोपाधेः मुक्तिदशायां धर्मज्ञानविकासेन बृहत्त्वञ्चास्तीति तदीय-कर्मनिमित्तत्वाज्जगज्जन्मस्थितिलयानां 'तज्जलानि'ति हेतुनिर्देशोऽप्युपपद्य-ते । तस्माज्जीव एव अत्र उपास्यतया निर्दिष्टं ब्रह्मेति । एवं प्राप्ते सिद्धांतः— 'सर्वं खल्विद'मिति निर्दिष्टे सर्वस्मिन् जगति तदात्मतया विधीयमानं ब्रह्म परमेव ब्रह्म । न जीवः । जगज्जन्मादिहेतुकतादात्म्यस्य प्रसिद्धत्वेनो-पदेशात् । ब्रह्मणो जातत्वात् ब्रह्मणि लयवत्त्वात् ब्रह्माधीनजीवनत्वाच्च हेतोः ब्रह्मात्मकं खलु सर्वमिदं जगदित्युक्ते हि यस्माज्जगज्जन्मस्थितिलया वेदान्तेषु प्रसिद्धाः तदत्र ब्रह्मेति प्रतीयते । तच्च परमेव ब्रह्म, 'यतोवा इमानि भूतानि जायन्त' इत्यादिश्रुतेः । ततश्च ब्रह्माधीनजन्मजीवनलयस्य स्थूल-चिदचिद्वस्तुरूपस्य सर्वस्य जगतः तदपृथक्सिध्या तच्छरीरत्वेन तदात्म-भूतत्वलक्षणं तत्तादात्म्यं तस्य सकलहेयप्रत्यनीककल्याणगुणाकरत्वेन न विरुध्यते, प्रकारभूतशरीरगतदोषाणां प्रकारिण्यात्मन्यप्रसङ्गात् । जीवस्य तु सर्वतादात्म्यनिर्देशो नोपपद्यते । तस्य प्रतिशरीरं भिन्नस्य अन्योन्यतादा-त्म्यासम्भवात् । तस्मादिह ब्रह्मशब्देन निर्दिष्टं परमेव ब्रह्म । नन्वेवं सति कथं 'मनोमयः प्राणशरीर' इत्यनयोरुपास्यगुणतया ब्रह्मण्यन्वयः, मनःप्रा-णयोरुपकरणोपकरणिभावेन जीवसम्बन्धस्यैव सुप्रसिद्धत्वादितिचेत् उच्यते-सांसारिकमनःप्राणसम्बन्धोऽत्र नार्थत्वेन ग्रहीतुं योग्यः, तस्य हेयस्य मुक्ति दशायां त्यक्तव्यस्य अनुपदोक्ततत्क्रतुन्यायविरोधेन उपास्यगुणत्वायोगात् । तस्मान्मुक्तिदशाविकसितधर्मज्ञानरूपविशुद्धमनोग्राह्यत्वं मनोमयत्वं, सर्वप्रा-

णिप्राणधारकत्वं प्राणशरीरत्वं, निरतिशयदीप्तियुक्तदिव्यमङ्गळविग्रहवत्त्वं भारूपत्वमित्यादिर्भाष्योक्तएव तेषामर्थो ग्राह्यः । एवं च एवंरूपा मनोमयत्वादयो जीव एव नोपपद्यन्ते । तथा 'एतमितःप्रेत्य अभिसम्भविताऽस्मी'ति प्रकृतस्य ब्रह्मणः उपासकप्राप्यतया निर्देशः, 'एष म आत्माऽन्तर्हृदय'इति षष्ठीनिर्दिष्टादुपासकात् प्रथमान्तेन तस्य व्यतिरेकनिर्देशश्च, 'ईश्वरस्सर्वभूतानां हृद्देशेऽर्जुन तिष्ठती'त्यादिस्मृतिश्च, हृदयदेशस्थितमुपास्यं ब्रह्म जीव इति पक्षे नोपपद्यते । ननु ब्रह्मेति पक्षेऽपि 'एष म आत्माऽन्तर्हृदयेऽणीयान् व्रीहेर्वा यवाद्वे'ति अल्पौकस्त्वाणीयस्त्वव्यपदेशो नोपपद्यते । मैवं, ध्यानार्थमणीयस्त्वमुपदिश्यते, न पुनरणीयस्त्वमेवास्य स्वरूपमिति । व्योमवच्चैष व्यपदेशो द्रष्टव्यः । अतएव 'ज्यायान् पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान् दिवो ज्यायानेभ्यो लोकेभ्य'इति तस्य स्वाभाविकं महत्त्वमपि श्रूयते । एवं च यस्योपाध्यनुक्त्या स्वाभाविकं महत्त्वमवगतम्, तस्योपाध्युक्तिपूर्वकमुच्यमानं परिच्छिन्नत्वमेवौपाधिकमिति एवमौचित्यात् । इह अल्पत्वोपाधेः हृदयायतनत्वस्येव ज्यायस्त्वोपाधेरश्रवणात् उपासनार्थमौपाधिकमणीयस्त्वं स्वाभाविकं ज्यायस्त्वञ्च विवक्षितमिति न कश्चिद्विरोधः । एवं तर्हि जीवस्येव परस्यापि शरीरान्तर्वर्तिचेतनत्वाविशेषात तत्प्रयुक्तसुखदुःखभोगः प्राप्नुयादिति चेन्न । हेतुविशेषात्, न हि शरीरान्तर्वर्तिचेतनत्वमात्रं सुखदुःखभोगहेतुः, अपि तु कर्मपारवश्यमपि, तत्त्वपहतपाप्मनः परमात्मनो न शक्यशङ्कं, तस्मादिहोपास्यं ब्रह्म परमेव ब्रह्मेति सिद्धम् ॥

सङ्ग्रहकारिकाः ॥

सर्वं खल्वित्यत्र सार्वात्म्यमुक्तं हेयं यस्य ब्रह्म तज्जीव एव ।
पर्यायेणानादिसंसारभाजस्तस्यैतद्युज्यते नो परस्य ॥
मैवं खलुप्रयोगाद्धि प्रसिद्धवदनूद्यते ।
सार्वात्म्यं कारणत्वोत्थं तच्च ब्रह्मणि विश्रुतम् ॥

येऽन्ये मनोमयत्वाद्या वाक्यशेषश्रुता गुणाः ।
ब्रह्मण्येव च ते सर्वे युज्यन्ते न तु भोक्तरि ॥
इति सर्वत्रप्रसिद्ध्यधिकरणम् ॥१॥

अत्ता चराचरग्रहणात् ॥९॥

प्रकरणाच्च ॥१०॥

गुहांप्रविष्टावात्मानौ हि तद्दर्शनात् ॥११॥

विशेषणाच्च ॥१२॥

कठवल्लीपु श्रूयते— 'यस्य ब्रह्म च क्षत्रञ्चोभे भवत ओदनः । मृत्युर्यस्योपसेचनं क इत्थावेद यत्र स' इति। अस्य यस्मिन् प्रकारे स्थितः यत्प्रकारविशिष्टः तं प्रकारं को वेदेत्यर्थः । अत्र ओदनोपसेचनसम्बन्धात् यस्येति पष्ठीनिर्दिष्टः तयोरत्ता प्रतीयते, स किं जीवः, उत परमात्मेति अत्तृत्वस्य कर्मफलभोक्तृत्वजगदुपसंहर्तृत्वान्यतररूपत्वानिर्द्धारणात् संशये पूर्वपक्षः— ओदनोपसेचनसम्बन्धात् अत्ता भोक्तैव । न च मृत्योरुपसंहारकारिणः उपसेचनत्वरूपणात् अत्ता संहर्ता प्रतीयत इति वाच्यम् । जीवस्य नित्यत्वेन मृत्युवश्यत्वाभावात् मृत्युर्जीवस्य विधेयप्राय इत्याशयेन मृत्यूपसेचनवादोपपत्तेरिति । सिद्धान्तस्तु— मृत्यूपसेचनवादो मृत्योरबाधकत्वाभिप्रायो न वक्तुं युक्तः, उपसेचनशब्दस्य गौणत्वेऽपि स्वयमद्यमानत्वे सत्यन्यादनहेतुत्वेन विशेषाकारेण गौणत्वे सम्भवति अबाधकत्वरूपेण गौणत्वायोगात् । न हि 'सिंहो देवदत्त' इत्यत्र शौर्यादिविशेषाकारेणेव द्रव्यत्वादिसामान्याकारेण सिंहशब्दस्य गौणत्वमिष्यते । अत एव पूर्वतंत्रेऽपि 'उद्गातृचमसमेकस्य श्रुतिसंयोगा' दित्यधिकरणे 'प्रैतुहोतुश्चमसः प्रब्रह्मणः प्रोद्गातृणां प्रयजमानस्ये' ति अध्वर्युप्रैषगतस्य उद्गातृपदस्य बहुवचनानुसारेण अजहल्लक्षणया बहुपु वृत्तौ वक्तव्यायां उद्गातृगणमात्रवृत्तिर्विशेषाकारस्तन्निमित्तं, न तु पोडशर्त्विक्साधारणः सामान्याकार इति निरूपितम् । एवं च यथौदनो येन दधिपयःप्रभृतिना तद्भोजनायोपसिच्यते तस्याप्यदनीयता,

एवमोदनस्थानीयं ब्रह्मक्षत्रशब्दितं येन मृत्युनोपसिच्यमानमदनीयं प्रतीयते, तस्यापि मृत्योस्तेन सहादनीयताप्रतीतेः, मृत्युना सह जगददनस्य प्रळय एव भावात्, प्रळये च सर्वस्य चराचरस्य संहारात्, समस्तं चराचरवृन्दं ब्रह्मक्षत्रशब्दलक्षितमवसीयते। न च समस्तस्य चराचरस्य मुख्यमदनं सम्भवतीति ओदनशब्दस्य विनाश्यत्वे लक्षणाऽवसीयते, यद्यपि विनाश्यत्वं भोज्यत्वभोग्यत्वापेक्षया सामान्याकारः, तथाऽपि सर्वस्य चराचरस्य ब्रह्मक्षत्रमात्रस्य वा कञ्चित्प्रत्योदनवत् भोज्यत्वाभावात् स्त्रीभृत्यादिवत् भोग्यत्वाभावाच्च समभिव्याहृतपदान्तरसामर्थ्यप्राप्तं विनाश्यत्वरूपसाधारणाकारनिमित्तत्वं न्यायप्राप्तत्वादुररीकरणीयम्। अतएव 'इमां स्पृष्ट्वोद्गायेत् इमां हि विश्वभूतान्युपजीवन्ती' त्यत्र विश्वभूतोपजीव्यत्वसमभिव्याहारप्राप्तं भूमिपरत्वं इमामित्यस्येष्यते, न तु सन्निहितौदुंबरीपरत्वं, एवं सिद्धे सकलचराचरसंहर्तृत्वे परमात्मलिंगे तेनात्ता परमात्मैव। 'महान्तं विभुमात्मानं मत्वा धीरो न शोचती' त्यादिना प्रकृतस्य परमात्मनो 'यत्रस' इति तत्पदेन परामर्शादप्येवमवसीयते। अथ स्यात् 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये। छायाऽऽतपौ ब्रह्मविदो वदंति पञ्चाग्नयो ये च त्रिणाचिकेता' इत्यनन्तरमन्त्रे ऋतपानशब्दितकर्मफलभोक्तृत्वाभिधानात्, तस्य च जीवलिङ्गतया पूर्वाधिकरणे समर्थितत्वात्, तयोरेकस्तावत् ऋतपानकर्ता जीवः, तस्य द्वितीयोऽपि बुद्धिप्राणयोरन्यतरः, कर्मफलभोगोपकरणत्वेन ऋतपानसम्बन्धित्वात्, अतः पूर्वप्रस्तुतोऽत्तापि तदेकप्रकरणत्वाज्जीवएवावसीयत इति चेत् उच्यते—

न प्राणजीवौ बुद्धिजीवौ वा 'गुहां प्रविष्टौ' 'ऋतंपिबन्तावि' ति चोच्यन्ते, अपितु जीवपरमात्मानौ हि तथोच्येते, तस्मिन् प्रकरणे जीवपरयोरेव गुहाप्रवेशव्यपदेशदर्शनात्, 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती' ति परस्य गुहाप्रवेशव्यपदेशो दृश्यते, 'या प्राणेन संभवत्यदितिर्देवतामयी। गुहां प्रविश्य तिष्ठंती या भूतेभिर्व्यजायते' ति जीवस्य। अत्र क-

र्मफलान्यत्तीति यौगिकेनादितिशब्देन जीव उच्यते, नतु देवमाता पृथिवी वा, तयोरस्मदादिहृदयगुहाप्रवेशाभावात् । 'प्राणेनसंभवति' सह वर्तते । देवतामयी । देवताशब्दादिंद्रियवाचिनः स्वार्थे मयट्प्रत्यय इति इन्द्रियाधीनभोगा । हृदयगुहांप्रविश्यतिष्ठंतीति-पृथिव्यादिभूतैः सहिता देवादिरूपेण विविधा जायत इति । एवञ्च 'ऋतंपिबंता' विति व्यपदेशः छत्रिन्यायेन अजहल्लक्षणया योज्यः । यद्वा– स्वतंत्रप्रयोजकोभयसाधारणकर्तृत्वसामान्यपरः शतृप्रत्यय इति जीवपरयोरुभयोरपि मुख्यतयैव योज्यः, बुद्धिप्राणयोरुपकरणयोः कर्त्रर्थे प्रत्ययो हि 'चक्षूरूपग्राहक' मितिवत् कर्तृत्वोपचारादिति समर्थनीयं स्यात् । न च 'सुकृतस्य लोक' इत्यस्य कर्मफलभोगार्थमुपात्तस्य परमात्मद्वितीयपक्षेऽनुपपत्तिः, भोक्तुरिव भोजयितुरपि भोगस्थाने सन्निधानस्य वक्तव्यत्वात् । न च जीवपरयोः प्रकाशरूपत्वात् छायातपत्वनिर्देशानुपपत्तिः, अज्ञत्वसर्वज्ञत्ववैलक्षण्येन तदुपपत्तेः, 'ज्ञाज्ञौ द्वावजावीशनीशा'वित्यादिश्रुतेः, हृदयगुहां प्रविष्टौ बुद्धिजीवाविति युक्तम्, 'आत्मानं रथिनं विद्धि शरीरं रथमेवच । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव चे' त्यत्रैवप्रकरणे जीवस्य रथित्वेन बुद्धेः सारथित्वेन च शरीराकाररथारूढत्ववर्णनात् । जीवपराविति तु न युक्तं, 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद' मिति तयोः प्राप्तृप्राप्यभावनिर्देशात् प्राप्यस्य रथ एव प्राप्तत्वे कस्य प्राप्तये रथारोहः कल्प्यत इति चेत् । उच्यते– गुहां प्रविष्टौ जीवपराविति युक्तं, 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणं । अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती' त्यादिपूर्वापरमंत्रेषु तयोरेव उपास्योपासकभावेन प्राप्यप्रापकभावेनच तयोरेव विशेष्यमाणत्वात् । रथिरथसारथ्यादिरूपणन्तु उपासनोपयोगिशरीरादिवशीकरणसिद्ध्यर्थं, 'यस्तु विज्ञानवान्भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वाइव सारथे' रित्यादिमंत्रांतराम्नानात् । न तु परमपदप्राप्त्यर्थं, तावत्पर्यन्तं प्राकृतशरीरेंद्रियविषयादिगमनाभावात् । सर्वगेतदानुमानिकाधिकरणे स्पष्टीकरिष्यते । तस्मात् गुहां प्रविष्टौ जीवपरौ नतु बुद्धिजीवौ, अत्ताच परमात्मैवेति सिद्धम् ॥

संग्रहकारिके ॥

ओदनसम्बन्धित्वादत्ता भोक्तेति जीवएव स्यात् ।
नास्ति ब्रह्मप्रकरणमृतमन्त्रोऽग्रे हि बुद्धिजीवपरः ॥
मृत्यूपसेचननिरूपणसन्निधानात् कृत्स्नचराचरमिहाद्यतया प्रतीतम् ।
तेनादनं हरणमित्युचितस्तदत्ता नाथस्सएव ऋतमंत्रगतस्स जीवः ॥

इति अत्रधिकरणम् ॥२॥

अन्तर उपपत्तेः ॥१३॥
स्थानादिव्यपदेशाच्च ॥१४॥
सुखविशिष्टाभिधानादेव च ॥१५॥
अतएव च सब्रह्म ॥१६॥
श्रुतोपनिषत्कगत्यभिधानाच्च ॥१७॥
अनवस्थितेरसंभवाच्च नेतरः ॥१८॥

छन्दोगाः समामनन्ति– 'य एषोऽक्षिणि पुरुषो दृश्यत एष आत्मेतिहोवाच एतदमृतमभयमेतद्ब्रह्मेति तद्यद्यप्यस्मिन् सर्पिर्वोदकं वा सिञ्चति वर्त्मनीएव गच्छति एतं संयद्वाम इत्याचक्षते एतं हि सर्वाणि वामान्यभिसंयंति सर्वाण्येनं वामान्यभिसंयंति यएवंवेद एष उएव वामनीरेष हि सर्वाणि वामानि नयति एष उ एव भामनीरेष हि सर्वेषु लोकेषु भाती'ति। अत्र अक्ष्यन्तरः पुरुषः प्रतिबिंबः स्यात्, 'य एष' इति प्रसिद्धवन्निर्देशात् 'दृश्यत' इत्यापरोक्ष्याभिधानाच्च। जीवात्मावा, तस्यापि चक्षुषि विशेषसन्निधानात् उन्मीलितं हि चक्षुरुद्वीक्ष्य जीवस्य शरीरे स्थितिन्निश्चिन्वन्ति । 'नेत्रस्थं जाग्रत'मिति च माण्डूक्यश्रुतेः। चक्षुःप्रतिष्ठो देवताविशेषो वा स्यात्, 'रश्मिभिरेषोऽस्मिन्प्रतिष्ठित' इति श्रौतप्रसिद्धेः। न तु परमात्मा। 'तन्दुर्दर्श'मिति दुर्दर्शत्वेनोक्तस्य तस्य 'य एष दृश्यत' इति निर्देशायोगात्। इति पूर्वःपक्षः। ननु कथमयं पूर्वपक्षो घटते, विषयवाक्य एव अमृतत्वाभयत्वयोरात्मब्रह्म-

श्रुत्योः संयद्वामत्ववामनीत्वभामनीत्वानाञ्च तल्लिङ्गानामाम्नानात्, 'तद्यद्यप्यस्मिन्निति स्थानिनिर्लेपत्वप्रयुक्तस्थाननिर्लेपत्वाम्नानात् , 'तद्यथा पुष्करपलाशआपो न श्लिप्यन्ते एवमेवंविदि पापं कर्म न श्लिप्यत' इति वाक्येन 'अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदु च न अर्चिषमेवाभिसम्भवन्ती'ति वाक्येन च ब्रह्मविद्याफलत्वेन प्रसिद्धयोः सकलपापाश्लेषब्रह्मप्राप्तिफलयोः प्रतिपादनात्, 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्मे'त्युपक्रान्तब्रह्मप्रकरणानुवृत्तेश्च। एवं परमात्मपक्ष इव प्रतिबिंबादिपक्षेषु श्रुतिलिङ्गादीनामन्यतमस्याप्यभावात्। अक्षिस्थत्वन्तु 'यश्चक्षुषि तिष्ठन्, य एषोऽक्षिणि पुरुषो दृश्यत' इत्यादिश्रुत्यन्तरेषु परमात्मन्यपि श्रुतं तत्साधारणमिति चेत् उच्यते– अक्ष्याधारत्वं परमात्मन्यावृत्तं प्रतिबिंबादिपक्षोत्थापकं भवत्येव। तस्य हि स्वमहिमप्रतिष्ठस्य मुख्यं तावदक्ष्याधारत्वं न सम्भवति, रूपविशेषावच्छेदोपाधिकं औपचारिकं सम्भवदपि तदाऽङ्गीकार्यम् , यद्याक्षिस्थस्य परमात्मत्वगमकं श्रुतिलिंगादिषु किञ्चिदिह जागृयात् । नत्वेतदस्ति। आत्मब्रह्मश्रुत्योः संयद्वामत्वादिगुणश्रवणस्य च इतिशब्दशिरस्कत्वेन 'मनोब्रह्मेती' त्यादिवत् अतस्मिन् तद्रूपप्रत्ययपरत्वावगमात् तत्समभिव्याहृतामृतत्वादिश्रवणस्य च तन्मात्रपरत्वात् उदाहृतफलानां अब्रह्मोपासनयाऽपि वैवाहिकवरवधूदर्शनेन अभ्युदयवत् वचनबलादुपपत्तेः। ब्रह्मप्रकरणानुवृत्तिस्त्वसिद्धा, 'प्राणो ब्रह्मे' त्यादेः 'मनो ब्रह्मे' त्यादिसारूप्येण ब्रह्मदृष्टिविधिपरत्वात् , तस्य ब्रह्मोपासनाविधिपरत्वेऽपि तदग्नीनां वाक्यं इदमाचार्यवाक्यमिति वक्तृभेदात्, अग्निविद्याभिर्व्यवधानाच्च। एवं ह्युपाख्यायते– उपकोसलः सत्यकाममाचार्यमुपसन्नः तस्य द्वादशवर्षाण्यग्नीन् परिचरन्नास्त, तस्मै ब्रह्मोपदेशमकृत्वैव आचार्ये प्रोषिते तदाऽपि आचार्याग्निपरिचर्यामवहिनं तमवेक्ष्य गार्हपत्यादयस्त्रयोऽग्नयः सम्भूय करुणया तस्मै 'प्राणोब्रह्मे' त्यादिना ब्रह्मविद्यां 'यएषआदित्ये पुरुषोदृश्यते सोऽहमस्मी' त्यादिना प्रत्येकं स्वस्वविषयविद्यांच उपदिश्य 'एषा सोम्य तेऽस्मद्विद्या चात्मविद्या चे' त्यभिधाय 'आचार्याद्धैव विद्या विदिता साधिष्ठं प्राप' दिति श्रुत्यनुसारेण

स्वोपदिष्टा ब्रह्मविद्या तदाचार्यकर्तृकगत्युपदेशेन साधिष्ठत्वं प्राप्नोत्विति आलोच्य 'आचार्यस्तु ते गतिं वक्ते' त्यवोचन्निति । अतोगतिमात्रस्य वक्तव्यत्वेन परिशेषितत्वात्, तस्य ब्रह्मविद्याशेषत्वेऽपि 'यएषोऽक्ष्णी' त्यादेस्तच्छेषत्वाभावात् तस्य प्रतिबिंबादिविषयतायां न काचिदनुपपत्तिः । यत्तु स्थानिमाहात्म्यप्रयुक्तसर्पिरुदकाद्यश्लेषवर्णनं स्थानिनः परमात्मत्वे लिंगमितितन्न, वस्तुतःसलेपेऽक्ष्णिस्थानिमाहात्म्यायत्तसर्पिरुदकाश्लेषवर्णनस्य स्तुतिमात्रत्वात् । तस्मात्प्रतिबिंबादीनामन्यतमएवाक्षिपुरुषइति । एवंप्राप्ते सिद्धांतः— यत्रोच्यमानस्यार्थस्याप्तवचनसंबन्धः प्रतिपाद्यः तत्र इतिशब्दो नार्थविवक्षां वारयति । यथा 'इति हस्मोपाध्यायः कथयती' ति । तस्मादिहामृतत्वादीनामाचार्यवचनसंबंधस्य प्रतिपाद्यत्वात् इतिशब्दो नार्थविवक्षावारकः । स्वाभाविकंचामृतत्वादिकं जीवस्य न संभवति प्रतिबिंबस्य तु कथमपि नसंभवतीति आत्मब्रह्मश्रुत्यमृतत्वाभयत्वसंयद्वामत्ववामनीत्वभामनीत्वलिंगैर्बहुभिरक्षिपुरुषस्य परमात्मत्वनिश्चये सति अक्ष्याधारत्वमेकमौपचारिकं नेतव्यं, उपक्रमस्थैकप्रमाणापेक्षया उपरितनानेकप्रमाणानां बलवत्त्वात् । किंच 'य एषोऽक्ष्णि पुरुषो दृश्यत' इति व्यपदेशात् उपासनाकालेऽक्ष्णि वर्तमानत्वं विवक्षितमिति गम्यते, तत्तावत्प्रतिबिंबे न संभवति; उपासनाकालेऽक्ष्यभिमुखबिंबसन्निधापनकल्पने गौरवं, नासाग्रन्यस्तदृष्टिके तस्मिन् काले बिंबसन्निधापनकल्पनेऽपि न प्रतिबिंबोदयः संभवति, जीवस्यापि जागरे नियमेन अक्ष्णिस्थितिर्नसंभवति, अणुपरिमाणस्य तस्य सर्वस्मिन्नपि जागरे नेत्रमात्रवर्तित्वे शब्दादिज्ञानानुपपत्तेः । अतस्सर्वेंद्रियकंदभूते हृदिस्थितस्य तस्य धर्मभूतज्ञानप्रसरेण नेत्रपदोपलक्षितसर्वेन्द्रियाधिष्ठातृत्वं 'नेत्रस्थ' मिति श्रुत्योच्यत इत्येवाभ्युपगन्तव्यं । चक्षुरधिष्ठातृदेवताविशेषस्यापि 'रश्मिभिरेषोऽस्मिन् प्रतिष्ठित'इति श्रुतेः तत्परिग्रहेऽपि अक्ष्याधारत्वस्यौपचारिकत्वानपायात्, तं परिगृह्य ब्रह्मश्रुत्याद्युपेक्षणमयुक्तं। किंच 'कं ब्रह्म खं ब्रह्मे'ति प्रकृतस्य सुखविशिष्टस्य परमात्मन उपासनास्थानस्य गुणांतराणांच विधानार्थं 'य एषोऽक्ष्णि पुरुष' इत्यभिधानाद-

प्यक्षिपुरुषः परमात्मा। ननु अग्निविद्याव्यवधानात् 'कंब्रह्मे'ति प्रकृतः परमात्मा नेह सन्निधत्ते। उच्यते– प्रवासात्पुनरागत आचार्यः प्रसन्नमुखमुपकोसलं वीक्ष्य 'ब्रह्मविद इव वै सोम्य ते मुखं भाति को नु त्वानुशशासे'ति पृष्ट्वा सहाग्निभिर्भीते तस्मिन् अग्नयोऽस्मा उपदिदिशुरिति निश्चित्य 'किन्नु सोम्य किल तेऽवोचन्नि'ति पृष्ट्वा एतावदवोचन्निति तेनोक्ते तत्र वक्तव्यविशेषोऽस्तीत्यवधार्य 'अहं तु ते तद्वक्ष्यामि यथा पुष्करपलाश' इत्यादिना स्ववक्तव्यं प्रतिज्ञाय 'ब्रवीतु मे भगवा'निति तेन प्रार्थितः ततः संयद्वामत्वादिगुणकमक्षिपुरुषं यदुपदिदेश तस्य प्रकृतस्य सुखविशिष्टब्रह्मान्यविषयत्वं कथं कल्पयितुमीश्महे। ननु 'एषा सोम्य ते अस्मद्विद्यात्मविद्या चे'ति निरवशेषमुपदिष्टतया उपसंहृतायां परमात्मविद्यायां वक्तव्यशेषसद्भावमालोच्य आचार्यः स्वयमुपदिदेशेति कल्पनेऽपि अग्नीनामनृतवादित्वं अनभिज्ञत्वं वा प्रसज्यत इति चेन्न। 'आचार्यस्तु ते गतिं वक्ते'त्यग्नीनां वचने गतिग्रहणस्य यदाचार्येण अग्रे वक्तव्यं तस्य सर्वस्याप्युपलक्षणार्थत्वात्, अन्यथा अग्रिमाचार्यवचनानामन्वयायोगात्। ननु 'कं ब्रह्म खं ब्रह्मे'त्यत्र न ब्रह्मविद्याविधानं किं तु प्रसिद्धाकाशलौकिकसुखयोः ब्रह्मदृष्टिविधानमात्रं 'कं ब्रह्म खं ब्रह्मे'ति प्रत्येकं ब्रह्मपदयोगादिति चेत्। उच्यते– भवभयभीतस्तावदुपकोसलः सत्यकाममुपसम्पन्नः। 'व्याधिभिः प्रतिपूर्णोऽस्मी'त्याचार्यजायां प्रत्युपकोसलस्य सांसारिकेषु विषयेषु व्याधित्वमारोप्य निंदावचनात्, अध्ययनार्थमुपसन्नेषु सर्वेष्वन्येषु ब्रह्मचारिषु अध्याप्य समावर्तितेष्वपि अमुमसमावर्त्य अग्निपरिचर्यायां नियुज्य स्वयं सत्यकामः प्रावासेत्यस्माच्च लिंगात्। एवं मुमुक्षया उपसम्पन्नंप्रति कथं तदनुपयोगिनं दृष्टिविधिमग्नय उपदिशेयुः, तस्मात् यथा 'प्राणो ब्रह्मे'त्यत्र प्राणशरीरतया ब्रह्मणि प्राणशब्दः, तथा सुखाकाशयोरपि ब्रह्मशरीरत्वाभिप्रायेण ब्रह्मणि सुखाकाशशब्दौ, उत तयोरन्योन्यव्यवच्छेदकतया निरतिशयानन्दब्रह्मस्वरूपसमर्पकत्वाभिप्रायेण वेत्यन्यतरनिर्दिधारयिषया प्रश्नः। अमुमभिप्रायं जानन्तोऽग्नयः 'यद्वाव कं तदेव खं यदेव खं

तदेव क'मित्यूचुरिति तेषां द्वितीयपक्षएवाभिमत इत्याशयः । अत एव 'कं ब्रह्म खं ब्रह्मे'ति ब्रह्मपदद्वयमप्युपपद्यते, आकाशवत् ब्रह्मानवच्छिन्नं च भवति, तदेव ब्रह्म सुखरूपंच भवतीति प्रत्याययितुं । एवं च 'यद्वाव कं तदेव खं यदेव खं तदेव क'मित्युभयथा विशेषणविशेष्यभावोक्तिः, अनवच्छिन्नसुखरूपं ब्रह्म सुखात्मकानवच्छिन्नवस्तुस्वरूपं च ब्रह्मेति उभयथा उपासनासिद्ध्यर्थमिति सर्वमनवद्यम् । श्रुतोपनिषत्कस्य अधिगतपरमपुरुषयाथात्म्यस्य श्रुत्यन्तरप्रसिद्धा या अर्चिरादिगतिः तामपुनरावृत्तिलक्षणपरमपुरुषप्राप्तिकरीं उपकोसलायाक्षिपुरुषं श्रुतवते 'अर्चिषमभिसम्भवन्ती'त्यादिना 'एष देवपथो ब्रह्मपथः एतेन प्रतिपद्यमाना इमं मानवमावर्तन्नावर्तन्त' इत्यन्तेन यदाचार्य उपदिदेश, ततोऽप्यक्षिपुरुषः परमात्मा, न तु प्रतिबिंबादिः । नहि तस्य नियमेनोपासनाकालेषु वाऽक्षिण्यवस्थानमस्ति, न वा तस्मिन्निरुपाधिकममृतत्वादिकं सम्भवतीति ॥

संग्रहकारिका ।

यएषपुरुषोऽक्षिणिदृश्यत इति प्रसिद्धिगमकादुपक्रमगतात् ।
शरीरभृदिनोऽथवा प्रतिकृतिः सइत्यनुचितं बहुप्रतिहतेः ॥

इति अन्तराधिकरणम् ॥३॥

अन्तर्याम्यधिदैवाधिलोकादिषु तद्धर्मव्यपदेशात् ।१९।

नचस्मार्तमतद्धर्माभिलापाच्छारीरश्च ॥२०॥

उभयेऽपि हि भेदेनैनमधीयते ॥२१॥

'स्थानादिव्यपदेशाच्चे' ति सूत्रे 'यश्चक्षुषितिष्ठ' न्नित्यादिनोक्तं-चक्षुषि स्थितिनियमनादिकं परमात्मधर्मइति सिद्धं कृत्वा अक्षिपुरुषस्य परमात्मत्वं साधितं, तदेवेदानीं समर्थ्यत इति सङ्गतिः । वाजसनेयिनः समामनंति— 'यः पृथिव्यांतिष्ठन् पृथिव्याअन्तरोयं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमंतरो यमयति एषतआत्मांतर्याम्यमृत'इति । एवं अब्वग्न्यन्तरिक्षवाय्वादित्यदिक्चन्द्रतारकादिष्वपि तिष्ठन्तं तदंतरभूतं तद-

वेद्यं तच्छरीरकन्तत्तद्यमयन्तमामनंति। माध्यन्दिनास्तु 'यस्सर्वेषु लोकेषु सर्वेषु वेदेषु सर्वेषु यज्ञेष्वि'ति पर्यायांतराण्यप्यामनंति। तत्र किमयमंतर्यामी जीवः परोवेति संशये जीवइति तावत्प्राप्तं, वाक्यशेषे 'द्रष्टा श्रोता मन्ता विज्ञाते'ति चक्षुरादिकरणायत्तज्ञानताश्रुतेः। न च दर्शनश्रवणमनन-विज्ञानशब्दाः रूपादिसाक्षात्कारवाचिनः, न चाक्षुषादिज्ञानवाचिनः, रूपादिसाक्षात्कारास्तु परस्यापि सन्ति, 'पश्यत्यचक्षुस्स शृणोत्यकर्ण' इत्यादिश्रुतेरिति वाच्यम्। तथासति 'नान्योऽतोऽस्ति द्रष्टा नान्योऽतोऽस्ति श्रोता नान्योऽतोऽस्ति मन्ता नान्योऽतोऽस्ति विज्ञाते'ति वाक्यश्रुतद्रष्ट्र-न्तरादिनिषेधायोगात्, दर्शनादिशब्दानां चाक्षुषादिज्ञानपरत्वे हि जीवा-दन्यस्तद्वान् नास्तीति निषेधो युज्यते। रूपादिसाक्षात्कारवाचित्वे तस्य परस्मिन्नपि सत्त्वादन्यत्र तन्निषेधो न युज्यते। न च जीव इति पूर्वपक्षेऽपि 'य इमञ्च लोकं परञ्च लोकं सर्वाणि च भूतानि योऽन्तरोयमयती' त्येक-वचनं, 'यः पृथिव्यां तिष्ठ'न्नित्यादिपृथिव्यादिस्थितत्ववचनं, 'यं पृथिवी न वेदे'ति पृथिव्याद्यवेद्यत्ववचनं, 'यः पृथिवीमन्तरोयमयती'त्यादिपृथिव्यादि-नियन्तृत्ववचनञ्च, न युज्यतइति वाच्यम्। एकवचनस्य जीवसमुदायाभि-प्रायेण, स्थितिवचनस्य स्वमहिमप्रतिष्ठितत्वोक्तिरीत्या, तदन्तरत्वतन्नि-यन्तृत्ववचनयोरात्मेश्वरत्वोक्तिरीत्या, तदवेद्यत्वोक्तेः निष्कृष्टस्वरूपज्ञाना-भावाभिप्रायेण च, योजयितुं शक्यत्वात्। तस्माज्जीवएवायमन्तर्यामीति। एवं प्राप्ते सिद्धान्तः— 'य इमञ्च लोकं परञ्च लोकं सर्वाणि च भूतानि यो ऽन्तरोयमयति तमन्तर्यामिणं ब्रूही' ति सर्वान्तर्यामी कश्चिदेकोऽन्तर्याम्य-स्ति तमन्तर्यामिणं ब्रूहीत्युद्दालकप्रश्नस्य हि 'यः पृथिव्यान्तिष्ठ' न्नित्यादि याज्ञवल्क्यस्योत्तरं, अत्रैकवचनं जात्यभिप्रायादिना योजयितुं न युक्तं, प्रथमप्रवृत्तैकविषयप्रश्नानुसारेण उत्तरवचनानां सर्वदेवलोकादिनियंत्रैकवि-षयत्वस्य वक्तव्यत्वात्। तस्मात् सुबालोपनिषदि 'यस्य पृथिवीशरीरं यः पृथिवीमन्तरे सञ्चरन् यं पृथिवी न वेद यस्यापश्शरीर' मित्यादिवाक्यस-न्दर्भप्रतिनिर्देशे 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देवएको नारा-

यण' इति वाक्ये श्रुतः परब्रह्मरूपः पुरुषोत्तमएवात्रान्तर्यामी विवक्षितइति युक्तम्। तस्यैव च 'एषत आत्माऽन्तर्याम्यमृत' इति निर्दिश्यमानं जीवाव्यतिरिक्तत्वं स्वाभाविकामृतत्वञ्च सङ्गच्छते। यत्तु 'नान्योऽतोऽस्ति द्रष्टे' त्यादिकरणायत्तज्ञानवतोऽन्यस्य निषेधएव सङ्गच्छते, न तु रूपादिज्ञानवतोऽन्यस्य निषेध इति जीवपूर्वपक्षोपोद्बलकमुक्तं, तत्रेदमुत्तरं, 'नान्योऽतोऽस्ति द्रष्टे' त्यादि न द्रष्ट्रन्तरादिनिषेधमात्रपरं, किं तु तत्सदृशसर्वभृतनियन्तृरूपद्रष्ट्रन्तरादिनिषेधपरं, 'नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थगति' रिति शाब्दिकन्यायात्, तमेव हि न्यायमवलम्ब्य इषुनामके क्रतौ कतिपयवैशेषिकधर्माम्नानानन्तरमाम्नाते 'समानमितरच्छ्येनेने' ति वाक्ये इतरशब्दः श्येननामकक्रतुवैशेषिकधर्मानामतिदेशार्थः, न तु श्येनसाधारणानाश्चोदकप्राप्तानां प्राकृतधर्माणामनुवादक इति निर्णीतं पूर्वतन्त्रे सप्तमाध्याये। एतेन 'न दृष्टेर्द्रष्टारं पश्येः न श्रुतेः श्रोतारं शृणुयाः न मतेर्मन्तारं मन्वीथाः न विज्ञातेर्विज्ञातारं विजानीयाः आत्मा वाऽरे द्रष्टव्यश्श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति मैत्रेयीब्राह्मणे श्रोतेत्यादिपदानां श्रवणमनननिदिध्यासनसाक्षात्कारकर्तृपरताया दृष्टत्वात् इहापि तत्परत्वं वक्तुमुचितमिति श्रवणमननादिकर्त्रन्तरनिषेधो जीवपक्षएव घटते न परमात्मपक्ष इति शङ्काऽपि निरस्ता। नञिवयुक्तन्यायावलम्बनेन तत्सदृशनियन्त्रन्तरनिषेधस्य 'पश्यत्यचक्षु' रित्यादिश्रुत्यन्तरप्रसिद्धार्थग्रहणानुकूलस्यैव तदर्थतया ग्राह्यत्वसमर्थनात्। यद्यपि चाक्षुषादिज्ञानवत्त्वेन सदृशस्यान्यस्यापि निषेधो जीवपक्षेऽपि घटते, तथाऽपि प्रधानवज्जीवोऽपि नान्तर्यामी भवितुमर्हति, सर्वनियन्तृत्वनिरुपाधिकामृतत्वाद्यसम्भवात्। अपिचैतं जीवं काण्वामाध्यन्दिनाश्च उभयेऽपि अन्तर्यामिणो भेदेनाधीयते। 'यो विज्ञाने तिष्ठन् विज्ञानादन्तर' इत्यादि हि काण्वा अधीयते। तत्रैव स्थाने 'य आत्मनि तिष्ठ'न्नित्यादि माध्यन्दिनाः। तस्मादन्तर्यामी परमात्मैव न जीवः॥

संग्रहकारिका॥

द्रष्टृश्रोत्रादिशब्दाभिहितकरणजज्ञानभेदाश्रयत्वा-
दन्तर्यामी शरीरी स्वनियमनवचोभाक्तमत्रेत्यसाधु।

एकस्यैव ह्यधीताखिलयमयितृता ब्रह्मणोऽन्यत्र कस्मिन्
संभाव्या तत्र रूपाद्यवगतिविषयादर्शनाद्या घटन्ते ॥
इति अन्तर्याम्यधिकरणम् ॥४॥

अदृश्यत्वादिगुणको धर्मोक्तेः ॥२२॥

विशेषणभेदव्यपदेशाभ्याञ्च नेतरौ ॥२३॥

रूपोपन्यासाच्च ॥२४॥

आथर्वणिकास्समामनन्ति । 'अथ परा यया तदक्षरमधिगम्यते यत्तदद्रेश्यमग्राह्यमगोत्रमवर्णमचक्षुश्श्रोत्रन्तदपाणिपादं नित्यं विभुं सर्वगतं सुसूक्ष्मं तदव्ययं यद्भूतयोनिं परिपश्यंति धीरा' इति तदनन्तरञ्चामनंति । 'दिव्योह्यमूर्तः पुरुषस्सबाह्याभ्यंतरोह्यजः । अप्राणोह्यमनाश्शुभ्रोह्यक्षरात्परतः पर' इति । तत्र किमदृश्यत्वादिगुणकमक्षरं अक्षरात्परतः परश्च प्रकृतिपुरुषौ, उतोभयमपि परमात्मेति । प्रकृतिपुरुषाविति तावत्प्राप्तं, नह्यस्मिन्नक्षरेऽन्तर्यामिणि 'अदृष्टोद्रष्टे' त्यादौ द्रष्टृत्वादिरिव चेतनधर्मः कश्चित्समाम्नायते । 'अक्षरात्परतः पर' इत्यत्र च सर्वस्माद्विकारजातात् परं यत्प्रकृतं भूतयोन्यक्षरं तस्मात्परः क्षेत्रज्ञस्समष्टिपुरुषउच्यते । ननु इह चेतनधर्माश्रवणेऽप्यदृश्यत्वादिकं साधारणमिति कुतोऽक्षरस्य प्रधानत्वनिर्णयः । उच्यते– यथाखलु 'अबालोऽयमतरुणोऽय' मित्यादिशब्दाः पुरुषविशेषे प्रयुज्यमानाः प्रत्यासन्नावस्थांतराश्रये तस्मिन्नेव वर्तंते, एवं दृश्यत्वग्राह्यत्वरूपज्ञानेंद्रियकर्मेंद्रियविषयत्वनिषेधाः धर्मिविशेषाकांक्षायां दृश्यत्वग्राह्यत्ववदचेतनजातएव सूक्ष्मावस्थे वर्तंत इति युक्तं, तस्यैवावस्थांतरापन्नस्य धर्मित्वे संभवति धर्म्यंतरकल्पनायोगात् । ननु तर्हि 'अगोत्रमवर्णमचक्षुश्श्रोत्रमपाणिपाद' मिति जीवे प्रसिद्धानां गोत्रादीनां निषेधजातस्य धर्म्याकांक्षायां तस्यैव शरीरान्निष्क्रष्टस्य सूक्ष्मावस्थस्य धर्मित्वोपपत्त्या भूतयोन्यक्षरं जीवएव स्यात्, 'अद्रेश्यमग्राह्य' मिति प्रकृतिलिंगनिषेधयोरुपक्रमगतत्वेपि गोत्रनिषेधादीनां जीवलिंगानां बहुत्वेन ततः प्राबल्यात्

'क्षरं प्रधानममृताक्षरं हर' इति जीवेप्यक्षरशब्ददर्शनात्, न क्षरति स्वरूपेण न विक्रियतइति तस्मिन्नप्यक्षरशब्दोपपत्तेः, अदृष्टद्वारा जगत्कारणे तस्मिन् भूतयोनित्वव्यपदेशोपपत्तेश्चेतिचेत् । उच्यते— भूतयोन्यक्षरसमाम्नानानन्तरं तस्य भूतयोनित्वविवरणार्थं प्रवृत्ते 'यथोर्णनाभिस्सृजते गृह्णते च यथा पृथिव्यामोषधयस्संभवन्ति । यथा सतः पुरुषात्केशलोमानि तथाक्षरात्संभवतीह विश्व' मिति मन्त्रे परिणाम्युपादानभूतोर्णनाभ्यादिदृष्टांतोपादानेन अक्षरस्य भूतयोनित्वं परिणाम्युपादानत्वरूपमवगमितं, तदनन्तरञ्च 'यथा सुदीप्तात्पावकाद्विस्फुलिंगास्सहस्रशः प्रभवन्ते सरूपाः । तथाक्षराद्विविधास्सोम्यभावाः प्रजायंते तत्रचैवापियंती' ति भूतयोन्यक्षरस्य सरूपकार्यप्रभवत्वोक्त्यापि तस्य भूतयोनित्वं परिणाम्युपादानत्वरूपमवगमितं, तस्मादुपक्रमोपसंहाराभ्यामवगमिते भूतयोन्यक्षरस्य प्रकृतित्वे 'यद्गोत्र' मित्यादिजीवलिंगन्तत् तत्रैव कथञ्चिन्नेतव्यं । ननु उक्तरीत्या भूतयोन्यक्षरं प्रधानमित्यस्तु, 'अक्षरात्परतः परस्समाष्टिपुरुषइतित्वयुक्तं । उपक्रमादिविरोधात् । तथाहि परमोपक्रमे 'सब्रह्मविद्यां सर्वविद्याप्रतिष्ठामथर्वाय ज्येष्ठपुत्राय प्राहे' ति ब्रह्मविद्यासमाख्या आम्नायते । ततः 'कस्मिन्नुभगवोविज्ञाते सर्वमिदं विज्ञातं भवती' ति एकविज्ञानेन सर्वविज्ञानमुच्यसे अक्षरवाक्येऽपि परविद्यासमाख्या दृश्यते । अपिच सद्विद्यावाक्यानां प्रधानपरत्वनिरासाऽर्थं ईक्षत्यधिकरणदर्शितायुक्तयोऽत्रापि प्रवर्तंतएव, अस्तिखल्वीक्षापूर्वकस्रष्टृत्वश्रवणं अत्रापि 'तपसा चीयते ब्रह्मे' ति, यतस्तपश्शब्दोऽत्र 'तपआलोचन' इति धातोर्निष्पन्नः स्रष्टव्यालोचनरूपज्ञानवाची, 'यस्य ज्ञानमयं तप' इत्यग्रे विवरणात्, आत्मशब्दश्चास्ति 'दिव्ये ब्रह्मपुरे ह्येष व्योमन्यात्मा प्रतिष्ठित' इति, तन्निष्ठस्य मोक्षोपदेशोऽप्यस्ति 'यदापश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती' ति । हेयत्वञ्च तस्य नोच्यते, प्रतिज्ञाविरोधोऽप्यस्तीत्युक्तं, साक्षाच्च ब्रह्मणः कर्तृत्वमुपादानत्वं च श्रूयते— 'कर्तारमीशं पुरुषं ब्रह्मयोनि' मिति । एतस्मिन् प्रमाणानि

अक्षरात्परः पुरुषो ब्रह्मेति पूर्वपक्षश्चेत्, तत्तद्विषयतया उपपद्यन्ते । सोऽपि समष्टिपुरुषइति पूर्वपक्षे केषांचिदुपपत्तावपि का भवेदन्येषां गतिरिति चेत्, उच्यते– 'यस्सर्वज्ञस्सर्ववित् यस्य ज्ञानमयं तपः । तस्मादेतद्ब्रह्म नामरूपमन्नश्च जायत' इति यस्सामान्यतो विशेषतश्च समस्तवेत्ता सर्ववेदान्तेषु प्रसिद्धः परमात्माऽस्ति 'तस्मादेतद्ब्रह्म, स ब्रह्मविद्या'मित्युपक्रमे ब्रह्मशब्देनोक्तं सकलक्षेत्रज्ञसमष्टिरूपं हिरण्यगर्भाख्यं ब्रह्म तज्जायत इत्युच्यते, तद्विद्यायाः परविद्यात्वं मोक्षफलकत्वादुपपद्यते, अपरब्रह्मविद्यायाः मोक्षफलकत्वञ्च वचनबलाद्युज्यते, समष्टिपुरुषज्ञानेन तद्व्यष्योऽन्येपि क्षेत्रज्ञाः विज्ञाताभवंतीति सर्वविज्ञानवचनमपि घटत इति पूर्वपक्षी मन्यते । एवं प्राप्ते सिद्धांतः—

भूतयोन्यक्षरं तावद्ब्रह्मैव, भूतयोनित्वविवरणार्थे 'यथोर्णनाभि'रिति मन्त्रे 'तथाऽक्षरात्सम्भवतीह विश्व'मिति विश्वशब्दस्य चेतनाचेतनात्मकसकलप्रपञ्चपरत्वात्, चेतनवर्गे च ब्रह्मकार्यत्ववत् प्रकृतिकार्यत्वस्याभावात्। न च ऊर्णनाभ्याद्युपादानोपन्यासानुसारेण विश्वशब्दः तत्परिणामत्वयोग्याचेतनमात्रपरः स्यादिति वाच्यम् । प्रतिज्ञावाक्यानुसारेण तदपेक्षितोपादानत्वांशमात्रे दृष्टान्तोपन्यास इत्युपपत्तेः, प्रतिज्ञातार्थानपेक्षितदृष्टान्तगतसाम्यान्तरस्य अनुपयुक्तत्वात् । तथा 'तपसा चीयते ब्रह्मे'ति तदनन्तरमन्त्रोऽपि तत इति पञ्चम्या प्रकृताक्षरगतस्य भूतयोनित्वस्य अन्नादिशब्दोक्तशब्दतन्मात्रादिकारणत्वप्रतिपादनद्वारा विवरणपर इति।तत्रत्यब्रह्मश्रुत्याऽपि अक्षरं ब्रह्मेत्यवसीयते । तथा 'यस्सर्वज्ञ' इति तदनन्तरमन्त्रे सर्वज्ञत्वादिब्रह्मलिंगप्रतिपादके यच्छब्दस्य प्रकृतपरत्वादपि तथाऽवसीयते। न च अक्षरे पुल्लिंगानुपपत्तिः, भूतयोन्यभिप्रायेण तदुपपत्तेः, योनिशब्दस्य द्विलिंगत्वात् । न च 'यथा सुदीप्ता'दिति मंत्रोक्तं कार्यकारणसारूप्यं अक्षरस्य प्रकृतित्वं गमयतीति वाच्यम् । तत्र 'भावा' इत्यनेन चेतनवर्गस्यैव ग्रहणेन तत्कारणत्वस्य ब्रह्मण्येव सत्त्वात् । अत्र हि 'सुदीप्ता'दिति विशेषणेन प्रकाशमानत्वं सारूप्यं विवक्षितं गम्यते, तत्तु चेतनवर्गस्यैवा-

स्ति । किञ्च इदं प्रकरणं प्रधानात्पुरुषाच्च भूतयोन्यक्षरं व्यावर्तयति सर्व-विज्ञानोक्त्यादिभिः । न च 'सर्वमिदं विज्ञात' मिति चेतनाचेतनात्मक-सकलप्रपञ्चविज्ञानत्वोक्तिः समष्टिपुरुषज्ञानेन व्यष्टिपुरुषाणां विज्ञातत्वविषयतया क्लेशेन योजनामर्हति । प्रकृतस्याक्षरस्य प्रधानात्समष्टिपुरुषाच्च भेदो व्यपदिश्यते– 'दिव्योह्यमूर्तः पुरुषः सबाह्याभ्यन्तरोह्यजः । अप्राणोह्यमनाश्शुभ्रः अक्षरात्परतः पर' इति । अक्षरादव्याकृतात् परो यः समष्टिपुरुषः तस्मादपि परोऽयं भूतयोन्यक्षररूपः पुरुषइत्यर्थः । ननु स्वकार्येभ्यः परं यत्प्रकृतमक्षरं तस्मात्पर इत्यर्थः किं न स्यात्, स एव च युक्तः, 'अक्षरात् परत' इति पञ्चम्योः सामानाधिकरण्यलाभादितिचेत्, उच्यते– 'सबाह्याभ्यन्तर' इत्यत्र स इति भिन्नं पदं पुरुषविशेषणं, यथा सुदीप्ता' दिति मन्त्रप्रकृतभूतयोन्यक्षरपरामर्शि सत् अक्षरात्परस्य पुरुषस्य तदभेदबोधनार्थं, न तु 'सबाह्याभ्यन्तर' इति एकं पदं, वैयर्थ्यात् । 'सबाह्याभ्यन्तर' इति सर्वगतत्वोक्त्यैव सकलवस्तुसंसर्गसिद्धेः । एवंभूतयोन्यक्षरस्य अक्षरात्परस्य पुरुषस्य च अभेदेन ब्रह्मरूपत्वसिद्धौ पंचम्यन्ताक्षरपदवाच्यमव्याकृतमेव पर्यवस्यति । 'अक्षरात्परतः पर' इत्यतः प्राचीने मंत्रे 'येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्या'मित्यक्षरपुरुषपदसामानाधिकरण्याद्प्ययमर्थो निश्चीयते । अपि च 'अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्यौ दिशश्श्रोत्रे वाग्विवृताश्च वेदाः । वायुः प्राणो हृदयं विश्वमस्य पद्भ्यां पृथिवीह्येष सर्वभूतान्तरात्मे' ति मंत्रे प्रकृतं भूतयोन्यक्षररूपं पुरुषं 'अस्ये'ति सर्वनाम्ना परामृश्य त्रैलोक्यशरीरत्वोपन्यासादपि न प्रधानमक्षरं, नापि समष्टिपुरुषोऽक्षरात्परतः परः, यद्यपि पुराणादिषु हिरण्यगर्भस्यापि त्रैलोक्यात्मकं वैराजं शरीरं प्रसिद्धमस्ति, तथापि यस्मिन् चराचरात्मकं समस्तं जगत् हृदयवत्प्रतिष्ठितं तथाभूतं तत्तस्य न सम्भवति । यत्सम्भवति तदपि परमात्मात्मकमेव, 'सृष्ट्यन्तरं करिष्यामि त्वामाविश्य प्रजापत' इति वचनात् । न च 'अग्निर्मूर्द्धे' ति मंत्रोक्तं सर्वभूतान्तरात्मत्वं हिरण्यगर्भे सम्भवति । तस्मादक्षरं अक्षरात्परतः परश्च परमात्मैव ॥

संग्रहकारिके ॥

भजति स्वविषयाणां लाघवात्सूक्ष्मरूपं
जडजगदनुवृत्तं दृश्यतादेर्निषेधः ।
तदभिहितमथर्वण्यक्षरं स्यात्प्रधानं
तदुपरि च निरुक्तस्तत्परः पंचविंशः ॥
सर्वज्ञत्वादिधर्मोक्तेः परएवाद्यमक्षरम् ।
अन्यदव्याकृतन्तस्माद्यत्परस्तत्परोपि सः ॥

इति अदृश्यत्वादिगुणकाधिकरणम् ॥ ९ ॥

वैश्वानरस्साधारणशब्दविशेषात् ॥ २५ ॥

स्मर्यमाणमनुमानं स्यादिति ॥ २६ ॥

शब्दादिभ्योऽन्तःप्रतिष्ठानाच्च नेति चेन्न तथादृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते ॥ २७ ॥

अत एव न देवता भूतश्च ॥ २८ ॥

साक्षादप्यविरोधं जैमिनिः ॥ २९ ॥

अभिव्यक्तेरित्याश्मरथ्यः ॥ ३० ॥

अनुस्मृतेर्बादरिः ॥ ३१ ॥

संपत्तेरिति जैमिनिस्तथाहि दर्शयति ॥ ३२ ॥

आमनंति चैनमस्मिन् ॥ ३३ ॥

त्रैलोक्यात्मकरूपोपन्यासादक्षरवद्वैश्वानरोपि परमात्मेति निर्णीयत इति सङ्गतिः । छन्दोगाः 'आत्मानमेवेमं वैश्वानरं संप्रत्यध्येपि तमेव नो-ब्रूही'ति ऋषिभिः पृष्टस्य केकयराजस्योत्तरेष्वामनन्ति— 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्त' इति । तत्र किमयं वैश्वानरः परमात्मेति शक्यनिर्णयः उताशक्यनिर्णयइति वैश्वानरशब्दस्य साधार-

ण्यात् संशये पूर्वपक्षः । वैश्वानरशब्दश्चतुर्ष्वर्थेषु दृश्यते । जाठराग्नौ तावत् 'अयमग्निर्वैश्वानरो येनेदमन्नं पच्यते यदिदमद्यते तस्यैषघोषो भवति यदेतत्कर्णावपिधाय शृणोती' ति, महाभूततृतीये च 'विश्वस्मा अग्निं भुवनाय देवाः वैश्वानरं केतुमह्नामकृण्व' न्निति, देवतायांच 'वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्री' रिति, परमात्मनिच 'सएषवैश्वानरो विश्वरूपः प्राणोग्निरुदयत' इति । ननु अयमादित्यविषयोवैश्वानरशब्दः, न तु परमात्मविषयः, तदनन्तरं 'तदेतदृचाभ्युक्त' मित्युपक्रम्य हि 'सहस्ररश्मिश्शतधावर्तमानः प्राणः प्रजानामुदयस्येषसूर्य' इति सौरमन्त्रस्य वैश्वानरविषयत्वेनोदाहरणात्, तत्र 'सएष' इति सर्वनाम्नः 'आदित्योहप्राण' इति प्रकृतादित्यपरत्वाच्चेतिचेत् उच्यते—

न केवलमादित्यपरस्तत्र वैश्वानरशब्दः, किंतु आदित्यान्तर्वर्तिपरमात्मपर्यन्तः, 'अथोत्तरेण तपसा श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजायन्ते एतद्वै प्राणानामायतनममृतमभयं परायणमेतस्मान्न पुनरावर्तन्त' इत्यग्रे श्रवणात् । ननु 'को न आत्मा किं ब्रह्मे' त्युपक्रमगतब्रह्मश्रुत्या वैश्वानरः परमात्मेति शक्यनिर्णयः । न च वाजसनेयिशाखायां 'वैश्वानरं ह वै भगवन् सम्प्रति वेद तन्नो ब्रूही' ति वैश्वानरशब्देन उपक्रमात् उपक्रमो न विनिगमक इति वाच्यम् । तस्य साधारणस्य वैश्वानरशब्दस्य छान्दोग्योपक्रमगतब्रह्मश्रुत्यनुसारेण परमात्मनि पर्यवसानोपपत्तेरितिचेत् मैवम् । 'को न आत्मा किं ब्रह्मे' ति विमृष्टवतां प्राचीनशालादीनामग्रे द्युप्रभृतिषु वैश्वानरात्मदृष्टिर्वर्णितेति तदनुसारेण तदीयवचनगतयोरात्मब्रह्मश्रुत्योरात्मब्रह्मदृष्टिविषयत्वाकारेण अन्यत्र गौणतयैव प्रयोगात् । एवं ह्युपाख्यायते—औपमन्यवादयः पंच महर्षयः 'कोनआत्मा किंब्रह्मे' ति मीमांसित्वा निश्चयमलभमानाः वैश्वानरोपासनापरमुद्दालकं गत्वा तेनापि तस्यामकृत्स्नवेदिना अश्वपतिः कैकयो वैश्वानरमुपास्ते तमभ्यागच्छामेत्युक्ताः उद्दालकषष्ठास्तमभिजग्मुः, स च तेषां ज्ञानं परीक्ष्य ततो वक्तव्यशेषं वक्ष्यामीत्यभिसन्धाय औपमन्यव कं त्व-

मात्मानमुपास्त' इत्यादिना तान् षडपि ऋषीन् क्रमेण पृष्ट्वा तैः 'दिव-मेव भगवोराज' न्नित्यादिभिर्यथाक्रमं द्युसूर्यानिलाकाशजलावनिषु वैश्वान-रबुद्ध्या स्वैरुपास्यमानतयोक्तेषु दिवादयो वैश्वानरं प्रति मूर्द्धचक्षुःप्राणम-ध्यस्थानपादावयवत्वेनोपास्याः, न तु वैश्वानरत्वेनेति व्यस्तोपासनाः प्रतिषिध्य समस्तोपासनाविषयस्य वैश्वानरस्य प्रागुपक्षिप्तं द्युमूर्द्धत्वादिवि-शिष्टं रूपमेकीकृत्योपदिदेश 'मूर्द्धैव सुतेजा' इत्यादिनेति। तस्माद्वैश्वा-नरः परमात्मेति न शक्यनिर्णयइति। एवं प्राप्ते सिद्धांतः— परमात्मेति शक्यनिर्णयएव, 'कोनआत्मा किं ब्रह्मे' ति जीवात्मनामात्मभूतं परमा-त्मानं जिज्ञासमानैस्तदभिज्ञइति राजानमुपसन्नैः प्राचीनशालादिभिः पृष्टेन राज्ञोपदिष्टत्वात्। न च तेषामात्मब्रह्मशब्दयोर्गौणत्वाभिमानश्शङ्कनीयः; यतः 'कोनआत्मा किं ब्रह्मे' ति विमर्शः अस्माभिरन्योन्यविरोधेन आ-त्मब्रह्मबुद्ध्योपास्यमानेषु द्युप्रभृतिषु वस्तुतः किन्तथाभूतं ब्रह्म। किमेतेषामन्य-तममन्यद्वेति वस्तुतत्वविषयः, न तु तेषु किंतथाभूतब्रह्मदृष्टिमारोप्योपास्य-मित्यारोपितरूपविशिष्टविषयः, 'अन्नंब्रह्म मनोब्रह्मे' त्यादिवत् अनेकत्र प्रतीके ब्रह्मदृष्ट्यारोपसंभवात् विरोधाभावेनास्मदुपास्यानां द्युप्रभृतीनां मध्ये किंतथाभूतब्रह्मदृष्ट्योपास्यमिति निर्द्धारणानपेक्षणात्। अतएव 'दिवमेव भगवोराज' न्नित्यादिवाक्यैः स्वस्वभ्रमएवोद्घाटितः, सम्भवति ह्यद्यापि चन्द्रसूर्यादिषु केषांचित् ब्रह्मत्वभ्रमवत् द्युप्रभृतिषु तेषां तद्भ्रमः; अतस्तत्र गौणत्वशङ्काऽनास्पदाभ्यामात्मब्रह्मश्रुतिभ्यां वैश्वानरः परमात्मेति शक्यएवं निर्णेतुं। किंच 'सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती' त्यनेन सर्वत्र वर्तमानमनवधिकातिशयानन्दरूपतया भोग्यं परंब्रह्मानुभवतीत्युच्यते, न तु कर्मवश्यैरात्मभिर्यदन्नं भुज्यते तदत्तीति, तस्य मुमुक्षून् प्रति हेयत्वात्। परमानन्दानुभवफलञ्च परमात्मपक्षएव घटते। 'तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयंते' इत्युच्यमानं सर्वपापप्रदाहफलञ्च तत्पक्षएव घटते। द्युप्रभृतिपृथिव्यन्तत्रैलोक्यात्मकं शरीरमिहोपदिश्यमानं 'अग्निर्मूर्द्धा चक्षुषी चन्द्रसूर्या' विति श्रुतौ 'यां मूर्द्धानं यस्य विप्रा वदन्ति

खं वै नाभिश्चन्द्रसूर्यौ च नेत्रे । दिशश्श्रोत्रे विद्धि पादौ क्षितिञ्च सोऽचिन्त्यात्मा सर्वभूतप्रणेते' त्यादिस्मृतिषु च परमात्मनः प्रसिद्धं रूपं प्रत्यभिज्ञापयद्वैश्वानरं परमात्मानमवगमयति । स्यादेतत्, उक्तहेतुभिः वैश्वानरः परमात्मेति नशक्यनिर्णयः, शब्दादिभ्योन्तःप्रतिष्ठानाच्च जाठरइत्यपि प्रतीतेः । अग्निशब्दस्तावत् वाजसनेयके 'सएषोग्निर्वैश्वानर' इति वैश्वानरसमानाधिकरणश्श्रूयते । छांदोग्ये च 'हृदयं गार्हपत्योमनोऽन्वाहार्यपचनआस्यमाहवनीय' इति वैश्वानरस्याग्नित्रयस्थानकल्पनं क्रियते । 'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयं सयां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहे' त्यादिना वैश्वानरस्य प्राणाहुत्याधारत्वमाम्नायते । तस्य च पुरुषेऽन्तःप्रतिष्ठितत्वं वाजसनेयिभिराम्नायते— 'सयोहैतमेवमग्निं वैश्वानरं पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं वेदे'ति । एवमुक्तहेतुभिः वैश्वानरोजाठरइत्यपि प्रतीयत इति चेत्, नैषदोषः । त्रैलोक्यशरीरस्य वैश्वानरस्य परमात्मनो जाठराग्निशरीरतया तद्विशिष्टस्योपासनोपदेशात् । अग्निशब्दादिभिः न केवलो जाठरः प्रतिपाद्यते, किन्तु तद्विशिष्टः परमात्मा, केवलस्य जाठरस्य त्रैलोक्यशरीरत्वासंभवात्, 'अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः । प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विध' मिति गीतासु भगवतो जाठराग्निशरीरतया अशितपीतान्नादिपक्तृत्वप्रतिपादनाच्च । एतेभ्यएव हेतुभ्यः अग्निदेवतायाः तृतीयमहाभूतस्य च वैश्वानरत्वशङ्काऽपि प्रत्युक्ता । एवमिहाग्निशब्दस्य जाठराग्निशरीरकपरमात्मपरतया गतिरुक्ता । जैमिनिस्त्वाचार्योमन्यते— यथा वैश्वानरशब्दस्साधारणोपि परमात्मासाधारणधर्मदर्शनात् विश्वेषां नराणां नेता विश्वानरः स एव स्वार्थिकाणप्रत्ययेन वैश्वानर इत्येवं परमात्माभिधायको निश्चीयते, एवमग्निशब्दोऽग्रनयनादियोगेन परमात्माभिधायक इति निश्चीयते, तस्य योगस्य ज्वलनादपि सर्वान्तरात्मनि परमात्मन्येव सुप्रतिष्ठितत्वादिति । ननु अपरिच्छिन्नस्य परमात्मनः 'यस्त्वेतमेवं प्रादेशमात्र' मिति श्रूयमाणं द्युप्रभृतिपृथिव्यन्तप्रदेशसम्बन्धिन्या मात्रया परिच्छिन्नत्वं कथमुपपद्यते, उपासकबुद्ध्यारोहार्थतया तथा

प्रादेशमात्रत्वप्रतिपादनं, न तु परिच्छिन्नत्वाभिप्रायेण। तत्रैव 'अभिविमान'मिति अभितो विगतमानत्वोक्तेः। तथाऽपि प्राकृतद्युमूर्द्धादिमत्त्वं अप्राकृतरूपस्य परमात्मनो न सम्भवतीति चेन्न। उपासनार्थं तथा पुरुषविधत्वकल्पनोपपत्तेः। परमात्मा वैश्वानरश्चेत् उरःप्रभृतीनां 'उरएव वेदिर्लोमानि बर्हिर्हृदयं गार्हपत्य' इत्यादिना कथं वेद्यादित्वोपदेशः, जाठरपरिग्रहे हि स उपपद्यतइति चेत्, उच्यते– तस्य वैश्वानरस्य समाराधनभूताया उपासकैरहरहः क्रियमाणायाः प्राणाहुतेरग्निहोत्रत्वसम्पादनार्थोऽयमुरःप्रभृतीनां वेद्यादित्वोपदेशः। अत एव प्राणाहुतेरग्निहोत्रत्वसम्पत्तिं परमात्मोपासनोचितफलञ्च दर्शयति श्रुतिः —'स य इदमविद्वानग्निहोत्रं जुहोति यथाऽङ्गारानपोह्य भस्मनि जुहुयात्तादृक्तत्स्यात् अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्त' इति। ननु परमात्मनो द्युप्रभृतिशरीरत्वमयुक्तं, उपासकस्य मूर्द्धाद्यवयवानामेव द्युप्रभृतित्वेनोपासनाविधानात्, 'तस्य ह वा एतस्ये'त्यादि ह्युपासकस्य द्युमूर्द्धत्वादिप्रतिपादकं, 'उर एव वेदि'रित्यादिसमभिव्याहारादिति चेत् सत्यं, उपासकद्युमूर्द्धत्वाद्यनुसन्धानं न परमात्मद्युमूर्द्धत्वादिविरोधि, उभयस्यापि विहितत्वात्। 'प्रादेशमात्र'मिति हि परस्य द्युमूर्द्धत्वादिकमुक्तं, तदीयमेव द्युमूर्द्धत्वादिकमुपासकस्याप्युक्तं, 'तस्य ह वा एतस्यात्मनो वैश्वानरस्ये'ति तदीयत्वेन परामृष्टमेव हि द्युमूर्द्धत्वादिकमुपासके वर्णितम्। अतः परस्य मूर्द्धादिना अहं द्युमूर्द्धा परस्य चक्षुषा सूर्येण अहं सूर्यचक्षुक इत्यादिरूपेणानुसन्धानपरस्य प्राणाग्निहोत्रेणाराधनं कार्यम्। तस्माद्विहोपक्रान्तो वैश्वानरः परमात्मेति सिद्धम्॥

संग्रहकारिके॥

वैश्वानरो न परमात्मतया नियन्तुं शक्यश्चतुर्विषयसंशयहेतुसत्त्वात्।
साधारणं हि जठराग्नितृतीयभूततद्दैवतस्य च पदं परमात्मनश्च॥

नैवं मुमुक्षुप्रश्नाच्च ब्रह्मशब्दश्रुतेश्च सः ।
तादृक्फलोपदेशाच्च परं ब्रह्मावधार्यते ॥

इति वैश्वानराधिकरणम् ॥६॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि-
द्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे
नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य
द्वि ती यः पा दः ॥

द्युभ्वाद्यायतनं स्वशब्दात् ॥१॥

मुक्तोपसृप्यव्यपदेशाच्च ॥२॥

नानुमानमतच्छब्दात्प्राणभृच्च ॥३॥

भेदव्यपदेशाच्च ॥४॥

प्रकरणात् ॥५॥

स्थित्यदनाभ्यां च ॥६॥

आथर्वणिकाःसमामनंति– 'यस्मिन् द्यौः पृथीवी चांतरिक्षमोतंमनस्सहप्राणैश्च सर्वैः तमेवैकंजानथात्मानमन्यावाचो विमुंचथ अमृतस्यैषसेतु'रिति । अत्र द्युभ्वाद्यायतनं जीवः परोवेति संशये जीवइति तावत्प्राप्तं, 'अराइव रथनाभौ संहतायत्र नाड्यः सएषोऽन्तश्चरते बहुधा जायमान' इति उत्तरमंत्रे नाड्याधारत्वशरीरांतस्संचारजन्मवत्त्वानां जीवलिंगानामाम्नानात्, तत्र आदिमन्त्रे 'ओतं मनस्सह प्राणैश्च सर्वै'रिति मनःप्राणाश्रयत्वरूपजीवलिंगाम्नानात्, 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंचधा संविवेश । प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन् विशुद्धे विभवत्येष आत्मे'त्यन्यत्र जीवे मनःप्राणयोरोतत्वश्रवणात् । द्युपृथिव्याद्यायतनत्वन्तु जीवस्य अदृष्टद्वारा सङ्गमयितव्यमित्येवं प्राप्तेऽभिधीयते,—

द्युभ्वाद्यायतनं परमात्मा, तदसाधारणामृतसेतुत्वश्रवणात्, अमृतसेतुत्वं ह्यमृतत्वप्रापकत्वं, सेतुर्हि नद्यादिषु कूलस्य प्रतिलम्भकः। एवं संसारार्णवपारभूतस्यामृतस्य प्रतिलम्भक इत्यर्थः । आत्मशब्दश्चात्र स्वशब्दः, सन्ध्याप्तेर्मन्प्रत्यये बाहुळके दकारे च सति निष्पन्नः। नियंतृत्वेन सर्वत्र व्याप्तिमति परमात्मन्येव मुख्यवृत्तिः । नाड्याधारत्वं परस्यापि सम्भवति 'सन्ततं सिराभिस्तु लम्बत्याकोशसन्निभ' मित्युपक्रम्य 'तस्याश्शिखाया- मध्ये परमात्मा व्यवस्थित' इत्याम्नानात्। बहुधा जायमानत्वमपि तस्यास्ति, 'अजायमानो बहुधा विजायते, अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् । प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायये' त्यादिश्रुतिस्मृतिदर्शनात् । किंच 'यदा पश्यः पश्यते रुक्मवर्णं कर्तारमीशं पुरुषं ब्रह्मयोनिं । तदा विद्वान् पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैति, यथा नद्यस्स्यन्दमानास्समुद्रेऽस्तं गच्छन्ति नामरूपे विहाय । तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैतिदिव्य' मिति मुक्तप्राप्यत्वश्रवणादपि द्युपृथिव्याद्यायतनं परमात्मा । अपि च यथाऽस्मिन् प्रकरणे प्रधानप्रतिपादकशब्दाभावात् न प्रधानं द्युपृथिव्याद्यायतनं, एवंजीवोऽपि, तत्प्रतिपादकशब्दस्याप्यभावात् । ननु इदं दृष्टांतदार्ष्टान्तिकद्वयमप्ययुक्तं । तथाहि— प्रधानस्य तावत् 'यस्मिन् द्यौ'रित्यादिरेव तच्छब्दः, अक्षरब्राह्मणे 'यदूर्ध्वं गार्गि दिवो यदवाक्पृथिव्या' इत्यादिना प्रधानस्य द्युपृथिव्यादिसकललोकाधारत्वप्रतिपादनात् 'यस्मिन् द्यौ' रित्यस्य यच्छब्दयोगेन तदनुवादत्वप्रतीतेः । न च तस्मिन् 'अमृतस्यैपसेतु' रिति व्यपदेशानुपपत्तिः । अमृतशब्दोह्यत्र ब्रह्मपरः, नत्वमृतत्वरूपमोक्षपरः । 'यस्मिन् द्यौ' रिति मन्त्रात्पूर्वं 'तदेतत्सत्यममृत' मिति 'आनन्दरूपममृतं यद्विभाती' ति च ब्रह्मणि अमृतशब्दाम्नानेन तस्यैव अत्रामृतशब्देन प्रत्यभिज्ञानात् । अतः प्रधानं 'अमृतस्यैपसेतु' रिति व्यपदेष्टुं शक्यम् । ब्रह्माधीनत्वेन ब्रह्मसंबन्धित्वात् । 'सेतु' रित्यपि व्यपदेष्टुं शक्यम् । सेतुशब्दोहि 'षिञ्बन्धन'इति धातोः व्युत्पत्तोबन्धहेतुमाचष्टे । न च बन्ध-

हेतुमात्रं जलबन्धहेतुमात्रं वा तदर्थः, घटोदरनिस्सरज्जलबन्धहेतुमधूच्छिष्टादौ तदप्रयोगात्, किंतु पारावारमध्यवर्तित्वविशेषितं जलबन्धनहेतुत्वं तदर्थः, तस्मादिह लक्षकेण सेतुशब्देन पारवत्त्वं लक्षयितुं युक्तं, सहजत्वात् शब्दार्थैकदेशत्वाच्च । न तु प्रापकत्वं, कादाचित्कत्वात् शब्दार्थबहिर्भूतत्वाच्च । पारवत्त्वन्तु प्रधानस्यैव अस्ति, न ब्रह्मणः, 'महद्भूतमनंतमपार' मिति श्रुतेः । आत्मशब्दोऽपि देहपरतया तस्मिन्नुपपद्यते, 'आत्मा जीवे धृतौ देह' इत्यादिस्मरणात् । 'अन्यावाचो विमुंचथे' त्येतदपि प्रधानमेव देहं जानीध्वं स्थूलदेहविषयास्तु देहत्ववाचो विमुंचथ देहविविक्तात्मज्ञानार्थं हि देहोमुमुक्षुभिर्ज्ञातव्यः, सतु न स्थूलदेहः, आगमापायिनः ततो विवेकस्य सुज्ञानत्वात् । किंतु अन्तःकरणादिरूपापन्नाव्याकृतात्मा सूक्ष्मदेह इति, तस्मात् प्रधानं द्युभ्वाद्याधार इति घटते । जीवइति पक्षेऽपि घटते, जीवोपकरणानां तेषां जीवाद्दृष्टायत्तोत्पत्तिस्थितिकत्वेन तदाश्रितत्वव्यपदेशोपपत्तेः । यथावा अरानाभौ समर्पिताएवमस्मिन् प्राणे सर्वं समर्पितमिति भूमविद्यायां, 'एवमेताभूतमात्राः प्रज्ञामात्रास्वर्पिताः' इति प्रतर्दनविद्यायांच, अचिद्वर्गस्य जीवाश्रितत्वप्रतिपादनाच्च । 'एषोऽणुरात्मा चेतसा वेदितव्यो यस्मिन् प्राणः पंचधा संविवेशे' ति 'प्राणैश्चित्तं सर्वमोतं प्रजानां यस्मिन्विशुद्धे विभवत्येषआत्मे' ति मुण्डकएव अग्रे मनसः प्राणानांच जीवाश्रितत्वप्रतिपादनात् । आत्मशब्दश्च तस्मिन्नुपपद्यते 'प्रणवोधनुश्शरोह्यात्मा ब्रह्म तल्लक्ष्यमुच्यते । अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवे' दिति प्राचीनमन्त्रे तत्रैव आत्मशब्दस्य प्रयुक्तत्वात् । 'तमेवैकं जानथात्मान' मित्येतदपि तस्मिन्नुपपद्यते ।

'मनोमयः प्राणशरीरनेता प्रतिष्ठितोऽन्ने हृदयं सन्निधाय । तद्विज्ञानेन परिपश्यन्ति धीरा आनन्दरूपममृत यद्विभाती' ति जीवविज्ञानस्य ब्रह्मदर्शनहेतुत्वोक्त्या तस्याप्राधान्येन अपेक्षितत्वात् । 'अन्या वाचो विमुञ्चथे' त्येतदपि तस्मिन्नुपपद्यते । 'धनुर्गृहीत्वौपनिषदं महास्त्रं शरंह्युपासानिशितं सन्दधीत । आयम्य तद्भावगतेन चेतसा लक्ष्यन्तदेवाक्षरं सोम्य

विद्धी' ति व्यवहितपूर्वमंत्रे देहस्थौल्यादिविशिष्टतया भासमानस्य जीवस्य उपासनया देहादिविवेकदार्ढ्यापादनेन तनूकरणोक्तेः, जीवोपासनायाञ्च तदन्यविषयवाग्विमोकावश्यम्भावात्। 'अमृतस्यैष सेतु' रिति व्यपदेशस्तु प्रधाने वर्णितयैव रीत्या जीवेप्युपपद्यते। तस्मात् प्रधानजीवपक्षयोः न काचिदनुपपत्तिरिति चेत् उच्यते– 'यस्मिन् द्यौ' रित्यादेरक्षरब्राह्मणोक्ताक्षररूपाधारान्तरसापेक्षद्युपृथिव्याद्याधारप्रधानानुवादकत्वन्तावदयुक्तम्। सन्मूलास्सोम्येमास्सर्वाः प्रजा' इत्यादि छान्दोग्यश्रुत्याज्ञातनिरपेक्षसर्वाधारब्रह्मानुवादकत्वे सम्भवति सापेक्षाधारानुवादकत्वकल्पनायोगात्। एवं च द्युभ्वादिसर्वाधारत्वोक्तिनिर्वाहार्थं अपेक्षितत्वेन आत्मशब्दस्य व्यापकत्वरूपार्थएव ग्राह्यः, समभिव्याहृतपदान्तरैकवाक्यत्वयोग्यएव लाक्षणिकार्थो ग्राह्यइति अत्राधिकरणे व्यवस्थापितत्वात्। एवं ब्रह्मैकान्तिकद्युपृथिव्याद्याधारत्वात्मश्रुत्यनुसारेण 'निष्कळं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अमृतस्य परं सेतुं दग्धेन्धनमिवानल' मिति श्वेताश्वतरे ब्रह्मणि अमृतसेतुत्वव्यपदेशदर्शनात्, तदनुसारेण 'अमृतस्यैषसेतु' रित्यस्य अमृतस्यस्वस्य स्वयमेव प्रापक इत्ययमर्थो ग्राह्यः; तथाऽपि उत्तरमन्त्रगता शरीरान्तस्सञ्चारोक्तिर्व्यापके ब्रह्मणि न युज्यत इति चेत् न। सुबालोपनिषदि– 'यस्य पृथिवी शरीरं यः पृथिवीमन्तरे सञ्चर' न्नित्यादिवाक्यसन्दर्भे सर्वनियन्तृतया सर्वत्र ब्रह्मणस्संचारत्वेन व्यपदेशदर्शनात्, इहापि तस्यास्तथात्वेन व्यपदेशोपपत्तेः। अपि च अस्मिन् प्रकरणे 'समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्टं यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोक' इति मंत्रः श्रूयते। अस्यार्थः— समाने एकस्मिन् वृक्षे वृक्षवद्वृश्चनार्हस्वभावे शरीरे निमग्नः पांसुपङ्कनिमग्नजलकण इव तदैक्यमापन्नः पुरुषो जीवः अनीशया प्रकृत्या मुह्यमानश्शोचति। अयं यदा स्वस्मादन्यं जुष्टं प्रीयमाणं प्रसीदन्तं सर्वस्येशं अस्यचेश्वरस्य निखिलजगन्नियमनरूपं महिमानं च पश्यति तदा वीतशोको भवतीति। अस्मिन् मंत्रे यद्यपि ब्रह्मवज्जीवोऽप्युपात्तः, तथाऽपि द्रष्टृत्वसमानाधिकरणं मुह्यमानत्वं दृश्यत्व-

समानाधिकरणमीशत्वं च व्यपदिशन्तीयं श्रुतिः 'तमेवैकं जानथे'ति ज्ञेयतया निर्दिष्टं द्युभ्वाद्याधारमीशमेव प्रत्यभिज्ञापयति । किं च प्रकरणमिदं परमात्मन इति प्रागक्षराधिकरणे दर्शितम् । अतोऽप्ययं परमात्मा । न च अक्षरप्रकरणादेव अक्षराधिकरणसिद्धात् द्युपृथिव्याद्याधारस्य परमात्मत्वसिद्धौ किमनेनाधिकरणेनेति शङ्कनीयम् । प्रकरणस्य नाडीसम्बन्धबहुधाजायमानत्वमनःप्राणाधारत्वादिभिः जीवैकान्तिभिः विच्छेदशङ्कायां तत्परिहारार्थत्वात् । अपि च अस्मिन्प्रकरणे 'द्वासुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते । तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्नन्यो अभिचाकशीती'ति मंत्रः श्रूयते । अत्र यद्यपि कर्मफलात्ता जीवः तदनश्नन् दीप्यमानः परमात्मा च प्रतिपाद्यते, तथाऽपि द्युभ्वाद्याधारः परमात्मैवेति युक्तं, दीप्यमानत्वोक्त्या तत्रैव प्राकरणिकसर्वज्ञत्वाद्यन्वयस्वारस्यात् । अनेन सूत्रेण सर्वविज्ञानप्रतिज्ञोपक्रमात् 'ब्रह्म वेद ब्रह्मैव भवती'त्युपसंहाराच्च जीवब्रह्माभेदे प्रकरणस्य तात्पर्यमिति शङ्कानिराकरणमपि कृतम् । 'अभि, अनश्न'न्नित्युपपत्तिसहितभेदव्यपदेशेन तयोर्भेद एव सिद्ध्येदिति ॥

सङ्ग्रहकारिके ॥

द्युभ्वाद्यायतनं जीवो मनःप्राणान्वयश्रुतेः ।
समनन्तरमन्त्रे च नाडीयोगजनिश्रुतेः ॥
परमेश्वर एव स्यात् सर्ववस्तुविधारकः ।
अमृतप्रापयितृताप्रमुखप्रतिपादनात् ॥

इति द्युभ्वाद्यधिकरणम् ॥१॥

भूमा सम्प्रसादादध्युपदेशात् ॥७॥
धर्मोपपत्तेश्च ॥ ८ ॥

मुण्डकेपरमात्मप्रकरणाविच्छेदेन परमात्मत्वं साधितम्, तर्हि भूमविद्यायाः जीवप्रकरणाविच्छेदेन जीवपरत्वमिति शङ्कया उत्थानात्सङ्गतिः । छन्दोगास्समामनंति । 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजा-

नाति स भूमा यत्रान्यत्पश्यत्यन्यच्छृणोत्यन्यद्विजानाति तदल्प' मिति । भूमशब्दः 'पृथ्वादिभ्य इमनिज्वे' ति पृथ्वादिगणपठितात् बहुशब्दात् भावार्थे इमनिच्प्रत्यये 'बहोर्लोपो भूच बहोरि' ति बहोः परस्य इमनिचः इकारलोपे बहुशब्दस्य भूइत्यादेशे च सति निष्पन्नो बहुत्ववाची । यद्यपि बहुत्वं वैपुल्यं संख्याविशेषश्च । तथाऽप्यत्र वैपुल्यमर्थः, 'यत्रान्यत्पश्यति तदल्प' मित्यल्पप्रतियोगित्वश्रवणात्, पूर्वत्र 'आकाशोवाव तेजसो भूया' नित्यादौ बहुत्वसंख्याहीनेऽप्याकाशादिके वैपुल्यवति बहुशब्दनिष्पन्नभूयश्शब्ददर्शनाच्च । भूमशब्दोऽयमल्पशब्दनिर्दिष्टधर्मिप्रतियोगिविषयत्वादेव धर्मिपरः, न धर्ममात्रपरः । ततश्च भूमेति विपुल इत्यर्थः । वैपुल्यविशेष्यश्चात्मा । 'तरति शोकमात्मवि' दिति प्रकृत्य भूमानमुपादिश्य 'आत्मैवेदं सर्व' मित्युपसंहारात् । तत्र किमयं भूमविशिष्टः प्रत्यगात्मा परमात्मा वेति संशये प्रत्यगात्मेति तावत्प्राप्तम् । आत्मजिज्ञासयोपसेदुषे नारदाय नामादिप्राणपर्यन्तेषु उपास्यतयोपदिष्टेषु 'अस्ति भगवो नाम्नो भूयः, अस्ति भगवो वाचो भूय' इत्यादिप्रश्नतत्प्रतिवचनवच्च 'अस्ति भगवः प्राणाद्भूय' इति प्रश्नस्य 'अदोवाव प्राणाद्भूय' इति प्रतिवचनस्यचाभावेन आत्मोपदेशस्य प्राणपर्यन्तताप्रतीतेः प्राणशब्दस्य प्राणसहचरिते प्रत्यगात्मनि वृत्त्युपपत्तेः, 'प्राणोह पिता प्राणो माता प्राणो भ्राता प्राणस्स्वसे' त्यादिचेतनवाचिपित्रादिशब्दसामानाधिकरण्याच्च पित्रादिरूपजीववाचित्वावगमात्, नत्वयमात्मोपदेशः परमात्मविषय इति युक्तम् । 'स यदि पितरं वा मातरं वा भ्रातरं वा स्वसारं वा आचार्यं वा ब्राह्मणं वा किञ्चिद्भृशमिव प्रत्याह धिक्त्वास्त्वित्येवैनमाहुः पितृहा वै त्वमसि मातृहा वै त्वमसी' त्यादिना सप्राणेषु पित्रादिषु अधिक्षिप्यमाणेषु हिंसोपक्रोशवचनात् । 'अथ यद्यप्येनानुत्क्रान्तप्राणान् शूलेन समासं व्यतिषन्दहेन्नैवैनं ब्रूयुः पितृहासीति न मातृहासी' त्यादिना तेषु उत्क्रान्तप्राणेषु शूलेन सम्यक्प्रक्षेपपूर्वकं व्यत्यस्य समन्तादह्यमानेष्वपि हिंसाव्यवहाराभाववर्णनाच्च । न हि परस्य हिंस्यत्वमस्ति, न वा तस्योत्क्रान्तिरस्ति । न च प्राणशब्दोक्तजीवप्रतिपा-

दनानन्तरं 'एष तु वा अतिवदति यस्सत्येनातिवदती' ति तुशब्देन तत्प्रकरणविच्छेदद्योतनात् ततःप्रभृति सत्यशब्दोक्तपरमात्मप्रकरणमिति तस्मिन् प्रकरणे प्रतिपाद्यमानो भूमा परमात्मैव स्यादिति शङ्कनीयम् । 'सवा एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवती' ति प्राणवादिनो यदतिवादित्वं स्वोपास्यस्यान्यतउत्कर्षवादित्वरूपमुक्तं तस्य 'एषतुवा' इति वाक्ये प्रत्यभिज्ञानेन प्रकरणविच्छेदाभावात् । 'एष तु वा अग्निहोत्री यस्सत्यं वदती' त्युक्तौ प्रसिद्धाग्निहोत्रिण इव प्रकृतप्राणातिवादिनस्सत्यवदनमङ्गं विधीयते, सत्येव तु सत्यवचने अग्निहोत्रित्ववत् प्राणातिवादित्वं प्रतिष्ठितं भवतीत्येतदर्थतया तुशब्दसामञ्जस्यात् । तस्मात् प्रत्यगात्मैवात्र प्रतिपाद्यः । अत एव 'अहमेवाधस्तादहमुपरिष्टा' दित्यारभ्य 'अहमेवेदं सर्वं' मित्युपसंहारे प्रत्यगात्मन एव वैभवमुपदिश्यते, तस्य च भूमशब्देन 'अहमेवाधस्ता' दित्यादिनाचोक्तं वैपुल्यं मुक्तौ धर्मज्ञानविकासादुपपद्यत' इति । एवं प्राप्ते सिद्धांतः—

'एषतु वा अतिवदति यस्सत्येनातिवदती' त्यत्र तुशब्दसत्यशब्दाभ्यां प्राणातिवादिनोऽन्यः सत्यातिवादी प्रतीयते । 'अपशवोवा अन्ये गोअश्वेभ्यः पशवो गोअश्वा' नित्यत्र पश्वन्तरेभ्योगोअश्ववत् प्रकृतप्राणातिवादिनः सत्यातिवादी प्रशस्त इत्यपि प्रतीयते । ततश्च तस्मादेतस्य प्राशस्त्यं तदतिवदननिमित्तात् प्राणात् एतदतिवदननिमित्तस्य सत्यस्याधिक्येनैवेति पर्यवस्यतीत्यनेन वाक्येन प्रकृताज्जीवात् अधिकत्वेन भूमोपदिश्यते । नचात्र 'एषतु वा अग्निहोत्री' ति वाक्यन्यायावतारः, तत्रहि द्रव्यदेवताऽन्तराभावेन अग्निहोत्रांतराप्रतीतेः तुशब्दस्वारस्यभङ्गः, इह प्रकृतातिवदननिमित्तप्राणव्यतिरिक्तसत्यशब्दोक्त परमात्मरूपातिवदननिमित्तान्तरप्रतीतेः किमिति तत्स्वारस्यभङ्गः कार्यः । सत्यशब्दोहि परमात्मवाचकः, छांदोग्यएव 'तस्य ब्रह्मणोनाम सत्यमिती' ति श्रवणात् । 'सत्येने' ति तृतीयाविभक्तिः करणत्ववाचिनी तस्यातिवदननिमित्तत्वमाह । अतस्तुशब्दसत्यनामकरणविभक्तिस्वारस्यभङ्गेन प्रकृतप्राणातिवादिविषयत्वक-

कल्पनाया नावकाशः। अतश्च प्रकृतात् प्राणशब्दोक्तात् जीवादधिकत्वेनो-पदेशात् सत्यशब्दोक्तोभूमा परमात्मा । नच 'महतःपरमव्यक्त' मिति श्रुतौ जीवादधिकत्वेनोपदिष्टे शरीरे व्यभिचारान्नायं हेतुरिति वाच्यम्। जीवाधिकात्मत्वेनोपदेशे तात्पर्यात् । एवं निरतिशयानन्दत्वश्रवणादपि भूमा परमात्मा । ननु सत्यशब्दोक्तोभूमैव प्रकरणी परमात्मा, प्राणशब्दोक्तोजीवस्तु तदधस्तनपर्वभूत इति सिद्धांते 'अस्ति भगवोनाम्नोभूयः वाग्वावनाम्नोभूयसी' त्यादि प्रश्नप्रतिवचनवत् 'अस्ति भगवन् प्राणाद्भूय' इति 'सत्यंवावप्राणाद्भूय'इति भाव्यं प्रश्नप्रतिवचनाभ्यां । न हि यदर्थमन्यत्प्रक्रांतं तदनुक्तिर्युक्तेतिचेत्, उच्यते—पूर्वपर्यायेष्वनुक्तस्यातिवादित्वस्य प्राणपर्याये प्रतिपादनात् उपक्रांतात्मोपदेशः प्राणएव समाप्त इति मत्वा नारदे भूयः पृच्छति सनत्कुमारः प्राणविज्ञानमप्युपक्रांतात्मविषयं नभवतीति न तेन सम्यगतिवादित्वं किंतु सत्येन परमात्मनेति सत्यविज्ञानं स्वयमेव उपचिक्षेप, ततः 'सोहं भगवस्सत्येनातिवदानी' ति पृष्टवते तस्मै विज्ञानमतिश्रद्धादिसाधनरपरंपरया तमेव सत्यशब्दोक्तं परमात्मानं भूमानमुपदिदेश इत्येवमन्यथोपपन्नौ प्रश्नप्रतिवचनाभावौ । ननु 'यत्रनान्य' दित्यादिविषयवाक्यस्य यस्मिन् अधिकरणे अन्यन्नपश्यतीत्याद्यर्थप्रतीतेः ब्रह्मणि दर्शनश्रवणादिगोचरस्य सर्वस्य मिथ्यात्वेन निर्विशेषविषयन्तद्भूमवाक्यं प्रतिभाति, कथन्तदनन्तकल्याणगुणाकरस्य भगवतः प्रतिपादकं वर्ण्यते, कथञ्च 'नपश्योमृत्युं पश्यति नरोगं नोत दुःखताम् । सर्वं हि पश्यः पश्यति सर्वमाप्नोति सर्वश' इति मन्त्रेण भूमदर्शिनः सर्वदर्शित्वं वर्णयताऽपि दुःखादर्शनं प्रतिपाद्यते । उच्यते— तत्र 'यस्मि' न्नित्यत्र अनुभूयमानइत्यध्याहारः कार्यः । न हि ब्रह्मसद्भावमात्रात्तस्मिन्नन्यस्यादर्शनादिकं भवति, अस्मदादीनामपि दृश्यदर्शनाद्यभावापत्तेः । 'यत्रे' त्यस्य च निजसकलगुणविभूतिविशिष्टइत्यर्थः । भूमशब्दस्य ब्रह्मशब्दवत् त्रिविधपरिच्छेदराहित्यार्थकत्वात् तद्वैशिष्ट्येन च दर्शने सत्येव च सर्वस्य तदन्तर्गतत्वात् निजसकलगुणविभूतिविशिष्टात् तस्मादन्यस्य ततः पृथग्भूतस्यादर्शनादिव-

चनमुपपद्यते । यदितु विभूतिरैश्वर्यं नियमनरूपं, तदा तन्नियाम्यस्य प्रतीतिसापेक्षमिति नियाम्यरूपप्रतियोगितया सर्वस्यापि दर्शनादिकमपेक्षितं । अस्त्वेवं, तथापि कथं दुःखादर्शनमुपपादनीयं, भूमविभूत्यन्तर्गततया सकल संसारिगतदुःखानामपि दर्शनस्यानिवारणात् । ततश्च समन्वयाधिकरणोक्तरीत्या सुखसाक्षात्कारमात्रस्य पुरुषार्थत्ववत् दुःखसाक्षात्कारमात्रस्य हेयत्वं वाच्यमिति भूमानं पश्यतो मुक्तस्य संसारदशापेक्षयाऽप्यधिकदुःखानुभवत्वं स्यात् । न च ब्रह्मविभूतितया अनुभूयमानं सर्वं सुखरूपमेव स्यादितिवाच्यं। ब्रह्मणोऽन्यतया संसारिभिरनुभूयमानं दुःखरूपं परिमितसुखरूपञ्च भवत् ब्रह्मविभूतित्वेनानुभूयमानं सुखरूपं भवतीत्यस्य विरुद्धत्वात्, एकस्यसुखदुःखोभयरूपतानुपपत्तेरितिचेत्,उच्यते-कर्मवश्यैर्ब्रह्मान्यत्वेनानुभूयमानं जगत् तेषां तत्तत्कर्मानुरूपं दुःखरूपं परिमितसुखरूपञ्च भवति, कर्मरूपाविद्याविमुक्तस्य तदेव जगत् विभूतिगुणविशिष्टब्रह्मानुभवान्तर्गतं सुखमेव भवति, यथा पित्तोपहतेन पीयमानं पयः पित्ततारतम्येन दुःखरूपमल्पसुखञ्च भवति, तदेव पयः पित्तानुपहतेन पीयमानं सुखात्मकमेव भवति, यदा हि यदनुभूयमानं पुरुषानुकूलं भवति तदा तत्सुखं,यदातदननुकूलं तदा तदेव दुःखं । अतएव हिमातपादीनां निदाघहेमंताद्यवस्थाभेदेन सुखदुःखोभयरूपत्वमिति न काचिदनुपपत्तिः । यत्तु 'अहमेवाधस्ता' दित्यादिना सर्वात्मत्वमुपदिष्टं तत् ब्रह्मणः अहंग्रहोपासनार्थं, 'सएवाधस्ता' दित्यादि 'सएवेदं सर्व' मित्यन्तस्य स्वरूपेणोपासनार्थं, 'आत्मैवाधस्तादित्यादि 'आत्मैवेदं सर्वं' मित्यन्तं विद्वदन्तर्यामित्वेनोपासनार्थं, 'तस्यह वा एतस्यैवंपश्यत एवं मन्वानस्यैवं विजानत आत्मतः प्राणआत्मतआशा आत्मतस्स्मर' इत्यादिना प्रकृतादात्मनः प्राणाद्युत्पत्तिप्रतिपादने प्रकृतस्यात्मनो विद्वांसं प्रत्यात्मत्वं विशिष्योक्तं । एवं त्रेधा तस्य सार्वात्म्योपदेशः त्रिविधोपासनासिद्ध्यर्थ इति न कस्यापि वैयर्थ्यमिति विवेक्तव्यम् ॥

संग्रहकारिकाः ॥

भूमा प्राणस्तस्मात् ऊर्ध्वंशाम्न इव वागादेः ।

प्रश्नप्रतिवचनाभ्यां विनैव भूम्नोऽवतारणतः ॥
प्राणश्च जीवएव स्फुटमात्मोपक्रमोपसंहारात् ।
मातृत्वादिश्रवणात् हिंस्यत्वोक्तेरहंत्ववचनाच्च ॥
सत्यं प्राणो जीवः स न भूमा किं तु पुरुष एव परः ।
एष तु वा अतिवदतीत्यत्र तुशब्देन पूर्वविनिवृत्तेः ॥
निरतिशयानन्दत्वश्रवणादपि यत्र नान्यदित्यादौ ।
अहमेवाधस्तादित्यहं ग्रहो दर्शितस्तस्मिन् ॥
इति भूमाधिकरणम् ॥२॥

अक्षरमम्बरान्तधृतेः ॥९॥
सा च प्रशासनात् ॥ १० ॥
अन्यभावव्यावृत्तेश्च ॥११॥

यथा जीवादूर्ध्वमुपदेशात् भूमा न जीवः, एवं प्रधानादूर्ध्वमुपदेशात् अक्षरं न प्रधानमिति समर्थ्यतइति सङ्गतिः । वाजसनेयिनस्समामनंति– 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलमनण्वह्रस्वमदीर्घमलोहितमस्नेहमच्छाय' मित्यादि । अत्राक्षरं प्रधानं परमात्मावेति संशये प्रधानमिति तावत्प्राप्तम् । 'अक्षरात्परतः पर' इत्यादिषु अक्षरशब्दस्य प्रधाने प्रयोगात् । तथा 'तदक्षरमधिगम्यत' इत्यादिषु परमात्मनि तस्य प्रयोगसत्त्वेऽपि प्रमाणान्तरप्रसिद्धश्रुतिप्रसिद्धयोः प्रधानपरमात्मनोर्मध्ये प्रमाणांतरप्रसिद्धस्य प्रधानस्य झटिति बुद्ध्यारोहेण प्रथमप्रतीतत्वात् अनुमानस्य प्रत्यक्षमात्रापेक्षा श्रुतेर्व्युत्पत्तिग्रहादावुभयापेक्षेति आनुमानिकस्याक्षरस्य श्रुतिप्रतिपन्नात् परमात्मनश्शीघ्रप्रतीतिकस्य श्रुतिलिंगादिषु पूर्वपूर्वस्य उत्तरोत्तरस्मादिव ततः प्रबलत्वात् अस्थूलत्वादीनां प्रधानेऽपि संभवेन भूतयोन्यक्षरइव परमात्मैकांतिकलिङ्गाभावात् । एवंप्राप्तेसिद्धांतः—

अक्षरंपरमात्मा, नाव्याकृतं प्रधानम्। 'एतस्मिन् खल्वक्षरे गार्ग्याकाशओतश्च प्रोतश्चे' त्यव्याकृताधारतयाऽक्षरस्योपदेशात्। स्यादेतत्, आकाशशब्दोऽयं भूताकाशपरोऽस्तु,प्रसिद्ध्यतिलङ्घनायोगात्। यद्युच्येत अक्षरब्राह्मणात्पूर्वे गार्गिब्राह्मणे गार्गियाज्ञवल्क्ययोः प्रश्नोत्तरपरंपरायां 'यदिदं सर्वमप्स्वोतञ्च प्रोतञ्च कस्मिन्नु खल्वापओताश्च प्रोताश्चेति वायौ गार्गीति कस्मिन्नु खलु वायुरोतश्च प्रोतश्चेति अन्तरिक्षलोकेषु गार्गी'त्यारभ्य, 'ब्रह्मलोकेषु गार्गी' त्यन्तेन सन्दर्भेण पृथिवीसलिलवाय्वन्तारिक्षलोकगन्धर्वलोकादित्यलोकचन्द्रलोकनक्षत्रलोकदेवलोकेंद्रलोकप्रजापतिलोकब्रह्मलोकानां पूर्वपूर्वस्य उत्तरोत्तरस्मिन् ओतत्वप्रोतत्ववर्णनानन्तरं 'कस्मिन्नु खलु ब्रह्मलोका ओताश्च प्रोताश्चे'ति पुनः पृष्टे याज्ञवल्क्येन 'गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपसदनतिप्रश्न्यां वै देवतामतिपृच्छसि मातिप्राक्षी' रिति सक्रोधमुक्ता भीता गार्ग्युपरराम। अनेन ब्रह्मलोकांतसकललोकाधारतया वक्तव्या महती काचिद्देवतेति सूचितं। ततश्च बहुब्राह्मणेषु याज्ञवल्क्यविजिगीषया तेन सह जल्पकथायां पर्यायेण प्रवर्तमानेष्वनुप्रविष्टा गार्गी तदानीं भीत्योपरताऽपि स्वोपरमानन्तरमुद्दालके प्रसिद्धब्रह्मविदि सूत्रमन्तर्यामिणश्च पृष्टवति याज्ञवल्क्येन जिते सर्वेषां ब्राह्मणानामेव पराजयोजायते, समाभूदिति मन्यमाना याज्ञवल्क्यं प्रक्ष्यामीति ब्राह्मणाननुज्ञाप्य 'अहं वै याज्ञवल्क्य यथा काश्योवा वैदेहोवा उग्रपुत्रउज्ज्यं धनुरधिज्यं कृत्वा द्वौ बाणवन्तौ शरौ सपत्नातिव्याधिनौ हस्ते कृत्वोपोत्तिष्ठेदेवमेवाहं त्वा द्वाभ्यां प्रश्नाभ्यां उपोदस्थां तौ मे ब्रूही' ति द्वितीयप्रश्ननिवारणपरिजिहीर्षया प्रश्नद्वयानुज्ञां युगपदेव याज्ञवल्क्यं प्रति पृष्ट्वा पृच्छेति तदनुज्ञाता 'यदूर्ध्वं याज्ञवल्क्य दिवो यदवाक्पृथिव्या यदन्तरा द्यावापृथिवी इमे यद्भूतञ्च भवच्च भविष्यच्चेत्याचक्षते कस्मिन् तदोतञ्च प्रोतञ्चे' ति पृष्ट्वा 'यदूर्ध्वं गार्गि दिव' इत्यादिना 'आकाशएव तदोतञ्च प्रोतंचे' त्यन्तेनोत्तरिते 'कस्मिन्नु खल्वाकाशओतश्च प्रोतश्चे' ति द्वितीयप्रश्नस्य उत्तरतया 'एतद्वैतदक्षर' मित्यादि 'एतस्मिन् ख-

स्वक्षरे गार्ग्याकाशओतश्च प्रोतश्चे' त्यन्तं कृत्स्नमक्षरब्राह्मणं प्रवृत्तं। तत्र गार्गिब्राह्मणांते याज्ञवल्क्येन यः प्रश्नस्सक्रोधं निवारितः, सएव खलु गार्ग्या सर्वेषां ब्राह्मणानां पराजयोभविष्यतीति भीतया तस्य क्रोधमविगणय्य पुनरवतारितः। अनेन ब्रह्मलोकान्तसकललोकाधारतया प्राग्वक्तव्यतया उपाक्षिप्ता देवता सेह आकाशशब्देनोदितेति सूचितं। एवञ्च कथमयमाकाशशब्दो भूताकाशपरस्स्यादिति तर्हि प्रधानपरोपि नस्यात्, तस्यापि देवतात्वाभावात्। तस्मात् प्रधानपरत्ववादिना इत्थं समाधेयं। पूर्वं ब्रह्मलोकांतसकललोकाधारप्रश्ने यदव्यवहितोत्तरं तत्परदेवताविषयमित्याशयेन न तन्निवारणं, किंतु धृष्टैषा तस्याप्याधारं प्रक्ष्यति, सप्रश्नः परदेवताविषयोभविष्यतीति दूरदृष्ट्या तन्निवारणं कृतमिति, तस्याकाशशब्दस्य भूताकाशविषयत्वेप्येवमेव समाधातुं शक्यमिति चेत्, उच्यते–'यदूर्ध्वं गार्गि दिव' इत्यादिना 'आकाशएव तदोतञ्च प्रोतञ्चे' त्यन्तेन यदाकाशस्य सर्वविकाराधारत्वमुक्तं, न तत् आकाशशब्दस्य भूताकाशपरत्वे घटते, तस्यापि विकारांतर्गतत्वात्, तस्मादिहाकाशपदमव्याकृतपरमिति तस्याप्याधारतयोपदिश्यमानमक्षरं परमात्मैव। नाव्यक्तम्। यत्तु श्रुतिप्रसिद्धात् प्रमाणांतरप्रसिद्धं प्रथमं प्रतीयत इति तन्न। अक्षरशब्दस्य अश्नोति व्याप्नोतीति अवयवशक्त्या स्वार्थप्रतिपादने प्रमाणान्तरानपेक्षणात् व्युत्पत्तिदशायामर्थस्वरूपं येन प्रमाणेनावगतं तस्य प्रतिपादनदशायामनुपयोगात्। उक्तं हि वार्तिके—'अर्थबोधेनपेक्षत्वान्मानांतरमनादृतं। व्युत्पत्त्युपायभूतं यत् तच्च तन्मात्रएव त्वि' ति। किंच गोशब्दादिसम्बन्धग्रहविषयसास्नावद्व्यक्त्यादिष्विव प्रधाने प्रत्यक्षं न प्रवर्तते, अनुमानमपि सांख्याद्यभिमतं तत्र न प्रवर्ततइति सांख्याधिकरणे वक्ष्यते, ततश्च ब्रह्मवत् प्रधानमपि श्रुत्येकगम्यमिति न प्रसिध्यप्रसिद्धिकृतोऽपि तयोर्विशेषः, तस्मात् सर्वविकाराधारत्वलिंगेन आकाशशब्दोदितमव्याकृतमित्यवगमात्, अक्षरशब्दोदित मव्याकृतमित्यत्र हेत्वसिद्धेश्च, आकाशशब्दोदितस्य अव्याकृतस्याधारतयोच्यमानमक्षरं परमात्मैव। 'तद्वा एतदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं

श्रोतृ अमतं मन्तृ अविज्ञातं विज्ञातृ' इति द्रष्टृत्वाद्युपदेशादप्यक्षरं परमात्मा, नत्वव्याकृतं। ननु तर्ह्यक्षरं जीवोस्तु, तत्र दर्शनाद्यविषयत्वस्य दर्शनादिमत्त्वस्य चोपपत्तेः। 'यथा वा अरानाभौ समर्पिता एवमस्मिन् प्राणे सर्वं समर्पित' मिति श्रवणेन तस्य सकलाचिद्वर्गाधारत्वोपपत्तेश्चेतिचेत् मैवं–'एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठत' इत्यादिना प्रशासनाधीनधारकत्वश्रवणात्। यद्यपि पर्यायेण देवमनुष्यादिजन्मवति जीवेपि द्यावापृथिव्यादिशासितृत्वं तत्तदधिकारोपयुक्तजन्मप्राप्त्या कथंचित्समर्थयितुं शक्यं, तथापि निरपेक्षशासितृत्वरूपं प्रकृष्टशासितृत्वं तत्पूर्वकचन्द्रसूर्यादिधारकत्वञ्चास्मिन्नसम्भवत्येव। किंच सर्वैरदृष्टस्य सतस्सर्वद्रष्टृत्वादिकं 'नान्यदतोऽस्ति द्रष्टृ नान्यदतोऽस्ति श्रोतृ' इत्यादिना क्रियमाणं द्रष्ट्रन्तरनिषेधादिकञ्च जीवे नोपपद्यते, किंतु अन्तर्याम्यधिकरणोक्तरीत्या परमात्मन्येवोपपद्यते। तस्मादक्षरं परमात्मैव॥

संग्रहकारिकाः॥

अक्षरमनुमितिगम्या प्रकृतिर्नागमनिरूपितं ब्रह्म।
अनुमानमक्षरमात्रापेक्षं सहि तद्व्यापेक्षः॥
नैवमव्याकृतधृतेः श्रौतं ब्रह्म तदक्षरं।
श्रुतेरपेक्षा व्युत्पत्तौ न त्वर्थप्रतिपादने॥
द्रष्टृत्वश्रोतृत्वप्रमुखा नाव्याकृतं हि पश्यंति।
न च जीवोऽक्षरमेतत् प्रशासितृत्वादिवैधर्म्यात्॥

इति अक्षराधिकरणम्॥ ३॥

ईक्षतिकर्मव्यपदेशात्सः॥ १२॥

प्रश्नोपनिषदि– 'सयोह वै तद्भगवन्मनुष्येषु प्रायणांतमोंकारमभिध्यायीत कतमं वाव स तेन लोकं जयती' ति पिप्पलादं प्रति सत्यकाम-

प्रश्ने 'एतद्वै सत्यकाम परञ्चापरञ्च ब्रह्म यदोङ्कारस्तस्माद्विद्वानेतेनैवायतनेन एकतरमन्वेती'ति तत्प्रतिवचनमुपक्रम्य 'स यद्येकमात्रमभिध्यायीत स तेनैव संवेदितस्तूर्णमेव जगत्यामभिसम्पद्यते तमृचो मनुष्यलोकमुपनयन्ते स तत्र तपसा ब्रह्मचर्येण श्रद्धया सम्पन्नो महिमानमनुभवत्यथ यो द्विमात्रेण मनसि सम्पद्यते सोऽन्तरिक्षं यजुर्भिरुन्नीयते सोमलोकं स सोमलोके विभूतिमनुभूय पुनरावर्तत' इत्येकमात्रमोङ्कारमुपासीनस्य तत्प्रथममात्रात्मकऋक्प्रापणीयमनुष्यलोकप्राप्तिफलं द्विमात्र तमुपासीनस्य तद्द्वितीयमात्रात्मकयजुःप्रापणीयांतरिक्षलोकप्राप्तिफलञ्चाभिधाय इदमाम्नायते— 'यः पुनरेतं त्रिमात्रेण ओमित्यनेनैवाक्षरेण परंपुरुषमभिध्यायीत स तेजसि सूर्ये संपन्नो यथा पादोदरस्त्वचा विनिर्मुच्यत एवं हैव स पाप्मना विनिर्मुक्तः स सामभिरुन्नीयते ब्रह्मलोकं स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षत'इति। अत्र ध्यातव्यः परमपुरुषएवेक्षणीयः। फलफलिनोरीक्षणध्यानयोरेकविषयत्वनियमात्, 'परं पुरुष' मित्यत्र परत्वावधित्वेन विवक्षितस्यापि केभ्यश्चित् परत्वसम्भवेन 'परात्परं पुरिशयं पुरुष' मिति निर्देशस्य ततो भेदावहत्वाभावादिति स्थिते ध्यातव्य ईक्षणीयश्च पुरुषः किं जीवसमष्टिरूपश्चतुर्मुखः, उत सर्वेश्वर इति संशये चतुर्मुख इति तावत्प्राप्तम्। ब्रह्मलोकशब्दोदितचतुर्मुखलोकगतेनेक्ष्यमाणत्वात्। न च ब्रह्मलोकशब्दो भगवल्लोकपर इति वाच्यम्। मनुष्यलोकान्तरिक्षलोकप्रायपाठेन तस्यापि प्राकृतचतुर्मुखलोकपरत्वात्। न च जीवघनशब्दो जीवसमष्टिरूपचतुर्मुखवाचीति तस्मात्परः पुरुषस्सर्वेश्वर एव स्यादिति वाच्यम्। तस्य व्यष्टिजीवसंघातवाचित्वोपपत्तेः। 'घनाः कठिनसंघातमेघकाठिन्यमुद्गरा' इति संघातेऽपि घनशब्दस्मरणात्। न च तथाऽपि व्यष्टिजीवसंघातात् परस्समष्टिजीव इति तस्मात्परः पुरुषस्सर्वेश्वर एव स्यादिति वाच्यम्। देहेन्द्रियादिभ्यः पराद्व्यष्टिजीवसंघातात् चतुर्मुखस्य परत्वोपपत्तेः। परजीवघनशब्दयोस्सामानाधिकरण्यसम्भवे वैयधिकरण्यकल्पनायोगात्। न च 'ऋग्भिरेतं यजुर्भिरन्तरिक्षं सामभिर्यत्तत्कवयो वेदयन्ते तमोङ्कारेणान्वेति विद्वान् यत्तच्छांत

मजरममृतमभयं परञ्चे' ति तदनन्तरश्लोकोक्तममृतत्वादिकं सर्वेश्वर एवान्वेतीति तदनुसारेण परः पुरुषस्सर्वेश्वरस्स्यात् ध्यातव्यस्यैव प्राप्यत्वादिति वाच्यम् । उपक्रमानुसारेण औपसंहारिकामृतत्वादेश्चतुर्मुखएवापोक्षिकामृतत्वादिरूपतया अन्वयोपपत्तेरिति । एवं प्राप्ते सिद्धान्तः—

ईक्षतिकर्म परमात्मा । उत्तरमन्त्रगतात् अमृतत्वादिव्यपदेशात्, एतस्माज्जीवघनात्परात्पर' मिति व्यपदेशाच्च जीवत्वाविशेषेण हिरण्यगर्भस्यापि जीवघनकोटिनिविष्टत्वात् । ब्रह्मलोकशब्दश्च भगवल्लोकपरः । सर्वपापविनिर्मुक्तप्राप्यत्वात् । 'यत्तत्कवयो वेदयन्त' इत्यत्र 'तद्विष्णोः परमं पदं सदा पश्यंति सूरय' इत्यादिश्रुत्यन्तरसिद्धकविशब्दोक्तसूरिदृश्यत्वलिङ्गात् 'एतद्वै सत्यकामे'त्यादिना उपक्रान्तपरोपासनाप्रकरणाच्च लिंगप्रकरणैः प्रायपाठस्य बाधेन तस्य अकिञ्चित्करत्वात् । ननु उपक्रमे परोपासनावत् अपरोपासनस्यापि श्रवणात् तदपि निरूपणीयमिति चेत् सत्यम् । पूर्वमेव तन्निरूपितम् । पूर्वं हि तदुपासनं ऐहिकामुष्मिकत्वेन द्विधा विभज्य एकमात्रप्रणवेन तदुपासनस्य मनुष्यलोकावाप्तिं, द्विमात्रप्रणवेन तदुपासनस्य स्वर्गावाप्तिञ्च उपन्यस्य हि त्रिमात्रप्रणवेन परमपुरुषोपासनं प्रक्रान्तम् । तस्मात् ध्यानेक्षणविषयभूतः परः पुरुषः सर्वेश्वर इति सिद्धम् ॥

संग्रहकारिके ॥

आदिष्टस्सत्यकामं प्रति हि पुरिशयः पूरुषोऽत्रेप वेधाः
पुंसा लोकं तदीयं समधिगतवता वीक्ष्यमाणत्वलिङ्गात् ।
उक्तोऽत्र ब्रह्मलोको न भवति हि परब्रह्मलोकस्तदा हि
स्यादुक्तैकद्विमात्रप्रणवविदि फलप्रायपाठस्य बाधः ॥
विष्णुरेप विजरामृततोक्तेः सर्वजीवपरताव्यपदेशात् ।
ब्रह्मलोकमिति तत्पदमुक्तं लिंगतो भवतु सन्निधिबाधः ॥

इति ईक्षतिकर्माधिकरणम् ॥४॥

दहरउत्तरेभ्यः ॥१३॥
गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गञ्च ॥१४॥
धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥१५॥
प्रसिद्धेश्च ॥ १६ ॥
इतरपरामर्शात्स इति चेन्नासम्भवात् ॥१७॥
उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥१८॥
अन्यार्थश्च परामर्शः ॥१९॥
अल्पश्रुतेरितिचेत्तदुक्तम् ॥२०॥
अनुकृतेस्तस्य च ॥२१॥
अपि स्मर्यते ॥२२॥

पूर्वाधिकरणे 'परात्परं पुरिशयं पुरुषमीक्षत' इत्युक्तस्य पुरिशयस्य परमात्मत्वं समर्थितम्। इहापि तथैव पुरिशयस्य परमात्मत्वं समर्थ्यत इति सङ्गतिः। छान्दोग्ये— 'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुंडरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्य' मिति ब्रह्मपुरशब्दोक्तशरीरान्तर्वर्तिहृदयपुण्डरीकमध्यवर्तित्वेन श्रुतो दहराकाशो भूताकाशः। 'तस्मिन्यदन्त' रिति दहराकाशेऽन्तरन्वेष्टव्यतया श्रुतः परमात्मा। अथवा दहराकाशः परमात्मा। 'तस्मिन् यदन्त'रिति श्रुतः तदीयोऽपहतपाप्मत्वादिगुणनिवह इति संशये भूताकाश इति तावत्प्राप्तं, अत्र रूढेः। 'तस्मिन् यदन्त'रिति श्रुतस्तु परमात्मा, न तु तदीयगुणनिवहः। 'तदन्वेष्टव्य' मित्यस्य 'तस्मिन्यदन्त'रित्येतन्मात्रान्वयित्वेन गुणमात्रस्योपास्यत्वापत्त्या गुणिनोऽनुपास्यत्वप्रसङ्गात्। एवञ्च वाक्यशेषे श्रूयमाणाः सर्वे परमात्मधर्माः 'तस्मिन् यदन्त' रिति निर्दिष्टे परमात्मन्यन्वयं लभन्त इति न तेषामप्यनुपपत्तिरिति। एवं प्राप्ते सिद्धान्तः—

दहराकाशः परमात्मा । न भूताकाशः । वाक्यशेषगतेभ्यो हेतुभ्यः । वाक्यशेषे हि 'यावान्वा अयमाकाशः तावानेषोऽन्तर्हृदय आकाश' इति दहराकाशस्य भूताकाशात् भेदापेक्षः । तेनोपमानोपमेयभावो निबध्यते । तदनन्तरं 'अस्मिन्द्यावापृथिवी अन्तरेव समाहिते उभावग्निश्च वायुश्च सूर्याचन्द्रमसावुभौ विद्युन्नक्षत्राणी' ति प्रकृतं दहराकाशं अस्मिन्निति निर्दिश्य तस्य सर्वजगदाधारत्वमुच्यते । ततो 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदस्मिन् समाहित'मित्यस्योपासकस्य लोके यद्भोग्यजातं वर्तते यच्च मनोरथमात्रास्पदमिह नास्ति सर्वं तद्भोग्यजातमस्मिन् दहराकाशे समाहितमिति तस्य निरतिशयभोग्यत्वेन तस्य निरतिशयानन्दत्वं प्रदर्श्यते। 'तदेतत्सत्यं ब्रह्मपुर'मिति तमेव दहराकाशमेतच्छब्देन परामृश्य तस्य सत्यभूतब्रह्माख्यपुररूपत्वमुच्यते । 'ब्रह्मपुर' मित्यत्र निषादस्थपतिन्यायेन सामानाधिकरण्यौचित्यात् । ततः 'अस्मिन्कामास्समाहिता' इति तमेव दहराकाशं 'अस्मिन्नि' ति निर्दिश्य काम्यभूतांश्च गुणान् 'कामा' इति निर्दिश्य तेषां दहराकाशान्तर्वर्तित्वमुक्त्वा तदेव दहराकाशस्य काम्यभूतकल्याणगुणविशिष्टत्वं तस्यात्मत्वञ्च 'एष आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्प' इति वर्ण्यते । ततः 'अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती' त्यात्मशब्देन परामृष्टं तदन्तर्वर्तिनश्च काम्यानपहतपाप्मत्वादिगुणांश्च अनुसन्दधतां फलं प्रदर्श्यते । तथा 'तद्यथाऽपि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि संचरन्तो नविन्देयुरेवमेवेमास्सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा' इति 'एत' मिति प्रकृतं दहराकाशं निर्दिश्य तत्र अहरहस्सर्वेषां गमनं गन्तव्यस्य तस्य ब्रह्मलोकशब्देन निर्देशश्च दृश्यते । परमात्मनि खलु सर्वेषामहरहस्सुषुप्तिकाले गमनमन्यत्राभिधीयमानं दृष्टम् , 'एवमेव खलु सोम्येमास्सर्वाः प्रजास्सतिसम्पद्य नविदुः सतिसम्पत्स्यामह'इति । ब्रह्मलोकशब्दश्च तस्मिन्दृष्ट 'एष ब्रह्मलोकस्सम्राडिति होवाचे' ति । तथा 'अथ य आत्मा

स सेतुर्विधृतिरेषां लोकानामसम्भेदाये'ति, प्रकृतदहराकाशं 'य आत्मे'ति निर्दिश्य तस्य जगद्विधारकत्वं प्रतिपाद्यते । स च परमात्मनो महिमा । 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल एष सेतुर्विधरण एषां लोकानामसम्भेदाये'ति श्रुत्यन्तरात् । एतेभ्यो वाक्यशेषगतेभ्यो हेतुभ्यो दहराकाशः परमात्मा । आकाशशब्दस्य हि परमात्मन्यपि वैदिकी प्रसिद्धिरप्यस्ति 'आकाश इति होवाचे'त्यादिश्रुत्यन्तरे । ननु यदि 'तस्मिन्यदन्त'रित्येतत् परमात्मवर्तिगुणनिवहपरं स्यात्, तदा 'तदन्वेष्टव्य'मित्यस्य दहराकाशान्तर्वर्तितया तस्यैवोपास्यता स्यात्, न तु प्राधान्येन दहराकाशस्यापि । तस्यापि प्राधान्येन उपास्यत्वमुपपादनीयम् । 'अथ य इहात्मानमनुविद्य व्रजंत्येतांश्च सत्यान्कामा'निति वाक्यशेषानुसारादिति चेत् । सत्यं इत्थं तदुपपादनं । 'तदन्वेष्टव्य'मित्यत्र तत्पदेन प्रथमानिर्दिष्टमन्तर्वर्तिमात्रं न परामृश्यते, किं तु सप्तमीनिर्दिष्टो दहराकाशोऽपि । 'त्यदादीनि सर्वैर्नित्यं, नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या'मिति सूत्रैर्नपुंसकैकशेषस्य एकवचनस्यचोपपत्तेरित्युक्तं भाष्यादिषु । अत्रेदं विचार्यते– तदिति नपुंसक शेषत्वं 'त्यदादीनि सर्वैर्नित्य'मिति परसूत्रेणैव हि वक्तव्यम् । तत्र नैकवद्भावानुवृत्तिरस्ति । 'एकवच्चास्यान्यतरस्या'मित्यत्र अस्येत्यस्य नपुंसकसूत्रकृतैकशेषस्यैवायमेकवद्भाव इत्येतदर्थत्वात् । न च वाच्यं त्यदादिषु नपुंसकानपुंसकयोर्नपुंसकशेषसिध्यर्थं 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या'मिति सूत्रस्याप्यनुवृत्त्या भाव्यमिति त्यदादिषु स च सा च ताविति स्त्रीपुंसकयोः पुंशेषसिध्यर्थं स च तच्च ते सा च तच्च ते इति नपुंसकानपुंसकयोर्नपुंसकशेषसिध्यर्थं च 'त्यदादितश्शेषे पुंनपुंसकतो लिंगवचना'नीति वार्तिककृता यत्नान्तरस्य कृतत्वात् तथैकवद्भावसिध्यर्थं भाष्यवार्तिकादिषु यत्नान्तरदर्शनात् । कथं तर्हि तंत्ररत्ने 'दधि मधु घृतं पयो धाना उदकं तंडुलास्तत्संसृष्टं प्राजापत्य'मिति चित्रेष्टिविधिवाक्ये दध्यादिप्रत्येकद्रव्यको यागगणः न तु संसृष्टैकद्रव्यको याग इति सिद्धान्तसिद्धये तत्पदं संसृष्टशब्दोक्तैकद्रव्यपरं न भवति, किं तु दध्याद्यनेकद्रव्यपरमित्युक्त्वा दध्यादिषु तदिति

नपुंसकैकशेषाभ्यां निर्व्यूढुं अभ्युच्चयार्थं तथा निर्वाहान्तरं कृतम् । सर्वनाम्नां प्रक्रान्तपरत्व एव स्वारस्येन प्रक्रंस्यमानपरत्वस्यानन्यगतिकत्वात् द्रव्यविशेषस्यैवाकांक्षापूरकत्वेन संसृष्टमात्रस्य प्रजापतिसम्बन्धानर्हत्वाच्च न्यायतस्तत्पदस्य दध्याद्यनेकद्रव्यपरत्वावश्यंभावेसति तदित्येकवचनोपात्तमेकत्वं 'गुणेत्वन्याय्यकल्पने' ति न्यायेन पाशबहुत्ववदविवक्षितमिति मुख्यहेतूक्त्यनन्तरं अथवा 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या' मिति स्मरणात् नपुंसकानपुंसकानेकाभिप्रायमपि युक्तमेव तदिति नपुंसकैकवचनं एवं प्राजापत्यमपि द्रष्टव्यमित्युक्तत्वादिति। अत्रेदं समाधानं 'अन्वेष्टव्य'मित्यत्र नपुंसकानपुंसकैकशेषे कृते सति तत्रैकस्मिन्नर्थ इवैकवचनरूपं कार्यं भवत् तद्विशेषणे तदर्थानुपपत्तिनि सर्वनाम्न्यपि भवति, यथा 'अस्मदोद्वयोश्चे'ति सूत्रेणास्मदर्थस्य एकत्वे द्वित्वे च बहुवचनं भवत् अस्मदर्थवर्तिनि क्रियापदेऽपि भवति वयं ब्रूमइति इहापि 'शुक्लश्च शुक्ला च शुक्लञ्च शुक्लं वर्तत' इति क्रियापदेऽपि एकवचनं दृश्यते तद्वत् सर्वनाम्न्यपि भवितुमर्हति। अत एव महाभाष्ये— 'शुक्लश्च कम्बळः शुक्ला च बृहतिका शुक्लञ्च वस्त्रं तदिदं शुक्लं तानीमानि शुक्लानी' ति द्विविधे नपुंसकसूत्रोदाहरणे कृतैकवद्भावमेव तदिति पदं प्रथमोदाहरणविशेषणं कृतम् । एवं चित्रेष्टिवाक्येऽपि प्राजापत्यशब्दे नपुंसकसूत्रप्रवृत्तौ तदन्तर्वर्तिनि तदिति पदेऽपि नपुंसकैकवचनं भवतीति तन्त्ररत्नाभिप्रायः । एवमिहापि 'अन्वेष्टव्य' मित्यत्र नपुंसकसूत्रेणैकवद्भावे कृते तदन्तवर्तिनि तदिति पदेऽपि नपुंसकलिंगमेकवचनं च युक्तमेव । तस्माद्दहराकाशः स्वान्तर्वर्त्यपहतपाप्मत्वादिगुणनिवहेन सहोपास्यः परमात्मैव । न भूताकाश इति सिद्धम्। ननु माभूदयं भूताकाशः, जीवस्तु स्यात्, दहरविद्याप्रकरणे– 'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति तस्य परामर्शादिति चेन्न । तत्र अपहतपाप्मत्वाद्यसम्भवात् । ननु दहरवाक्यादुत्तरस्मिन् प्रजापतिवाक्ये जीवस्याप्यपहतपाप्मत्वादिकमाम्नातम् । तत्र हि 'य आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकाम-

स्सत्यसङ्कल्पस्सोऽन्वेष्टव्यस्सविजिज्ञासितव्यस्ससर्वांश्च लोकानाप्नोति सर्वांश्च कामान् यस्तमात्मानमनुविद्य विजानाती' ति प्रजापतिवचनमैतिह्यरूपेणोपश्रुत्य अन्वेष्टव्यात्मजिज्ञासया प्रजापतिमुपसेदुषे मघवते प्रजापतिना 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मे' ति 'य एष स्वप्ने महीयमानश्चरत्येष आत्मे' ति 'अथ यत्रैतत्सुप्तस्समस्तस्संप्रसन्नस्स्वप्नं न विजानात्येष आत्मे' ति च जागराद्यवस्थात्रयवान् जीव एव जिज्ञासितापहतपाप्मत्वादिगुणकात्मेत्युपदिष्टः । सत्यम् । संसारदशायामविद्यातिरोहितापहतपाप्मत्वादिगुणको जीवः पश्चाद्विमुक्तकर्मरूपाविद्याबन्धः शरीरात् समुत्थितः परंज्योतिरुपसम्पन्नस्सन्नपहतपाप्मत्वादिगुणविशिष्टः प्रजापतिवाक्येऽभिधीयते । 'एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति जीवस्य परंज्योतिःप्राप्त्या तस्यापहतपाप्मत्वादिगुणकस्वरूपाभिनिष्पत्तिमुक्त्वा प्राप्यस्य परंज्योतिषः 'स उत्तमः पुरुष' इति पुरुषोत्तमत्वं विधाय 'स तत्र पर्येति जक्षत्क्रीडन् रममाणस्स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वे' त्यादिना तं प्राप्नुवतो जीवस्य तल्लोकानुभाव्यमहाफलकीर्तनात् । दहरवाक्ये तु नित्याविर्भूतापहतपाप्मत्वादिगुण एव दहराकाशः प्रतीयते । तथाभूतापहतपाप्मत्वादिग्रहणसम्भवे कारणाधीनाविर्भावस्य तस्य ग्रहणायोगात् । तस्माद्दहराकाशे जीवत्वाशङ्का न कार्या । यद्येवं दहरविद्याप्रकरणे— 'अस्माच्छरीरात्समुत्थाये' त्यादिना जीवपरामर्शः किमर्थः, दहराकाशस्य जगद्विधरणादिवत् जीवस्वरूपाविर्भावापादानरूपमहिमविशेषप्रतिपादनार्थः प्रजापतिवाक्यसिद्धस्यार्थस्यायमनुवादः । ननु यदि दहरो न जीवः, कथं तदल्पपरिमाणश्रवणमिति चेत्, अत्र वक्तव्यमुत्तरम् 'सर्वत्र प्रसिद्धोपदेशा' दित्यधिकरणे 'निचाय्यत्वादेवं व्योमवच्चे' ति पूर्वमेवोक्तम् । ननु संसारदशातिरोहितजैवापहतपाप्मत्वादिव्यतिरेकेण नित्याविर्भूतमन्यदपहतपाप्मत्वादिकमस्तीत्यत्रैव न प्रमाणम् । दहरविद्याप्रकरणे अपहतपाप्मत्वादिश्रवणस्य प्रजापतिवाक्यसिद्धसंप्रतिपन्नजैवापहतपाप्मत्वादिविषयत्वोपपत्तेः । अतो नित्याविर्भूतैरपहतपाप्मत्वादिभिः

दहरो न जीव इत्येतन्नयुक्तम् । किं तु सूक्ष्मत्वलिंगात् दहरो जीव इत्येव युक्तमितिचेदुच्यते— परमात्मानुकाररूपा तत्साम्यापत्तिर्हि मुक्तिः । 'यदा पश्यः पश्यते रुक्मवर्ण' मित्यादि श्रुतेः, 'इदं ज्ञानमुपाश्रित्य मम साधर्म्य मागताः । सर्गेऽपि नोपजायन्ते प्रळये न व्यथंतिचे' ति स्मृतेश्च । एवं च जीवस्य मुक्तावपहतपाप्मत्वादिगुणाविर्भावः परमात्मनो नित्याविर्भूतापहत-पाप्मत्वादिगुणकत्वमन्तरेण न सम्भवति । अन्यथा जीवस्य मुक्तौ तत्सा-म्यापत्त्ययोगात् । अतो जीवस्य मुक्तिदशाविर्भाववत् जैवापहतपाप्मत्वादि-प्रतिपादकप्रजापतिवाक्यसामर्थ्यादेव परस्य नित्याविर्भूतमपहतपाप्मत्वादि-कमस्तीति सिद्धेः तद्विषयत्वं दहरविद्याप्रकरणश्रुतस्य 'य आत्माऽपहतपा-प्मे' त्यादेर्युक्तमिति ततः परमात्मैव दहराकाशः न जीव इति सिद्धम् ॥

संग्रहकारिकाः ॥

युक्तो दहराकाशोः भूताकाशः प्रसिद्धत्वात् ।
अपहतपाप्मत्वाद्या गुणास्तदन्तर्गतान्वयिनः ॥
जीवोवाऽसौ श्रवणादमुं प्रकृत्यैष संप्रसाद इति ।
संति च तत्रोक्तगुणाः प्राजापत्येन वाक्येन ॥
मैवं परमात्माऽसौ स्वामिन्यभिहितगुणेभ्य इत्युचितम् ।
तस्माद्यदिति गुणोक्तिर्गुणगुणिविषय इति तद्वृत्तम् ॥
नित्याविर्भूतास्ते गुणा न सन्त्येव जीवस्य ।
संति तु परस्य लिंगान्मुक्तेस्तत्परमसाम्यरूपत्वात् ॥

इति दहराधिकरणम् ॥ ९ ॥

शब्दादेव प्रमितः ॥२३॥

हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥२४॥

पूर्वत्राणीयस्त्वरूपं अल्पपरिमाणं परस्मिन्नुपपादितम् । इदानीमं-गुष्ठमात्ररूपमप्यल्पपरिमाणं तस्मिन्नुपपाद्यत इति संगतिः । कठवल्लीपु

श्रूयते– 'अंगुष्ठमात्रः पुरुषो मध्य आत्मनि तिष्ठति । ईशानो भूतभव्यस्य न ततो विजुगुप्सत' इत्यादिः । किमयमंगुष्ठप्रमितो जीवः परोवेति संशये जीव इति प्राप्तम् । 'स विश्वरूपस्त्रिगुणस्त्रिवर्त्मा प्राणाधिपस्सञ्चरति स्वकर्मभिः । अंगुष्ठमात्रो रवितुल्यरूपः सङ्कल्पाहङ्कारसमन्वितो य' इति तस्यांगुष्ठमात्रत्वश्रवणात् । न तु परः, तस्य क्वचिदपि तथात्वश्रवणाभावात् । एवञ्चोपक्रमभूतांगुष्ठमात्रत्वानुसारेण भूतभव्येशानत्वश्रवणं जीव एव देहेन्द्रियादिनियन्तृत्वादिविषयतया योजनीयमिति । ननु श्वेताश्वतरे– 'अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । हृदा मनीषा मनसाभिक्लृप्तो य एतद्विदुरमृतास्ते भवन्ती'ति, तैत्तिरीयके– 'अंगुष्ठमात्रः पुरुषोंऽगुष्ठञ्च समाश्रितः । ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभु'गिति परस्याप्यंगुष्ठमात्रत्वं श्रूयते । सत्यम् । परस्यांगुष्ठमात्रत्वश्रवणं क्वचिदपि नास्तीति कृत्वाचिंतयेदमधिकरणम् । यद्वा तदपि मंत्रद्वयं 'अंगुष्ठमात्रो रवितुल्यरूप' इति मन्त्रान्तरानुसारेण जीवपरमिति पूर्वपक्षी मन्यते । एवं प्राप्ते सिद्धान्तः—

अंगुष्ठप्रमितः परमात्मा । भूतभविष्यदात्मकसर्वजगदीशितृत्वश्रवणात् । तस्य देहेन्द्रियादिनियन्तृत्वविषयतया सङ्कोचायोगात् । नन्वंगुष्ठमात्रत्वं प्रथमश्रुतमिति तदनुसारेण देहेन्द्रियादिनियन्तृत्वविषयतया चरमश्रुतं तत् योजनीयम् । न च 'अंगुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः । तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवेषीकां धैर्येण । तं विद्याच्छुक्रममृत'मिति मंत्रे हृदयनिविष्टत्वश्रवणात् तदुपाधिकमंगुष्ठमात्रत्वं परमात्मनस्सम्भवतीति वाच्यम् । शाण्डिल्यविद्यायां– 'एषम आत्माऽन्तर्हृदयेऽणीया'निति हृदयोपाधिकं परस्याणीयस्त्वमेव श्रुतम् । दहरविद्यायामपि तैत्तिरीयके– 'तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । तस्याश्शिखायामध्ये परमात्मा व्यवस्थित' इत्यणीयोवह्निशिखामध्यवर्तित्वोक्त्या परमात्मनोऽप्यणीयस्त्वे तात्पर्यमवगतम् । तस्मादंगुष्ठमात्रत्वं हृदयोपाधिकमित्येतत् न सम्भवतीतिचेत् सम्भवत्येव । दहरशाण्डिल्यविद्ययोः

हृदयकमलोर्ध्ववर्तिसुषिरवर्तितयोपास्यः परमात्मेति तत्र तदवच्छेदोपाधिकमणीयस्त्वं, इह कृत्स्नहृदयवर्त्युपास्यो विवक्षित इति तदवच्छेदोपाधिकमंगुष्ठमात्रत्वमिति व्यवस्थोपपत्तेः । न च खरतुरगभुजगादीनां अंगुष्ठाभावात् अंगुष्ठमात्रत्वं हृदयोपाधिकमित्येतन्नव्यापकमिति वाच्यम् । मनुष्याणामुपासनाधिकारात् तेषाञ्च हृदयस्य तत्तदंगुष्ठप्रमितत्वात् । आराग्रमात्रस्य जीवस्य हृदयोपाधिनाऽप्यंगुष्ठमात्रत्वं न सम्भवतीति । अत्रेदं वक्तव्यं । अंगुष्ठमात्रत्वं जीवलिंगमेव । अंगुष्ठमात्रशब्देन हि अंगुष्ठाधिकपरिमाणव्यवच्छेदः क्रियते । न त्वंगुष्ठपरिमाणमपि विधीयते । एकस्य शब्दस्य उभयत्र तात्पर्यायोगात् । अत एव अग्नीषोमीयपशौ अध्रिगुप्रैषे छागस्य पार्श्वद्वयगतानामस्थ्नां वंक्रिशब्दवाच्यानामियत्ताप्रकाशकस्य 'षड्विंशतिरस्य वंक्रय' इति मंत्रस्य अश्वमेधपशौ अश्वे चोदकप्राप्तस्य तत्प्रकरणाम्नातेन 'चतुस्त्रिंशद्वाजिनो देवबंधोर्वंक्रीरश्वस्य स्वधितिस्समेती'ति वैशेषिकमंत्रेण अपवादप्रसक्तौ तदपवादार्थेन 'षड्विंशतिरित्येव ब्रूया'दिति वाक्येन षड्विंशतिपदयुक्तप्राकृतमंत्रविधानात् 'षड्विंशतिरेषां वंक्रय'इति षड्विंशतिपदयुक्त एव सः प्राकृतो मंत्रः प्रयोक्तव्यः । न तु 'अश्वस्तूपरो गोमृगस्ते प्राजापत्या 'इति विहिताश्वतूपरगोमृगवंक्रीणां समस्यवचन ऊहः कर्तव्य इति पूर्वपक्षे प्राप्ते ॥

'षड्विंशतिरित्येव ब्रूया'दिति वाक्यस्यैवकारेण षड्विंशतिमात्रव्यतिरिक्तं यदन्यत् चतुस्त्रिंशदिति मंत्रान्तरं प्राप्तम्, तन्नकर्तव्यमित्यत्र तात्पर्यावगमात् षड्विंशतिपदयोगेऽपि तात्पर्यकल्पने वाक्यभेदापत्तेः न्यायप्राप्तस्य अश्वतूपरगोमृगवंक्रीणां समस्यवचनरूपस्य ऊहस्य न बाध इति व्यवस्थापितं पूर्वतंत्रे नवमाध्याये । अत एव च भाष्यकारैरिहाधिकरणे 'यावान्वा अयमाकाश'इति दहराकाशस्य परमात्मनो भूताकाशसमपरिमाणत्वोक्तिरयुक्ता, 'ज्यायान् दिव' इत्यादिवाक्यान्तरे तस्य तदधिकपरिमाणश्रवणादित्याशंक्य 'यावान्वा' इत्यादिवाक्यं हृदयावच्छेदप्रयुक्ताल्पपरिमाणत्वनिवृत्तिमात्रपरम् न तु भूताकाशसमपरिमाणत्वपरमपीत्युक्तम् । एवमंगुष्ठमात्रत्वस्य अंगुष्ठाधिकपरिमाणव्यवच्छेदरूपतायामाराग्रमात्रत्वस्याप्या-

राग्राधिकपरिमाणव्यवच्छेदरूपत्वप्राप्तेराराग्रपरिमाणत्वमपि जीवस्य न स्यादिति चेत् । नास्त्येववस्तुतस्तस्याराग्रपरिमाणत्वमपि । अत एव 'आराग्रमात्रोऽप्यवरोऽपि दृष्ट' इत्येतदनन्तरं 'वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयस्सचानन्त्याय कल्पत' इति मंत्रेण आराग्रपरिमाणत्वादत्यल्पमतिसूक्ष्मं परिगाणान्तरं प्रतिपादितम् । तस्मादंगुष्ठाधिकपरिमाणव्यवच्छेदस्य परमात्मन्यनुपपत्तेः जीवे तदुपपत्तेश्च जीव एवांगुष्ठमात्र इति निश्चिते तदनुसारेण चरमश्रुतं भूतभव्येशितृत्वं तस्मिन्नेव सङ्कोचनीयमिति पूर्वपक्षो वर्णनीयः । 'अंगुष्ठमात्र' इत्येतन्मात्रशब्दस्य अवधारणार्थं परिगृह्य अंगुष्ठपरिमाणाधिकपरिमाणव्यवच्छेदपरत्वं न कल्पनीयम्, किंतु शब्दस्य 'प्रमाणे द्वयसज्दघ्नञ्मात्रच' इति प्रमाणार्थविहितमात्रच्प्रत्ययरूपत्वं परिगृह्य अंगुष्ठसमपरिमाणत्वपरत्वकल्पनं युक्तम् । भावरूपलघ्वर्थपरिग्रहे सम्भवति अभावद्वयघटितगुर्वर्थकल्पनायोगात् । एवं च अंगुष्ठमात्रत्वं परमात्मन्येव सम्भवति । अधिकपरिमाणस्य अल्पपरिमाणावच्छेदोपाधिकाल्पत्वस्य व्योमादिषु दृष्टत्वात् । वालाग्रायुतांशपरिमाणस्य जीवस्य तु हृदयावच्छेदप्रयुक्तमप्यंगुष्ठमात्रत्वं न सम्भवति । अल्पपरिमाणस्य अधिकपरिमाणकवस्तुमध्यवर्तित्वप्रयुक्ताधिकपरिमाणत्वव्यपदेशस्य क्वचिदप्यदर्शनात् । जीववाक्येषु अंगुष्ठमात्रत्वश्रवणन्तु अंगुष्ठाधिकपरिमाणव्यवच्छेदविषयत्वेनोपपादनीयम् । एकस्यापि शब्दस्य तत्र तत्र उचितार्थभेदसम्भवात् । यद्वा– तेषु हृदयशततमनाड्यवच्छेदोपाधिकयोर्धर्मज्ञानगतयोरंगुष्ठमात्रत्वाराग्रमात्रत्वयोस्तस्मिन् सद्वारकान्वयः । नचेहांगुष्ठवाक्ये सद्वारकान्वयः कल्प्यः । परमात्मनि साक्षात्तदन्वयसम्भवादिति सिद्धांतो वर्णनीयः । यद्येवं प्रथमश्रुतेन अंगुष्ठमात्रत्वलिंङ्गेनैव परमात्मेति निर्णयसम्भवे किमिति तन्निर्णयार्थं ईशानश्रुतिस्सूत्रकारेणाश्रिता । तस्यास्सर्वेश्वरे रूढतया ततो झटिति निर्णयमभिप्रेत्य । अत एव सूत्रे 'शब्दादेवे'त्येवकारः । आस्तां यौगिकार्थविचारावगम्याल्लिंगान्निर्णयः रूढतयाऽभिधानश्रुतिरूपादीशानशब्दादेव तावन्निर्णयस्संभवतीतिहि तदभिप्रायः । तस्मादंगुष्ठप्रमितः परमात्मेति सिद्धं ॥

संग्रहकारिकाः ॥

अंगुष्ठमात्रः पुरुषश्शरीरी श्रुत्यन्तरे तस्य तथा प्रसिद्धेः ।
ईशानतात्वस्तु जघन्यपाठात् तद्भोग्यभोगस्थितिहेत्वपेक्षा ॥
ईशानशब्दस्वरसोपनीतस्सर्वस्य नेता पुरुषोत्तमोऽसौ ।
अंगुष्ठमात्रत्वमणौ विभौ च स्वारस्यहीनं हृदपेक्षयाऽस्तु ॥
अस्माद्भयेन जगतः प्रवृत्तिरुक्ता स्वकार्येषु ।
अस्य च निरवधि दृष्टं सर्वानुग्राहकं ज्योतिः ॥
यदिदं किंचेति मनौ न तत्र सूर्यइति मंत्रे च ।
आभ्यामपि लिंगाभ्यां परमात्मांऽगुष्ठमात्रोऽसौ ॥ इति ।

'हृद्यपेक्षयात्वि'त्येतावतीह स्थितमधिकरणं कम्पनात् ज्योतिर्दर्शनादिति सूत्राभ्यामुत्तरत्र समापयिष्यते । मध्ये प्रासंगिकमधिकरणत्रयं पूर्वतंत्रगतेंद्रपीताद्यधिकरणवत् गर्भाधिकरणतया प्रासंगिकं प्रवृत्तम् । संग्रहश्लोकेषु तु बुद्धिसौकर्यार्थं उपरितनसूत्रद्वयार्थोऽपि अत्रैव संगृहीतः ॥

तदुपर्यपि बादरायणस्सम्भवात् ॥२५॥

विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥२६॥

शब्द इति चेन्नातः प्रभवात्प्रत्यक्षानुमानाभ्यां ॥२७॥

अत एव च नित्यत्वं ॥२८॥

समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥

मनुष्याधिकारप्रसङ्गात् देवादीनां ब्रह्मविद्यायामधिकारोस्ति न वेति विचार्यते । तत्र पूर्वपक्षः— नास्त्यधिकारश्शरीररहितानां तेषां ब्रह्मविद्यानुष्ठाने सामर्थ्याभावात् । न च तेषां शरीरवत्त्वे प्रमाणमस्ति । न च 'वज्रहस्तः पुरन्दरः, इन्द्रोवृत्राय वज्रमुदयच्छ' दित्यादिमन्त्रार्थवादाः तत्र प्रमाणं । अनुष्ठेयार्थस्मृतिस्तुत्यर्थानां तेषान्तत्र तात्पर्याभावात् । नच स्मृतिद्वारतया तत्सिद्धिः । सताचासताचस्तुतिदर्शनेन स्तुत्यर्थं द्वारभूतार्थसत्ता-

नपेक्षणात्। नच स्तुत्यर्थं प्रतीयमानतामात्रेण तत्सिद्धिः। तात्पर्याभावे तदसिद्धेः, तात्पर्याधीनत्वाच्छब्दप्रामाण्यस्य। न च तत्रापि तात्पर्यं, कल्पकाभावात्। प्रामाण्यनिर्वाहकप्रयोजनपर्यवसानाय हि तत्कल्पनं। कर्मकाण्डवचसां विधिनिषेधाधीनप्रवृत्तिनिवृत्तिभ्यां ब्रह्मकाण्डवचसां स्वतःपुरुषार्थब्रह्मप्रतिपादनेन च प्रयोजनपर्यवसानं लब्धमेव। न च देवतोद्देश्यकद्रव्यत्यागात्मकयागविधिवाक्यान्येव देवतापेक्षाणीति वाच्यं। शरीररहितस्यापि उद्देशसम्भवेन ततस्तासां शरीरापेक्षाऽसिद्धेः। न च क्षणध्वंसिनां कर्मणां कालांतरभाविफलसाधनत्वनिर्वाहाय द्वारापेक्षायां 'तृप्त एवैनमिंद्रः प्रजया पशुभिस्तर्पयती' त्याद्यर्थवादतः प्रतीतस्य देवताप्रसादस्य द्वारत्वेन परिग्राह्यतया तासां विग्रहादिपञ्चकसिद्धिः। अपूर्वस्य द्वारस्य सद्भावेन द्वारान्तरानपेक्षणात्। न च अर्थवादप्रतीते देवताप्रसादे स्थिते नापूर्वं कल्प्यमिति वाच्यम्। देवतारहितेषु दानादिषु अपूर्वकल्पनाऽवश्यंभावात यागहोमेष्वपि सम्प्रतिपन्नाचेतनदेवताकेषु चेतनदेवताकेष्वपि केषुचित् तत्कल्पनाऽवश्यम्भावाच्च। न ह्यश्वमेधे मेध्यस्याश्वस्य गुणक्रियांगान्युद्दिश्य 'कृष्णाय स्वाहा श्वेताय स्वाहा यन्मेहसि तस्मै स्वाहा यच्छकृत्करोषि तस्मै स्वाहा दद्भ्यस्स्वाहा हनूभ्यां स्वाहे' त्यादिमन्त्रैः क्रियमाणेषु होमेषु चेतनादेवतास्ति। न च तिर्यग्जन्मगतान् पितॄनुद्दिश्य क्रियमाणेषु श्राद्धेषु तिर्यग्भूताः पितरः फलप्रदानसमर्थाः। न च इन्द्रादयोपि कल्पावसानेषु निवृत्ताधिकाराः कल्पावसानानुष्ठितभाविकल्पभोग्यफलयागादिफलप्रदानसमर्थाः। एतेन 'यजदेवपूजाया'मिति स्मरणेन यागस्य देवताराधनरूपत्वात् तदाराधनानां राजाराधनवत् आराधनप्रसन्नाराधनीयदेयफलार्थत्वावश्यम्भावात् यागविधिसामर्थ्येन देवताविग्रहसिद्धिरित्यपि शङ्का निरस्ता। राजशिशवः तत्पादुकादयश्च राजभृत्यैरुचितोपचारेण पूज्यन्ते। ज्योतिष्टोमे सोमलता पयोन्ननिवेदनेन पूज्यते। पितृमातृगुरुभर्त्रतिथिविद्यावृद्धादयश्च शुश्रूषादिभिः पूज्यन्ते। न च तेषां फलप्रदातृत्वमस्ति। राजकुमारादीनामुपचारो राजादीनामेव पूजा, तेषाञ्च फलदातृत्वमस्तीति यद्यु-

च्चेत, तदा देवतानामिज्या वर्णाश्रमादिरूपाचारप्रवर्तकस्य सर्वेश्वरस्यैव पूजा, तस्य फलदातृत्वमस्तीति ततएव यागस्य देवपूजात्वसिद्धेः न तत इन्द्रादिदेवानां विग्रहसिद्धिः। एतेन 'इन्द्रो ह वै देवानामभिप्रवव्राजविरोचनोऽसुराणा' मित्यादि ब्रह्मकाण्डगतोपाख्यानैः इन्द्रादीनां विग्रहसिद्धिशङ्काऽपि निरस्ता। कर्मकाण्डगतविश्वरूपाद्युपाख्यानानां अग्नीषोमीययागादिविधिशेषत्ववत् ब्रह्मकाण्डगतोपाख्यानानामपि पारिप्लवाधिकरणन्यायात् तत्तद्विद्याविधिशेषत्वेन कर्मकाण्डगतैरिव ब्रह्मकाण्डगतैरपि अर्थवादैः स्तुतिद्वारभूतार्थासिद्धेः। तस्माद्देवादीनां विग्रहरहितानां सामर्थ्याभावेन नास्ति ब्रह्मविद्यास्वधिकार इत्येवं प्राप्ते सिद्धांतः॥

ब्रह्मोपासनं मनुष्याणामुपरि ये देवादयः तेष्वपि संभवत्येव। न च विग्रहाभावेन तेषां सामर्थ्याभावः, सर्वास्वप्युपनिषत्सु सृष्टिप्रकरणेषु 'नारायणाद्ब्रह्मा जायते, नारायणाद्रुद्रोजायते, इन्द्रो वरुणस्सोमो रुद्र' इत्यादिवाक्यैः देवादीनां सृष्टिप्रतिपादनात्, सर्वासु श्रुतिषु इन्द्रादिपदानां कर्मविशेषफलत्वप्रतिपादनाच्च। तथा हि सामगानां सामविधिब्राह्मणे 'मयि वर्च' इत्येतेन कल्पेन चत्वारि वर्षाणि प्रयुञ्जानः त्रयाणां लोकानामाधिपत्यं गच्छती' ति श्रूयते। त्रैलोक्याधिपत्यमिंद्रत्वमेव। तथा छन्दोगानामुपनिषदि– 'वसूनामेवैको भूत्वाऽग्निनैव मुखेनैतदेवामृतं दृष्ट्वा तृप्यती' त्यादिवाक्यैः वसुरुद्रादित्यमरुत्साध्याख्यगणदेवतापदप्राप्तिः मधुविद्याफलत्वेन प्रतिपाद्यते। तथा देवतावशीकरणस्य कर्मविशेषफलत्वश्रवणादपि तासां विग्रहसिद्धिः। तथा हि सामविधिब्राह्मणे श्रूयते– 'यः कामयेतावर्तयेयमित्येकरात्रं क्षुरसंयुक्तस्तिष्ठेत् सुतासांमधुमत्तमा' इति वर्गः। 'एतेषामेकमनेकं वा सर्वाणि वा प्रयुञ्जानः एकरात्रेण कुटुंबिनमावर्तयति, द्विरात्रेण राजोपजीविनं, त्रिरात्रेण राजानं, चतूरात्रेण ग्रामं, पञ्चरात्रेण नगरं, षड्रात्रेण जनपदं, सप्तरात्रेणासुररक्षांसि, अष्टरात्रेण पितृपिशाचान्, नवरात्रेण यक्षान्, दशरात्रेण गन्धर्वाप्सरसः, अर्धमासेन वैश्रवणं, मासेनेंद्रं, चतुर्भिः प्रजापतिं, संवत्सरेण यत्किञ्चिज्जगत् सर्वं हास्य गुणीभ-

चती ' ति । एवं देवतानां विग्रहसामान्यसिद्धौ 'सहस्राक्षो गोत्रभिद्वज्रबाहुरस्मासुदेवो द्रविणं दधातु, चत्वारि शृङ्गा त्रयो अस्य पादा द्वेशीर्षे सप्तहस्तासोऽस्ये ' त्यादिमन्त्रैः इन्द्राग्न्यादीनां सहस्राक्षसप्तहस्तत्वादिविशिष्टविग्रहविशेषसिद्धिः । न च तेषु विग्रहविशेषप्रतिपादनानपेक्षा शङ्कनीया । 'यां देवतां वषट्करिष्यन् स्यात्तांमनसाध्यायेदि ' ति विहितस्य ध्यानस्य ध्यातव्याकारविशेषापेक्षत्वात् निराकारध्यानासम्भवात्, तथा अर्थवादैरपि वज्रहस्तत्वादिविशिष्टविग्रहसिद्धिः । असता विवेकिनां प्ररोचना संभवेन प्ररोचनार्थं द्वारभूतार्थसत्तापेक्षणात् । अत एव शाबरभाष्ये प्रजापतिर्वपोत्खननादिवाक्यानामपि लाक्षणिकार्थपरिग्रहेण द्वारभूतस्याप्यर्थस्य सद्रूपता दर्शिता । किंच 'इन्द्रो वृत्राये ' त्यादिवादानां इन्द्रवृत्रादिशब्देभ्योपि विभक्त्युत्पत्त्यर्थमर्थवत्त्वन्तावदपेक्षितम् । तदभावे प्रातिपदिकत्वाभावेन विभक्त्यनुत्पत्तेः । अपेक्षितोर्थस्तदर्थवादैस्समर्पितो वज्रहस्तत्वादिरूप एव पर्यवस्यति । अपेक्षितार्थविशेषसमर्पणे विद्यमाने तं परित्यज्य अपेक्षापूरणार्थं अर्थांतरग्रहणायोगात् । ननु 'नकिरिन्द्र त्वदुत्तरः न ज्यायोऽस्ति वृत्रहन् नक्येवं यथा त्वं, आ त्वा विशंत्विन्दवःसमुद्रमिव सिन्धवः, नत्वामिन्द्रातिरिच्यते, इन्द्रं विश्वा अवीवृधन् समुद्रव्यचसङ्गिरः ' इत्यादयो मन्त्राः न केवलमिन्द्रं प्रकाशयन्ति'। किन्तु सर्वोत्तरत्वसर्वसोमग्रहपात्रत्वसर्ववाग्जालप्रतिपाद्यत्वादिभिरसदर्थैस्स्तुवन्त्यपि । अतो न स्तुतिद्वारा अर्थसत्तानियम इति चेत्, यत्र विरोधः तत्र 'शृणोतग्रावाण ' इत्यादिष्विव असदर्थावलम्बनतास्तु, लौकिकराजादिस्तुतिषु काव्यादिनिबन्धस्तुतिनिन्दासु च असदर्थावलम्बनत्वस्यापि दर्शनात् । यत्र न विरोधः तत्र औत्सर्गिकस्वतःप्रामाण्यवशादपि अर्थसत्ताऽभ्युपगन्तव्या । किमुत तदपेक्षायां । तस्माद्विधिमन्त्रार्थवादैर्देवादीनां विग्रहसिद्धेः सामर्थ्यसद्भावात् मोक्षफलायां ब्रह्मविद्यायामस्त्यधिकारः । ननु मन्त्रार्थवादादिवशात् देवानां विग्रहवत्त्वाभ्युपगमे 'अग्निमग्न आवह, इन्द्रागच्छ हरिव आगच्छ, अध्वर्यो द्रावयत्वं सोममिन्द्रः पिपासति, उपोनूनं युयुजे वृषणा हरी, आ च जगाम वृत्रहा, कस्य

वाऽह्देवा यज्ञमागच्छंति कस्य वा न बहूनां यजमानाना'मित्यादिबहुतरमंत्रार्थवाददर्शनात् देवानां यज्ञदेशागमनमपि अङ्गीकर्तव्यम् । कथमेकस्येन्द्रस्य युगपदनेकयज्ञदेशागमनं घटते । भूतवशिनान्तेषां योगिनामिव युगपत् बहुशरीरपरिग्रहसम्भवादिति ब्रूमः । 'अग्नेस्त्रयो ज्यायांसो भ्रातर आसन् ते देवेभ्यो हव्यं वहन्तः प्रामीयन्त, अवाड्ढव्यानि सुरभीणि कृत्वे' त्यादिश्रुतिषु लोकान्तरस्थदेवसमीपप्रापणार्थं हव्यवहनश्रवणं तु येषु दर्वीहोमादिषु देवताह्वानं तदागमनं वा न श्रुतं तद्विषयं । यद्वा यज्ञदेशमागता देवाः हविर्गृहीत्वा 'यद्वै देवा हविर्जुषन्ते अल्पमप्येकमाहुतिमपि तद्गिरिमात्रं वर्धत' इति श्रुतेः प्रवृद्धन्तद्धविरग्निना वाहयन्तः स्वस्थानं गत्वा भुञ्जत इति यज्ञदेशागमनहव्यवहनश्रुत्योर्न विरोधः । माभूदिन्द्रादीनां विग्रहवत्वे कर्मणि विरोधः । शब्दे तु स्यात्, विग्रहाणामानित्यत्वावश्यंभावेन तद्विशिष्टवाचिनामिन्द्रादिशब्दानां तदुत्पत्तेः पूर्वं पश्चाच्च अर्थशून्यत्वस्य अनिवार्यत्वात् । यद्युच्येत डित्थादिसाङ्केतिकशब्दानामिव कादाचित्केनाप्यर्थेन अर्थवत्त्वमुपपद्यत इति तदाऽपि इन्द्रादिपूर्वापरकालयोः— 'इन्द्रागच्छे'त्यादीनामर्थशून्यत्वमनिवार्यमिति चेन्न । इन्द्रादीनामिंद्रादिशब्दप्रभवतयेन्द्रादिशब्दानां घटादिशब्दवत् प्रवाहानादिव्यक्तिपरम्परागतजातिवाचित्वात् । यथा हि शिल्पी शिल्पशास्त्रावगतमिंद्राद्याकारं स्मृत्वा तदाकारां प्रतिमां निर्माति, तथा प्रजापतिर्वेदावगतं पूर्वपूर्वेन्द्राद्याकारं स्मृत्वा तत्तदाकारविशिष्टानिंद्रादीन् सृजतीति हि 'वेदेन रूपे व्याकरोत् सतासती प्रजापतिस्सभूरिति व्याहरत् स भूमिमसृजत स भुव इति व्याहरत् सोऽन्तरिक्षमसृजते'त्यादिश्रुतिषु श्रूयते । तथा स्मर्यते च 'नाम रूपं च भूतानां कृत्यादीनां प्रपञ्चनम् । वेदशब्देभ्य एवादौ देवादीनां चकार स' इति । ननु माभूदर्थद्वारको वैदिकशब्दे विरोधः । शब्दद्वारकस्तु स्यात् । मंत्रार्थवादादीनां हि प्रतीयमानार्थं प्रामाण्यमुपपादितम् । तथा च 'मंत्रकृतो वृणीते' विश्वामित्रस्य सूक्तं भवति, संहिताकारपदकारसूत्रकारब्राह्मणकाराणा'मित्यादिप्रामाण्याद्वेदस्य पौरुषेयत्वमभिचार्यमितिचेत् नायः

मपि दोषः । 'विश्वामित्रस्य सूक्तं भवती'त्यादिवेदशब्देभ्यो विश्वामित्रादीनां तत्तत्सूक्तविशेषदर्शनादिरूपकृत्यविशेषान् नामरूपाणि चानुसन्धाय पूर्वकल्पानुष्ठितपुण्यवशात् विश्वामित्रादीन् सूक्तादीननधीत्यैव द्रष्टुं समर्थान् प्रजापतिः सृष्ट्वा विश्वामित्रादिपदेषु निवेशयति । अनधीत्य तत्तत्सूक्तादिदर्शनसामर्थ्यमेव च मन्त्रकृत्त्वादिकं । ततो न वेदानित्यत्वापत्तिः । अथ स्यात् चतुर्मुखस्य स्वमानेन परार्धद्वयजीविनः चतुर्युगसहस्ररूपैकैकदिवसात्मकस्य अवान्तरकल्पस्यावसाने तावत्कालप्रमाणरात्रिरूपे नैमित्तिकप्रळये भूर्भुवस्स्वरिति त्रैलोक्यमात्रस्य नाश इति वेदसत्त्वात् भवतुवेदशब्दपूर्विका तदनंतरसृष्टिः । तदीयवर्षशतावसाने तावत्प्रमाणो यः प्राकृतप्रळयकालः तदा व्याकृतपर्यन्तसर्वनाशे वेदस्यापि नाशावश्यम्भावात् कथन्तदनन्तरमहाकल्पादौ वेदशब्दपूर्विका सृष्टिः, कथञ्च प्राकृतप्रळये नश्यतो वेदस्य नित्यत्वमितिचेत् उच्यते– तदा वेदानां नाशो न दोषः, 'छन्दांसि जज्ञिरे तस्मादि'ति श्रुतिषु महाकल्पादौ तेषामपि सृष्टिश्रवणात् । समानानुपूर्वीकत्वरूपे तु नित्यत्वे नास्ति विरोधः । महाकल्पावृत्तावपि सृज्यानां समाननामरूपत्वात् । न च तदसिद्धिः । 'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मा' इति मन्त्रे महाकल्पादौ ब्रह्मसृष्ट्यनन्तरं तस्मै वेदप्रदानश्रवणस्य ब्रह्मा शिल्पिन्यायेन पूर्वकल्पेन्द्रादिनामरूपाणि मन्त्रार्थवादेभ्योऽवगत्य तत्समाननामरूपानिन्द्रादीन् सृजत्वित्येतदर्थत्वात् , 'तस्य सुप्तस्य देवस्य नाभौ पद्ममजायत । तस्मिन् पद्मे महाभाग वेदवेदाङ्गपारगः । ब्रह्मोत्पन्नस्सतेनोक्तः प्रजास्सृजमहामत'इत्यादिस्मरणाच्च । तस्माद्देवादीनां विग्रहवतामर्थित्वसामर्थ्ययोगादस्तिब्रह्मविद्यायामधिकारइति सिद्धं ॥

संग्रहकारिकाः ॥

देवादीनामधिकृतिर्विद्यायां नैव विद्यते ।
तेषां विग्रहशून्यानां नखल्वस्ति समर्थता ॥
न च मन्त्रार्थवादेभ्यस्तत्सिद्धिप्रार्थनोचिता ।
आन्यपर्याद्विरोधाच्च दुर्वारात्कर्मशब्दयोः ॥

मैवम्मन्त्रार्थवादानां द्वारार्थेऽप्यस्ति मानता ।
न कर्मणि विरोधोऽस्ति नैकविग्रहसम्भवात् ॥
न शब्दे जातिशब्दत्वात् समत्वान्नामरूपयोः ॥
इति देवताधिकरणम् ॥७॥

मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥३०॥
ज्योतिषि भावाच्च ॥३१॥
भावं तु बादरायणोऽस्ति हि ॥३२॥

पूर्वाधिकरणे सामान्येन देवानां तदभीप्सितपरोपासनाधिकारोऽस्तीत्युक्तम् । अथ उपासनाविशेषेषु देवताविशेषाणामधिकारोऽस्ति न वेति चिन्त्यत इति सङ्गतिः । अस्ति छान्दोग्ये मधुविद्या । तस्यां वस्वादय उपास्याः प्राप्याश्च श्रूयन्ते । तत्रह्यादित्यव्यपाश्रयाणि लोहितादिपञ्चरूपात्मकानि पञ्चामृतानि वसुरुद्रादित्यमरुत्साध्यगणभोग्यत्वेनोपास्यानि, तदुपासनानाञ्च वस्वादिपदप्राप्तिः फलमिति वर्णितं, 'तद्यत्प्रथममसृतं तद्वसव उपजीवन्त्यग्निना मुखेन न वै देवा अश्नन्ति न पिबन्त्येतदेवामृतन्दृष्ट्वा तृप्यन्ति सयएतदेवममृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यती'त्यादिना । तस्यांवस्वादीनां नास्त्यधिकारः। स्वस्य स्वोपास्यत्वासम्भवात्, स्वपदप्राप्तेः फलत्वासम्भवाच्चेति पूर्वः पक्षः । ननु नायं पूर्वपक्षो युक्तः । इह कल्पे वस्वादीनां सतां कल्पान्तरेऽपि वसुत्वादिकमस्त्विति, इह जन्मनि ब्राह्मणस्य सतो जन्मान्तरेऽपि ब्राह्मण्यमस्त्विती च्छावदिच्छोपपत्तेः, भूमविद्यामध्यगतायां प्राणविद्यायां स्वस्य स्वोपास्यत्वसम्प्रतिपत्तेश्चेति चेत्, एवं पूर्वपक्षी मन्यते । मधुविद्याया न वस्वादिभावः फलम् । किन्तु वस्वादिस्थानप्राप्तिपूर्वकं तत्तद्भोगसाम्यं। यथा 'अस्मद्भ्रातॄणाम्मध्ये त्वमेक' इत्युक्तौ भ्रातृभिर्भोगसाम्यं । अन्यथा मधुविद्यानिष्ठानां प्रायणानन्तरं वस्वादिभावप्राप्तौ 'अष्टौवसव' इत्यादिश्रुतिसिद्धसंख्यातिरेकप्रसङ्गात् । दृष्टश्च 'वैष्णवं वामनमालभेत स्पर्धमान' इति

विधिशेषस्य 'विष्णुरेव भूत्वेमान् लोकानभिजयती' त्यर्थवादस्य विष्णुवज्जेतृत्वमात्रपरत्वं। तस्माद्वस्वादीनामप्राप्तफलत्वोक्तिर्युक्तैव। तथा स्वोपासनासम्भवोक्तिरपि युक्ता। तदुपासनया तद्भोगसाम्यप्राप्तेस्तत्प्रीतिद्वारत्वस्यौत्सर्गिकत्वेन वस्वादिषु प्रीणयितृत्वप्रीणनीयत्वरूपकर्तृकर्मभावाविरोधात्। न हि स्वयमेव स्वात्मानं प्रीणयित्वा प्रीतास्स्वस्मात् फलंलभत इत्यस्ति सम्भवः। प्राणविद्यायांतु भगवत्प्रीत्यैव फललाभः। न हि तत्र स्वोपासनस्य स्वसमभोगप्राप्तिफलश्रवणमस्तीति। किंच 'तन्देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत' मिति श्रुतिः न देवादीनां ब्रह्मविद्याधिकारप्राप्त्यर्था। मनुष्याणामिव तेषामप्यर्थित्वादिसत्त्वेनाधिकारस्य स्वतःप्राप्तत्वात्। किन्तु ज्योतिषां ज्योतिर्ब्रह्मैवोपासत इति परिसंख्यार्था। अतोऽपि न वस्वादीनां मधुविद्यायामधिकारइति पूर्वपक्षः। सिद्धान्तस्तु—

वस्वादीनामपि तस्यामस्त्येवाधिकारः। तेषामपि स्वान्तर्यामितया ब्रह्मोपासनसम्भवात् 'य एतामेवं ब्रह्मोपनिषदं वेदे' त्युपसंहारे ब्रह्मविद्यात्वश्रवणात् तेषामपि भाविवस्वादित्वप्राप्तिपूर्वकब्रह्मप्रेप्सासम्भवाच्च। एतेन पूर्वपक्ष्यापादितः प्रीणयितृप्रीणनीयैक्यापत्तिमूलस्सर्वोऽपि दोषो निरस्तः। वस्वादिभिस्स्वान्तर्यामितयोपास्यस्य सर्वेश्वरस्यैव प्रीणनीयत्वात्। तस्माद्वस्वादीनामपि स्वप्रीणनीयोपास्यतत्फलप्रेप्सयोस्सम्भवात् अस्ति मधुविद्याधिकारः। एवं वाय्वादीनां संवर्गविद्याद्यधिकारोऽपि द्रष्टव्यः। नन्वग्न्यादिभ्य उपरि स्थितानामिन्द्रादीनामर्चिरादिगतिस्मरणं न सम्भवति। तच्च विद्याङ्गमिति 'तदोकोग्रज्वलन' मिति सूत्रे सूत्रकार एव 'तच्छेषगत्यनुस्मृतियोगा' दिति सूत्रांशेन स्फुटीकरिष्यति। अतोऽङ्गानुष्ठानाशक्तानां देवानां कथं विद्याधिकारः। यदि गतिस्मरणमदृष्टार्थं तदाऽर्चिरादिदेवता अपि मनुष्याणां मुच्यमानानां अर्चिरादिका गतिरिति स्मरिष्यति। यदि त्वेवंभूतेन मार्गेण मया विद्यया परमपदं प्राप्यमिति स्मरणमहरहःकर्तव्या। यामुपासनायां ऋत्विक्कर्तृकहविश्शेषभक्षणनियमस्तेषां करिष्यमाणकर्मसन्तताविवोत्साहजननार्थं, तदाग्न्यादयः स्वस्थानपेक्षितांशं विहायापेक्षितं स्व-

स्वपदानामुपरिस्थितं गत्यंशं स्मरिष्यन्ति । यथा ऋत्विजोऽश्वमेधादिषु अतिबहुपशुप्रभवहविश्शेषमध्ये अपेक्षितांशमात्रं भक्षयन्तीति न सङ्कटं किंचित् । ननु देवानां ब्रह्मविद्याधिकारचिन्तेयं क्वोपयुज्यते । न तावदस्मदादीनां प्रवृत्तौ । नापि देवानां । तेषां स्वकीये विग्रहवत्त्वे तत्प्रयुक्तसामर्थ्यादिमत्त्वे च स्वयमेवावगतिसद्भावात् । उच्यते– देवता न संति चेत् मधुविद्यादीनां वस्वादिपदप्राप्तिः फलं न भवेत् । वरुणग्रहनिर्मोकादिवत् बाधितस्य फलत्वेन श्रुतस्यापि विधेयक्रियाफलत्वायोगात् अन्यदेव तत्फलं कल्प्यं स्यात् । अन्तरादित्यविद्यादिष्वादित्यदेवतान्तर्यामित्वेन ब्रह्मोपासनं न सिध्येत् । गत्यनुस्मृतावचेतनान्यर्चिरादीन्येव मार्गपर्वत्वेन चिन्तनीयानि स्युः । 'भाक्तं वानात्मवित्त्वा' दित्यादिसूत्रोक्तन्यायेन यागादिफलं भुञ्जानानान्निरन्तरमाजानदेवकर्मकरतावगत्या वैराग्यं न सिध्येत् । मनुष्याणामेतादृशाभिमतसिद्धिः फलम् देवतासद्भावप्रसाधनस्य । मंत्रार्थवादाः प्राप्तिविरोधयोरसतोः प्रतीयमानार्थे प्रामाण्यं न जहातीति देवताविग्रहप्रसाधनोपयोगिन्यायसमर्थनस्यापि 'प्लवाह्येते अदृढा यज्ञरूपा अष्टादशोक्तमवरं येषु कर्म । एतच्छ्रेयो येऽभिनन्दन्ति मूढा जरामृत्यू ते पुनरेवापियंति ॥ जायस्व म्रियस्वेत्येतत् तृतीयं स्थानं, तेनासौ लोको न संपूर्यते तस्माज्जुगुप्सेते' त्यादिमन्त्रार्थवादप्रामाण्यावधारणेन विवेकवैराग्यादिसिद्धिः फलमित्याद्यूह्यम् ॥

संग्रहकारिके ॥

तथाऽपि मधुविद्यायां वस्वादीनान्नविद्यते ।
अधिकारो विरोधाच्च प्राप्तत्वात्तत्फलस्य च ॥
मैवं सा ब्रह्मविद्या तदधिगतिफला वर्णिता वाक्यशेषे
तस्माद्वस्वादिशब्दे प्रविकसितपरब्रह्मपर्यन्तशक्तिः ।
स्वावस्थब्रह्मचिन्ताविधिषु न वलते कर्मकर्त्रैक्यशङ्का
मुक्तेः प्राक् द्वारभूतं फलमपि घटते भावि वस्वादिताप्तिः ॥

इति मध्वधिकरणम् ॥ ८ ॥

शुगस्य तदनादरश्रवणात्तदाद्रवणात् सूच्यते हि ॥३३॥

क्षत्रियत्वगतेश्च ॥३४॥

उत्तरत्र चैत्ररथेन लिंगात् ॥३५॥

संस्कारपरामर्शात्तदभावाभिलापाच्च ॥३६॥

तदभावनिर्धारणे च प्रवृत्तेः ॥३७॥

श्रवणाध्ययनार्थप्रतिषेधात् ॥३८॥

स्मृतेश्च ॥३९॥

वस्वादीनामर्थित्वसामर्थ्यसद्भावात् ब्रह्मविद्यायामधिकारोऽस्तीत्युक्तं। तर्हि शूद्राणामपि तत्सद्भावात् अधिकारस्स्यादिति शङ्कया सङ्गतिः। शूद्राणामधिकारोऽस्ति न वेति तदुपसंहारसामर्थ्यसत्त्वासत्त्वाभ्यां संशये पूर्वपक्षः। अस्त्यधिकारस्तेषामपि। अग्निविद्याभावाद्धि कर्मानधिकारः पूर्वतन्त्रापशूद्राधिकरणे साधितः। न चोपासनेषु मनोवृत्तिमात्ररूपेषु तदपेक्षाऽस्ति। अतः स्त्रीणामिव तेषामप्यधिकारोऽस्त्येव। न च तेषां विद्यासहकारिकर्मासम्भवः। स्ववर्णाश्रमधर्मसम्भवात्। न च तेषां ब्रह्मस्वरूपतदुपासनप्रकारज्ञानासम्भवः, इतिहासपुराणसत्त्वात्। अत एव हि विदुरादयो ब्रह्मनिष्ठाः। अस्ति च छान्दोग्योपनिषदि तेषां विद्याधिकारलिङ्गम्। तत्रहि संवर्गविद्यायां विद्याधिकारिणः शूद्रेत्यामन्त्रणं दृश्यते। 'आजहारेमाश्शूद्रानेनैव मुखेन मामालापयिष्यथा' इत्येवन्तत्रोपाख्यायते। जानश्रुतिर्नाम राज्यपरिपालकः श्रद्धयाबहुप्रदः सर्वासु दिक्षु ग्रामनगरमार्गारण्यतीर्थादिषु पान्थानामन्नोदकशयनाच्छादनादिभोग्यजातसंपूर्णानावसथान् मापयांचक्रे। तस्य धार्मिकप्रवरस्य कर्मभिः क्षीणदुरितस्य ब्रह्मविविदिषामुत्पादयितुं केचन महर्षयो हंसरूपमास्थाय निशायां हर्म्ये शयानस्य तस्योपरि पङ्क्तिमाबध्याजग्मुः। तेषामग्रेसरं हंसं 'भोभो भल्लाक्ष भल्लाक्षे' ति विपरीतलक्षणया मन्दलोचनेति सम्भ्रमेण द्विवारं सम्बोध्य कश्चिद्धंस

उवाच । जानश्रुतेरन्नदानादिप्रभावजनितं ज्योतिः द्युलोकपर्यन्तं व्याप्तं वर्तते । तत्र त्वं लग्नः प्रदग्धो माभूरिति, एवमुक्तवन्तन्तमग्रगामी हंसः प्रत्युवाच । एतं वराकं जानश्रुतिं शकटसहितं रैक्वमिव कीदृशमाहात्म्यशालिनमात्थेति । एतदाकर्ण्य तेन पृष्ठगामिना हंसेन कोऽसौ रैक्व इति पुनः पृष्टस्सएव प्रत्युवाच । सर्वेषामपि सर्वं सत्कर्मविज्ञानजातं यदीयसत्कर्मविज्ञानान्तर्भूतं सरैक्व इति । तदेतद्धंसवाक्यं जानश्रुतिःस्वनिंदारैक्वप्रशंसागर्भमाकर्ण्य कथमपि निशामतिवाह्य तल्पं त्यजन्नेव क्षत्तारमाहूय शकटचिह्नसहितं रैक्वमुक्त्वा तदन्वेषणाय प्रेषयित्वा कचिद्देशे शकटस्याधस्तात् पामानं कण्डूयमानं रैक्वं दृष्ट्वा प्रत्यागत्य तस्मिन्निवेदितवति स्वयं रैक्वमुपसंपद्य गवां षट्शतानि निष्कमश्वतरीयुक्तं रथञ्चोपहृत्य त्वदुपास्यां देवतामुपदिशेति प्रार्थयामास । ततस्तमुवाच रैक्वः 'अहहारेत्वा शूद्र तवैव सह गोभिरस्त्वि' ति । अहेति निपातः । हारसहितः इत्वा रथः गोभिस्सह तवैवास्त्विति तदर्थः । पुनर्जानश्रुतौ रैक्वस्यैतावता न सन्तोष इति मत्वा गवां सहस्रं पूर्वानीतं हारादिकं रैक्वस्य विवाहार्थं स्वकन्याञ्चोपहृत्य विद्योपदेशार्थं प्रार्थयमाने रैक्वस्येदं वाक्यं 'आजहारेमाश्शूद्रे' त्यादि । इमाः दक्षिणाः आहृतवानसि । अनेनैव मुखेन विद्याग्रहणोपायेन मामालापयिष्यसि । विद्योपदेष्टारं करिष्यसीत्यर्थः । यद्यपि 'अहहारेत्वाशूद्रे' ति पूर्ववाक्येऽपि 'शूद्रे' त्यामन्त्रणमस्ति । तथाऽपि शूद्रवत् ब्रह्मविद्यागौरवमजानानस्स्वल्पांदक्षिणामाहरसीति कोपेन क्षत्रिय एव 'शूद्रे' त्यामन्त्रित इत्यन्यथा सिद्धिर्वक्तुं शक्या । न तु द्वितीयवाक्य इत्यभिप्रेत्य इदं सन्तोषवाक्यमुदाहृतं भाष्ये । एवं शूद्रस्यापि विद्याधिकारोऽस्तीति प्राप्ते राद्धान्तः—

शूद्राणान्तावत् नब्रह्मस्वरूपतदुपासनप्रकारपरिज्ञानोपायोऽस्ति । न च पुराणादिकं तदुपायः, 'इतिहासपुराणाभ्यां वेदं समुपबृंहये'दिति वेदतात्पर्यनिर्णयार्थत्वेन तस्य विनियुक्तत्वात् । न च 'श्रावयेच्चतुरोवर्णान् कृत्वा ब्राह्मणमग्रत' इति शूद्राणां पुराणादिश्रवणानुमतेर्वैफल्यं, पापक्षयार्थत्वोपपत्तेः । विदुरधर्मव्याधदीनान्तु ब्रह्मनिष्ठा न पुराणादिना, किंतु

जन्मान्तरवासनानुवृत्त्या । 'शूद्रे' त्यामन्त्रणमपि न शूद्राणां विद्याधिकारे लिङ्गं । इह शूद्रशब्दस्य रूढ्या जातिवाचित्वाभावात् 'शुचेर्दश्चे' त्युणादिसूत्रेण 'शुच शोक'इति धातोः'स्फायितञ्चिवञ्चिशकिक्षिपिक्षुदिसृपी'त्यादिसूत्रानुवृत्तरप्रत्ययस्य 'अमितम्योर्दीर्घश्चे' ति तदनन्तरसूत्रानुवृत्तदीर्घस्य धातुचकारस्थाने दकारादेशस्य च विधायकेन निष्पन्नस्य तस्य योगेन शोचितृत्वार्थकत्वात्। नचेह रूढिप्रावल्यं शङ्कनीयं। हंसवाक्यानादरश्रवणेन तदैव रैक्वोपसर्पणेन कार्येण च सूचितस्य शोकस्य बुद्धिस्थतया बुद्धिस्थयोगस्य रूढितः प्रबलत्वात् । किंच जानश्रुतेः क्षत्रियत्वावगमादपि तद्विषयशूद्रशब्दो यौगिकः । उपाख्यानोपक्रमेहि 'जानश्रुतिर्ह पौत्रायणः श्रद्धा देयो बहुदायी बहुवाक्य आससहस्रर्वत आवसथान्मापयांचक्रे सर्वत एव मेऽन्नम त्स्यन्ती' ति जानश्रुतेः दानपतित्वं सर्वेभ्यः पक्वान्नदायित्वञ्चोक्तम् । मध्ये च 'सह सञ्जिहान एव क्षत्तारमुवाचे'ति क्षत्तृप्रेषणं । 'इयं जाया अयं ग्रामो यस्मिन्नास्स'इति रैक्वाय कन्याप्रदानं रैक्वस्तदा यत्र ग्रामेस्थितः तस्य ग्रामस्य दानंचोक्तम् । अन्ते च 'ते हैते रैक्वपर्णानामममहावृषेषु यत्रास्मा उवासे' ति तस्मै महावृषाख्यदेशगतबहुग्रामप्रदत्वमुक्तम् । एतैर्लिंगैः जानश्रुतेः क्षत्रियत्वमवगतं । यद्यपि अन्यायवृत्ताश्शूद्रा अपि राज्यं परिपालयन्तः 'वैश्यात् ब्राह्मणकन्यायां क्षत्ता नाम प्रजायते। 'जीविकावृत्तिरेतस्य राजांतःपुररक्षण' मित्युक्तलक्षणक्षत्रसंग्रहादिकं कुर्वंति । तथाऽपि वेदनिबद्धं तत् न तादृशं वक्तुं शक्यम् । वाधकाभावे वैदिकलिंगावगम्यस्य धर्म्यस्यैव ग्राह्यत्वात् । अन्यथा शूद्रेत्यामन्त्रणेनावगतशूद्रस्य विद्याग्रहणं अधर्म्यं वेदेन निवद्धमिति वक्तुं शक्यतया शूद्रस्य विद्याधिकारे उक्तवैदिकलिंगासिध्या तद्बाधकानामनुपन्यसनीयतापत्तेः । तस्माज्जानश्रुतिः क्षत्रियोऽवगम्यत इति युक्तमेव । किंच अस्यामेव संवर्गविद्यायामुत्तरत्र चैत्ररथस्य क्षत्रियत्वात् तस्यापि क्षत्रियत्वमवगम्यते । उत्तरत्र हि 'अथ ह शौनकञ्च कापेयमभिप्रतारिणञ्च काक्षसेनिं परिविष्यमाणौ ब्रह्मचारी विभिक्ष'इत्यादौ शौनकस्य ब्राह्मणस्य द्वितीयोऽभिप्रतारी क्षत्रिय इति तत्प्रायपाठात् रैक्वस्य

ब्राह्मणस्य द्वितीयो जानश्रुतिरपि क्षत्रिय इत्यवगम्यते । स्यादेतत् । जान-श्रुतेः क्षत्रियत्वनिर्धारणमिह प्रायपाठसत्वाधीनं, तत् अभिप्रतारिणः क्षत्रि-यत्वनिर्धारणाधीनं, तदपि तस्य चैत्ररथत्वनिर्धारणाधीनं, तच्च तस्य का-पेययाज्यत्वनिर्धारणाधीनं, तत्कुतो निर्धार्यते । न हि तदिह वा अन्यत्र-वा श्रुतमस्ति । न च कापेयसहपाठात् तत्सम्बन्धः क्वचित्सिध्यन् तद्याज्य-त्वरूपस्सिध्यतीति वाच्यम् । भोजनार्थं सहोपविष्टाविस्येव हि सहपाठः । न च तावन्मात्रेण कश्चन कुलसम्बन्धस्सिध्यति । अतिथिगृहस्थयोर्व्यभि-चारात्, प्राचीनशालीयसंज्ञादिषु व्यभिचाराच्च । तेषामेकविद्यत्वं सम्ब-न्धश्चेत्, इहापि तदेव सम्बन्धस्स्यात् । उभयोरपि असंवर्गविद्योपासक-त्वात् । ननु छन्दोगब्राह्मणे 'अथ यस्य ज्योतिरुक्थ्यः पूर्वमहर्भवत्या-युरुत्तर' इतिविहितस्य द्विरात्रस्य 'एकाकिनमेवैनमन्नाद्यस्याध्यक्षं करोती' त्येनं द्विरात्रयाजिनमेकमेव भ्रातृवर्गादिमध्ये ऐश्वर्यस्याध्यक्षं करोतीत्येवं फलार्थवादमुक्त्वा तदुपपादकमर्थवादान्तरमाम्नातम् । 'एतेन वै चित्ररथं कापेया अयाजयन् तमेकाकिनमन्नाद्यस्याध्यक्षमकुर्वन् तस्माच्चैत्ररथीनामेकः क्षत्रपतिर्जायत' इति चित्ररथतद्वंश्यानां कापेययाज्यत्वं श्रुतमिति चेत्, किंततः । न खल्वभिप्रतारी चित्ररथः, नामभेदेन ततो भेदावगमात् । नापि चित्ररथवंश्यः, तथा श्रवणाभावात् । भाष्ये तु 'एते नवै चित्ररथं कापेया अयाजयन्नि'ति श्रुतिपाठो लिखितः । तत्रापि अभिप्रतारिणः का-पेययाज्यत्वासिद्धिशङ्का तुल्या । तस्य चैत्ररथस्वाश्रयणादेव । तस्मादभिप्र-तारिणः कापेययाज्यत्वं ततश्चित्ररथवंश्यत्वञ्च अवगन्तुमशक्यमिति चेत् उच्यते– कापेयस्तावत् श्रुत्यन्तरबलात् चित्ररथयाजकत्वेन प्रत्यभिज्ञायत इति तावन्निर्विवादं । तत्सहोपविष्टोऽभिप्रतारी कापेययाज्यः चित्ररथवं-श्यश्चेति बुद्धिरौत्सर्गिकी । बाधकाभावात् । भवत्येव यथाह्यविदितपूर्वस्य हस्तिनो निकटे दृश्यमाने पुरुषे राज्ञो हस्तिपकोऽयमिति प्रत्यभिज्ञायमाने सति अयमस्य हस्तिपकस्य शिक्षणीयो हस्ती राजकीयश्चेति बुद्धिः । ननु सिध्यतु कापेययाज्यत्वमभिप्रतारिणः, ततश्चित्ररथवंश्यत्वं न सिध्यति,

अन्यस्यापि तद्याज्यत्वसम्भवादिति चेत् । न त्रिविधाः खलु याजकाः पितृपितामहादिपरम्परया कुलक्रमागताः याजकाः पितृभूताः, तदसम्भवे कस्यचिदाधानप्रभृतिषु सर्वेषु कर्मसु याजका मनुष्यभूताः, तदसम्भवे तत्र कर्मणि दैवादागत्य आर्त्विज्यं कुर्वन्तो देवभूताः । अतस्समानान्वयानां याज्ययाजकभावस्य मुख्यत्वेन औत्सर्गिकत्वात्, पूर्वराजचरित्रेषु बहुशो याज्ययाजककुलव्यवस्थादर्शनाच्च कापेयानां पितृभूतयाजकत्वावधारणात् कापेययाजकयोगेन चित्ररथवंश्यत्वसिद्धिः । तस्मात् संवर्गविद्यान्वयिनोर्द्वयोः ब्राह्मणस्य द्वितीयः क्षत्रिय इत्युत्तरदर्शनात् तत्प्रायपाठादपि रैकस्य द्वितीयो जानश्रुतिः क्षत्रियः । ननु रैको ब्राह्मण इति कुतोऽवगतं, येन शौनकद्वितीयवत् तद्द्वितीयः क्षत्रियस्स्यात् । तदन्वेषणार्थं प्रेषिते क्षत्तरि तमन्विष्य प्रत्यागते सति 'यत्रारे ब्राह्मणस्यान्वेषणा तदेनमर्च्छे'ति यत्र तपोवनादौ ब्राह्मणानामावासस्थले ब्राह्मणस्यान्वेषणं कर्तुमुचितं, तत्र गत्वैनं प्राप्नुहीत्यर्थकेन तस्य ब्राह्मणत्वस्य स्फुटीकरणात् । तस्मादिह आमन्त्र्यमाणस्य क्षत्रियत्वावगमात न शूद्रेत्यामन्त्रणेन तस्य विद्याधिकारः । विद्याप्रदेशेषु उपदेश्यस्य उपनयनसंस्कारपरामर्शात् शूद्रस्य तदभावाभिलापाच्च न शूद्रस्य विद्याधिकारः । छान्दोग्ये ह्येवमुपाख्यायते शैशवे प्रमीतपितृकस्सत्यकामो 'विद्यार्थमाचार्यमुपेत्य ब्रह्मचर्यं चरिष्यामि किं गोत्रोऽह'मिति मातरं पृष्ट्वा तया त्वज्जनकपरिचरणं कृत्वैव स्थिताऽस्मि नाहं गोत्रं वेदेत्युक्तः गौतममासाद्य 'ब्रह्मचर्यं भवति वत्स्याम्युपेयां भगवन्त' मित्युक्त्वा 'किंगोत्रस्त्व' मितिपृष्टो 'नाहं गोत्रं वेद माताऽपि नावेदीत् माता मे जबाला सत्यकामोऽह' मित्युवाच । अथ गौतमस्सत्यवचनेन 'नायमब्राह्मण' इति निर्धार्य 'समिधं सोम्याहरोपत्वानेष्य' इत्युक्तवानिति । ननु अपरामृष्टमुपनयनं विद्याङ्गमध्ययनाङ्गं वा उभयथापि नोपपद्यते । विद्यांगोपनयने गोत्रपरिज्ञानस्य अनपेक्षितत्वेन गोत्रप्रश्नानुपपत्तेः । अध्ययनांगोपनयन एव गोत्रभेदेन प्रकारभेदसत्त्वेन गोत्रप्रश्नोपयोगात् अध्ययनांगोपनयने 'समिधं सोम्याहरे' ति विनियोगानुपपत्तेः । विद्यांगोपनयन एव 'तद्विज्ञानार्थं स

गुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठ'मिति समित्पाणित्वस्य विहितत्वात्, अग्रे सत्यकामाय षोडशकलब्रह्मविद्योपदेशस्यैव दर्शनात्, वेदाध्यापनस्यादर्शनाच्च। उच्यते— उपक्रमगतगोत्रप्रश्नानुसारादध्ययनांगमिदमुपनयनं। अध्ययनन्तु 'उपनीये' त्यनेनैव गृहीतं। तस्य अध्ययनपर्यंतोपनयनपरत्वात्। पूर्वतन्त्रे हि 'तस्मादग्निचिद्वर्षति न धावे' दित्यत्र 'अग्निचि' दित्यस्य यदर्थोऽग्नेश्चयनसंस्कारः, तत्पर्यन्ताग्निचयनपरते त्यग्निचयनांगकर्तृभूत एव 'वर्षति न धावे'दित्यादीनि अग्निचिद्वृतानि, न त्वग्निचयनसंस्कारमात्रे भूत इति निर्णीतं क्रमलक्षणे। विद्याप्रदेशे अध्ययनांगोप'नयनपरामर्शो विद्यार्थमपि तदपेक्षास्ति, अतस्तद्रहितस्य न विद्याधिकार' इतिज्ञापनार्थः। समिदाहरणनियोगस्तु तस्मिन् दयया तस्मै विद्यामप्युपदेक्ष्यामीत्यभिप्रायो वर्णनीयः। अस्तु शूद्रस्याप्युपनयनमिति चेत् न 'न शूद्रे पातकं किञ्चिन्नच संस्कारमर्हती' ति मानवे धर्मशास्त्रे तस्य तत्प्रतिषेधात्। पातकं=वृथामांसभक्षणादिकृतं। ननु तत्र 'न शूद्रे पातकं किंचिन्न च संस्कारमर्हती' त्येतदनन्तरं 'धर्मेप्सवस्तु धर्मज्ञास्सतां वृत्तिमनुव्रताः। मन्त्रवर्जन्नदुष्यन्ति प्रशंसां प्राप्नुवन्ति चे' ति धार्मिकाणां शूद्राणां मन्त्रवर्जसंस्काराभ्यनुज्ञानं कृतमिति चेत् सत्यं। तज्जातकर्मादिमात्रविषयं। न तु उपनयनविषयमपि। 'शूद्रश्चतुर्थो वर्ण एकजाति' रिति गौतमस्मृतौ। आहत्य तस्य द्वितीयजन्मरूपोपनयनाभावस्मरणात् इहापि शूद्रत्वाभावनिर्धारणे सत्येव अध्ययनांगोपनयनप्रवृत्त्युपन्यासाच्च। किंच शूद्रस्य वेदवाक्यश्रवणतदध्ययनतदर्थविचारज्ञानानुष्ठानानि, 'पद्यु वा एतत्श्मशानं यच्छूद्रः तस्माच्छूद्रसमीपे नाध्येतव्य' मिति शूद्रसमीपे अध्ययनप्रतिषेधेन गौतमस्मृतौ 'अथहास्यवेदमुपशृण्वतस्त्रपुजतुभ्यां श्रोत्रप्रतिपूरणमुदाहरणे जिह्वाच्छेदो धारणे शरीरभेद' इति शूद्रस्य वेदश्रवणादिषु दण्डविधानेन चार्थात्प्रतिषिध्यन्ते। यस्य हि समीपेऽपि नाध्येतव्यं वेदवाक्यं, यस्य च तच्छ्रवणेऽपि महान् दण्डः, स तत्कथं शृणुयात्। अश्रृण्वतः कुतोऽध्ययनमनुष्ठानं वा, तस्मान्नशूद्रस्य विद्याधिकार इति सिद्धम्॥

संग्रहकारिके ॥

विद्यास्वस्त्यधिकारश्शूद्राणामपि फलार्थित्वात्।
इतिहासपुराणाभ्यां वेद्यत्वाद्दर्शनाच्च तथा ॥
वेदोपबृंहणतया विद्यार्थे ते न तु स्वतन्त्रतया।
विदुराद्यास्स्वयमुद्गतविद्या जानश्रुतिस्तु स नृपः ॥

इति अपशूद्राधिकरणम् ॥९॥

कम्पनात् ॥ ४० ॥

एवं प्रासंगिकेऽधिकरणत्रये वृत्ते यदंगुष्ठाधिकरणान्ते स्थितमुत्तरत्र समापयिष्यतइत्युक्तं, तत्सूत्रद्वयेन समापयति– 'अंगुष्ठमात्रः पुरुषो मध्य आत्मनी'ति 'अंगुष्ठमात्रः पुरुषोऽन्तरात्मे'त्यनयोर्मन्त्रयोर्मध्ये 'यदिदं किं च जगत्सर्वं प्राण एजति निस्सृतम्। महद्भयं वज्रमुद्यतं य एतद्विदुरमृतास्ते भवन्ती'ति मन्त्रः पठ्यते। अस्यार्थः। अस्मिन्नंगुष्ठमात्रे पुरुषे प्राणशब्दनिर्दिष्टे स्थितं ततो निस्सृतमिदं सर्वं जगदुद्यतवज्रतुल्यादेतस्माद्यन्महतोभयं तस्माद्धेतोः एजति=कम्पते। तच्छासनातिवृत्तौ प्रत्यवायो भविष्यतीति भयात् स्वस्वकार्येषु प्रवर्तत इत्यर्थः। 'भयादस्याग्निस्तपति भयात्तपति सूर्यः। भयादिन्द्रश्च वायुश्च मृत्युर्धावति पञ्चम'इत्यनन्तरमंत्रे अग्न्यादीनामंगुष्ठमात्रनिमित्तभयहेतुकस्वस्वव्यापारप्रवृत्त्युपन्यासादिहापिमंत्रे 'महद्भयं वज्रमुद्यत'मिति प्रथमानां पञ्चम्यर्थतां कम्पत इत्यस्य स्वस्वव्यापारप्रवृत्त्यर्थताञ्चालोच्यैवं व्याख्यातम्। एवंरूपात् कम्पनादपि अंगुष्ठप्रमितः परमात्मा ॥

ज्योतिर्दर्शनात् ॥ ४१ ॥

तयोरेव अंगुष्ठमात्रविषययोर्मन्त्रयोर्मध्ये 'न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती'ति परमात्मासाधारणं सर्वतेजसां छादकं तेषां कारणभूतं अनुग्राहकञ्च अंगुष्ठमात्रपुरुषस्य ज्योतिर्दृश्यते। अत्र हि 'तमेव

मान्तमनुभाति सर्वं'मिति तद्भानानुभानरूपभानपौर्वापर्योक्त्या सर्वतेजः-कारणत्वमुक्तम्। पूर्वार्धेन सर्वतेजश्छादकत्वमुक्तम्। चतुर्थपादेन सर्वतेजोऽनुग्राहकत्वमुक्तं। इदं परमात्मासाधारणम्। 'तं देवा ज्योतिषां ज्योतिः, यस्यादित्यो भामुपयुज्य भाती'त्यादिश्रुत्यन्तरदर्शनात् आथर्वणस्यैव 'न तत्र सूर्य' इति मन्त्रस्य पाठाच्च। एवम्भूतज्योतिर्दर्शनादपि अंगुष्ठमात्रः पुरुषः परमात्मा॥

इति प्रमिताधिकरणम्॥१०॥

आकाशोऽर्थान्तरत्वादिव्यपदेशात्॥४२॥

सुषुप्त्युत्क्रान्त्योर्भेदेन॥ ४३॥

पत्यादिशब्देभ्यः॥ ४४॥

पूर्वं दहराकाशस्य परब्रह्मत्वसमर्थनाय अल्पश्रुतिपरिहारे कृते तत्प्रसङ्गादंगुष्ठमात्रस्य परमात्मत्वं साधितम्। तत्प्रसङ्गागतं तु अधिकरणत्रयम्। अथ पूर्वप्रकृतदहरविद्याया बुद्धिस्थत्वेन तदनन्तरश्रुतस्याकाशवाक्यस्य परमात्मपरत्वं निरूप्यत इति सङ्गतिः। छान्दोग्ये दहरविद्यानन्तरं श्रूयते— 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मे'ति। तत्र आकाशः 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य। धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी'ति पूर्वमन्त्रप्रकृतो मुक्तात्मा, उत परमात्मेति मुक्तात्मनि नामरूपनिर्वोढृत्वसम्भवासम्भवाभ्यां संशये, पूर्वपक्षः— स मुक्तात्मा। 'ते यदन्तरे'ति नामरूपमध्यस्थितत्वोक्त्या नामरूपास्पृष्टत्ववर्णनात्। 'नामरूपयोर्निर्वहिते'ति तु मुक्तात्मनि पूर्वावस्थाभिप्रायेण उपपद्यते। स हि बद्धावस्थायां नामरूपयोर्नितरां वोढा, देवमनुष्यादिजन्मपर्यायेण बहुविधनामरूपवोढा स्थित इत्येवं प्राप्त उच्यते—

अयमाकाशः परमात्मा। न मुक्तात्मा। मुक्तात्मभेदोपपादकनामरूपनिर्वोढृत्वश्रवणात्। निर्वोढृत्वं हि रूढ्या कर्तृत्वम्। न तु योगेन नितरां वोढृत्वम्। रूढेः प्रबलत्वात्। नामरूपकर्तृत्वं तु जीवस्य न बन्धमुक्त्यवस्थयोस्सम्भवति। जगद्व्यापारनिषेधात्। तत्तु परमात्मन एव धर्मः। 'नामरूपे व्याकरवाणि, तस्मादेतद्ब्रह्म नाम रूपमन्नञ्च जायत' इत्यादि श्रुतेः। तस्माद्यद्यपि पूर्वमंत्रे अभिसम्भवितृत्वेन मुक्तात्मा प्रकृतः। तथाऽपि अभिसम्भाव्यत्वेन परमात्माऽपि प्रकृत इति तद्विषय एवायमाकाशशब्दः। आकाशशब्देन प्रकृतस्य दहराकाशस्य प्रत्यभिज्ञानादपि तद्विषयोऽयं। न च प्रजापतिवाक्येन व्यवधानात् न तत्प्रत्यभिज्ञानमस्तीति शङ्कनीयम्। तस्याप्युपासकस्वरूपयाथात्म्यकथनद्वारा दहरवाक्यशेषत्वात्। दहरवाक्ये दहराकाशउपास्यतयोपक्रान्त इह प्राप्यतयोपसंह्रियत इति विशेषः। अथ स्यात् जीवात्मनो भिन्नं आत्मान्तरमेव नास्ति। बृहदारण्यके – 'योऽयं विज्ञानमयः प्राणे' ष्विति प्रकृतस्य जीवस्य 'एष ब्रह्मलोकस्सम्राडि' ति निर्दिष्टपरमात्मैक्योपदेशात्, 'नेह नानास्ति किं चने' ति भेदनिषेधाच्च। एवं च नामरूपकर्तृत्वमपि मुक्तात्मनि घटते। तस्यैव परमात्मत्वात्। अतोऽयमाकाशो न मुक्तात्मा, किं तु तद्भिन्नः परमात्मेति निर्णयो न युक्त इति चेत्, मैवं। बृहदारण्यके प्राणेष्विति जीवं प्रकृत्य 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किं च न वेद नान्तर'मिति सुषुप्तौ, 'प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्याती'त्युत्क्रान्तौ च, भेदेन व्यपदेशात् 'एष सर्वेश्वर एष भूताधिपतिरेष भूतपाल' इत्यादिवाक्यश्रुतपरिष्वञ्जकविषयपत्यादिशब्देभ्यश्च जीवभिन्नस्य परमात्मनः प्रत्याख्यानासम्भवात्। ऐक्योपदेशभेदनिषेधौ तु प्रकार्थैक्यनिबन्धनाविति समनन्तरपादे वक्ष्यते। तस्मादिहाकाशः परमात्मा न मुक्तात्मेति युक्तमेव ॥

संग्रहकारिका: ॥

मुक्तात्मा प्रकृतस्स्यात् आकाशो नामरूपनिर्वोढा।
प्राग्बद्धस्तद्धानिति तन्निर्वोढा ततस्तदस्पृष्टः ॥

निर्वोढेप्येत कर्ता यदि भवतु तथा पूर्वमन्त्रोपदिष्टः
प्राप्तव्यब्रह्मलोकोदिततदभिदया यद्विमुक्तोऽपि कर्ता ।
तेनैक्यं ब्रह्मलोकश्रुतिसमधिगतेनैकधैवेति किञ्चि-
न्नानानास्तीति चास्य स्फुटगतिबृहदारण्यके प्रत्यपादि ॥
नैवन्निर्वोढा स्यात् कर्ता योगाद्धि बलवती रूढिः ।
तत्कर्तृताच बद्धे मुक्तेऽपि च नैव सम्भवति ॥
बृहदारण्यकवचसामर्थो न ब्रह्मजीवैक्यं ।
सुप्त्युत्क्रान्त्योर्भेदश्रवणात्पत्त्यादिशब्देभ्यः ॥

इति अर्थांतरत्वादिव्यपदेशाधिकरणम् ॥११॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजि-
द्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे
नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य
तृ ती यः पा दः ॥

**आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्त-
गृहीतेर्दर्शयति च ॥ १ ॥**

सूक्ष्मं तु तदर्हत्वात् ॥ २ ॥

तदधीनत्वादर्थवत् ॥ ३ ॥

ज्ञेयत्वावचनाच्च ॥ ४ ॥

वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥ ५ ॥

त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥ ६ ॥

महद्वच्च ॥ ७ ॥

इह पादे सांख्यतन्त्रप्रतिपादनच्छायापन्नानां वाक्यानां सांख्याभिमतार्थनिरासेन ब्रह्मणि समन्वयः प्रतिपाद्यत इति पादार्थस्तत्सङ्गतिश्चेत्युभयमपि प्रथमपाद एव दर्शितं । काठके श्रूयते– 'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परम्मनः । मनसस्तु परा बुद्धि र्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः ॥ पुरुषान्नपरं किंचित् सा काष्ठा सा परागति' रिति । तत्र किं सांख्यतन्त्रसिद्धं प्रधानमव्यक्तशब्देनोच्यते, उत शरीरमिति सांख्यतत्त्वप्रक्रियाप्रत्यभिज्ञानशरीरपरिशेषाभ्यां संशये, पूर्वपक्षः- सांख्याभिमतं प्रधानमिदमव्यक्तम् । 'महतः परमव्यक्तमव्यक्तात्पुरुषः पर' इति तत्प्राक्रियाप्रत्यभिज्ञानात्, 'पुरुषान्न परं किंचि' दिति पञ्चविंशपुरुषातिरिक्ततत्त्वनिषेधाच्च । न तु शरीरमव्यक्तं । व्यक्ते तस्मिन्नव्यक्तशब्दस्य शक्त्यभावात् । अव्यक्तकार्ये शरीरे तस्य लक्षणोपेयत इति चेन्न । लक्षणातः प्रधाने रूढेर्बलवत्त्वात् । सांख्यकल्पिता सा रूढिः नैयायिककल्पितपक्षसपक्षादिरूढिवदन्यत्रशब्दार्थनिर्णये अनुपयोगिनीति चेन्न । सांख्यतन्त्रसिद्धतत्त्वानुवादोयमिति तत्प्रक्रियाप्रत्यभिज्ञानात् सिद्धौ तदीयरूढेरेव ग्राह्यत्वात्, 'न पक्षे न सपक्षे वा विपक्षे केवलं स्थितः । चित्रंनिस्त्रिंशधूमस्ते प्रतापाग्न्यनुमापक' इति काव्यश्लोके नैयायिककल्पितरूढेरप्युपयोगदर्शनात् । ननु 'पुरुषान्न परं किंचि' दित्यत्र पुरुषः पंचविंश इति कथमवगम्यते, येनायं पंचविंशातिरिक्तनिषेधस्स्यादिति चेत्, इत्थं । ज्ञानकर्मेन्द्रियाणि दशेन्द्रियशब्दगृहीतानि, भूततन्मात्राः दशार्थशब्दोदिताः, मनोऽन्तःकरणं बुद्धिरहङ्कारः महानात्मा महत्तत्त्वमव्यक्तं प्रधानमिति सांख्याभिमतानि चतुर्विंशतिस्तत्त्वानि प्राङ्निर्दिष्टानि । अतः पुरुषः पंचविंशः । यद्यपि सांख्यानाम्महत्तत्त्व एव बुद्धिशब्दः, आत्मशब्दश्च चेतने, तथापि प्रत्यभिज्ञापकभूयस्त्वानुसारेण कार्ये कारणोपचारादहङ्कारे बुद्धिशब्दः, महत्तत्त्वे व्यापकत्वयोगेनात्मशब्दः । 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनी' त्युपरितनमन्त्रे ज्ञानेप्यात्मशब्ददर्शनात् । ननु पूर्वत्र 'आत्मानं रथिनं विद्धि शरीरं रथमेव तु । बुद्धिन्तु सारथिं विद्धि मनः

प्रग्रहमेवच ॥ इन्द्रियाणि हयानाहुर्विषयांस्तेषुगोचरा' नित्यात्मशरीरादिषु रथिरथादिरूपेण रूपितेषु इन्द्रियादिपरत्ववाक्ये शरीरव्यतिरिक्तानींद्रियादि-शब्दैर्गृहीतानि, शरीरमेकं स्वशब्देन नगृहीतं, अव्यक्तशब्दश्चाधिकोस्तीति परिशेषादव्यक्तशब्दो लक्षणयापि शरीरार्थको वक्तुं युक्त इति चेत् न। रथि-रथादिरूपेण निरूपितान्येव इन्द्रियादिपरत्ववाक्येप्यन्यूनातिरेकेण ग्राह्या-णीति नियमे कारणाभावात्। तथा नियमे हि न तावद्रूपकवाक्यस्याकांक्षा कारणं। तस्य वाक्यस्येन्द्रियादिभिरसंयतैर्जीवैः पुनःपुनः संसारमेति संय-तैस्तुमुक्तिमिति प्रदर्शनार्थे रथिरथादिरूपेणांगभावमासाद्य निराकांक्षत्वात्। नापीन्द्रियादिपरत्ववाक्यस्याकांक्षा तत्र कारणं। तस्यापि पुरुषपरत्वप्र-तिपादनेऽङ्गभावमासाद्य निराकांक्षत्वात्। अतः परिशेषादव्यक्तशब्दश्शरी-रलक्षक इत्येतदयोगात् सांख्यतन्त्रप्रक्रियाप्रत्याभिज्ञानुसारेण तत्तन्त्रासिद्धप्र-धानार्थक इत्येव युक्तमिति। एवं प्राप्ते राद्धान्तः—

पूर्वत्र रथिरथादिरूपेण रूपितानां मध्ये यच्छरीरं रथरूपकेण वि-न्यस्तं तदात्मनारूपितं तदव्यक्तशब्देन परिशेषात् गृह्यत इति युक्तम्। तत्रह्यात्मा शरीरं बुद्धिर्मन इन्द्रियाणितद्विषया इति षडर्थाः रथरथिसारथित-द्वहमाणतुरगरज्जुतुरगतन्मार्गात्मना यद्रूपिताः तन्मुक्त्यर्थोपासनोपकरणत्वा-द्वशीकार्यत्वायेति तावन्निर्विवादं। 'यस्त्वविज्ञानवान्भवति अयुक्तेन मन-सा सह। तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः। यस्तु विज्ञानवा-न्भवति युक्तेन मनसा सह। तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथे' रिति तत्रैव श्रवणात्। तत्र च वशीकार्यतायां प्राधान्याप्राधान्यविवेचन-मपेक्षितं यत् प्रधानं तद्वशीकरणं यत्नातिशयसिद्धये। इन्द्रियादिपरत्ववा-क्यमपि वशीकार्यतायां प्राधान्याप्राधान्यरूपं परापरभावं विना विषयान्त-रत्नलभते। न हि 'दशमन्वन्तराणीह तिष्ठन्तीन्द्रियचिन्तकाः। भौतिका-स्तु शतं पूर्णं सहस्रन्त्वाभिमानिकाः॥ बौद्धा दशसहस्राणि तिष्ठन्ति विग-तज्वराः। पूर्णं शतसहस्रन्तु तिष्ठन्त्यव्यक्तचिन्तकाः॥ पुरुषन्निर्गुणं प्राप्य कालसंख्या न विद्यत' इति सांख्यकल्पिततत्तदुपासनाफलभूयस्त्वाल्पत्व-

रूपः परापरभाव इति वक्तुं शक्यम् । तत्र मनसः इन्द्रियेभ्यः पृथक्परिगणनाभावेन भूततन्मात्रापेक्षया निकर्षापत्त्या तद्विषयत्वे 'अर्थेभ्यश्चपरम्मन' इति मनइन्द्रियस्य अर्थशब्दोक्तभूतपरत्वोक्त्यनुपपत्तेः । नापि हेतुहेतुमद्भावरूप इति वक्तुं शक्यम् । सांख्यमते इन्द्रियाणामाहङ्कारिकत्वेन 'इन्द्रियेभ्यः परा ह्यर्था' इति भूततन्मात्राणामिंद्रियपरत्वोक्त्यनुपपत्तेः, तेषां भौतिकत्वाभ्युपगमे 'अर्थेभ्यश्च परं मन' इति मनइंद्रियस्य भूतपरत्वोक्त्यनुपपत्तेः । तस्मात् इंद्रियेभ्यः तद्विषयाः वशीकार्यत्वे पराः । वश्येंद्रियस्यापि विषयसन्निधावींद्रियविजृम्भणात् । तेभ्योऽपि मनः परं । मनसि विषयध्यानप्रवृत्ते विषयासन्निधाने रागविजृम्भणात् । तस्मादपि बुद्धिः परा । अध्यवसायाभावे मनसोऽकिंचित्करत्वात् । ततोऽप्यात्मा परः । सर्वस्या अपि विषयवृत्तेः आत्मेच्छायत्तत्वात् । तत एवात्मा अणुरपि महानिति विशेष्यते । तस्मादपि शरीरं परं । तदायत्तत्वात् सर्वासामपि पुरुषप्रवृत्तीनां । तस्मादपि परस्सर्वान्तर्यामी सर्वप्रेरकः परिपूर्णः पुरुषोत्तम इति इन्द्रियादयो वशीकार्यतायामुत्तरोत्तरं परा उच्यन्त इति तदर्थो वाच्यः । सर्वान्तर्यामिणो भगवतो वशीकरणं तच्छरणागतिरेव । 'तमेव शरणं गच्छे' त्यादिवचनात् । तदिदमिंद्रियादिपरमपुरुषान्तानां वशीकार्यतायामुत्तरोत्तरपरत्वमग्रे श्रुतिरेव दर्शयति– 'यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्तआत्मनी'ति । अस्य हि मन्त्रस्यायमर्थः । वागुपलक्षितं सर्वं ज्ञानकर्मेंद्रियजातं मनसि नियच्छेत् । वागेंद्रियव्यापारमुत्सृज्य मनोमात्रेणावतिष्ठेत् । विषयविकल्पाभिमुखं तन्मनः आत्मनि स्थितायां बुद्धौ विषयदोषाध्यवसायरूपायां नियच्छेत् । तां बुद्धिं महति प्रत्यगात्मनि नियच्छेत् । तदुपादेयताविषयां तत्प्रवणां कुर्यात् । तञ्च प्रत्यगात्मानं निरुपप्लवे परमात्मनि नियच्छेत् । तच्छेषताप्रतिपत्तिं कुर्यादिति । तस्मात्सूक्ष्ममव्याकृतमव्यक्तशब्दार्हमिति तदवस्थांतररूपं शरीरमुपचारादव्यक्तमित्युक्तम् । यदि सूक्ष्ममव्याकृतमभ्युपगम्यते तर्हि तदेव सांख्यमतमापन्नमिति कथं तन्निरसनम् । स्वतन्त्रमेवाव्याकृतं

कार्याणि साधयतीति सांख्यमतन्निरसनीयम्। परमपुरुषाधीनत्वात् तेन प्रेर्यमाणमेवाव्याकृतम्महदादिकार्यजातं साधयतीति त्वस्माकमभ्युपगम इति विशेषः। किञ्च– यदि सांख्याभिमतमव्यक्तमिहश्रुतिरवक्ष्यत्, तदातस्य-तत्कार्यस्य व्यक्तजातस्यच ज्ञेयत्वमप्यवक्ष्यत्। 'व्यक्ताव्यक्तज्ञविज्ञानान्मोक्ष' इति हि सांख्यानामुद्घोषः। ननु 'अशब्दमस्पर्शमरूपमव्ययन्तथाऽरसन्नित्यमगन्धवच्च यत्। अनाद्यनन्तम्महतःपरं ध्रुवं निचाय्य तन्मृत्युमुखात् प्रमुच्यत' इत्यनन्तरमेव सा श्रुतिरव्याकृतं वदति। व्यक्तधर्मभूत-शब्दादिनिषेधानामव्यक्तपर्यवसानस्य न्याय्यत्वात् महतः परत्वोक्तेश्च यत्तदिति सामान्यतोऽपि निर्देशस्याव्याकृतपरत्वौचित्यादितिचेन्नैवम्। 'विज्ञानसारथिर्यस्तु मनःप्रग्रहवान्नरः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पद'मिति परमपुरुषप्रकरणात्। स एव ह्यन्यत्र निचाय्यत्वेन प्रतिपाद्यते। अत एव 'पुरुषान्नपरं किं चि'दिति पञ्चविंशपुरुषातिरिक्ततत्त्वनिषेध इति शङ्का निरस्ता। प्रकरणेन तत्र पुरुषशब्दस्य परमपुरुषपरत्वात्। 'अशब्द-मस्पर्श'मित्यादि तु 'यत्तदद्रेश्यमग्राह्य'मित्यादिवत् तस्मिन्नप्युपपद्यते। 'महतः पर'मिति 'बुद्धेरात्मा महान्पर' इति प्रस्तुतात् जीवात् परत्वमुक्तम्। अपिचास्मिन्प्रकरणे प्राप्यस्य परमपुरुषस्य प्राप्त्युपायस्योपासनस्य प्राप्तुरुपासकस्यचेति त्रयाणामेव ज्ञेयत्वेनोपन्यासः प्रश्नश्च दृश्यते। तत्र 'तं दुर्दर्शं गूढमनुप्रविष्टं गुहाहितं गह्वरेष्ठं पुराणम्। अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाती'ति। अत्र 'देवं मत्वा धीर'इति क्रमेण उपास्योपासनोपासकानामुपन्यासः, 'येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके। एतद्विद्यामनुशिष्टस्त्वयाऽहं वराणामेष वरस्तृतीय'इति मोक्षरूपप्रश्नद्वारा उपायोपेयोपेतॄणां त्रयाणामपि प्रश्नः। प्रेतः प्रकर्षेणेतः अपुनरावृत्तिं मुक्तिं प्राप्तः। आत्मोच्छित्तिर्मुक्तिरिति शून्यवादिनां विमतिः 'नायमस्तीति चैके'इत्युपन्यस्ता। न त्वत्र प्रेतशब्दो मृतवचनः। मृतास्तित्वस्य वैवस्वतं लोकं प्राप्य तं पृच्छता 'न साम्परायः प्रतिभाति बालं प्रमाद्यंतं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इति मानी पुनःपुनर्व-

शमापद्यते म' इत्यादिवैवस्वतवचनं श्रुतवता च नचिकेतसा निर्ज्ञातत्वेन मृते देहातिरिक्ते नास्तित्वविमत्युपन्यासायोगात् । तस्मात्त्रयाणामेवात्र ज्ञेयत्वेनोपन्यासः प्रश्नश्चेति नेह तांत्रिकस्याव्यक्तस्यानुवादप्रसक्तिरस्ति । अपि च 'बुद्धेरात्मा महान्पर'इत्यत्र महत्तत्त्वन्नग्राह्यं, चेतनरूढात्मशब्दसामानाधिकरण्यात् । 'तद्यच्छेज्ज्ञान आत्मनी' त्यत्र सप्तम्यौ तु वैयधिकरण्येन प्राग्व्याख्यातौ । अतोऽपि जीवात्मपरत्वेनोच्यमानमव्यक्तं न सांख्यतन्त्रसिद्धं प्रधानमिति युक्तम् । महत्तत्त्वपरत्वानभिधानात् ॥

संग्रहकारिके ॥

महतः परमव्यक्तं पठितं यद्धि काठके ।
प्रधानं कपिलोक्तं तत्तत्तन्त्रप्रत्यभिज्ञया ॥
मैवं तत्स्याच्छरीरं रथिरथतुरगाद्यात्मना रूपितानामात्मादीनां मुमुक्षोर्नियतमिह वशीकार्यताज्ञापनार्थम् ।
एतस्यां तारतम्यस्फुटसमधिगमायेन्द्रियेभ्यः पराइस्यारभ्याम्नातमन्त्रे न्यसनमभिलपत्यस्वशब्दं शरीरम् ॥

इति आनुमानिकाधिकरणम् ॥१॥

चमसवदविशेषात् ॥ ८ ॥
ज्योतिरुपक्रमातु तथाह्यधीयत एके ॥ ९ ॥
कल्पनोपदेशाच्च मध्वादिवदविरोधः ॥१०॥

पूर्वत्र रूपकवाक्ये शरीरश्रवणादव्यक्तं शरीरं न तंत्रसिद्धा प्रकृतिरित्युक्तम् । तर्हि तदश्रवणादजा तंत्रसिद्धा प्रकृतिस्स्यादिति प्रत्यवस्थानात्सङ्गतिः । श्वेताश्वरोपनिपदि पठ्यते- 'अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजास्सृजमानां सरूपाः । अजोह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' इति । अत्र किमजाशब्देन तन्त्रसिद्धा स्वतन्त्रा प्रकृतिरुच्यते, उत सिद्धान्ताभिमता ब्रह्माधीना प्रकृतिरिति संशये पूर्वपक्षः ।

तन्त्रसिद्धैवोच्यते । 'अजा'मिति जन्मराहित्यश्रवणात्, 'सृजमाना'मिति स्वातंत्र्यश्रवणाच्च । न तु ब्रह्मात्मिका । तस्यास्सिद्धान्ते ब्रह्मकारणकत्वाभ्युपगमेन जन्मराहित्याभावात्, सृष्टौ ब्रह्मप्रेर्यत्वाभ्युपगमेन स्वातन्त्र्याभावाच्चेति । सिद्धान्तस्तु —

ब्रह्मकारणिकाया अपि जन्मराहित्यमुपपादयिष्यते । तथा । अजाशब्दयौगिकार्थस्य जन्मराहित्यस्य साधारणत्वात् न तेन तन्त्रसिद्धेति विशेषः प्रतीयते । यथा 'अर्वाग्बिलश्चमसऊर्ध्वबुध्नस्तास्मिन् यशोनिहितं विश्वरूपम् । तस्यासत ऋषयस्सप्ततीर' इत्यस्मिन् मंत्रे यौगिकेन चमसशब्देन चम्यते भक्ष्यते अनेनेति व्युत्पत्तिमता भक्षणसाधनमात्रं प्रतीयते। न कश्चिद्विशेषः, यौगिकशब्दानामर्थप्रकरणवाक्यशेषादिभिर्विनाऽर्थनिश्चयासम्भवात् । तत्र 'यथेदं तच्छिर एषह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न' इति वाक्यशेषः शिरोऽत्र चमस इति निश्चायकोऽस्ति । तस्मिन्निहितं यशः प्राणवायुः तस्य तीरस्थास्सप्त ऋषयश्श्रोत्रचक्षुर्घ्राणयुगळरसनानीति निश्चायको वाक्यशेपोऽस्ति । नैवमिहाजा तंत्रसिद्धा प्रकृतिरित्यत्र किञ्चिन्निश्चायकमस्ति । सृष्टिस्वातंत्र्यं तु स्वव्यापारकर्तृत्वरूपं परप्रेर्यत्वेऽप्युपपद्यते । सारथिना प्रेर्यस्यापि रथस्य 'रथो गच्छती'ति स्वातंत्र्यव्यवहारात् । तस्मादिह तन्त्रसिद्धा अजा न ग्राह्या । किं तु ब्रह्मात्मिकैव ग्राह्या । ब्रह्मकारणकत्वाम्नानात् । तैत्तिरीया हि 'अणोरणीयान्महतो महीया'निति मंत्रेण ब्रह्मोपक्रम्य 'सप्त प्राणाः प्रभवंति तस्मा'दित्यादिना 'यस्माज्जाता न परा नैव किं च नास' इत्यंतेन प्राणसमुद्रपर्वतादिकस्य सर्वस्य प्रपञ्चस्य ब्रह्मणस्सकाशात्प्रभवमधीयानास्तेषां मंत्राणां मध्य एव 'अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य' इति पठन्ति । अतोऽत्र ब्रह्मकार्यवर्गमध्ये पाठादजाऽपि ब्रह्मकारणिका विवक्षितेत्यवसीयते । ननु अयमजामन्त्रस्तद्भोगत्यागरूपबन्धमुक्तजीववृत्तांतविषयः, कथमिह 'अजा' मिति द्वितीयान्तेन 'सप्त प्राणाः प्रभवंती' त्यनुवृत्तक्रियान्वयः । अतो नास्याः

प्राणादिवत् ब्रह्मकारणकत्वं प्रतीयतइतिचेत् उच्यते– यथा 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पूर्णमासे प्रायच्छ' दितिवाक्यमिंद्रवृत्तांतमात्रविषयतया प्रतीयमानमपि दर्शपूर्णमासप्रकरणानुरोधादिंद्रेण अग्नीषोमाभ्यां दत्ततयोच्यमानस्य पुरोडाशद्रव्यकस्य यागस्य विधायकं, तथा वृत्तान्तमात्रविषयतया प्रतीयमानोऽपि अयं मंत्रस्सकलकार्यजनयित्र्याः प्रकृतेः परमेश्वरसृज्यत्वप्रतिपादक इति पूर्वापरपरामर्शादङ्गीकर्तव्यम् । ननु कथं प्रकृतेः परमेश्वरकारणकत्वं जन्मराहित्यञ्च । स्थूलसूक्ष्मभेदान्नैतद्विरुद्धम् । यथा मधुविद्यायामादित्यस्य वस्वादिदेवताभोग्यरसाश्रयस्योदयास्तमयादिमत्वं, 'अथ ततऊर्ध्वं उदेत्य नैवोदेता नास्तमेतैकलएव मध्ये स्थाते' त्युक्तम् सर्वविशेषप्रहाणेनैकतयाऽवस्थानञ्च कार्यकारणावस्थाभेदरूपस्थूलसूक्ष्मावस्थाभेदेन न विरुद्धम् । 'एकल' इति लकारोपजनश्छान्दसः । एकएवेत्यर्थः । तस्मात् ब्रह्माधीनैवेयमजा तंत्रसिद्धेति सिद्धम् ॥

संग्रहकारिके ॥

स्वातंत्र्यजनिराहित्ये सृजमानामजामिति ।
यस्याश्श्रुते सा प्रकृतिस्सांख्योक्ता न परात्मिका ॥
मैवं ब्रह्मात्मिकायामपि यदजनिता कारणावस्थया स्यात्
स्वव्यापाराश्रयत्वं रथवदिह परप्रेर्यतायामपि स्यात् ।
तस्मान्नायं विशेषोऽस्त्यपितु परसृजिप्रक्रियास्तोविशेष-
स्तत्सृज्यायान्ततस्स्यादतिविशदमजामन्त्रतात्पर्यगम्याः ॥

इति चमसाधिकरणम् ॥२॥

न संख्योपसंग्रहादपि नानाभावादतिरेकाच्च ॥११॥

प्राणादयो वाक्यशेषात् ॥ १२ ॥

ज्योतिषैकेषामसत्यन्ने ॥ १३ ॥

अजाशब्दस्य स्वतन्त्रप्रकृतिपरत्वे विशेषकस्याभावात् वाक्यान्तरानुरोधेन ब्रह्मात्मकत्वं साधितम्। तदत्रनप्रसरति। ब्रह्मसत्वे संख्याधिक्यात्, तेन विनैव संख्यापूरणेन अब्रह्मात्मिका प्रकृतिरिति निश्चयसंभवादिति शङ्कया सङ्गतिः। वाजसनेयिनस्समामनंति। 'यस्मिन्पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्यआत्मानं विद्वान् ब्रह्मामृतोऽमृत'मिति। अयम्मन्त्रः सांख्यतन्त्रासिद्धतत्वपरः उत वाक्यशेषाज्ञातप्राणादिपर इति पंचविंशतिसंख्यातत्वाधिक्यप्रतीतिभ्यांसंशये पूर्वपक्षः। सांख्यतत्वपरः। पंचविंशतिसंख्याप्रतीतेः। तत्प्रतीतिश्च पंचशब्दविशेषितात्पञ्चशब्दात्। पंचजनाइति हि न मनुष्यादिवाचीशब्दः। प्रथमपंचशब्दसमभिव्याहारेण द्वितीयपंचशब्दस्यापि संख्यापरत्वावसायात्। ततश्च पञ्चानां जनानां समूहाइति समाहारविषयोयं समासः। तथा निश्चये च पंचपूल्यइतिवदीकाराभावो लिङ्गव्यत्ययश्च छान्दसस्समर्थनीयः। तद्धितार्थोत्तरपदयोरभावेन समासस्य समाहारविषयत्वावश्यंभावात्। ते समूहाः कतीत्याकांक्षायां पुनः पञ्चसंख्यया विशेष्यन्ते 'पञ्च पञ्च पूल्य' इतिवत्। ननु समासमभ्युपगम्य छान्दसत्वेन रूपसमर्थनं किमर्थं, असमासेऽपि पञ्चशब्दद्वयेन पञ्चविंशतिसंख्यालाभोपपत्तेः। एवं संवर्धनेन संख्याविशेषलाभोऽप्यन्यत्र संप्रतिपन्न एव। यथा 'पञ्चपञ्चाशतस्त्रिवृतस्संवत्सरा' इत्यत्र पञ्चगुणितपंचाशत्संख्यया पंचाशदुत्तरद्विशतसंख्यालाभः। यथावा 'वयसो वयसस्सप्त दशसप्तदशानि ददाती'त्यत्र सप्तदशगुणितसप्तदशसंख्यया एकोननवत्युत्तरद्विशतसंख्यालाभः। यथावा 'पंचभिर्धाता विदधाविदं यत्तासां स्वसॄरजनयत् पंच पंच तासामुयंति प्रयवेण पंच नानारूपाणि क्रतवो वसानाः त्रिंशत्स्वसार उपयंति निष्कृत' मित्यत्र पंचगुणितपंचसंख्यया पंचविंशतिसंख्यालाभ इति चेत् मैवं। पंचजनशब्दस्य समासपदत्वेन तन्न्यायानवतारात्। समासपदत्वंच शतपथब्राह्मणपठितस्यास्य मन्त्रस्य अन्तानुदात्तस्वरेण निश्चीयते। अस्यान्तानुदात्तस्वरस्य शतपथब्राह्मणस्वरविधायकभाषिकाख्यग्रन्थविहितब्राह्मणपठितमन्त्रत्वनिमित्तोदात्तादेशरूपत्वात्।

अतस्तस्य 'स्थानिना समासस्ये' ति व्याकरणविहितेन अन्तोदात्तस्वरेण 'पंचानांत्वा पंचजनाना' मिति मन्त्रान्तरे समासदर्शनेन च अत्रापि समासेन भाव्यमिति। तस्मात्समाहारसमासोऽयं, छान्दसत्वेन रूपसिद्धिरित्येव युक्तम्। न च तत्त्वाधिक्यप्रसङ्गः। चतुर्विंशतेस्तत्त्वानां आत्मनि प्रतिष्ठितत्ववचनं तदद्दष्टायत्तत्वात् भाक्तं, आत्मनस्तद्वचनं स्वमहिमप्रतिष्ठितत्ववचनवत् भाक्तमित्युपपत्तेः। सांख्यतत्वापरिग्रहे श्रुतपंचविंशतिसंख्यान्वयानिर्वाहादिति। एवंप्राप्ते सिद्धान्तः॥

पंचविंशतिसंख्योपसंग्रहादपि न सांख्यतत्वप्रतीतिः। तेभ्यः पृथग्भावात्। तद्वैलक्षण्यात्। 'यस्मिन् पंच पंचजना' इति तेषां यच्छब्दनिर्दिष्टब्रह्मात्मकताप्रतीतेः, आत्माकाशाभ्यां संख्यातिरेकाच्च। न च पंचविंशतिसंख्यान्वयानुरोधेन पूर्वपक्षावसानोक्ता क्लिष्टगतिः कल्पनीया। कठवल्लीषु 'इन्द्रियेभ्यः पराह्यर्था' इत्यादिना पुरुषावरत्वेन वर्णितानां ज्ञानेन्द्रियकर्मेंद्रियभूततन्मात्रा मनोबुद्धिभोक्तृस्थूलसूक्ष्मशरीराणां 'तच्चाकाशं सनातन' मित्यादिष्वाकाशशब्देन प्रसिद्धस्य अप्राकृतभगवल्लोकस्य च ग्रहणसम्भवात् कठवल्लीषु अव्यक्तशब्दस्य स्थूलसूक्ष्मशरीरद्वयपरत्वोपपत्तेः। एवमक्लेशेन अन्तरङ्गशाखान्तरदृष्टसंख्येयोपसंग्रहसंभवे क्लिष्टगत्या बहिरङ्गाप्रामाणिकसांख्यतत्वोपसंग्रहायोगात्। वस्तुतोऽत्र पंचविंशतिसंख्याप्रतीतिरेव नास्ति। समाहारसमासे स्त्रीप्रत्ययाभावपुल्लिंगयोः छान्दसत्वेन समर्थनीयत्वात्, पंचजनशब्दस्य संज्ञाशब्दत्वमभ्युपगम्य 'दिक्संख्ये संज्ञाया' मिति सूत्रविहितसंज्ञासमासवर्णनोपपत्तेः। ननु तर्हि पंचजनसंज्ञकाः केचिदिह वर्णनीया इति चेत् सत्यम्। सन्त्येव वाक्यशेषश्रुताः प्राणादयः 'प्राणस्य प्राणमुत चक्षुषश्चक्षुरश्श्रोत्रस्य श्रोत्रमन्नस्यान्नं मनसो ये मनोविदु' रिति वाक्यशेषे हि पष्ठ्यन्तैः प्राणादिशब्दैः प्रसिद्धाः प्राणादयः श्रूयन्ते। ननु शतपथब्राह्मणे माध्यन्दिनानामेवान्नपाठः। न काण्वानाम्। अतस्तेषां प्राणादयः पंचपंचजना नस्युरिति चेत् उच्यते– 'यस्मिन्पंचपंचजना' इत्यस्मात् पूर्वस्मिन्मंत्रे 'तं देवा ज्योतिषां ज्योतिरायुर्होपासतेऽमृत' मिति

ज्योतिषां ज्योतिष्ट्वेन ब्रह्मण्यभिधीयमाने ब्रह्माधीनस्वकार्याणां केषांचिज्ज्योतिषां प्रतिपादकेन षष्ठ्यन्तज्योतिश्शब्देन प्रकाशकानि ज्ञानेन्द्रियाणि गृह्यन्त इति इन्द्रियविशेषाणां समर्पकेण 'प्राणस्य प्राण' मित्यादिवाक्यशेषेणावधार्यते । तत्र 'प्राणस्ये' ति शब्देन वायुसम्बन्धिनस्स्पर्शेन्द्रियस्य ग्रहणम् । मुख्यप्राणस्य ज्योतिश्शब्देन षष्ठ्यन्तेन प्रदर्शनायोगात् । 'चक्षुष' इति 'श्रोत्रस्ये' ति चक्षुश्श्रोत्रेन्द्रिययोर्ग्रहणम् । 'अन्नस्य'त्यन्नशब्दोदितपृथिवीसम्बन्धिघ्राणेन्द्रियग्रहणम् । तेनैव अद्यतेऽनेनान्नमिति व्युत्पत्त्या तंत्रेण रसनेन्द्रियस्यापि ग्रहणम् । 'मनस'इति मन इन्द्रियस्य । एवं गृहीतानां सर्वेषामिन्द्रियाणां ग्रहणसिध्यर्थं कण्वशाखायामप्युपसंहर्तव्यम् । षष्ठ्यन्तज्योतिःपदोदितेन्द्रियोपक्रमस्य वाक्यशेषगतेंद्रियविशेषोपन्यासस्य च तत्रापि तुल्यत्वात् तदेवं 'यस्मिन् पंच पंचजना आकाशश्च प्रतिष्ठित' इति पंचजनशब्दनिर्दिष्टानि इन्द्रियाणि आकाशशब्दोपलक्षितानि भूतानि च ब्रह्मणि प्रतिष्ठितानीति सर्वतत्वानां ब्रह्माश्रयत्वप्रतिपादनात् नतन्त्रसिद्धब्रह्मानधीनपंचविंशतितत्वानुवादशङ्कावकाशइति स्थितम् ॥

संग्रहकारिका: ॥

यस्मिन्पञ्चेति मनौ पंचोक्ताःपंचजनसमाहाराः ।
तत्वानि पंचविंशतिरेते कपिलेन कथितानि ॥
मैवं ब्रह्माश्रयताभेदान्नहिधीस्तदुक्ततत्वानां ।
अधिकरणाऽऽकाशाभ्यां तदुक्तसंख्यातिरेकाच्च ॥
पंचजनाइति संज्ञापदेन पंचेद्रियाणि कथ्यन्ते ।
दृष्टानि यानि शेषे ब्रह्माधीनस्वकार्याणि ॥
संग्राह्यं काण्वैरप्यन्नपदं घ्राणरसनपरं ।
ज्योतिःपदोदितेन्द्रियसमुपक्रमवाक्यशेषगतितौल्यात् ॥

इति संख्योपसंग्रहाधिकरणम् ॥३॥

कारणत्वेनचाकाशादिषु यथाव्यपदिष्टोक्तेः ॥१४॥

समाकर्षात् ॥ १५ ॥

माभूवन् पंचपंचजनास्सांख्यतत्वानि, तथापि ब्रह्मकारणमिति सिद्धांत्यभिमतं न सिध्यति। कारणवाक्यानां परस्परविरोधेन क्वचिदपि प्रतिष्ठितत्वाभावात्, तानि विहाय स्मृत्यनुसारेण प्रधानस्यैव कारणतया वक्तव्यत्वादिति प्रत्यवस्थानात्सङ्गतिः। कारणवाक्यैः ब्रह्म कारणमिति निश्चेतुं शक्यं, उत परस्परविरोधेन तैः किमपि निश्चेतुं नशक्यमिति, तान्यनपेक्ष्य कपिलादिस्मृतिभिः प्रधानं कारणमिति निश्चेयमिति संशये पूर्वपक्षः— छांदोग्ये 'सदेवसोम्येदमग्रआसीदेकमेवाद्वितीय'मिति सत्पूर्विकासृष्टिराम्नाता। तत्रैव 'तद्धैक आहुरसदेवेदमग्रआसीत् एकमेवाद्वितीय' मित्यसत्कारणवादमुपाक्षिप्य 'कुतस्तुखलु सोम्यैवंस्यात् कथमसतस्सज्जायेते' ति असत्कारणवादं निराकृत्य 'सदेवसोम्येदमग्र आसी' दिति सत्पूर्विका सृष्टिः स्थिरीकृता। तैत्तिरीयकेतु छान्दोग्ये निराकृतमसत्कारणवादं परिगृह्य असत्पूर्विका सृष्टिराम्नाता। 'असद्वा इदमग्रआसीत् ततो वै सदजायत' इति। बृहदारण्यकेऽपि तथैवाम्नायते— 'सदेवेदमग्रआसीत् तत्सदासीत् तत्समभव'दिति। तत्रैव अव्याकृतपूर्विकाऽपि सृष्टिराम्नायते— 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियते' ति। अव्याकृतं ह्यव्यक्तं प्रधानमेव। एवं कारणवाक्यानां परस्परविरोधेन ब्रह्म वा स्वतन्त्रं प्रधानंवैकं कारणमिति निर्णयालाभेसति आप्ततमकपिलादिप्रणीतस्मृतिभिः प्रधानं कारणमिति निश्चेयं, तत्रैव सर्वाणि कारणवाक्यानि योजनीयानि, ईक्षणादयोऽपि गौणायोजनीयाइति। एवंप्राप्ते सिद्धांतः—

ब्रह्मणएव जगदुत्पद्यत इति निश्चेतुं शक्यते। जन्मादिसूत्रे सर्वज्ञत्वसत्यसङ्कल्पत्वादिविशिष्टं ब्रह्मयथाव्यपदिष्टंतथा भूतस्यतस्यैकस्यैव 'तस्माद्वाएतस्मादात्मनआकाशस्संभूतः, तत्तेजोऽसृजते' त्यादिश्रुतिभिराकाशादिषु कारणत्वेन प्रतिपादनात्। नन्वस्तु तथाप्रतिपादनं, तथाऽप्युदाहृतकारणवाक्यजातविगानं कथं समाधेयं। उच्यते— आनन्दवल्ल्यां 'सोऽकामयत बहुस्यां प्रजायेये' ति पदेन पूर्वप्रकृतमानंदमयं परामृश्य तस्य जगत्सृष्टिसङ्कल्पपु-

वत्वा 'इदं सर्वमसृजत यदिदं किंचे' त्यादिना तस्य सर्वस्रष्टृत्वसर्वानुप्रवेशसर्वात्मभावानभिधाय 'तदप्येष श्लोकोभवती' त्युक्ते सर्वस्मिन्नर्थे साक्षित्वेन 'असद्वा इदमग्र आसी' दिति श्लोक उदाहृतः। तस्मादानन्दमयसमाकर्षात् असच्छब्दस्तस्मिन्नेवानभिव्यक्तनामरूपताभिप्रायो वक्तव्यः। 'असदेवेदमग्र आसी' दित्यत्राप्ययमेव निर्वाहः। असच्छब्दोक्तस्य 'तत्सदासी' दिति सत्पदेन समाकर्षात्, अत्यन्तासतश्च 'नासतोदृष्टत्वा' दिति न्यायेन सद्रूपतापत्त्ययोगात्। 'तद्धेदं तर्ह्यव्याकृतमासी' दित्यत्राप्यव्याकृतपदं अव्याकृतशरीरकपरमपुरुषपरं। 'सएष इह प्रविष्ट आनखाग्रेभ्यः पश्यंश्चक्षुश्शृण्वन् श्रोत्रं मन्वानोमन' इत्यनन्तरवाक्ये 'सएष' इत्यनेन प्रकृतमव्याकृतं समाकृष्य तस्य अन्तःप्रविष्टसर्वांतर्यामिपुरुषत्वाभिधानात्। 'तन्नामरूपाभ्यां व्याक्रियते' ति कर्मकर्तरिलकारः। तदव्याकृतशरीरमविभक्तनामरूपं ब्रह्म स्वयमेव स्वात्मानं विभक्तनामरूपमकरोदित्यर्थः। 'तदात्मानं स्वयमकुरुते' ति श्रुत्यन्तरैकार्थ्यात्। एवं कारणवाक्यानां ब्रह्मपरत्वे सति ईक्षणब्रह्मात्मश्रुतयोऽप्यनुगृहीता भवंति। तस्माद्ब्रह्मैककारणकं जगदिति सिद्धम्॥

संग्रहकारिके॥

कारणवाक्यविगानादासतमोक्तं प्रधानमेव भवेत्।
कारणमशेषजगतः कारणवाक्यानि तत्र नेयानि॥
मैवं सर्वत्रापि ब्रह्मसमाकर्षसत्वेन।
तेषां नास्ति विगानं तस्माद्ब्रह्मैव कारणं जगतः॥

इति कारणत्वाधिकरणम्॥४॥

जगद्वाचित्वात्॥ १६॥

जीवमुख्यप्राणलिङ्गादिति चेत्तद्व्याख्यातम्॥ १७॥

अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपिचैवमेके॥

अत्रेयं विषयशुद्धिः— अजातशत्रुर्नाम काशीराजः स्वसमीपमागत्य 'ब्रह्म ते ब्रवाणी' त्युक्तवन्तं बालाकिं गार्ग्यं 'सहस्रं दद्म एतस्यां वाचि जनको जनक इति वै जना धावन्ती'ति प्रशस्य बालाकिना 'य एवैष आदित्ये पुरुषस्तमेवाहमुपास' इत्यादिभिर्वाक्यैर्ब्रह्मत्वेनोपदिष्टानादित्यचन्द्रविद्युत्स्तनयित्न्वादिगतान् पुरुषानब्रह्मत्वेन तत्तत्पुरुषोक्त्यनन्तरमेव प्रत्याख्याय ततस्तूष्णींभूते तस्मिन् किमेतावदेव परिज्ञानमिति पृष्ट्वा तेनैतावदेवेत्यभिगते 'मृषा वै किल मासमवादिष्ठाः ब्रह्म ते ब्रवाणी'त्युक्त्या तमपोह्य 'यो वै बालाक एतेषां पुरुषाणां कर्ता यस्य वैतत्कर्म स वै वेदितव्य'इति स्वयमुपदिदेश । अत्र यो वेदितव्य उपदिष्टः पुरुषः स किं सांख्यतन्त्रसिद्धः पुरुषः उत पुरुषोत्तम इति संशये पूर्वपक्षः । तन्त्रसिद्धः पुरुष एवायम् । 'यस्य वै तत्कर्मे'ति पुण्यपापसम्बन्धश्रवणात् । न च तस्य 'एतेषां पुरुषाणां कर्ते'ति श्रुतादित्यादिपुरुषकर्तृत्वासम्भवः । आलोकदानादिना तद्भोगोपयोगिनां तेषां तददृष्टजन्यत्वेन अदृष्टद्वारा तस्य तत्कर्तृत्वात् । 'तद्यथा श्रेष्ठी स्वैर्भुङ्क्ते यथा वा स्वाः श्रेष्ठिनं भुञ्जन्ति एवमेवैष प्राज्ञ आत्मा एतैरात्मभिर्भुङ्क्ते एवमेवैत आत्मानः एतमात्मानं भुञ्जन्ती' ति वाक्यशेषे यथा प्रधानपुरुषः स्वकीयैर्भृत्यादिभिर्भोगसाधनान्युपहरद्भिर्भोगान्भुङ्क्ते यथा च ते भोगसाधनान्युपहरन्तः प्रधानपुरुषं पालयन्ति तथा वेदितव्यत्वेनोपदिष्ट आत्मा प्रकृतैरादित्यादिपुरुषैर्भुङ्क्ते ते च तं पालयन्तीत्युक्तत्वाच्च । ननु तथाऽपि पुण्यपापवान् पुरुषो वेदितव्यः परिग्राह्य इत्यत्र किन्नियामकम् । कर्मशब्दस्य पुण्यपापरूढिवत् क्रियत इति व्युत्पत्त्या कार्यमात्रयोगस्यापि सत्त्वेन परमपुरुषपक्षेऽपि 'यस्य वैतत्कर्मे' त्येतदुपपन्नम् । रूढिप्राबल्यावलम्बने चलनेऽपि रूढेस्सत्त्वेनान्यतरपरिग्रहे विनिगमनाविरहात् रूढ्योः परस्परं कलहायमानयोर्लब्धोन्मेषो योग एवेह प्रबल इति वक्तुं शक्यत्वादिति चेन्न । आदित्यादिपुरुषकर्तृत्वमपूर्वद्वारकं विवक्षितमित्येतदर्थसमर्पणार्थतया कर्मशब्दस्यापूर्वरूढेरिहोपयुक्तत्वेन रूढ्यन्तरायोगाच्च तस्याः प्रबलत्वात् चलनरूढेः परमपुरुषपक्षे विभौ तस्मिन्ननन्वयेन सांख्यपुरुषपक्षेऽपि विभुत्वेन

तैरभ्युपगते तस्मिन्ननन्वयेन जीवाणुत्वपक्षेऽपि चलनोक्तेः प्रयोजनाभावेन रूढ्यन्तरोन्मेषशङ्कानवकाशाच्च । तस्माद्युक्तन्यतयोपक्रान्तं ब्रह्म तन्त्रसिद्धः पुरुष एवेति न तद्व्यतिरिक्तेश्वरसिद्धिः । एवञ्च यद्यपि पूर्वाधिकरणेषु सकलवेदान्तप्रसिद्धब्रह्माधिष्ठानेन प्रधानस्य जगत्परिणामित्वमुक्तं, तथाऽपि तथाभूतं ब्रह्म सांख्यपुरुष एवेतीह ब्रह्मनिरूपणोपक्रमसांख्यपुरुषनिरूपणाभ्यामवगमात् तस्मिन्नेव सर्वेषां वेदान्तानां पर्यवसानमभ्युपेयमिति सर्वपूर्वाधिकरणाक्षेपेणायं पूर्वपक्षः । तत एवास्य पूर्वाधिकरणसङ्गतिश्च । एवं प्राप्ते सिद्धान्तः —

'यस्य वैतत्कर्मे'त्यत्र एतच्छब्दस्तावत् प्रत्यक्षादिसन्निधापितसकलजगद्वाची । प्रकरणोपपदादिसङ्कोचकाभावात् । अतस्तत्समानाधिकरणः कर्मशब्दोऽपि कार्यत्वयोगेन सकलजगद्वाचीत्यभ्युपेयं । सकलजगद्वाच्येतच्छब्दसामानाधिकरण्येन दुर्बलस्यापि योगस्योन्मेषात् । पूर्ववाक्योक्तमादित्यादिपुरुषकर्तृत्वं प्रति द्वारतया निर्वाहकत्वेन अपूर्वं बुद्धिस्थमितिचेत् न । जगदेकदेशभूतादित्यादिकीर्तनेन तदेकदेशि जगत् बुद्धिस्थमित्यपि वक्तुंशक्यत्वात् । उभयोर्बुद्धिस्थत्वसंभवे च एतत्पदसामानाधिकरण्येन जगद्वाचित्वस्यैव युक्तत्वात् । अपूर्ववाचित्वमादित्यादिपुरुषकर्तृत्वनिर्वाहकतया प्रकृतोपयोगीतिचेत् न । एकःकथमेतावतामादित्यादिपुरुषाणां कर्तेत्याकांक्षायां नह्ययन्तेषामेव कर्ता किंतु सर्वस्यास्यजगतः । तथाच यस्यैतत्सर्वमेव जगत्कार्यं तस्यादित्यादिपुरुषकर्तृत्वे का विचिकित्सेति कैमुतिकन्यायेन कार्यसामान्ययोगस्याप्यादित्यादिपुरुषकर्तृत्वनिर्वाहकतया प्रकृतोपयोगसाम्यात्, तत्साम्यंच एतत्पदसामानाधिकरण्यबलात् कार्यत्वयोगोन्मेषेण जगद्वाचित्वस्यैवाभ्युपेयत्वात् , 'एतेषां पुरुषाणां कर्ते' ति प्रकृतं कर्तारं 'यस्ये' ति परामृश्य कर्मशब्देन तत्संबन्धिनिर्देशरूपेण कर्तृकर्मसमभिव्याहारेणापि कर्मशब्दे कर्तृव्यापारविषयत्वात्मककार्यत्वयोगोन्मेषात् , सर्वकार्यसाधारणेन कार्यसामान्ययोगेनैव अपूर्वेऽपि वृत्तिसम्भवेन तत्र तस्य असाधारण्येन रूढिकल्पनायोगाच्च । पूर्वतंत्रे हि बर्हिराज्याधिकरणे बर्हि-

शब्दस्य लवनादिसंस्कृतेषु दर्भेष्वाज्यशब्दस्योत्पवनादिसंस्कृते घृते च सार्वभौमे शिष्टप्रयोगे सत्यपि क्वाचित्कं तयोर्दर्भघृतजातिमात्रे प्रयोगमवलम्ब्य तेनैव संस्कृतप्रयोगनिर्वाहात् तयोस्संस्काररूपं प्रवृत्तिनिमित्तान्तरं न कल्प्यमित्युक्तम् । 'एकदेशेऽपि यो दृष्टश्शब्दो जातिनिबन्धनः । तदत्यागान्नतस्यास्ति निमित्तान्तरकल्पने' ति । अतः 'बल्क्षो योगः कल्प्यां रूढिं बाधत' इति न्यायात् नापूर्वरूढिकल्पनावकाशः । तस्मात् 'यस्य वै तत्कर्मे' ति सकलजगत्कर्तृत्वोपदेशोऽयम् । एवं च प्रत्यक्षादिसन्निधापितसकलजगदुपस्थापकैतच्छब्दः आदित्यपुरुषाद्येकदेशमात्रकर्तृत्वमात्रव्यवच्छेदको वाशब्दश्च सार्थको भवति । ब्रह्मनिरूपणोपक्रमः 'चक्षोस्सूर्यो अजायते' त्यादिश्रुतिप्रतिपन्नपरब्रह्मधर्मादित्यपुरुषादिकर्तृत्वोपन्यासश्च सर्वलोकप्रसिद्धजीवातिरिक्तबालाक्यविदितपुरुषोपदेशश्च अनुकूलितो भवति । 'सर्वान् पाप्मनोऽपहत्य सर्वेषाञ्च भूतानां श्रैष्ठ्यं स्वाराज्यं पर्येति यएवं वेदे' त्यौपसंहारिकब्रह्मवेदनफलवर्णनमप्युपपादितं भवति । ननु 'एतैरात्मभिर्भुङ्क्ते' इति भोक्तृत्वं, 'अथास्मिन् प्राणएवैकधा भवती' ति सप्तम्यन्तनिर्दिष्टवेदितव्यपुरुषाश्रितमुख्यप्राणसंबन्धश्चेति जीवलिंगद्वयं वेदितव्यपुरुषस्य जीवत्वगमकं वाक्यशेषे श्रूयत इति चेत्, तस्य निर्वाहः प्रतर्दनविद्यायामेवाभिहितः । उपक्रमोपसंहारबलात् ब्रह्मपरत्वेन निश्चिते वाक्ये तन्मध्यगतान्यन्यलिंगानि तदनुरोधेन नेयानीति । कथन्तन्नयनमिति चेत् । इत्थं ।जीवा।तिरिक्तब्रह्मस्वरूपप्रतिबोधनार्थं जीवसङ्कीर्तनमिति तदिदं प्रश्नव्याख्यानाभ्यामवगम्यते । प्रश्नस्तावत् राज्ञा गार्ग्यं प्रति कृतः, 'क्वैष एतत्बालाके पुरुषोऽशयिष्ट क्वैपतदाऽभूत् कुतएतदागा'दिति । एवं राज्ञा पृष्टे सुषुप्तजीवाधिकरणमविजानति गार्ग्ये 'हितानाम हृदयस्य नाड्य' इत्यादिना 'तासु तदा भवति यदा सुप्तः स्वप्नं नकथञ्चन पश्यती' त्यन्तेन जीवस्य सुषुप्त्यधिकरणं हृदयावच्छिन्नं ब्रह्म प्राप्तुं मार्गतयाऽधिगन्तव्यासु नाडीषु सर्पणमुक्त्वा 'अथास्मिन् प्राणएवैकधाभवती' ति राज्ञैव कृतं स्वपृष्टार्थविवरणम् । तस्य व्याख्यानमिदं सुषुप्तौ जीवस्य ब्रह्मणि लयप्रतिपा-

दकं । 'सता सोम्य तदा सम्पन्नो भवती'ति छन्दोगश्रुत्यैकार्थ्यात्, 'यत्रैषएतत्सुप्तोभूत्, यएष विज्ञानमयः पुरुषः क्वैषतदाऽभूत् कुतएतदागा'दिति 'यत्रैषएतत्सुप्तोभूत् यएषविज्ञानमयः पुरुषः तदैषां प्राणानां विज्ञानेन विज्ञानमादाय यएषोऽन्तर्हृदयआकाशस्तस्मिन्शेत'इति वाजसनेयिशाखाम्नातबालाक्यजातशत्रुसंवादगतप्रश्नोत्तरैकार्थ्याच्च । तस्माद्वेदितव्यतयोपदिष्टः पुरुषस्सुषुप्तजीवाधिकरणत्वेन ततोभिन्न उक्तइति सभगवान् परमपुरुषएवेति सिद्धम् ॥

संग्रहकारिकाः ॥

ब्रह्मेति सर्वागमसीमलाळितः सांख्योदितः पूरुषएव नाधिकः ।
ब्रह्मप्रसङ्गे यदजातशत्रुणा कर्मान्वितं तत्र समाप्तिमापितः ॥
नैवमिह कर्मशब्दः कार्यपरो नैव पुण्यपापपरः ।
निखिलजगत्स्वरसैतत्पदममभिव्याहृतिग्रासात् ॥
बालाक्यविदितपुरुषोपदेशवाक्यप्रवेशाच्च ।
चक्षोस्मृर्य इतीदृक्प्रापकवचनानुरोधाच्च ॥

इति जगद्वाचित्वाधिकरणम् ॥ ९ ॥

वाक्यान्वयात् ॥ १९ ॥
प्रतिज्ञासिद्धेर्लिंगमाश्मरथ्यः ॥ २० ॥
उत्क्रमिष्यत एवंभावादित्यौडुलोमिः ॥ २१ ॥
अवस्थितेरिति काशकृत्स्नः ॥ २२ ॥

बृहदारण्यके मैत्रेयीब्राह्मणे याज्ञवल्क्यः स्वयंप्रविव्राजिषया मैत्रेयीकात्यायन्योः स्वभार्ययोर्वित्तसंविभागं चिकीर्षन् वित्तेन किममृतत्वं प्राप्तुं शक्यमिति मैत्रेय्या पृष्टो 'यथैवोपकरणवतां जीवितं तथैवतेजीवितंस्यात् अमृतत्वस्य तु नाशास्ति वित्तेने' त्युक्त्वा 'येनाहन्नामृतास्यां किमहं तेन कुर्यां यदेव भगवान्वेद तदेव मेब्रूही' ति तया पुनरमृतत्वसाधनं पृष्टः 'न

वा अरे पत्युः कामाय पतिः प्रियोभवति आत्मनस्तु कामाय पतिः प्रियोभवती' त्यादिभिः 'नवा अरे सर्वस्य कामाय सर्वं प्रियं भवति आत्मनस्तु कामाय सर्वं प्रियं भवती' त्यन्तैः वाक्यैः पतिजायापुत्रवित्तादिकं सर्वं यद्भोगार्थतयैव प्रियं भवति तं पत्यादिसर्वभोक्तारमात्मानमुपक्रम्य 'आत्मावा अरे द्रष्टव्यश्श्रोतव्योमन्तव्योनिदिध्यासितव्य' इत्यमृतत्वसाधनमात्मदर्शनं तत्साधनानि श्रवणादीनि चोपदिश्य 'आत्मनिखल्वरे दृष्टे श्रुते मते विज्ञाते इदंसर्वंविदित'मित्यात्मविज्ञानेन सर्वविज्ञानमुक्त्वा 'सयथाऽऽर्द्रैधाग्नेरभ्याहितस्य पृथक्धूमाविनिश्चरन्त्येवंवा अरेऽस्य महतोभूतस्य निश्वसितमेतद्यदृग्वेदो यजुर्वेदस्सामवेदोऽथर्वाङ्गिरसइतिहासःपुराणं विद्याउपनिषदश्श्लोकास्सूत्राण्यनुव्याख्यानानि व्याख्यानानीष्टं हुतमाशितं पायितमयञ्च लोकः परश्च लोकस्सर्वाणि च भूतान्यस्यैवैतानिसर्वाणिनिश्वसितानी'ति तस्य नामरूपात्मकसकलप्रपञ्चकारणत्वं प्रदर्श्य 'प्रज्ञानघनएवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति नप्रेत्यसंज्ञाऽस्ती'ति तस्योत्पत्तिविनाशविशेषविज्ञानाभावानुक्त्वा 'एतावदरेखल्वमृतत्व' मिति तस्यात्मनोवेदनममृतत्वसाधनमुपसञ्जहारेति श्रूयते । अत्र पतिजायादिवाक्यजातमुत्पत्तिविनाशवाक्यञ्च जीवविषयं, श्रवणमननादिवाक्यं सर्वविज्ञानवाक्यं सर्वकारणत्ववाक्यञ्च परमात्मविषयमिति प्रतीयते । सर्वाणि चैतानि वाक्यानि एकविषयत्वेन प्रवृत्तानि प्रकृतपरामर्शिभिरात्मशब्दसर्वनामशब्दैरुत्तरोत्तरवाक्यप्रवृत्तेः । चतुर्थाध्याये मैत्रेयीब्राह्मणे 'महद्भूतमनन्तमपार' मिति परमात्मासाधारणविशेषणानि'प्रज्ञानघनएवे'त्यादिवाक्योक्तोत्पत्तिविनाशादिजीवलिंगसामानाधिकरण्येन निर्दिष्टानि। एवं जीवेश्वरलिंगयुक्तवाक्यानामेकविषयत्वप्रतीतावपि नाभेदस्तयोश्श्रुतितात्पर्यविषय इत्यभ्युपगन्तुं युक्तम् । 'नाहं सर्वज्ञ'इत्याद्यनुभवेन जीवे सर्वज्ञत्वादिविशिष्टेश्वरभावबाधात् । उभयोर्भेदेन अत्र प्रतिपादनकल्पनंत्वेकविषयत्वप्रतीतिविरुद्धम् । तस्मात् जीवेश्वरयोरन्यतरएवात्र प्रतिपाद्यः । अप्रतिपाद्यलिंगानि च प्रतिपाद्ये योज्यानीति स्थिते जीवधर्माणामीश्वरे योजनेन सिद्धान्तो भविष्यति । ईश्वरलिंगानां

जीवे योजनेन सांख्यतन्त्रसिद्धः पुरुष एवात्र प्रतिपाद्य इति तावत्पूर्वपक्षः । तथा हि– पतिजायादिसम्बन्धस्तावदविचलं जीवलिंगम् । 'न वा अरे पत्युः कामाये'त्यत्र वैशब्देन प्रसिद्धिद्योतकेन । प्रसिद्धं ह्येतत् तथापि, मैत्रेयि यत् पत्यादयो जायादीनां पत्यादिप्रयोजनाय प्रिया न भवंति किं तु स्वप्रयोजनायैवेत्येवमर्थप्रतीतेः । अतः पत्यादिकं परित्यज्यामृतत्वसाधकं स्वात्मदर्शनमेव श्रवणादिभिस्सम्पादनीयमिति 'आत्मा वाअरे द्रष्टव्य' इत्यादिनोच्यत इति सङ्गच्छते । ननु स्वात्मभोगाय पत्यादीनां प्रियत्वमुक्त्वा ततः केवलमात्मस्वरूपमन्वेष्टव्यमिति वचनं न संघटते । प्रियमेवह्यन्वेष्टव्यं न तु प्रियवियुक्तस्वरूपमिति चेत्, उच्यते– सर्वेषामपि स्वात्मा स्वतः प्रियः, पतिजायादयस्तु न पतित्वादिना प्रियाः, तेषां स्वेष्टसंपादकत्वदशायामिव स्वानिष्टकरणत्वदशायां प्रीत्यदर्शनात् । अतः स्वात्मनःपत्यादीनां चानुभवानुसारेण व्यवस्थिताव्यवस्थितपुरुषार्थत्वरूपं तत्वमालोच्याव्यवस्थितगौणपुरुषार्थरूपं पत्यादिकं परित्यज्य मुख्यमेवाश्रयेदिति प्रकृतिवियुक्तात्मदर्शनतदर्थश्रवणमननध्यानविधानं सङ्गच्छत एव । 'दशमन्वन्तराणीह तिष्ठन्तीं द्रियचिन्तका' इत्यादिना तन्त्रसिद्धपुरुषध्यानस्य सांख्यैर्मुक्तिफलकत्वप्रतिपादनात् । सर्वविज्ञानवचनमपि तत्र सङ्गच्छते । मुक्त्यर्थानुसन्धेयप्रकृतिवियुक्तजीवस्वरूपाणां विशेषकान्तराभावेनैकाकारतया स्वात्मनि तथा विज्ञातेसति 'एवमाकारास्सर्वे जीवा' इति ज्ञातुं शक्यत्वात् । सर्वोपादानत्ववचनं तु जीवाधिष्ठितप्रधानविषयतया सङ्गच्छते । तत्रह्यार्द्रेंधनविशिष्टस्याग्नेः धूमोपादानत्वं दृष्टान्तीकृतं । न चाग्निर्धूमोपादानं, किंत्वार्द्रेंधनमेव । तदुत्कर्षेण धूमोत्कर्षदर्शनात् । एवं दार्ष्टान्तिकभावेऽप्यार्द्रेंधनकल्पजडप्रकृतिविशिष्टस्याग्निकल्पस्य चेतनस्योपादानत्ववर्णनं दृष्टान्तानुसारात् 'दध्ना जुहोती' ति विधानमिव विशेषणे संक्रामति । एवमिह ब्रह्मधर्माणां जीवे योजयितुं शक्यत्वात्, जीवधर्माणां पतिजायादिसम्बन्धोत्पत्तिविनाशविशेषविज्ञानाभावानां ब्रह्मणि योजयितुं शक्यत्वात्, बृहदारण्यकचतुर्थपष्ठाध्यायाम्नातयोर्मैत्रेयीब्राह्मणयोस्तन्त्रसिद्धे पुरुषे पर्यवसानेन तत्सामान्यात् सर्वाण्यपि

कारणवाक्यानि पुरुषाधिष्ठितप्रधानकारणत्वपराणि। अतः प्रधानमेव जगत्कारणं नत्वीश्वरो नाम कश्चिदस्तीति। एवं प्राप्ते सिद्धांतः--

अमृतत्वसाधनवेदनेनोपक्रमस्तेनोपसंहारो मध्ये चामृतत्वसाधनात्मदर्शनश्रवणमननध्यानकीर्तनञ्च प्रकरणस्य परमात्मविषयत्व एवोपपद्यते, नतन्त्रसिद्धपुरुषविषयत्वे। 'नान्यः पन्था' इति श्रुतेः श्रुतिविरुद्धस्य 'पुरुषं निर्गुणं प्राप्ये'त्यादितान्त्रिकवचनस्य हेयत्वात्। कथं ब्रह्मणि पतिजायादिवाक्यघटना। इत्थं- पतिजायापुत्रवित्तादयो मत्प्रयोजनायाहमस्यप्रियस्स्यामिति स्वसङ्कल्पात् प्रिया न भवन्ति, किन्तु परमात्मनस्स्वाराधकप्रियप्रतिलंभनविषयकामनानिर्वृत्तय इति। परमात्मा हि कर्मभिराराधितस्तत्तत्कर्मानुगुणं प्रतिनियतदेशकालस्वरूपपरिमाणमाराधकानान्तत्तद्वस्तुगतं प्रियत्वमापादयति। 'एप ह्येवानन्दयाती'ति श्रुतेः। न तु किमपि वस्तु स्वतः प्रियमप्रियं वा भवति। यथोक्तं भगवता पराशरेण--'तदेव प्रीतये भूत्वा पुनर्दुःखाय जायते। तदेव कोपाय पुनः प्रसादाय च जायते॥ तस्माद्दुःखात्मकन्नास्ति न च किञ्चित् सुखात्मक'मिति। नन्वित्थं पतिजायादिवाक्यं परमात्मविषयतां प्राप्नोतु नाम। 'तान्येवानुविनश्यती' त्यादि जीवपरामर्शः कथन्तद्विषयतां प्राप्नुयादिति चेत्, इत्थं- जीवस्तावत् ईश्वरादुत्पद्यते। 'यथा सुदीप्तात्पावकाद्विस्फुलिङ्गा' इत्यादिश्रवणात्। अतस्तयोः कार्यकारणभूतयोरस्ति घटमृत्पिण्डयोरिव मुख्यमैक्यं, तदिह ज्ञापनीयम् 'आत्मनि खल्वर' इत्यादिपूर्ववाक्योक्तसर्वविज्ञानप्रतिज्ञासिध्यर्थमिति तज्ज्ञापनार्थं जीवशब्दैरीश्वराभिधानमित्याश्मरथ्य आचार्यो मन्यते। संसारदशायां जीवेश्वरयोर्भेदेऽपि मोक्षदशायां 'यथा नद्यस्स्यंदमानास्समुद्र' इति मन्त्रोक्तनदीसमुद्रन्यायेन अभेदप्राप्तेः जीवशब्दैरीश्वराभिधानमित्यौडुलोमिराचार्यो मन्यते। ईश्वरस्य जीवेऽन्तर्यामितयाऽवस्थितेस्तन्नियाम्यत्वेन तच्छरीरस्य जीवस्य शब्दाश्शरीरिपर्यन्ताइति जीवशब्दैरीश्वराभिधानमिति काशकृत्स्न आचार्यो मन्यते। इदमेव मतं सूत्रकारस्याभिमतम्। जीवोत्पत्तेः 'नात्माऽश्रुते'रित्यत्र, मुक्तावागन्तुकरूपा-

भिनिष्पत्तेः 'संपद्याविर्भाव' इत्यत्र निराकरिष्यमाणत्वात्, सर्वशब्दानां शरीरिपरमात्मपर्यन्तत्वस्य 'चराचरव्यपाश्रयस्तु स्या' दिति सूत्रेण प्रसाधयिष्यमाणत्वाच्च । तस्मादादिमध्यावसानपरामर्शात् मैत्रेयीब्राह्मणं परमात्मपरम् । न तु तन्त्रसिद्धपुरुषपरमिति सर्वेषां कारणवाक्यानां सिद्धं परमात्मपरत्वम् ॥

संग्रहकारिकाः ॥

मैत्रेयीब्राह्मणोक्तः पतिसुतवनिताद्यन्वयात् पञ्चविंश-
स्तस्य ज्ञानाद्विमुक्तिः प्रकृतिविरहितस्येति तंत्रे प्रसिद्धिः ।
तन्न्यायात्सर्ववेदावधिपरिपठिताश्चेतनैकान्तशब्दाः
तत्रैवाख्यां लभंतां भवतु च तदधिष्ठातृकं तत्प्रधानम् ॥

पतिसुतवनितादिकीर्तनेऽपि स्पृशति न संसृतिभाजमात्मशब्दः ।
इह सुदृढमुपक्रमादिदृष्ट्या परविषये सति तस्य कः प्रसङ्गः ॥

तस्मादिहात्मा भणितः पुमान्परस्तदिष्टमाराधकसौख्यलम्भनम् ।
तत्सिद्धये स्युस्तनयादयः प्रियाःस्वरूपतो नेति तदर्थइष्यतां ॥

जीवपरामर्शोऽयं शरीरिपरमात्मपर्यन्तः ।
यत्रोत्पत्तिविनाशज्ञानाभावाहि न गदितास्तस्य ॥

इति वाक्यान्वयाधिकरणम् ॥६॥

प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् ॥२३॥

अभिध्योपदेशाच्च ॥ २४ ॥

साक्षाच्चोभयाम्नानात् ॥ २५ ॥

आत्मकृतेः ॥ २६ ॥

परिणामात् ॥ २७ ॥

योनिश्च हि गीयते ॥ २८ ॥

एवं निरीश्वरसांख्ये निरस्ते सतीश्वरः केवलं निमित्तभूतः प्रधानमेव तु परिणामिजगदुपादानमिति वदतस्सेश्वरसांख्यस्य मतं निराक्रियत इति सङ्गतिः । किं ब्रह्म जगतोनिमित्तमात्रं उतोपादानमपीति तस्योपादानत्वे श्रुतिन्यायविरोधतदानुकूल्याभ्यां संशये पूर्वपक्षः— ईश्वरोनिमित्तमात्रं, प्रधानमेव उपादानं । 'मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं, मयाध्यक्षेण प्रकृतिस्सूयते सचराचर' मित्यादिश्रुतिस्मृतिदर्शनात्, लोके कुलालमृत्पिण्डादिनिमित्तोपादानभेददर्शनाच्च परमात्मनउपादानत्वासम्भवाच्च। कार्याकारेण परिणामित्वं ह्युपादानत्वं, न तु परिणाम्याधारत्वमपि । मृदि घटाकारेण परिणममानायां तदाधारस्य भूतलस्याप्युपादानत्वप्रसङ्गात् । न च 'बहुस्यां प्रजायेये' ति ब्रह्मणस्सङ्क्ष्यमाणतेजःप्रभृतिरूपेण स्वस्य बहुभवनसङ्कल्पश्रवणादुपादानत्वमप्येष्टव्यमिति वाच्यम्। तदनुपादानत्वेपि ततो भेदेऽपि स्वकीयत्वप्रयुक्ताभेदोपचारेणतदुपपत्तेः। 'प्रजायेमहिरुद्रप्रजाभिः, अग्ने यन्मे तनुवा ऊनन्तन्मआपृणेत्याह यन्मे प्रजायै पशूनामूनन्तन्मआपूरयेतिवावैतदाहे'त्यादिमन्त्रार्थवादा हि प्रजापशुरूपेण स्वस्यैव जननं स्वस्यैव प्रजापश्वात्मकत्वञ्चावेदयन्ति । नच प्रतिज्ञादृष्टान्तानुसारेणोपादानत्वमप्येष्टव्यमिति वाच्यम् । ब्रह्मज्ञाने सत्यपि वियदादिषु मृत्पिण्डादिज्ञाने सत्यपि घटशरावादिषु च संशयदर्शनेन प्रतिज्ञादृष्टान्तयोरौपचारिकतया नेतव्यत्वात् । 'तदात्मानं स्वयमकुरुते' त्यादेः 'यदायदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यह' मित्यादिवन्नयनसम्भवादिति । एवंप्राप्ते सिद्धान्तः—

ब्रह्म जगत उपादानमपि, न निमित्तमात्रं । उपादानत्वे सत्येवहि सर्वविज्ञानप्रतिज्ञामृत्पिण्डघटशरावादिदृष्टान्तौ नोपरुध्येयाताम् । न च तयोरौपचारिकत्वं कल्प्यं, मुख्यत्वसमर्थनोपपत्तेः । तथाहि— 'सदेव सोम्येदमग्रआसीत् एकमेवाद्वितीय' मित्यत्र सत्पदं सूक्ष्मचिदचिद्विशिष्टवस्तुपरम् । अन्यथा ब्रह्मातिरिक्तस्य जीववर्गस्य अव्यक्तस्य च सत्त्वेन अवधारणाविरोधात्, अवधारणस्य तत्पृथग्भूतवस्त्वन्तरं ।..........उपादानी-

यत्वात् । तज्ज्ञाने च तत्कार्यं सर्वमपि विषयोभवति । कार्यद्रव्यस्य कारणानन्यत्वात् । कार्यगतस्थूलावस्था परं विषयो नभवति । अतस्तेनाकारेण संशय उपपद्यते । अन्यदिहापेक्षितं प्रतिज्ञादृष्टान्तवाक्ययोर्विचारणीयमारम्भणाधिकरणे विचारयिष्यते । न च कुलालमृत्पिण्डन्यायेन निमित्तोपादानभेदनियमश्शङ्कनीयः । तत्र हि निमित्तोपादानाभेदग्राहकप्रमाणाभावात् तद्भेदः, इह तत्प्रमाणे जाग्रति कथमभेदो न स्यात् । न च भूतलघटपरिणाम्युपादानाधारस्योपादानत्वोक्तिर्निरालंबनेति वाच्यं । अपृथक्सिद्धकार्याश्रयत्वरूपत्वादुपादानत्वस्य तस्य ब्रह्मण्यपिमुख्यत्वात् । नच कार्याश्रयत्वे साक्षात्त्वन्निवेशनीयं, येन साक्षात्तदाश्रयभूता प्रकृतिरेवोपादानं स्यात् । साक्षात्त्वविशेषणे गौरवात् । किंच प्रतिज्ञादृष्टान्ताभ्यां तावद्ब्रह्मण उपादानत्वमवसीयते । 'बहुस्यां प्रजायेये' त्यभिध्योपदेशादपि तदवसीयते । न च तस्य मुख्यत्वसम्भवे पूर्वपक्षोदाहृतमन्त्रार्थवादवक्लिष्टगतिः कल्पनीया । तथा 'ब्रह्मवनं ब्रह्मसवृक्ष आसीत् यतोद्यावापृथिवी निष्टतक्षुः । मनीषिणो मनसा विब्रवीमिवः ब्रह्माध्यतिष्ठद्भुवनानि धारय' न्निति साक्षाच्च तस्य निमित्तोपादानोभयरूपत्वमाम्नायते । अत्र हि 'वृक्ष' इति तक्षणनिर्वर्त्यद्यावापृथिव्युपादानत्वमुक्तम् । 'ब्रह्माध्यतिष्ठ' दिति निमित्तत्वं । तथा 'तदात्मानं स्वयमकुरुते' ति सृष्टौ तस्यैव कर्तृकर्मभावश्रवणादपि तस्य निमित्तोपादानोभयरूपत्वमवगम्यते । 'तदात्मानं सृजाम्यह' मितिवदुपपद्यत इत्युक्तमिति चेत् न । तत्रापि निमित्तोपादानभावसिध्यविशेषात् । इयांस्तु विशेषः । तत्र अवतारशरीररूपेण स्वात्मनः स्वेन सृष्टिरुच्यते, इह प्रपञ्चरूपेणेति । एवं बहुविधश्रुतिसिद्धमपि तस्योपादानत्वं 'निष्कलं निष्क्रियं शान्त' मित्यादिनिर्विकारत्वविषयबहुश्रुत्यन्तराविरोधेन कल्पनीयम् । तथा तत्कल्पनञ्च निरुक्तोपादानलक्षणे साक्षादाश्रयत्वाविवक्षयैव निर्वहतीत्यतोऽपि साक्षात्त्वन्नविवक्षणीयम् । न च व्यवहितकारणवद्व्यवहिताश्रयो नास्ति, स केवलमाश्रयस्यैवाश्रय इति शङ्कनीयम् । पर्यङ्कास्तीर्णवस्त्रे शयानं प्रति तद्वहनाक्षमस्य वस्त्रमात्रस्य आश्रयत्वायोग्यतया

व्यवहितस्य पर्यङ्कस्य वस्त्रद्वारा तदाश्रयत्वात् प्रासादस्थपर्यङ्कशायिते पुरुषे 'प्रासादे शेते' इति व्यवहारदर्शनाच्च। एतेन स्वाभिन्नकार्यावस्थाश्रयत्व-मुपादानलक्षणम्, तथा च ब्रह्मप्रपञ्चयोरपृथक्सिद्धिसत्त्वेऽप्यभेदाभावात् न ब्रह्मणः प्रपञ्चोपादानत्वमित्यपि शङ्का निरस्ता। श्रुतोपादानत्वनि-र्वाहार्थमपृथक्सिद्धिगर्भस्यैव लक्षणस्य वाच्यत्वात् श्रुतोपपत्त्यनुसारेण अश्रुतकल्पनौचित्यात्। तस्मादुक्तलक्षणपरिणामित्वाभ्युपगमे श्रुतोपादान-त्वनिर्वाहात् श्रुतनिर्विकारत्वाव्याकोपाच्च निरुक्तपरिणामित्वरूपं निरवद्यमे-वोपादानत्वम्, यदक्षरवाक्यगतभूतयोन्यादिशब्दैरपि जोघुष्यते। योनि-शब्दो ह्युपादानपर्यायः। अक्षरप्रकरणे 'कर्तारमीशं पुरुषं ब्रह्मयोनि' मिति कर्तृत्वस्यापि श्रवणात् ततोऽपि निमित्तोपादानोभयरूपत्वसिद्धिः। तस्मात् ब्रह्म जगत उपादानं निमित्तञ्चेति सिद्धम्॥

संग्रहकारिके॥

अस्तीश्वरस्तथाऽपि तु नोपादानमयमपरिणामित्वात्।
तदधिष्ठितं प्रधानं श्रुतिस्मृतिभ्यामुपादानम्॥
निर्दोषो निर्विकारस्स्वत इति चिदचिद्देह एष स्वदेह-
द्वारादोषैर्विकारैरपि च न सहते सङ्गतिं विश्वनेता।
तेनोपादानलक्ष्मच्युतमिह न भवेद्वाव्यवस्थाश्रयत्वं
पर्यङ्कास्तीर्णवस्त्रस्थितिजुष इव यद्देहगत्याश्रयोऽसौ॥

इति प्रकृत्यधिकरणम्॥७॥

एतेन सर्वे व्याख्याता व्याख्याताः॥२८॥

अतीतपञ्चत्रिंशदधिकरणन्यायातिदेशरूपत्वात् सङ्गतिः। अतीता-धिकरणेष्वनुदाहृताः कारणवाक्यविशेषाः किमुक्तलक्षणब्रह्मपरा उत नेति

तेषामुक्तन्यायविषयत्वसम्भवासम्भवाभ्यां संशये पूर्वःपक्षः । अनुदाहृताः कारणवाक्यविशेषास्सर्वे परमपुरुषैकान्तिका न भवन्ति । ‘ हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् , यदा तमस्तन्नदिवा न रात्रिर्नसन्नचासच्छिव एव केवल’इत्यादिकारणवाक्यान्तरेषु ब्रह्मशिवादिशब्दोक्तकारणान्तरप्रतीतेरिति । सिद्धान्तस्तु—

अतीताधिकरणोक्तन्यायैरेव तेऽपि परमपुरुषविषयास्सिध्यन्तीति । तत्सिद्धिप्रकारस्तु श्रुतप्रकाशिकादिषु प्रपञ्चितो द्रष्टव्यः । अतिविस्तरापत्तेर्नेह सलिख्यते । कारणभूत वस्तुनि शिवादिशब्दा अपि श्रुता इतिचेत् पूर्वन्यायैस्तेऽपि ब्रह्मणि नारायणे योज्याः ॥

इति सर्वव्याख्यानाधिकरणम् ॥८॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे प्रथमस्याध्यायस्य

च तु र्थः पा दः ॥

प्रथमोऽध्यायस्समाप्तः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥

नयमयूखमालिकायां

द्वितीयोऽध्यायः ॥

स्मृत्यनवकाशदोषप्रसंगइतिचेन्नान्यस्मृत्यनवकाश-दोषप्रसंगात् ॥१॥

इतरेषाञ्चानुपलब्धेः ॥ २ ॥

प्रथमेऽध्याये श्रीमन्नारायणाख्यं परंब्रह्म सकलजगत्कारणमिमि तत्र सर्वेषां वेदान्तानां न्यायतस्समन्वयव्युत्पादनेन प्रसाधितं। तत्र संभावितसर्वविधविरोधसमाधानेन तदेव स्थिरीकर्तुं द्वितीयोऽध्याय आरभ्यते। तत्र प्रथमाधिकरणे सांख्यस्मृतिविरोधेन वेदांतानामन्यपरत्वाशङ्का निरस्यते। ननु कथं स्मृतिविरोधेन श्रुतेरन्यपरत्वशङ्का, श्रुतिस्मृतिविरोधे स्मृतेरेवाप्रामाण्यस्य 'विरोधे त्वनपेक्ष्यं स्यादसति ह्यनुमान' मिति पूर्वतन्त्राधिकरणे स्थितत्वात्। तत्र हि 'औदुंबरीं स्पृष्ट्वोद्गाये' दिति प्रत्यक्षश्रुतिविरोधेन 'औदुंबरी सर्वा वेष्टयितव्ये' ति स्मृतेरनादरणीयत्वं, असत्येव प्रत्यक्षश्रुतिविरोधे स्मृतेर्मूलश्रुत्यनुमापकत्वेन प्रामाण्यञ्चोक्तम्। सत्यं। प्रत्यक्षश्रुतेः स्फुटार्थत्वे तथैव। जगत्कारणविषयावेदान्तास्तु स्पर्शनश्रुतिवन्नस्फुटार्थाः, किंत्वतिगहना नानाप्रकाराः 'वेदार्थोयस्स्वयं ज्ञातस्तत्राज्ञानं भवेदपि। ऋषिभिर्निश्चिते तस्मिन् का शङ्का स्यान्महात्मभि' रित्युक्तरीत्योपबृंहणनिश्चयार्थाइति कपिलादिमहर्षिप्रणीतसांख्यस्मृतिरूपोपबृंहणानुसारेण तेषामन्यपरत्वशङ्का भवत्येवेति तन्निरासार्थमिदमधिकरणम्। अत्र प्रथमाध्यायप्रसाधितं ब्रह्मणो जगत्कारणत्वमयुक्तं युक्तंवेति सांख्यमन्वादिस्मृतिविप्रतिपत्तेः किं सांख्यस्मृत्योपबृंहणीयास्सन्तो वेदान्तास्तदनुसारेण प्रधानकारणपराः, उत मन्वा-

दिस्मृत्युपबृंहणीयास्सन्तस्ते ब्रह्मकारणपराइत्यनिर्धारणात् संशये पूर्वपक्षः- सांख्यस्मृत्योपबृंहणीयाः । तस्या निरवकाशत्वात् । मन्वादिस्मृतीनां वर्णाश्रमादिधर्मेषु अग्निहोत्रादिकर्मसु च सावकाशत्वात् । न च मनुव्यासादिबहुस्मृतिविरोधात् सांख्यस्मृतेर्भ्रान्तिमूलत्वं कल्प्यतामिति वाच्यम् । 'ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्ति जायमानञ्च पश्ये' दिति श्वेताश्वतरोपनिषदि सांख्यकर्तुः कपिलस्य ज्ञानपरिपूर्णत्वश्रवणेन तत्कल्पनाऽयोगात् । 'यद्वै किञ्च मनुरवदत्तद्भेषज' मिति मनूक्तीनामपि कार्त्स्न्येन प्रामाण्यं श्रुतमितिचेन्न । भेषजशब्दस्य प्रामाण्यार्थत्वाभावेन तदसिद्धेः । यजुर्वेदेहि 'यो ब्रह्मवर्चसकामस्स्यात् तस्मा एतं सोमारौद्रंचरुं निर्वपे' दिति ब्रह्मवर्चसकामस्येष्टिं विधाय 'यावदेव ब्रह्मवर्चसं तत्सर्वं करोती' ति फलार्थवादानन्तरं 'अतिब्रह्मवर्चसंक्रियत इत्याहुरीश्वरो दुश्चर्माभवितो' रित्येवंरूपेष्ट्यनुष्ठानेन 'अतिब्रह्मवर्चसं क्रियते तेन यजमानश्श्वित्रीभवितुं प्रभवती' त्येवं फलमेव पुनर्दोषपर्यवसायिनं सङ्कीर्त्य तत्परिहारार्थं 'मानवी ऋचौ धाय्ये कुर्या' दिति मनुना दृष्टे 'अग्निं वः पूर्व्यंगिरा देवमीडे वसूना' मित्यादिके ऋचौ सामिधेनीमध्ये धाय्यारूपे विधाय कथं मानवीभ्यामृग्भ्यां श्वित्रपरिहारइत्याकांक्षायां 'यद्वै किञ्च मनुरवदत्तद्भेषजं भेषजमेवास्मै करोती' त्यर्थवादेन तत्सङ्घटनं कृतम् । अत्र मनूक्त्यर्थानां श्वित्रपरिहारार्थभेषजरूपत्वप्रतिपादनमेव तत्सङ्घटकं, न तु मनुदृष्टऋगर्थानां 'अग्निर्वसूनाम्मध्ये पूर्व्य' इत्यादीनां मनुस्मृतिवचनार्थानाञ्च प्रामाणिकत्वप्रतिपादनम् । मनूक्त्यर्थानां श्वित्रे व्याध्यन्तरे वा भेषजरूपत्वं बाधितमिति चेत्, तर्हि असदर्थावलम्बनार्थवादत्वमस्तु । नह्यर्थवादस्य सदर्थावलम्बनत्वसिध्यर्थं प्रकृतार्थासङ्घटकार्थान्तरपरिग्रहो युक्तः । तस्मात् 'यद्वै किञ्चे' त्यादिकमनुवाक्यानां सर्वेषां स्वस्वविषयत्वेन प्रतीते सर्वत्रार्थे प्रामाण्यप्रतिपादनपरमित्येतदसिद्धेः मनुस्मृतिवचनानां ब्रह्मकारणवादांशमपहाय वर्णाश्रमधर्मेष्वेव अवकाशकल्पनं युक्तमिति वेदान्तानां निरवकाशया सांख्यस्मृत्यैवोपबृंहणीयत्वात् ते कपिलसूत्रहरिहरवार्तिकादिप्रतिपादितेन प्रकारेण प्रधानकारणत्वपरा नेतव्याः ।

तेषु ये पुरुषस्यैव कारणत्वं स्फुटं वदन्ति तेत्वमात्यजयं राज्ञीव प्रधानकृत्यं पुरुषे व्यपदिशंतीति नेतव्याइति मन्वादिस्मृतिभिरेवोपबृंहणीयाः। तासामाप्ततमप्रणीतानां बहूनामनवकाशत्वात् । नच कर्मभिस्तासां सावकाशत्वं, परमपुरुषाराधनभूतकर्मप्रतिपादकानामपि तदाराधनीयतया तच्छेषिणि परमपुरुषे जगत्कारणे ब्रह्मण्येव तात्पर्यात् । अत एव मनुना वर्णाश्रमादिधर्मान् ऋषिभिः पृष्टेन तदाराधनीयपरमपुरुषोपदेशपूर्वकमेव तेषामुपदेशः कृतः । 'आसीदिदं तमोभूतमप्रज्ञातमलक्षणम् । अप्रतर्क्यमनिर्देश्यं प्रसुप्तमिव सर्वतः ॥ ततस्स्वयम्भूर्भगवानव्यक्तो व्यञ्जयन्निदम् । महाभूतादिवृत्तौजाः प्रादुरासीत्तमोनुदः ॥ सोऽभिध्याय शरीरात्स्वात् सिसृक्षुर्विविधाः प्रजाः । अप एव ससर्जादौ तासु वीर्यमपासृजत् ॥ तदण्डमभवद्धैमं सहस्रांशुसमप्रभम् । तस्मिन् जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः ॥ आपो नारा इति प्रोक्ता आपो वै नरसूनवः । ता यदस्यायनं प्रोक्तं तेन नारायणस्स्मृतः' इत्यादिना पुराणेषु परमपुरुषप्रतिपादनैदंपर्येण प्रवृत्तेष्वेव 'वर्णाश्रमाचारवता पुरुषेण परः पुमान् । विष्णुराराध्यते पन्था नान्यस्तत्तोषकारक' इत्यादिवचनैस्तदाराधनतया तच्छेषत्वेनैव कर्मप्रतिपादनमिति स्पष्टमेव । तथा याज्ञवल्क्येनापि 'क्षेत्रज्ञस्येश्वरज्ञानाद्विशुद्धिः परमा मता' इतीश्वरं प्रस्तुत्य 'मुखपादोरुपज्जास्स्युस्तस्य वर्णा यथाक्रम' मिति पुरुषसूक्तप्रक्रियया तस्य जगत्कारणत्वं प्रतिपादयता मनुवदेव स्ववर्णितवर्णाश्रमधर्माणामाराधनीये पुरुषसूक्तप्रतिपाद्ये श्रियःपतौ नारायण एव तात्पर्यमाविष्कृतम् । तथा आपस्तम्बेनापि 'पूः प्राणिनस्सर्व एव गुहाशयस्याहन्यमानस्यविकल्मषस्ये' ति एवं 'एष सर्वभूतान्तरात्माऽपहतपाप्मा दिव्यो देव एको नारायण' इति सुबालोपनिषत्प्रतिपाद्यरूपं नारायणं प्रस्तुत्य 'तस्मात्कायाः प्रभवंति सर्वे समूलं शाश्वतिकस्सनित्य' इति तस्य सकलमूलकारणत्वं वदता सएव स्ववर्णितवर्णाश्रमादिधर्माणामाराधनीय इति तत्र तात्पर्यमाविष्कृतम् । एवमन्येषामपि स्मर्तॄणां वचनान्युदाहरणीयानि । नच अनवकाशत्वतौल्ये कथं मन्वादिस्मृतिभिरेवोपबृंहणीया इति निर्णय

इति वाच्यम् । मन्वादीनामाप्ततमत्वात् । मनोस्तावदाप्ततमत्वं तदुक्तीनां भेषजत्वश्रुत्याऽवसितम् । तथाहि— भेषजत्वमिह रोगदुरितोभयशान्त्यर्थसाधारणदोषपरिहारार्थत्वमात्रं विवक्षितं, नतु विशिष्य रोगशान्त्यर्थत्वमेव । 'यद्वैकिंचे' ति वाक्यस्यात्यंतासमर्थत्वापत्तेः । नहि मनुस्मृतिवचनानां मध्ये किमपि वचनं वैद्यकवद्रोगशांत्यर्थभेषजप्रतिपादकमस्ति । दुरितशांत्यर्थप्रतिपादकत्वस्त्वेव वर्णाश्रमधर्मविषयवचनजातम् । नित्यनैमित्तिकानां वर्णाश्रमधर्माणां दुरितक्षयहेतुत्वात् । ननु तथाऽपि सर्वाणि मनुस्मृतिवचनानि दुरितक्षयोपयोगीनि नभवंति, मनुस्मृतौ राजनीतिव्यवहारपदनिर्णयविषयत्वेन दृष्टार्थानामपि सत्त्वादिति वीप्सार्थकयत्किञ्चिच्छब्दासांगत्यमस्तीतिवाच्यं । तेषामपि दुरितक्षयार्थकर्मानुष्ठानोपकारकत्वेन परम्परया तादर्थ्यसत्त्वात्, तदभावेऽपि कात्स्न्यर्पपरयत्किञ्चिच्छब्दस्य वर्णाश्रमधर्मविषयवचनजातपरत्वेन सङ्कोचोपपत्तेश्च असंकुचितसर्वपरत्वासंभवे संकुचितसर्वपरत्वौचित्यात् । अतएव 'सर्वएव हारियोजनस्य लिप्सन्त'इति ज्योतिष्टोमप्रकरणश्रुतिवाक्ये सर्वशब्दस्य असंकुचितसर्वपरत्वासम्भवात् केनचिदवच्छेदेन सामस्त्यपरत्वे वाच्ये प्राकरणिकज्यौतिष्टोमिकार्त्विज्यावच्छिन्नसामस्त्यपरत्वं युक्तमिति ऋत्विजांमेव हारियोजनभक्षणविधायकमिदं वाक्यमिति निर्णीतं पूर्वतन्त्रे । एवञ्च भेषजत्वोक्त्या लब्धप्रामाण्यानां मनूक्तीनां परमतात्पर्यविषयमाराधनीयं विहाय तदाराधनमात्रे तात्पर्यपर्यवसानायोगस्य उक्तत्वात् । तत्रैव धर्मशास्त्ररूपाणां सर्वासां मनूक्तीनां प्रामाण्यं लभ्यत इति तत्र तस्याप्ततमत्वम् । तथा 'सहोवाच व्यासः पाराशर्य' इति श्रुत्या स्वप्रतिपाद्येऽर्थे व्यासोक्तत्वेन गौरवप्रदर्शनात् तथा व्यासोपदिष्टानां सर्वेषां प्रामाण्यं लभ्यत इति तस्याप्ततमत्वम् । एवं याज्ञवल्क्यादीनामपि 'जनकोह वैदेहो बहुदक्षिणेन यज्ञेनेज' इति बृहदारण्यकाध्यायादिवचनभङ्गीभिराप्ततमत्वं, कपिलस्यत्वाप्तत्वमात्रम् । 'ऋषिं प्रसूत' मित्यादेस्तद्दृष्टित्वोपयोगिकतिपयवेदवेदार्थगोचरज्ञानवत्त्वमात्रविषयत्वेनापि चारितार्थ्यात् । तथा सांख्यशास्त्रप्रवक्तारः कपिलासुरिपञ्चशिखादयस्त्रिचतुराएव स्मृतीतिहा-

सपुराणवक्तारो मन्वादयस्त्वतिबहवइति सुप्रसिद्धम् । स्मृतीतिहासपुराणानिच कपिलादिप्रणीतकतिपयसूत्ररूपात् सांख्यशास्त्रात् अतिबहुलानीतिव्यक्तमेव । तस्मादाप्ततममन्वादिबहुप्रणीतबहुशास्त्रविरोधात् सांख्यशास्त्रस्य निरवकाशत्वमकिंचित्करमिति निरवकाशाभिर्मन्वादिस्मृतिभिरेवोपबृंहणीया वेदांताः । ततश्च तेषां समन्वयात् ब्रह्मणोजगत्कारणत्वमविचलमिति ॥

संग्रहकारिकाः ॥

वेदान्तौघस्य सांख्यस्मृतिरतिगहनस्यार्थतत्त्वावधृत्यै
वक्तुं युक्तोपबृंहण्यनितरविषया साह्यलब्धावकाशा ।
नत्वन्या कापि धर्मावगतिपरतया विश्रुता सावकाशा
तस्माद्वेदान्तवेद्यं न भवति जगतः कारणं ब्रह्म तत्त्वे ॥
मैवं मनुव्याससमुखस्मृतीनामपि प्रतीतोऽनवकाशभावः ।
आराधनीये खलु कर्मभिस्स्वैर्नारायणे भावमुशन्ति तासाम् ॥
तस्माद्व्रजन्त्याप्ततमैः प्रणीतास्ताएव तेषामुपबृंहणत्वम् ।
या तद्विरुद्धार्थपरैव दृष्टा सांख्यस्मृतिर्भ्रान्तिनिबन्धना सा ॥

इति स्मृत्यधिकरणम् ॥१॥

एतेन योगः प्रत्युक्तः ॥ ३ ॥

अत्रापि विषयसंशयपूर्वपक्षसिद्धान्तहेतवः पूर्ववद्द्रष्टव्याः । हिरण्यगर्भस्य भ्रमासम्भवात् तत्कृतस्य शास्त्रस्येश्वराभ्युपगमेन श्वेताश्वतरोपनिषदाद्युक्तयोगानुष्ठानवर्णनेन च कपिलादिस्मृतिवैलक्षण्येन च वेदान्तान्तरङ्गत्वात् तेनोपबृंहणीया वेदान्ता इति तदुक्तरीत्या ईश्वराधिष्ठितस्य प्रधानस्य कारणत्वेनाभ्युपगन्तव्यत्वात् ब्रह्म कारणमित्येतदयुक्तं इत्यस्यातिदेशाधिकरणस्याधिका शङ्का । हिरण्यगर्भस्यापि क्षेत्रज्ञत्वेन तत्कृतस्य शास्त्रस्य भ्रममूलत्वसंभवात्, अब्रह्मात्मकप्रधानकारणत्वाभ्युपगमात्, ईश्वरस्य निमित्तमात्रत्वाङ्गीकारात्, वेदांताभिमतध्येयवैषम्यात्, तन्निरूप्यनिरीक्षणध्यानविधानाच्च विरुद्धेन तेन वेदान्ता नोपबृंहणीया इति तत्परिहारः ॥

संग्रहकारिका ॥

योगस्तद्बुपबृंहणत्वमयतां सद्मब्जभूर्निर्मित-
स्तत्राङ्गीकृत ईश्वरश्श्रुतिमितो योगश्च तद्गोचरः ।
मैवं श्रुत्युदितेश्वराच्चदुदिताद्योगाच्च तद्गोचरा-
द्वैलक्षण्यजुषौ हि तौ भववतः कस्येह नास्ति भ्रमः ॥

इति योगप्रत्युक्त्यधिकरणम् ॥२॥

न विलक्षणत्वादस्य तथात्वञ्च शब्दात् ॥४॥
अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् ॥५॥
दृश्यते तु ॥ ६ ॥
असदिति चेन्न प्रतिषेधमात्रत्वात् ॥७॥
अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥ ८ ॥
न तु दृष्टान्तभावात् ॥ ९ ॥
स्वपक्षदोषाच्च ॥ १० ॥
तर्काप्रतिष्ठानादपि ॥ ११ ॥
अन्यथाऽनुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः ॥१२॥

मन्वादिस्मृतिभिरेवोपबृंहणं कार्यमित्युक्तमयुक्तम् । तासां तर्कविरुद्धत्वात् । अतस्तर्कानुगृहीतया सांख्यस्मृत्यैवोपबृंहणं कार्यमिति प्रत्यवस्थानात्सङ्गतिः । ब्रह्मकारणत्वं युक्तमयुक्तंचेति चेतनात् ब्रह्मणोऽचेतनतया तद्विलक्षणस्य जगत उत्पत्तिसम्भवासम्भवाभ्यां संशये पूर्वपक्षः- चेतनाद्ब्रह्मणोऽचेतनस्य जगत उत्पत्तिर्न सम्भवति । विलक्षणत्वात् । घटकुण्डलमृत्सुवर्णादीनां मृत्त्वसुवर्णत्वादिकारणगतासाधारणरूपेण सालक्षण्ये सत्येव हि कार्यकारणभावो दृष्टः । चेतनस्य च चेतनत्वमसाधारणं न तत्कार्येषूपलभ्यते । न च कदाऽप्यनुपलभ्यमानं चैतन्यं सुषुप्तजीवेष्विव घटादिष्वनुद्भूतं श्रुत-

ब्रह्मकारणताऽन्यथाऽनुपपत्त्या कल्पनीयम् । सति चैतन्ये कदाचिदुद्भवावश्यम्भावेन तथा कल्पनाऽयोगात् । अन्यथा श्रुतयूपादित्यभावान्यथानुपपत्त्या यूपेऽप्यनुद्भूतादित्यत्वकल्पनापत्तेः, 'विज्ञानञ्चाविज्ञानञ्च' त्यादिचेतनाचेतनविभाजकश्रुतिविरोधापत्तेश्च विलक्षणाविलक्षणयोः कार्यकारणभावाभ्युपगतौ वैलक्षण्ये सति भेदावश्यंभावेन कार्यकारणैक्यसिद्धांतविरोधापत्तेश्चेति।

सिद्धांतस्तु —

क्रिमिमाक्षिकादिषु सत्यपि वैलक्षण्ये कार्यकारणभावो दृश्यते । तत्राचेतनांश एव माक्षिकप्रकृतिक इति सालक्षण्यमस्तीति चेत् न । यथाकथञ्चित्सालक्षण्यस्य कार्यकारणभावप्रयोजकत्वे सर्वस्य सर्वस्मादुत्पत्तिः प्रसज्यत इति कारणगतासाधारणरूपेण सालक्षण्यं तवाभिमतम् । न च तदिहोपपादयितुं शक्यम् । क्रिमौ माक्षिकत्वस्याभावात् । एवमुपपद्यते विलक्षणयोरपि जगद्ब्रह्मणोः कार्यकारणभावः । न च तथा सति भेदाभ्युपगमापत्तिः । सालक्षण्यप्रतिषेधेऽपि कुण्डलहिरण्ययोरिवाभेदोपपत्तेः । न च जगद्ब्रह्मणोरभेदे जगत्सृष्ट्यादिषु सत्सु हेया जगदवस्थाः जगतीव ब्रह्मण्यपि स्युरित्येकस्मिन्नेव ब्रह्मणि हेयगुणाः तद्विरुद्धाः श्रुत्यन्तरसिद्धापहतपाप्मत्वादयश्चेत्यसामञ्जस्यापत्तिः । सूक्ष्मचिदचिद्वस्तुशरीरकं ब्रह्म कारणं, स्थूलचिदचिद्वस्तुशरीरकं ब्रह्म कार्यमित्येवंरूपे सिद्धान्ताभिमते कार्यकारणाभेदे तदप्रसक्तेः शरीरगतधर्माणां शरीरिण्यप्रसङ्गे बाल्ययौवनस्थाविरादीनामात्मन्यसम्बन्धस्य दृष्टान्तस्य सद्भावादिति । एवं च यद्यपि स्थूलसूक्ष्मशरीररूपविशेषणांशे कार्यकारणयोरचेतनत्वेन विशेष्यांशे तयोश्चेतनत्वेन च सालक्षण्यमस्तीति वक्तुं शक्यम्, तथाऽपि कारणगतविशेष्यांशस्य कार्यगतविशेषणांशेऽपि कारणत्वं वक्तव्यमित्यभ्युपेत्य वैलक्षण्यम् । तत्र दृष्टान्त उपन्यस्तः । बाल्यावस्थस्य यौवनाद्यवस्थान्तरापत्तावपि हि कारणगतविशेष्यांशस्य कार्यगतविशेषणांशेऽपि कारणत्वमस्ति, निरात्मकशरीरस्य यौवनादिप्राप्त्यभावात्, तथेहापि सत्यपि वैलक्षण्ये कार्यकारणभाव उपपद्यत इति दर्शयितुम् ॥

संग्रहकारिके ॥

अचेतनं चेतनतः कथं स्याद्विलक्षणाद्ब्रह्मिति स्थवीयः ।
विशिष्टयोः कारणकार्यभावे न चोद्यमेतद्धि पदं लभेत ॥
तथाऽपि तर्कप्रतितर्कउच्यते न सर्वसाम्यं क्वचिदप्युदीक्ष्यते ।
यथा कथञ्चित्प्रकृतेऽपि वर्तते विशेषतो न क्रिमिमाक्षिकादिषु ॥

इति विलक्षणत्वाधिकरणम् ॥३॥

एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥१३॥

प्रधानकारणवादिसांख्यमात्रतर्केण समन्वयभङ्गाभावेऽपि परमाणुकारणवादिकणभक्षाक्षचरणक्षपणकादिबहुतान्त्रिकाभिमततर्केण तद्भङ्गस्स्यादित्यधिकाशङ्कानिरासाय पूर्वन्यायातिदेशार्थमिदमधिकरणम् । परमाणुकारणवादिनां तर्केण समन्वयभङ्गो भवति न वेति तेषां परस्परविरोधसद्भावेऽपि तद्भङ्गसामर्थ्यसम्भवतदसम्भवाभ्यां संशये पूर्वपक्षः । सम्भवति तद्भङ्गे सामर्थ्यं, यथा शुनां परस्परविरोधसत्त्वेऽपि एकं वराहं मारयितुमैकमत्येन तद्भक्षणलिप्सया प्रवृत्तानां सर्वेषां शुनां तदलाभेऽपि वराहस्य मारणं भवति । एवं परमाणवस्सत्याः शून्याः विज्ञानात्मकाः क्षणिकाश्चतुर्विधाः एकविधा इत्येवमवान्तरकलहसद्भावेऽप्यल्पपरिमाणानामेव तंत्वादीनां महापरिमाणपटाद्यारम्भकत्वदर्शनात् तद्विपरीतपरिमाणयोर्ब्रह्मजगतोरुपादानोपादेयभावो न सम्भवतीति प्रतिष्ठितेन सकलपरमाणुवाद्यभिमतेन तर्केण तद्भङ्गउपपद्यत इति पूर्वः पक्षः । सिद्धान्तस्तु—

यथा नानादिग्विप्रकीर्णमपि बहलन्तमस्तोमं एक एवादित्यः प्रतिक्षिपति, एवमुदाहृतं अन्यदप्येतादृशं तर्कजालं 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मय' मित्याद्यो मृत्पिण्डारब्धघटशरावादिप्रत्युदाहरणेन प्रतिक्षिपन् वेद एव जागर्तीति नात्रप्रयतितव्यमस्तीति ॥

संग्रहकारिके ॥

अणुकारणता बहुवादिमता प्रतितिष्ठति तर्क इहेति मुधा ।
तदवान्तरभेदकथाकलहक्षपितश्श्रुतिसीम्नि न स प्रभवेत् ॥

अल्पान्महत्स्यान्महतो नाल्पमित्येष वादिनां ।
श्ववराहनयः क्षिप्तः श्रुत्या दृष्टान्तवर्णनात् ॥
इति शिष्टापरिग्रहाधिकरणम् ॥४॥

भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकवत् ॥ १४ ॥

पूर्वाधिकरणस्यातिदेशाधिकरणत्वात् तद्विहाय तन्मूलाधिकरणेन सङ्गतमिदमधिकरणम् । तत्र हि 'न तु दृष्टान्तभावा'दिति सूत्रेण शरीरगतबालत्वयुवत्वादीनां शरीरिण्यप्रसङ्गं दृष्टान्तीकृत्य चिदचिच्छरीरकं ब्रह्मेति तद्गतदोषाणां ब्रह्मण्यप्रसक्तिरुक्ता । साऽनुपपन्ना । जीववच्छरीरित्वे तत्कृतसुखदुःखभोगप्रसक्तेरित्याक्षिप्यते । प्रथमेऽध्याये 'सम्भोगप्राप्तिरिति चेन्न वैशेष्या'दिति सूत्रेण परस्यास्मदादिशरीरानुप्रवेशप्रयुक्ता सुखदुःखभोगप्रसक्तिर्निराकृता । यथा परगृहप्रविष्टस्यागृहस्वामिनो गृहसाकल्यवैकल्यप्रयुक्तहर्षविषादभाक्त्वं नास्ति एवं परस्यापीति । इह पुनः शरीरस्वामित्वप्रयुक्ता सा निराक्रियते । 'न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती'ति श्रवणात् शरीरस्वामित्वे तत्कृतसुखदुःखभोगो न निवारयितुं शक्य इति पूर्वः पक्षः । सिद्धान्तस्तु —

यथाऽपराधिनमपराधानुगुणं क्लेशयितुं तदर्थं कारागृहं निर्माय तत्क्लेशनार्थं स्वयमपि तत्र प्रविष्टस्य स्वतन्त्रस्य तत्कृतक्लेशभाक्त्वं न भवति, एवं परस्यापि । 'नह वै सशरीरस्ये'त्यादिश्रुतिरपि स्वकर्मोपार्जितशरीरविषया । न तु शरीरस्वामिमात्रविषया । अन्तर्यामिब्राह्मणे— 'यस्य पृथिवी शरीर'मित्यादिना परस्य पृथिव्यादिशरीरस्वामित्वमुक्त्वा तत्तदभिमानिदेवतावत् तत्कृतसुखदुःखभाक्त्वशङ्कानिरासायैव प्रतिपर्यायं 'एषत आत्माऽन्तर्याम्यमृत' इत्यमृतत्ववचनादिति ॥

संग्रहकारिके ॥

यदि वर्ण्येत चिदचिच्छरीरं ब्रह्म कारणम् ।
तदा शरीरिणोऽस्य स्यात् भोक्तृत्वं सुखदुःखयोः ॥

मैवं कर्मकृतं तन्न शरीरकृतं ततोऽस्य तन्न भवेत् ।
राजानुग्रहनिग्रहवशवर्तित्वं यथा राज्ञः ॥
इति भोक्त्रापत्त्यधिकरणम् ॥५॥

तदनन्यत्वमारम्भणशब्दादिभ्यः ॥१५॥

भावेचोपलब्धेः ॥ १६ ॥

सत्वाच्चापरस्य ॥ १७ ॥

असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्ते-
श्शब्दान्तराच्च ॥ १८ ॥

पटवच्च ॥ १९ ॥

यथा च प्राणादिः ॥ २० ॥

विलक्षणत्वाधिकरणे कारणात् ब्रह्मणः कार्यस्य जगतो वैलक्षण्येऽप्यनन्यत्वं 'असदिति चेन्न प्रतिषेधमात्रत्वा'दिति गुणसूत्रोक्तं कुण्डलहिरण्यन्यायेन सांख्यंप्रत्युपपादितम् । इदानीं वैलक्षण्ये सत्यनन्यत्वमयुक्तम् । वैलक्षण्यस्य भेदव्याप्तत्वात् । अत एव कुण्डलहिरण्ययोरप्यनन्यत्वमसिद्धम् । सर्वत्र कार्यकारणयोर्बुद्धिशब्दान्तरादिभिर्भेदावश्यम्भावादिति वदतो वैशेषिकस्य मतमास्थायानन्यत्वमाक्षिप्य समाधीयत इति सङ्गतिः । तत्रैवं पूर्वपक्षः— अनन्यत्वे ब्रह्मणो जगत्कारणत्वं न संभवति । लोके कार्यकारणभूतानां घटमृत्पिण्डादीनां बुद्धिशब्दान्तरादिभिः कार्यकारणभावस्य भेदव्याप्तिनिर्धारणात् । न हि मृत्पिंडे घटाकारा घटे वा पिंडाकारा बुद्धिरुदेति । न च घटशब्दो मृत्पिंडे पिंडशब्दो वा घटे प्रयुज्यते । न च पिंडाकारो घटे पृथुबुध्नोदराकारो मृत्पिंडेवाऽस्ति । न च मृत्पिंडेनोदकाहरणं घटेन वा कुड्यनिर्माणं क्रियते । न च तंतुष्विव पटे बहुत्वं पट इव तंतुष्वेकत्वं वाऽस्ति । न च घटस्येव मृत्पिंडस्य दण्डचक्रादि कारणम् , मृत्पिंडस्येव घटस्य जलसंयोजनपूर्वकमर्दनं वा कारणं भवति । न चोत्तरकाले

मृत्पिंडः पूर्वकाले घटोवाऽस्ति । न च पूर्वकाले घटादिदर्शनमुत्तरकाले मृत्पिंडदर्शनं वाऽस्ति । तस्माद्बुद्धिशब्दादिभेदात् कार्यकारणयोर्भेद एष्टव्यः । एकस्मिन्नेव शरीरे बाल्ययौवनाद्यवस्थाभेदेनेव एकस्मिन्नेव मृद्द्रव्ये पिंडघटावस्थाभेदेन बुद्धिशब्दान्तरादय उपपद्यन्त इति चेत् न । अवस्थानामनित्यतायामसत्कार्यवादापत्तेः, अनित्यानामवस्थानां प्रागसता कारणेनानन्यत्वासम्भवात् कार्यकारणानन्यत्वसिद्धांतभङ्गापत्तेश्च । तासामपि नित्यतायां बुद्धिशब्दान्तरादिव्यवस्थित्यसम्भवात् दण्डचक्रादिकारणकलापवैयर्थ्यप्रसङ्गाच्च । ननु मृदः पिण्डतादशायामनभिव्यक्ता घटावस्था, अभिव्यक्तैव सा बुद्धिशब्दान्तरादिभाजनं, अभिव्यक्त्यर्थश्च दण्डचक्रादिकारणकलापः । न च तथा सति मृत्पिण्डगतघटावस्थाभिव्यक्त्यर्थेन दण्डचक्रादिव्यापारेण तद्गतकरककपालमणिकमल्लकाद्यवस्थानामप्यपवरकगतघटाभिव्यक्त्यर्थमारोपितेन प्रदीपेन तद्गतकरकादीनामिवाभिव्यक्तिप्रसङ्गः । नैल्योत्पलत्वयोः प्रदीपप्रभयोत्पलत्वस्यैवाभिव्यक्तिः । कूपजलस्य कूपान्तरवस्थितिसमये जलत्वशौक्ल्ययोर्जलत्वस्यैवाभिव्यक्तिरित्यादिव्यवस्थादर्शनेन तद्वदिहापि यथादर्शनमभिव्यङ्ग्याभिव्यञ्जकभाववैचित्र्योपपत्तेरिति चेत्—नैवम् । अभिव्यक्तावपि नित्यत्वानित्यत्वविकल्पे पूर्वोक्तदोषानातिप्रसक्तेः । किंच केयमभिव्यक्तिः, ज्ञानं चेत् ,तदा दण्डचक्रादिमेळनस्य घटज्ञानकारणत्वापत्त्या तस्मिन्नसति क्वचिदपि घटज्ञानोदयो न स्यात् । आवरणाभिभवश्चेत् तेन किमावरणमभिभूयते? पूर्वं मृदिस्थिता पिंडावस्थेति चेत्—न । तथा सति घटध्वंसकमुद्गरपातानंतरमपि घटावस्थायाः प्रतीतिप्रसङ्गः । तदावरणभूतायाः पिण्डावस्थायास्तिरोहितत्वात् । ननु तदानीं मुद्गरपाताभिव्यक्ता कपालावस्था तदावरणं, स्वकारणाभिव्यक्तायाः कस्याश्चित् कार्यावस्थायाः तद्गतसकलकार्यावस्थांतरावरणत्वाभ्युपगमात् । न च तथा सति कपालेषु कदाचित घटकारणमेळने घटावस्थाभिव्यक्तिप्रसङ्गः । इष्टापत्तेः । कपालानि चूर्णीकृत्य जलमृदन्तरसंयोजनमर्दनव्यापारैर्मार्दवं प्रापय्य दण्डचक्रादिमेळने घटाभिव्यक्तिदर्शनात् । न च दग्धपटकारणानां पुनः पट-

भावो न दृश्यत इति शङ्कनीयम्। तद्भस्मनां क्षितितलपतितानां तत्क्षितिप्ररूढकार्पासतरुफलपरिणतौ क्रमेण तेषां पटभावाभिव्यक्तिदर्शनादितिचेत्–मैवं। एवं घटाद्यवस्थानां पिण्डाद्यवस्थास्वपि सद्भावस्य तदानीं तदप्रतीत्यर्थं प्रतीयमानपिंडाद्यवस्थानां तदावरणत्वस्य च कल्पने कल्पकाभावात् यथानुभवमवस्थानामागन्तुकत्वेन व्यवस्थित्युपपत्तेः। अन्यथा कदाचित् कस्याश्चिदेवावस्थाया अनुभवः, नावस्थान्तराणामित्यनुभवाननुभवव्यवस्थाया अप्यनुपपत्तेः। न ह्यभिव्यक्तिरनुभवस्वयंवरलभ्यः, येन दंडचक्रादिसमवधानात्पूर्वं पिंडावस्थाया एवानुभवः, तदनंतरं घटावस्थायाएव। ततो मुद्गरपातानंतरंकपालावस्थाया एवेत्यादिव्यवस्था सिध्येत्। न च जलसंयोजनमृण्मृदुकरणादिकं दण्डचक्रादिकं मुद्गरपातनादिकञ्च पिंडघटकपालावस्थानामनुभवेषु वा तत्तदितरावस्थानामननुभवेषु वा करणानीत्युक्त्या तथा व्यवस्थानिर्वाहः। उदाहृततत्तत्कारणसमवधानेष्वतीतेष्वपि पिंडाद्यवस्थानामनुभवस्य तत्तत्प्रतिद्वंद्विव्यवस्थानामननुभवस्यचानुवृत्तिसत्त्वात्। तस्माद्यथानुभवं पूर्वं पिंडावस्थैव, मध्ये घटावस्थैव, ततःकपालावस्थैवेति व्यवस्थैवाङ्गीकर्तुं युक्ता। तथा सत्यवस्थानामागन्तुकत्वेनासत्कार्यवादः प्रसज्यत इति तत्परिहारार्थमिदंकल्प्यत इति चेत्, किमभिव्यक्तीनामागन्तुकत्वे स न प्रसज्यते, अभिव्यक्तीनामपि नित्यत्वे तु कथमपि त्वदुक्तव्यवस्थासिद्धिः। एवमवस्थानां तत्तदभिव्यक्तीनां वाऽऽगन्तुकत्वेवासत्कार्यवादस्याप्रतिक्षेप्यत्वस्थितौ द्रव्यमात्रे सत्कार्यवादाभ्युपगमस्य निष्प्रयोजनत्वात्। कुलालेन घटः कृतः, कलादेन कुंडलं कृतमिति कर्तृकार्ययोरिव मृत्पिंडेन घटः कृतः सुवर्णेन कुण्डलं कृतमिति समवायिकारणतत्समवेतकार्ययोरप्यबाधितभेदव्यवहारदर्शनात् कार्यकारणयोरवस्थाभेदवद्द्रव्यभेद उपगन्तुंयुक्तः। 'मृद्घटस्सुवर्णं कुण्डल'मित्यभेदव्यवहारेण भेदव्यवहारो बाधित इति चेत् न। मृत्त्वसुवर्णत्वयोरवयवावयविवृत्तिजातित्वेन तथा व्यवहारोपपत्त्या तेन भेदव्यवहारबाधनायोगात्। अत एव यत्रावयववृत्तिस्तन्तुत्वादिजातिर्नावयविपटादिवृत्तिः, न तत्र तन्तवः पट इत्यादिव्यवहारः। तस्मात्

सहावस्थाभिः कार्यकारणद्रव्ययोर्भेद एव युक्त इति लोके कार्यकारणभेद-नियमदर्शनात् जगद्ब्रह्मणोरनन्यत्वे ब्रह्मणोजगत्कारणत्वासम्भवात् जग-त्कारणे ब्रह्मणि समन्वय इत्येतन्नघटत इति एवंप्राप्ते सिद्धांतः—

तदनन्यत्वं परमकारणाद्ब्रह्मणोऽनन्यत्वमेव। जगतः तदुपपादयद्भच आरम्भणशब्दादिभ्यः । तथा च छान्दोग्ये- 'श्वेतकेतुर्हारुणेय आस तं ह पितोवाचे' ति प्रस्तुत्य 'श्वेतकेतो वस ब्रह्मचर्यं न वै सोम्यास्मत्कुली-नोऽननूच्य ब्रह्मबन्धुरिव भवती' ति पित्रा नियुक्तस्य तस्य गुरुकुलवासं प्रतिनिवृत्तिश्च 'सहद्वादशवर्ष उपेत्य चतुर्विंशतिवर्षः पुनरेयाये' त्युक्त्वा तस्य वेदाभ्यासमूलमवलेपं पश्यतातमवलेपमपनीयतस्यब्रह्मजिज्ञासामुत्पिपाद-यिषता पित्रा स इत्थं पृष्ट इत्युक्तम्।'स्तब्धोस्युत तमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञात 'मिति।येन श्रुतेन मतेन विज्ञातेन चेत्यर्थः। 'आत्मनि खल्वरे दृष्टे श्रुते मतेविज्ञाते इदं सर्वं विदितं भवती' ति श्रुत्य न्तरात् । एवं कृत्स्नस्य जगतो ब्रह्मैककारणकत्वं कारणात् कार्यस्यानन्यत्वं च हृदि निधाय ब्रह्मविज्ञानेन सर्वविज्ञाने प्रतिज्ञाते सति तदभिप्रायमजा-नता पुत्रेण कथमन्यविज्ञानेनान्यद्विज्ञातं भवतीति मन्यमानेन 'कथन्नु भगवस्स आदेश' इति पृष्टे पिता स्वप्रतिज्ञातमर्थमुपपादयितुं कारणात् कार्यस्यानन्यत्वे लौकिकदृष्टान्तमुवाचेति वर्णितम् - 'यथा सोम्यैकेन मृत्पिं-डेन सर्वं मृण्मयं विज्ञातं स्या' दिति। यथा एकमृत्पिंडारब्धघटशरावाद-यस्तदनतिरिक्तद्रव्यत्वात् तज्ज्ञानेन ज्ञाता भवन्तीत्यर्थः । अत्र वैशेषिक-प्रक्रियया कारणात्कार्यस्य बुद्धिशब्दान्तरादिभिर्द्रव्यान्तरत्वमाशंक्य लोक-प्रतीत्यैव कार्यकारणानन्यत्वमुपपादयितुं वाक्यशेषः 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्य'मिति। अस्यार्थः— आरभ्यते आलभ्यते स्पृश्यत इत्यारम्भणम् । 'यत्पर्यपश्यत्सरिरस्य मध्य' इतिवत् रलयोरभेदाद्रेफः। आलम्भ इह स्पर्शः । 'आलम्भस्स्पर्शहिंसयो'रिति हि कोशकाराः। 'कृत्य-ल्युटो बहुळ' मिति कर्मणि ल्युट् । वाचा— 'घटेनोदकमाहर' त्यादिवा-क्यपूर्वकोदकाहरणादिव्यवहारेण हेतुनेत्यर्थः । वाक्पदेनाजहल्लक्षणया व्यव-

द्वारस्यापि संग्रहः। वाचेति हेतौ तृतीया, अध्ययनेन हेतुना वसतीति-वत् प्रयोजनस्य हेतुत्वविवक्षया प्रयोजनार्था। वाक्पूर्वकव्यवहारसिद्ध्यर्थं मृद्द्रव्येणैव पृथुबुध्नोदरत्वादिविकारस्संस्थानविशेषः तत्प्रयुक्तश्च घट इति नामधेयं स्पृश्यते। 'नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्या' मिति विकारनामधेयोभयवर्तिन आरम्भणशब्दस्य नपुंसकशेषत्वैकवचनञ्च। उदकाहरणादिव्यवहारविशेषसिध्यर्थं मृद्द्रव्यमेवावस्थांतरनामधेयांतरभाग्भवति। अतो घटाद्यपि मृत्तिकेत्येव सत्यं प्रामाणिकं न तु द्रव्यांतरत्वेनेति। 'आरम्भणशब्दादिभ्य' इत्यादिशब्देन 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयं, तदैक्षतबहुस्यांप्रजायेयेती' त्यादयः कार्यकारणयोर्जगद्ब्रह्मणोरनन्यत्वप्रतिपादकाश्शब्दागृह्यंते। एवञ्च यद्यपि बालस्थविररीत्या बुद्धिशब्दान्तरादयोऽवस्थाभेदेनेव घटरुचकादिरीत्या द्रव्यभेदेनाप्युपपद्यन्ते। द्रव्यभेद एव चात्यन्तसामञ्जस्यम्। तथाऽपि कार्यकारणानन्यत्वे मृद्घटादिकं दृष्टांतयंत्या श्रुत्याऽवस्थाभेद एव दर्शित इति अवस्थाभेदकृता एव बुद्धिशब्दान्तरादय इत्युररीकरणीयम्। न चावस्थानामागन्तुकतायामसत्कार्यवादापत्तिर्दोषः। सत एव द्रव्यस्योत्पत्तिर्हि सत्कार्यवादः, न त्ववस्थानामप्यनागन्तुकत्वं। न च प्रागपि सतो द्रव्यस्योत्पत्त्यनुपपत्तिः। न ह्यभूत्वा भवनमुत्पत्तिरित्यभ्युपेयते। किं त्ववस्थान्तरोत्पत्तिरुत्पत्तिः, पूर्वावस्थाप्रहाणं नाश इति। एवं च एकमृत्पिंडारब्धेषु घटशरावादिष्वेकत्वावस्थाप्रहाणेनानेकत्वावस्थापत्तिः। सांद्रतंत्वारब्धे पटे अनेकत्वावस्थाप्रहाणेनैकत्वावस्थापत्तिः। अतो विरळतंत्वारब्धे पटे पटगतैकत्वावस्थापत्तावपि न तंतुसतस्तन्तुत्वस्येवाऽनेकत्वस्यापि न प्रहाणम्। किन्तु तन्तुत्वावच्छेदेनानेकत्वानुवृत्तिः, पटत्वावच्छेदेनैकत्वापत्तिरित्यादयोपि विशेषा यथादर्शनमनुसन्धेयाः। ननु 'मृत्तिकेत्येवसत्य' मिति श्रुत्या घटशरावादिकं मृत्तिकेत्येव प्रामाणिकम्, न नु द्रव्यांतरत्वेनेत्येवमर्थया कार्यकारणद्रव्यानन्यत्वे प्रमाणांतरमप्यादर्शितमिति व्याख्यातम्, तत् किं प्रमाणांतरमिति चेत्— प्रत्यभिज्ञाप्रत्यक्षमिति ब्रूमः। मृत्पिडावस्थासद्भावेपि हि घ-

टशरावादिद्रव्यसद्भावः प्रत्यभिज्ञाप्रत्यक्षेणोपलभ्यते । इदं घटशरावादिकं सर्वं पूर्वाह्णे मृत्पिंड एवासीदिति पूर्वाह्णस्थित एक एव मृत्कूटः एतावद्घटशरावादिरूप आसीदिति च प्रत्यभिज्ञा दृश्यते । नन्विदं घटशरावादिकं सर्वं पूर्वाह्णे नासीदित्यपि लोके व्यवहारो दृश्यते । श्रुतावपि 'असदेवेदमग्र आसी' दिति प्राग्जगदसत्त्वं व्यपदिश्यते । कथं प्रत्यक्षश्रुतिभ्यां लोकवेदयोः कार्यकारणानन्यत्वव्यवस्थासिद्धिरिति चेत् उच्यते— पृथुबुध्नोदरादिस्थूलत्वविरोधिसूक्ष्मत्वं यद्धर्मान्तरं ततोऽयमसद्व्यपदेशः । न तु प्राक् सर्वथैवाभावात् । कुतःश्रुतौ वाक्यशेषात् 'इदं वा अग्रेनैव किंच नासी' दित्यत्र हि 'तदसदेव सन्मनोऽकुरुत स्या' मितीत्यसतो मनस्काराख्यमानससङ्कल्पप्रतिपादको वाक्यशेषश्श्रूयते । लोकेऽपि तत एवासद्व्यपदेश इति युक्तितोऽवगम्यते । न हि सर्वत्र तत्तद्विरोधिधर्मव्यतिरेकेणाभावोनाम कश्चिदस्ति । कल्पनीयाभाववत् तद्विरोधिनः क्लृप्तभावरूपधर्मांतरस्यैवाभावव्यवहारालंबनतोपपत्तावतिरिक्ताभावकल्पने गौरवात् । लोकवेदयोरसद्व्यपदेशप्रतिद्वंद्विनश्शब्दान्तराच्च 'सदेव सोम्येदमग्र आसीत्' 'इदं घटशरावादिकं पूर्वाह्णे मृदेवासी' दित्येवंरूपात्तथाऽवगम्यते । असद्व्यपदेशात् सद्व्यपदेशस्य कार्यकारणानन्यत्वपर्यवसायिनो युक्तिसाहित्येन बलवत्त्वात् । युक्तिर्हि विरोधिभावधर्मव्यतिरेकेणाभावनामकं वस्त्वन्तरं न कल्पनीयमिति प्रागुपन्यस्ता । यथा तंतव एव व्यतिषंगविशेषभाजः पटइति नामरूपबुद्धिभेदादिकं भजन्ते । नहि व्यतिषक्ततन्तुव्यतिरेकेण पटनामकमवयविद्रव्यान्तरमस्ति । तस्य रूपादिराहित्ये चाक्षुषत्वाद्यभावप्रसंगात् । रूपान्तरादिमत्त्वेऽवयवरूपव्यतिरेकेण अवयविनि रूपान्तरस्य गुरुत्वद्वैगुण्यस्य चोपलब्धिप्रसंगात् । एवं व्यतिषक्ततन्तूनामेवपटभाववत् एकस्यैव वायोश्शरीरे वृत्तिविशेषेण प्राणापानादिभाववच्च ब्रह्मण एव विचित्रचराचररूपजगद्भावोपपत्तेर्न वस्तुभेदः कल्पनीय इत्यनयापि युक्त्या सद्व्यपदेशस्योबलवत्त्वमवधारणीयम् । एवञ्च 'सुवर्णेन कुंडलं कृत' मित्यादिव्यवहारोऽप्यवस्थाभेदकृतेनैव कार्यकारणभावेन उपपादनीयः । अन्यथा कुंडलाय सु-

वर्णे तोलयित्वार्पिते सुवर्णकारेण कुंडलं कृत्वा द्विगुणगुरुत्वेन तोलयित्वा प्रत्यर्पणीयत्वप्रसंगात् । तस्मान्मृत्पिंडघटशरावादीनामनन्यत्वात् तद्दृष्टांतेन ब्रह्मजगतोरप्युपादानोपादेयभूतयोरनन्यत्वमिति ॥

संग्रहकारिका ॥

कार्याणां बुद्धिशब्दाकृतिफलगणनाहेतुकालादिभेदा-
द्भिन्नत्वंकारणेभ्यस्स्थिरमिति न दशाभेदतस्स्यात्स भेदः ।
एकस्यैव ह्यनेका समुदयति दशा हेतुभिः कालभेदात्
सत्वासत्वादिरूपात्तदिदमपि जगद्ब्रह्मणोऽनन्यदेव ॥

इति आरम्भणाधिकरणम् ॥६॥

इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥२१॥
अधिकन्तु भेदनिर्देशात् ॥२२॥
अश्मादिवच्च तदनुपपत्तिः ॥२३॥

ब्रह्मणस्त्वानन्यजगत्स्रष्टृत्वे तस्य हिताकरणादयो दोषास्स्युरित्याक्षेपिकी संगतिः पूर्वपक्षश्च- न च प्रसाधितेन मृत्पिंडघटशरावादिदृष्टांतेन ब्रह्मणस्सूक्ष्मचिदाचित्प्रपञ्चविशिष्टरूपेण कारणत्वं, स्थूलचिदचित्प्रपञ्चरूपेण कार्यत्वमिति ब्रह्मण एव कार्यकारणभावेनानन्यत्वमुच्यते, न तु ब्रह्मजगतोरिति वाच्यम् । ब्रह्मणस्सर्वकारणस्य स्वविशेषणे चिदचिदात्मके जगद्रूपकार्येऽपि कारणत्वस्यावश्यवक्तव्यत्वात् । ततश्च ब्रह्मणस्तेनाप्यनन्यत्वं वाच्यमिति सर्वज्ञं सर्वशक्तिकं ब्रह्म स्वाभिन्नत्वेन जीवं पश्यदपि तस्य हितरूपं जगन्नसृजति, अहितरूपमेव जगत्सृजतीति स्वस्यैव हिताकरणादिदोषः प्रसज्यते । अतस्स्वस्मादनन्यदेव जगद्ब्रह्म सृजतीत्येतन्नयुक्तमिति । राद्धान्तस्तु—

जीवादधिकं ब्रह्म ततो भिन्नमेव । 'सत्यकामस्सत्यसङ्कल्पः, ज्ञाज्ञौ द्वावजावीशनीशौ, सकारणं करणाधिपाधिपः, अस्मान्मायी सृजते विश्वमेत-

तस्मिंश्चान्यो मायया सन्निरुद्धः' इत्यादि भेदनिर्देशात् । अनन्यत्वश्रुतयस्तु अपृथग्भावविषयाः । पृथग्भूतप्रकारो हि ब्रह्मणश्चिदचिदात्मकप्रपञ्चः । 'सदेवे' त्यादिश्रुतौ अग्रे 'इदं सर्वमसदेवासी' दिति सामानाधिकरण्यनिर्देशेन जगतस्सूक्ष्मतादशायां सच्छब्दानिर्दिष्टब्रह्मविशेषणत्वस्य 'तदैक्षत बहु स्यां प्रजायेये'ति ब्रह्मणो बहुभवनसङ्कल्पाद्युक्त्या । स्थूलतादशायां तद्विशेषणत्वस्य च प्रतिपादनेन जगतः कदापि ब्रह्मपृथग्भावो नास्तीत्यवगमात् मृद्घटशरावादिरप्यपृथग्भावरूप एवानन्यत्वे दृष्टान्तः । स्वाभिन्नात् स्वस्य कदापि पृथग्भावासंभवात् । न चानन्यत्वश्रुतयः 'सर्वं खल्विदं ब्रह्म तत्त्वमसी' त्याद्यावा मुख्याभेदविषयाः, भेदश्रुतयस्तु तत्तद्विशेषणभेदादौपचारिकभेदविषया इत्यस्त्विति वाच्यम् । तथासति प्रसक्तहिताकरणादिदोषस्यैव परिहारालाभादश्मकाष्ठलोष्टादिवदत्यन्तहेयगुणानां जीवानां निर्दोषकल्याणगुणैकतानब्रह्माभेदासंभवाच्च । तस्मात् 'अवस्थितेरितिकाशकृत्स्न' इत्यादि सूत्रोक्तप्रकारेणानन्यत्वश्रुतय एवापृथग्भूतप्रकारप्रकारिभावविषया इत्येव युक्तमिति ॥

संग्रहकारिका ॥

एवं जीवा अपि नियमतस्तत्त्वमस्यादिवाक्या-
द्ब्रह्माभिन्ना इति तदहितां नैव कुर्वीत सृष्टिम् ।
मैवं वाक्यं न तदभिदया भेदनिर्देशदृष्टे-
स्तत्स्थत्वेनत्विति हि कथितःकाशकृत्स्नीयपक्षः ॥

इति इतरव्यपदेशाधिकरणम् ॥७॥

उपसंहारदर्शनान्नेतिचेन्नक्षीरवद्धि ॥२४ ॥
देवादिवदपि लोके ॥ २५ ॥

सत्यसङ्कल्पत्वादिभेदनिर्देशादनन्यत्वश्रुतयस्संस्त्वपृथग्भावमात्रविषयाः । नैवं सत्यसङ्कल्पत्वेऽपि सर्वशक्तिमत्त्वेऽपि सहकारिसहितस्य ब्रह्मणो

जगदुपादानत्वतत्स्रष्टृत्वश्रुतयस्समर्थयितुंशक्यन्ते । शक्तस्यापि सहकारिरहितस्याकार्यकरत्वादित्युत्थानादवांतरसङ्गतिः । पूर्वपक्षश्च— 'सदेव सोम्येदमग्र आसी' दित्यवधारणेन प्राक्सृष्टेस्सर्वसहकारिशून्यं खलु ब्रह्म श्रूयते । तत्कथं जगत्कारणभावमश्नुवीत । न च सर्वशक्तिकत्वेन कश्चिद्विशेषः । घटाद्युत्पादनशक्तएव हि कुलालादिस्सहकारिणः अपेक्ष्यैवं घटादिकमुत्पादयति । एवं ब्रह्मापि सर्वकार्योत्पादनशक्तश्चेत्, तत्तत्कार्योचितानि सहकारीण्यपेक्ष्यैव तानि तानि कार्याणि जनयेत् । न हि कुलालो घटोत्पादनशक्तइति सहकार्यनपेक्षः तमुत्पादयति । अशक्तस्सहकारिषु सत्स्वपि न तमुत्पादयतीत्येव शक्तस्याशक्ताद्विशेषः । तस्मात् सहकारिरहितं ब्रह्म न कारणं भवितुमर्हतीति पूर्वपक्षः । राद्धान्तस्तु —

ब्रह्मणस्सहकारिराहित्येऽपि क्षीरस्य दधिभावापत्तिवत् देवर्षिप्रभृतीनां स्वस्वभोगसाधनस्रष्टृत्ववत् जगदुपादानत्वं तत्स्रष्टृत्वञ्च उपपद्यते । न च क्षीरस्य दधिभावापत्तौ पाकातंचने सहकारिणी स्तः । न च ब्रह्मणो जगदुपादानत्वे किञ्चित्सहकार्यस्ति । देवादीनाञ्च योगप्रभावासादितैश्वर्यतया भूतवशिनां स्वसङ्कल्पाकृष्टैर्भूतैस्स्रष्टृत्वमुपपद्यते । न तथेश्वरस्य नित्यसिद्धस्य भूतवशितापादको योगप्रभावोऽस्तीतिचेत्— मैवं । विनापि पाकातंचनाभ्यां चिरेण दधिभावो भवत्येव । अचिरेण दधिभावापत्त्यर्थं रसविशेषार्थञ्च तयोरपेक्षा । योगाभ्यासादैश्वर्यावाप्तिश्च श्वेताश्वतरोपनिषदादिमन्त्रार्थवादेभ्योऽवगन्तव्या । ब्रह्मणोपि सङ्कल्पमात्रेण स्रष्टृत्वे मन्त्रार्थवादास्संतीति न कश्चिद्विशेषः । किंच सर्वस्यापि सङ्कल्पमात्रेण स्वशरीरव्यापारयितृत्वं दृष्टम् । कृत्स्नञ्जगत् ब्रह्मणश्शरीरमिति तस्य जगद्व्यापारे न काचिदनुपपत्तिः॥

संग्रहकारिका ॥

अग्रे सदेकं सहकारिशून्यं कथं ह्युपादानतया जगत्स्यात् ।
सङ्कल्पमात्रेण कथं च कुर्यात् क्षीरादिदेवादिवदित्यवेहि ॥

इति उपसंहारदर्शनाधिकरणम् ॥८॥

कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥२६॥

श्रुतेस्तु शब्दमूलत्वात् ॥२७॥

आत्मनि चैवं विचित्राश्च हि ॥२८॥

स्वपक्षदोषाच्च ॥२९॥

सर्वोपेता च तद्दर्शनात् ॥३०॥

विकरणत्वान्नेति चेत्तदुक्तम् ॥३१॥

यदि क्षीरदृष्टांतेन ब्रह्मणोजगद्भावापत्तिः, तर्हि कार्त्स्न्येन क्षीरस्य दधिभाववत् ब्रह्मणोऽपि कार्त्स्न्येन जगद्भाव आपद्येतेति आक्षेपिकी सङ्गतिः। पूर्वपक्षस्तु— क्षीरं दध्याकारेणेव ब्रह्म कार्त्स्न्येन जगदाकारेण परिणमते, उत अग्निसंयुक्तैकभागोजतुपिंडोमुद्रिकाद्युपयुक्तैकदेशेनेव तत्तत्कार्योपयुक्तैकदेशेन परिणमते। नाद्यः। कृत्स्नस्य जगद्भावापत्त्या ब्रह्मावशेषाभावप्रसङ्गात्। न च सूक्ष्मचिदचित्प्रपञ्चविशिष्टं ब्रह्म कारणं, स्थूलचिदचित्प्रपञ्चविशिष्टं ब्रह्म कार्यमिति पक्षे नब्रह्मानवशेषदोषप्रसङ्गः, कार्यरूपतया ब्रह्मावस्थानादिति वाच्यम्। इदानीं कारणरूपेणापि ब्रह्मणस्सत्त्वस्य वक्तव्यत्वात्। अन्यथा कारणस्य ब्रह्मणस्सार्वदिकसत्ताबोधकानां तत्साक्षात्कारोपायविद्याविधायकानांच वाक्यानामानर्थक्यप्रसङ्गात्। सर्वोपादानस्य ब्रह्मणश्चिदचिद्रूपविशेषणांशेऽपि कारणत्वस्य वक्तव्यतया तत्र कृत्स्नस्य ब्रह्मण एककार्यात्मना परिणामे कार्यान्तरात्मना परिणामः कारणब्रह्मावशेषश्च न स्यादिति दूषणस्य वज्रलेपायमानत्वाच्च। तस्मादाद्यः पक्षो न युक्तः। नापि द्वितीयः। निरवयवस्यैकदेशेन परिणामायोगात् सावयवत्वमिष्यतामिति चेन्न। 'निष्कळं निष्क्रियं शांत' मित्यादिनिरवयवत्वश्रुतिव्याकोपप्रसङ्गात्। तस्माद्ब्रह्म जगदुपादानमित्येतन्नयुक्तमिति ॥ सिद्धांतस्तु—

नैवं शङ्कावकाशोऽस्ति। निरवयवमेव ब्रह्म जगदाकारेण परिणमते। न च ... परिपूर्णमवतिष्ठत इति श्रुत्यैव मुखतः प्रतिपादनात्। न

च श्रुतिप्रतिपन्नोऽर्थः कुतर्केणोपनयमर्हति । 'नैषा तर्केण मतिरापनेये' ति श्रुतेः । ननु श्रुतिरपि ग्रावप्लवनादिवत् प्रमाणांतरविरुद्धं प्रतिपादयितुं नशक्नोतीति चेत्, न। ब्रह्मणश्शब्दैकबोध्यत्वेन तद्वैलक्षण्यात्। प्रत्यक्षादियोग्येष्वर्थे तद्विरुद्धं श्रुतिरपि न बोधयति । श्रुत्येकगम्यस्त्वर्थो यथाश्रुत्येव सिध्यति । न तु तद्विषयत्वायोग्येन प्रमाणांतरेण बाधितुं शक्यम् । न हि रूपसाधनाक्षमस्य श्रोत्रस्य तद्बाधकत्वमस्ति । किंच जीवात्मन्याचिद्धर्मविलक्षणाः कर्तृत्वभोक्तृत्वादयोऽभ्युपेयन्ते। एवं परमात्मनि चिदचिद्धर्मविलक्षणा धर्माः कुतो न स्युः। लोकेऽग्निजलादयोऽपि औष्ण्यशैत्यादिभिर्विचित्रा दृश्यन्ते । न खलु ते परस्परदृष्टांतेन परस्परविलक्षणधर्मशून्यास्स्वीक्रियंते। न च 'जातिर्व्यक्तौ नांशेन वर्तते निरवयवत्वात् । नापि परिसमाप्य वर्तते। व्यक्त्यन्तरे तदभावप्रसङ्गा'दिति कृत्स्नैकदेशवृत्तिविकल्पेन जातेर्व्यक्तौ वृत्तिर्निराक्रियते । स्वपक्षे च सांख्यस्य तुल्यमिदं दोषापादनम्, निरवयवं प्रधानं कथमिव महदादिविचित्रकार्यारंभकमिति । सत्त्वरजस्तमांसि तस्यावयवास्सन्तीति चेन्न । प्रधानातिरिक्तानां तेषां तदवयवानामभ्युपगमे तत्त्वानां चतुर्विंशतिसंख्याविरोधात्, तेषामपि कृत्स्नैकदेशविकल्पेन महदहङ्काराद्यारंभकत्वायोगाच्च । परमाण्वादिकारणवादिनामपि कृत्स्नैकदेशसंयोगादिविकल्पैर्द्व्यणुकाद्यारंभायोगाच्च । तस्मात् कल्प्यमपि प्रधानं कृत्स्नैकदेशवृत्तिविकल्पागोचरं मन्यमानस्य श्रुतिसिद्धे ब्रह्मणि का तद्गोचरत्वप्रत्याशा । किंच श्रुतिवशादिव सर्वशक्त्युपेतत्वादपि ब्रह्मणो निरवयवस्यापि विचित्रजगदाकारेण परिणामो घटते । सर्वशक्त्युपेतं हि ब्रह्म । 'परऽस्य शक्तिर्विविधैव श्रूयत' इत्यादिदर्शनात् । अल्पशक्तिमतामपि प्रपञ्चान्तर्गतचिदचितामतर्कणीया विविधा वैचित्री दृश्यते । सर्वशक्तिमतस्सा कथं न भवेत् । ननु शक्तिमतामपि करणकळेबरापेक्ष एव शक्त्युन्मेषो दृष्टः । अतस्तदनपेक्षं सदपि सर्वशक्तिमत्त्वमध्ययनानपेक्षं धीशक्तिमत्त्वामिवाप्रयोजकमिति चेत – अत्रोत्तरमुक्तमेव । शब्दैकप्रमाणकं वस्तु यथाशब्दमेव ग्राह्यम् । न तु लोकदृष्टकारणविरहेण प्रत्याख्यातुं शक्यम् । तथैव च

श्रुतिः—'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुस्सशृणोत्यकर्णः। न तस्य कार्यं करणंच विद्यते न तत्समश्चाभ्यधिकश्च दृश्यते । परास्यशक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचे'ति। अतश्श्रुत्या श्रुतिदर्शितयुक्त्युपोद्बलितया निरवयवमपि ब्रह्म जगदाकारेण परिणमते, तथैव परिपूर्णमवतिष्ठते चेति युक्तमेव॥

संग्रहकारिके॥

कृत्स्नं यदि परिणमते ब्रह्म तदा नावशिष्येत ।
नांशेन निरंशत्वाद्विशिष्टपक्षेऽपि तुल्यमिदम्॥
एतादृशाः प्रधाने परमाण्वादौ च दोषास्स्युः।
न ब्रह्मणि श्रुतिशतप्रतिपन्ने विविधशक्तियुते॥

इति कृत्स्नप्रसक्त्याधिकरणम्॥९॥

न प्रयोजनवत्त्वात्॥३२॥

लोकवत्तु लीलाकैवल्यम्॥३३॥

वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथाहि दर्शयति॥३४॥

नकर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यतेच॥३५॥

सर्वधर्मोपपत्तेश्च॥३६॥

युक्त्युपोद्बलितश्रुत्या कृत्स्नप्रसक्त्यादिदोषनिराकरणेन ब्रह्मण उपादानत्वसमर्थनेऽपि स्रष्टृत्वसमर्थनं न संभवति। प्रेक्षावत्प्रवृत्तेः प्रयोजनवत्त्वनियमादित्युत्थानात्संगतिः। पूर्वपक्षस्तु— ब्रह्मणो जगत्सृष्टिस्स्वार्था परार्था वा। नाद्यः। अवाप्तसमस्तकामस्यापेक्षितप्रयोजनाभावाच्च। न च प्रेक्षावतामपि निष्प्रयोजना कंतुकक्रीडादिप्रतीतिर्दृष्टेति शंक्यम्। ततोऽपि क्रीडापराणां तात्कालिकानन्दसत्त्वात्। न च ब्रह्मणो जगत्सृष्टावपि तादृशं

प्रयोजनं कल्प्यम् । अवाप्तसमस्तकामत्वश्रुतिविरोधात् । नन्ववाप्तसमस्त-कामानामपि राज्ञां कंतुकक्रीडादिप्रवृत्तिर्दृश्यत इति चेत्—न । अवाप्तभोगा-न्तरप्रयुक्तसकलकामानामप्यनवाप्तकंतुकक्रीडानन्दार्थमेव तत्र प्रवृत्तेः । न चैवं ब्रह्मणि वक्तुं शक्यम् । किंच स्वप्रयोजनार्थं जीवान् संसारदुःखे निम-ज्जयतश्च ब्रह्मणो वैषम्यनैर्घृण्ये स्यातां । तल्लीलाचासमञ्जाख्यसगरतनय-लीलाकल्पा स्यात् । एतेन परार्थासृष्टिरिति द्वितीयपक्षोऽपि निरस्तः । सृ-ष्टेः पारार्थ्ये हि सर्वान् सुखिन एव सृजेत् । पक्षपातरूपेण वैषम्येण कां-श्चित्सुखिनः कांश्चिद्दुःखिनश्च न सृजेत् । दुःखिनस्सृजतश्च नैर्घृण्यं प्रस-ज्यते । न च कर्मक्षपणेन रक्षितुमेव पापिनो दुःखं प्रापयति ब्रह्म, यथा व्रणिनो रक्षितुमेव व्रणदाहच्छेददुःखं वैद्यः प्रापयतीति वाच्यम् । व्रणदा-हादिकमकृत्वा व्रणशांतिं कर्तुमशक्तस्य वैद्यस्य दाहादिदुःखप्रापकत्वेऽपि सर्वशक्तिकस्य ब्रह्मणोदुःखमप्रापय्यापि रक्षितुं शक्तस्य तत्प्रापकत्वायोगात् । न च तत्तत्कर्माण्यपेक्ष्य विषमसृष्टिकर्तुः पक्षपातित्वनैर्घृण्यदोषौ न प्रसज्ये-तेइति वाच्यम् । 'सदेव सोम्येदमग्र आसी' दिति ब्रह्ममात्रावशेषत्वेन श्रु-तायामाद्यसृष्टौ कर्माभावेन तदानींतनविषमसृष्ट्या वैषम्यनैर्घृण्यप्रसङ्गानि-वारणात् । तस्माद्ब्रह्मणो जगत्स्रष्टृत्वं न युक्तमिति ॥ सिद्धान्तस्तु—

सत्यं । प्रयोजनार्थैव प्रेक्षावत्प्रवृत्तिः । इहाप्यस्त्येव सृष्ट्या ब्रह्मणो लीलारूपं प्रयोजनं राज्ञ इव बालस्येव चाक्षद्यूतादिना, 'क्रीडा हरेरिदं सर्वं क्षरमित्युपधार्यतां । क्रीडतो बालकस्येव चेष्टास्तस्य निशामये' त्यादिभग-वत्पराशरवचनात् । न चैवं सति ब्रह्मणोऽवाप्तसमस्तकामत्वविरोधः । यद्य-देप्सति तत्तदाऽवाप्तुं सामर्थ्यं ह्यवाप्तसमस्तकामत्वं सार्वभौमादिसाधारणं, न तु सर्वदा सर्वकामावाप्तिमत्वम् । शीतोष्णादिकालभेदेन सुरनरतिर्यगा-दिजन्मभेदेन चार्थनीयानां कामानां युगपदवाप्तेः कस्यापीष्टत्वाभावात् । न च विषमसृष्ट्या वैषम्यनैर्घृण्यदोषापत्तिः, 'पुण्यो वै पुण्येन कर्मणा भवति पापः पापेने' ति श्रुतेः । कर्मविशेषमूलं जगद्वैषम्यमीश्वरस्तदन्वयौ निमित्त-

मात्रं साधारणकारणम्। यथा सस्योत्पत्तौ पर्जन्यस्साधारणकारणम्। तद्भूयोऽल्पत्वव्रीहियवत्वादिवैषम्यं क्षेत्रबीजादिविशेषकृतमित्यभ्युपगमात्। यथोक्तं भगवता पराशरेण– 'निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणि। प्रधानकारणीभूता यतो वै सृज्यशक्तय' इति। सृज्यशक्तयस्सृज्यकर्माणि। एवं च ब्रह्मणः प्रजानां व्यवहारदर्शने तदीययुक्तायुक्तवचनानुसारेणानुग्रहविशेषं कुर्वतो राज्ञ इव न निरवद्यत्वहानिः। प्रत्युत विषमकर्मणामेकरूपसृष्टावेव युक्तायुक्तवादिनामेकरूपानुग्रहे व्यवहारद्रष्टुरिव तद्धानिस्स्यात्। न च सृष्टेःप्रागेकत्वावधारणात् तदा जीवानामप्यभावेन तत्कर्मणामभावश्शङ्कनीय इति वाच्यम्। जीवानां तत्कर्मप्रवाहाणाञ्चानादित्वेनैकत्वावधारणस्य पृथग्व्यपदेशार्हविभक्तनामरूपात्मकस्थूलरूपाभावाभिप्रायत्वात्। अतो जीवतत्कर्मणामनादित्वेन सत्त्वेऽप्यविभाग उपपद्यते। अनादित्वं जीवानां तत्सृष्टिप्रवाहाणाञ्च 'न जायते म्रियते वा विपश्चित्, सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पय' दित्यादिश्रुतिषूपलभ्यते। विचित्रसृष्टिप्रवाहानादित्वेनैव तत्कारणविचित्रकर्मप्रवाहानादित्वमप्यवसीयते। तस्माज्जगदुपादानत्वतत्स्रष्टृत्वोपयुक्तानां सर्वेषां धर्माणां ब्रह्मण्युपपत्तेः प्रधानपरमाण्वादिष्वेव उक्तवक्ष्यमाणन्यायैस्तदनुपपत्तेः ब्रह्म जगतो मूलकारणमित्येतद्युक्तमेवेति सिद्धम्॥

संग्रहकारिकाः॥

नावाप्तव्यं किमपि फलमस्त्याप्तकामस्य सृष्ट्या
लीलाऽप्येवं जगति वलते नासमज्ञेतराणाम्।
तत्पाराध्ये कथमपि सृजेन्नैव कस्यापि दुःखं
कर्मापेक्षा परिहृतिरपि व्यापिका नाद्यसृष्टेः॥
राज्ञइव द्यूतकृतिः लीलेयं ब्रह्मणो जगत्सृष्टेः।
कर्मापेक्षानियमान्नविषमता नापि नैर्घृण्यम्॥
तच्चास्ति प्रळयेष्वपि संसारभुजामनादित्वात्।
श्रुतिषु सदेवेत्यवधृतिरविभागार्हास्तदाऽतइति॥

कारणतानिर्वाहो यैस्स्यात्सर्वेऽपि ते धर्माः ।
उपपद्यन्ते ब्रह्मणि तद्वैकल्यं प्रधानादौ ॥
इति प्रयोजनवत्त्वाधिकरणम् ॥ १० ॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे द्वितीयस्याध्यायस्य प्रथमः पादः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीः ॥

रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च ॥ १ ॥
पयोऽम्बुवच्चेत्तत्रापि ॥ २ ॥
व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥ ३ ॥
अन्यत्राभावाच्च न तृणादिवत् ॥ ४ ॥
पुरुषाश्मवदिति चेत्तथाऽपि ॥ ५ ॥
अंगित्वानुपपत्तेश्च ॥ ६ ॥
अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् ॥ ७ ॥
अभ्युऽपगमेऽप्यर्थाभावात् ॥ ८ ॥
विप्रतिषेधाच्चासमंजसम् ॥ ९ ॥

प्रथमाध्यायप्रतिपादिते ब्रह्मणो जगत्कारणत्वे प्रधानपरमाणुकारणवादिभिस्सांख्यवैशेषिकादिभिः केवलतर्कमवष्टभ्यापादितानि दूषणानीति प्रथमपादेन निराकृतानि । तत्रापि पणेतृगौरवेण तेषां तर्काणामुपादेयत्व-

शङ्कास्मृत्यधिकरणयोगाधिकरणाभ्यांनिराकृता । तत्तत्तर्कस्वरूपपर्यालोचनया तेषामुपादेयत्वशङ्का नविलक्षणत्वाधिकरणमारभ्य निराकृता । एवमाद्याधिकरणयोस्तृतीयादीनामष्टानामधिकरणानाञ्चावान्तरार्थभेदेऽपि ब्रह्मवादप्रतिक्षेपकतर्कनिराकरणार्थत्वेनैकार्थ्यं, अस्मिन्पादे शुष्कतर्कालम्बनास्सांख्यादिपक्षास्तथाभूतैरेव तर्कैर्दूष्यन्ते । अन्यथा प्रधानादिकारणत्वप्रतिष्ठापकानां परपक्षाणां तर्काभासमूलत्वं जानतां मन्दधियां तेषु प्रामाणिकत्वशङ्कया ब्रह्मवादश्रद्धा शिथिलीभवेत् । एवं स्वपक्षस्थापनार्थः प्रथमपादः । परपक्षप्रतिक्षेपार्थोऽयं पादः । स्वपक्षस्थापनस्याभ्यर्हितत्वात् प्रथमं कृतमिति तदानन्तर्यमस्य । यद्यपि तृतीयचतुर्थपादयोरपि कार्यगोचरश्रुतिविरोधपरिहारेण स्वपक्षस्थापनं क्रियते, तथाऽपि कारणविषयत्वेन प्रथमद्वितीयपादयोरैकार्थ्येन अवान्तरसङ्गतिः । तत्र वैदिकानुमतसत्कार्यवादाद्यभ्युपगमेन सांख्यमतस्योपादेयत्वसम्भावनास्पदत्वातिरेकात् प्रथमं तन्निराकरणं क्रियते । सांख्याः स्वतन्त्रतर्कैः स्वमतं प्रसाध्य स्वमतानुगुण्येन श्रुतिवाक्यानां नयनं कुर्वन्ति । तैः कृतनयनमीक्षत्याद्यधिकरणेषु निराकृतम् । इदानीं तदीयास्स्वतन्त्रतर्का निराक्रियन्त इति न पौनरुक्त्यम् । एषा सांख्यानां प्रक्रिया- 'मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयस्सप्त । षोडशकश्च विकारो न प्रकृतिर्न विकृतिः पुरुषः' । तत्र मूलप्रकृतिः सत्वरजस्तमोगुणरूपाणां द्रव्याणां साम्यावस्था । साचैका स्वयमचेतना सकलचेतनभोगापवर्गार्था नित्या सर्वगता च स्वयं प्रकृतिरेव न कस्यचिद्विकृतिः । महदाद्याः प्रकृतेर्महान् महतोऽहङ्कारः अहङ्कारात् पञ्च तन्मात्राणि शब्दस्पर्शरूपरसगन्धात्मकानीत्येतास्सप्त स्वस्वकार्यापेक्षया प्रकृतयः स्वस्वकारणापेक्षया विकृतयश्च। आकाशादीनि पञ्च महाभूतानि श्रोत्रादीनि पञ्च ज्ञानेन्द्रियाणि वागादीनि पञ्च कर्मेन्द्रियाणीति षोडशको गुणो विकृतिरेव न कस्यचित्तत्वान्तरस्य प्रकृतिः पुरुषस्त्वपरिणामित्वान्नकस्यचित्प्रकृतिः । नित्यत्वान्नकस्यचिद्विकृतिः । निर्धर्मकश्चैतन्यमात्रवपुः सर्वगतः प्रतिशरीरं भिन्नश्च । निर्विकारत्वादकर्ता, नापि भोक्ता । एवंभूतेऽपि तत्वे मूढाः प्रकृतिपुरुषसन्निधि-

मात्रेण पुरुषस्य चैतन्यं प्रकृतावध्यस्यन्ति। तेन चैतन्ययोगात् कर्तृशक्ति-
मत्त्वाच्च ज्ञातृत्वम्। प्रकृतेरेवान्तःकरणरूपापन्नायाः तस्याश्च कर्तृत्वं पुरुषेऽ
ध्यस्यन्ति। एवमन्योन्याध्यासादहंकर्ता अहंभोक्तेत्यभिमानात्मको भोगस्त-
त्त्वज्ञानादपवर्गइत्येवं पञ्चविंशतिस्तत्त्वानीति। तत्र सकलमूलकारणत्वाभिमत-
स्वतन्त्रप्रधानानुमाननिरसनेन तन्मतं सर्वं निरस्तं भवतीति तदिह निरस्यते।
इदमिह तेषामनुमानं–सर्वं कार्यं सुखदुःखमोहात्मकद्रव्यप्रकृतिकं, तत्समन्वि-
तत्वात्। सामान्यव्याप्तौ घटादिवदिति। यद्वा सर्वं कार्यं सत्प्रकृतिकंकार्यत्वात्।
विशेषव्याप्तौ घटवदिति। आद्यानुमाने सुखदुःखमोहात्मकानि द्रव्याणि का-
र्याणां कारणत्वेन सिध्यंति सत्त्वरजस्तमांस्येव पर्यवस्यंति, तेषान्तथात्वात्। उ-
क्तंतत्त्वसंग्रहे–'प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्था' इति। अय-
मर्थः– सत्त्वरजस्तमोगुणाः प्रीत्यप्रीतिविषादात्मकाः क्रमात्सुखदुःखमोहा-
त्मकाः क्रमादेव प्रकाशप्रवृत्तिनियमप्रयोजनाश्च। स्वच्छं सत्त्वं प्रकाशयति,
रजोगुणः प्रकाशकार्ये सत्त्वं प्रवर्तयति, लघोस्सत्त्वगुणस्य चलनस्वभावेन र-
जसा सर्वत्र प्रवर्तने प्रसक्ते यथाकार्यं गुरुस्तमोगुणो नियच्छतीति। नचा-
द्यहेतोरसिद्धिः। कार्याणां सुखदुःखमोहान्वितत्वस्य लोकसिद्धत्वात्। त-
थाहि– घटो येन प्राप्यते तं प्रति सत्त्वगुणोद्भवात् घटस्सुखात्मकोभवति।
यदीयस्सोऽन्येनापह्रियते तं प्रति रजोगुणोद्भवात् दुःखात्मकोभवति। यस्य
तस्मिन्नुपेक्षया दर्शनमेव नोदेति तं प्रति तमोगुणोद्भवात् मोहात्मकोभवति।
'मुहवैचित्त्ये' इतिधातुः। नच गुणानां पुरुषभेदव्यवस्थयोद्भवे विनिगम-
नाविरहः। तत्तत्पुरुषभोगरूपप्रयोजनवशादुद्भवसिद्धेः। तद्यथा–सत्त्वं रज-
स्तमसी कञ्चित्प्रति कदाचिदभिभूय शान्तां स्ववृत्तिं लभते, एवं रजस्सत्त्व-
तमसी अभिभूय घोरां स्ववृत्तिं, तमः सत्त्वरजसीअभिभूय मूढां स्ववृत्तिमिति।
नच द्वितीयानुमानस्य परमाण्वादिकारणकत्वेनार्थान्तरं, लाघवादेककारण-
कत्वसिद्धेः। नच तथापि ब्रह्मप्रकृतिकत्वेनार्थान्तरं जडं सुखदुःखमोहात्मकं
कार्यजातं प्रत्यतथाभूतस्य कारणत्वेन सिध्यनवकाशादिति। एवंरूपस्य
सांख्यानुमानस्य दूषणमनुमानमुच्यते। प्रधानं न जगद्रचनायां समर्थम्।

अचेतनत्वे सति चेतनानधिष्ठितत्वात् । यदेवं तदेवम् । यथा चेतनानधिष्ठितं मृद्दार्वादिकम् । न च व्याप्त्यसिद्धिः, चेतनानधिष्ठितस्य कार्यारम्भकत्वानुपपत्तेः, चेतनाधिष्ठितस्यैव कार्यारम्भप्रवृत्तेस्सर्वत्र दर्शनाच्च । ननु सिद्धान्ते पक्षासिद्धिः । न च 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इति श्रुतिसिद्धं प्रधानं सिद्धान्तेऽप्यस्तीति वाच्यम् । तस्यानुमानगम्यत्वाभावेन कर्मव्युत्पन्नसूत्रानुमानपदनिर्देश्यत्वायोगात् । साध्यस्य च बाधः, प्रधानस्य सिद्धान्तेऽपि जगद्रचनासामर्थ्याभ्युपगमात् । हेतोश्चासिद्धिः, तस्य सिद्धान्ते चेतनाधिष्ठानसत्त्वादिति चेत्-- सत्यं । परप्रक्रियया परो दूषणीय इति परसिद्धं पक्षादिकं परिगृह्य इदमनुमानमुक्तम् । यद्वा परानुमानस्य प्रतिकूलतर्करूपं दूषणानुमानमुक्तम् । यदि प्रधानं अचेतनत्वेसति चेतनानधिष्ठितं स्यात् , जगद्रचनायामसमर्थं स्यात् । अथवा हेतोर्विशेष्यांशस्य साध्ये प्रतियोगिविशेषणतयाऽन्वयः, ततश्च प्रधानं न चेतनानधिष्ठितं कार्यजनकं, अचेतनत्वात् घटगृहादिजनकमृद्दार्वादिवदित्यनुमानशरीरम् । न चानुमानिकप्रधानानभ्युपगमादाश्रयासिद्धिः । महदादिकं सप्रकृतिकं कार्यत्वाद्घटवदित्यनुमानस्य विरोधाभावेन सिद्धान्तेऽभ्युपगन्तुं शक्यत्वात्, साध्ये स्वातंत्र्याप्रवेशात्, तस्येश्वरपारतंत्र्यमात्रे श्रुत्यपेक्षणात् । ननु अचेतनस्य चेतनाधिष्ठितस्यैव प्रवृत्तिरिति न नियमः, वत्सवृद्ध्यर्थं धेनुगतस्य क्षीरस्य स्वयमेव प्रस्रवदर्शनात् । सस्यवृद्ध्यर्थं वारिदमुक्तस्य जलस्य स्वयमेव निस्सरणदर्शनात् । एवं पुरुषस्य भोगापवर्गार्थं चेतनानधिष्ठितस्यापि प्रधानस्य प्रवृत्तिसम्भवादिति चेन्न । क्षीरजलयोरप्यचेतनत्वाच्चेतनाधिष्ठानाभावे प्रवृत्त्यसम्भवतौल्येन पक्ष इव पक्षतौल्येऽपि व्यभिचाराभावात् । एतेन धेन्वाद्युपयुक्ततृणादेः क्षीरादिभावापत्तिरपि व्याख्याता । तत्रापि चेतनाधिष्ठानावश्यम्भावेन पक्षतौल्यात् । अन्यथा चेतनविशेषसङ्कल्पस्य नियामकस्याभावे अनडुहाद्युपयुक्तस्यापि तृणादेः क्षीरादिभावप्रसङ्गात् । न च धेनवजाठराग्निसंयोगे कश्चित्पाके विशेषः । अग्निसंयोगमात्रस्य पाकहेतुत्वात्, तस्य अनडुहादिजठरसंयोगेऽप्यविशेषात् । पाचकस[ङ्क]ल्पविशेषात्

पाकविशेषस्तु लोके दृष्टः । ननु अप्रयोजकमिदं चेतनाधिष्ठानानुमानं, यथा प्रवृत्तिशक्तियुक्तोऽन्धः दृक्छक्तियुक्तपंगुसन्निधानात्प्रवर्तते, यथा च अयस्कान्तमणिसन्निधानादयः प्रवर्तते, तथा चैतन्यवपुषः पुरुषस्य सन्निधानात् प्रधानस्य प्रवृत्त्युपपत्तेरिति चेत्, एवं दृष्टान्तोपादानेऽपि प्रधानस्य प्रवृत्त्यसम्भवरूपदोषस्तदवस्थः । अस्ति हि पंगोर्गमनशक्तिविकलस्य अंधेनोह्यमानस्य स्वयं मार्गदर्शनं, वोढारमन्धं प्रति तदुपदेश इति च व्यापारः, अयस्कांतमणेरप्ययस्समीपागमनं तदभिमुखीभावइत्यस्ति व्यापारः । पुरुषस्य तु निष्क्रियस्य न तादृशः कश्चिद्व्यापारः । अयःप्रवृत्तावपि चेतनाधिष्ठानावश्यम्भावान्नव्यभिचारोऽपि । तस्मान्निर्दोषं दूषणानुमानम् । सांख्यानुमानमेव च प्रतिकूलतर्कपराहतम् । पुरुषसन्निधानमात्रेण प्रधानस्य परिणामित्वे सर्गव्यतिरिक्तः प्रळयः कदाऽपि न स्यात्, नित्यस्य पुरुषसन्निधानस्य सर्वदाऽप्यविशिष्टत्वादिति । तस्मादधिष्ठातुरीश्वरस्यैव सङ्कल्पविशेषास्सर्गप्रळयनियामका इत्यभ्युपेयम् । न च धर्माधर्मावेव तन्नियामकौ स्यातामिति वाच्यम् । धर्माधर्मयोः परमपुरुषाराधनतद्विपर्ययरूपतयैव सकलश्रुतिप्रसिद्धयोस्तदनभ्युपगतावात्मलाभाभावात् । यदि च गुणानां कदाचित्साम्येनावस्थानमभ्युपेत्य तदा गुणानामुत्कर्षापकर्षनिबन्धनाङ्गाङ्गिभावाभावात् तन्निमित्ता जगत्प्रसूतिर्नास्तीति प्रळय उपपाद्यते, तदा प्रळयावस्थायां साम्येनावस्थितानां गुणानां क्षोभकपुरुषव्यापाराभावेन स्वयमेव वैषम्यावस्थां प्राप्तुमक्षमाणामङ्गाङ्गिभावानुपपत्तेः कदाचिदपि जगत्सर्गो न स्यात् । यदि सुखदुःखमोहात्मकवैषम्यावस्थं जगत् दृष्ट्वा यथाकार्यं वैषम्यावस्थापन्नमेव त्रिगुणमनुमीयते, तदा धर्मिग्राहकमानासिद्धाया वैषम्यावस्थायास्सदानुवृत्तेस्सदासर्गएव स्यात् । यच्चुच्येत त्रिगुणं न वैषम्यावस्थं नापि साम्यावस्थमनुमीयते, येन सदा सर्गः प्रळयो वा स्यात् । किं तु अनादिसृष्टिप्रळयप्रवाहमूलद्विविधसंस्कारानुवृत्तिसद्भावात्तत्संस्कारोद्बोधानुसारतः साम्यवैषम्यभागुभयस्वभावमनुमीयत इति । नैतदपि युक्तम् । अन्धस्य मार्गोपदेशकपंगुसन्निधानात् मार्गज्ञातृत्ववत् प्रधानस्य निर्व्यापार-

पुरुषसन्निधानात् चिच्छायापत्त्या ज्ञातृत्वासम्भवस्य उक्तत्वात्, तदसम्भवेचाचेतनस्य चेतनाधिष्ठानं विना प्रवृत्त्ययोगात् । किं च प्रधानाभ्युपगमे यदि प्रयोजनं किंचित्स्यात् तदा यथाकथंचिदभ्युपगच्छेम । न किमपि प्रयोजनमस्ति । पुरुषस्य भोगापवर्गौ हि प्रयोजनमितीष्यते । भोगश्च सुखदुःखानुभवरूपः प्रधानपरिणामरूपाया बुद्धेर्धर्मः । पुरुषस्य तु बुद्धिच्छायापत्त्या तदैक्यमिवापन्नस्य तद्दर्शनं भोगः । तेन तस्य विवेकाग्रहात् आध्यासिकं भोक्तृत्वं, भोक्तृत्वाध्यासस्य तद्विवेकख्यात्या निवृत्तिर्मोक्ष इति सांख्यैरिष्यते । न च निर्विकारचैतन्यमात्रवपुषः पुरुषस्य सविकारबुध्यैक्याभिमानः तदीयभोगदर्शनं तद्विवेकानुसन्धानं वा सम्भवति । ननु सांख्यैरेव बुध्यादिष्वचेतनेष्वसम्भाविताभ्यां भोक्तृत्वमोक्षोपायश्रवणादिप्रवृत्तिभ्यां बुध्याद्यतिरिक्तो भोक्ता श्रवणादिप्रवृत्तिमांश्च पुरुषस्साधितः 'पुरुषोऽस्ति भोक्तृभावात्कैवल्यार्थप्रवृत्ते' श्चेति । प्रकृतेः पुरुषभोगार्थत्वं च तत्स्वरूपदर्शने सति तदैव पुरुषस्यापवर्गश्चेत्येतदुभयमपि बहुधा प्रपञ्चितम् । 'नानाविधैरुपायैरुपकारिण्यनुपकारिणः पुंसः । गुणवत्यगुणस्य सतः तस्यार्थमपार्थकं चरति ॥ रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् । पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ प्रकृतेस्सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति । या दृष्टास्मीति पुनर्नदर्शनमुपैति पुरुषस्ये'ति ॥ तस्मादस्त्येव तन्मते पुरुषस्य प्रकृतिभोक्तृत्वं तद्याथार्थ्यदर्शनार्थश्रवणादिकर्तृत्वंच । अतः कथं तन्मते प्रयोजनासंभवइति चेत् तर्हि परस्परविरुद्धार्थकथनादेव तन्मतमसमंजसं । तत्वसंग्रह एव हि ' तस्मान्नबध्यते नापि मुच्यते नापि संसरति कश्चित् । संसरति बध्यते मुच्यते च नानाश्रया प्रकृति ' रित्यादिभिः प्रकृतेरेव बंधमोक्षाविति प्रपंचितं । किञ्च जगतः कारणं सिध्यत् लाघवादेकमेव प्रकृतिरूपं सिध्यतीति वदद्भिरेव गुणत्रयसंघातएव प्रकृतिः नतु तद्व्यतिरिक्ता प्रकृतिर्नामास्तीत्यभ्युपगतं, ततोपि तन्मतं विप्रतिषिद्धं । पंचविंशतिस्तत्त्वानीत्युक्त्वैव गुणाः परस्परभिन्नाइत्यप्युक्तं, तदपि विप्रतिषिद्धं । गुणभेदे हि सप्तविंशतिस्तत्त्वानि

स्युः । अर्थविप्रतिपिद्धंचेदं दर्शितं । न हि पटलाभादिमतां सुखदुःखमोहाभवंतीति विषयाणामपि सुखदुःखमोहान्वयकल्पनं युक्तं । रजतभुजगादिदर्शिनामिच्छाद्वेषाद्युदयेन विषयाणामपि तद्वत्त्वकल्पनापत्तेः । विषयाणां सुखदुःखाद्यन्वयेन च तत्कारणं कुतस्सुखदुःखमोहात्मकं सिध्यति । न खलु शौक्ल्यगोत्वादिकं विषयान्वितमिति तत्कारणमपि शौक्ल्यगोत्वादिरूपं भवति । विषयान्वितं द्रव्यं घटान्वितमृन्न्यायेन कारणं भवतीति चेन्न । सत्वरजस्तमसां द्रव्यत्वासिद्धेः । पृथिव्यादिद्रव्यगतलघुत्वप्रकाशादिहेतवस्तद्गुणा एव हि सत्वादयः । अतएव गुणा इत्येव तेषां प्रसिद्धिः । तस्मात्परस्परविप्रतिपेधार्थविप्रतिपेधाभ्यामप्यसमञ्जसं सांख्यमतम् ॥

इति रचनानुपपत्त्यधिकरणम् ॥ १ ॥

महद्दीर्घवद्वा ह्रस्वपरिमंडलाभ्याम् ॥ १० ॥

उभयथाऽपि न कर्मातस्तदभावः ॥ ११ ॥

समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥ १२ ॥

नित्यमेव च भावात् ॥ १३ ॥

रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥ १४ ॥

उभयथा च दोषात् ॥ १५ ॥

अपरिग्रहाच्चात्यन्तमनपेक्षा ॥ १६ ॥

आनुमानिकप्रधानकारणवादवत् आनुमानिकपरमाणुकारणवादोऽपि न युक्त इति समर्थित इति दृष्टान्तसङ्गतिः । ईश्वरानङ्गीकारात् चेतनाधिष्ठानाभावेन प्रधानकारणवादे रचनानुपपत्तिवत् न परमाणुकारणवादे साऽस्ति । वैशेषिकैरीश्वरस्याङ्गीकृतत्वात् । अतएव प्रळयानुपपत्तिदोषोऽपि नास्ति । सृष्टि[illegible]कर्मा[illegible]दिदोषोपाहितत्वेन सिसृक्षारूपाया ईश्वरेच्छायास्तदानी[illegible]य वक्तुं शक्यत्वादिति प्रत्युदाहरणसंगतिश्च ॥ इयमिह परमाणुवा-

दिनां प्रक्रिया। प्रलीने जगति प्राणिकर्मोन्मेषविशेषोपधानादीश्वरस्य इच्छायां सिसृक्षारूपायां सत्यां निश्चलेषु निरवयवेषु परमाणुषु आद्यं कर्मोत्पद्यते। तेन कर्मणा परमाणुद्वयं संयुज्यते। संयुक्तेन परमाणुद्वयेन द्व्यणुकमारभ्यते। त्रिभिर्द्व्यणुकैस्त्र्यणुकमित्यादिक्रमेण सर्वं जगदुत्पद्यत इति। तत्र परमाणूनां निरवयवत्वं तावदयुक्तम्। यथांगुलिद्वयं प्रत्यक्षं दशदिक्सम्बन्धिदशप्रदेशावच्छिन्नं परस्परं संश्लेष्यमाणमेकया महादिशा विदिग्द्वयेन चावच्छिन्नैः प्रत्येकं त्रिभिस्त्रिभिः प्रदेशैः संश्लिष्यत इत्येवं षड्भिः पार्श्वैस्संयुज्यते, एवं पटारम्भकास्तन्तवस्संश्लेष्यमाणाष्षड्भिः पार्श्वैस्संयुज्यमानाः प्रत्येकमसंयुक्तसप्तपार्श्वयुक्तास्सन्तः स्वाधिकपरिमाणं पटमारभन्त इति दृष्टम्। एवं परमाणवोऽपि षड्भिः पार्श्वैस्संयुज्यमाना एव पारिमंडल्यात्स्वपरिमाणाधिकपरिमाणमणुत्वह्रस्वत्वयुक्तद्व्यणुकमहत्त्वदीर्घत्वयुक्त-त्र्यणुकादिकार्यमारभन्त इति वक्तव्यमिति परमाणूनां प्रदेशभेदोऽवश्यमंगीकर्तव्यः। अन्यथा परिमण्डलात् परमाणोरणुह्रस्वस्य द्व्यणुकस्य द्व्यणुकान्महतो दीर्घस्य त्र्यणुकस्य च प्रथिमानुपपत्तेः। न च वाच्यं माभूत्परमाणुतः प्रथिमा द्व्यणुकस्य, द्व्यणुकात् त्र्यणुकस्य तु प्रथिमा कारणबहुत्वाद्भविष्यतीति चेन्न। तथासति परमाणोः पारिमाण्डल्यं परिमाणं द्व्यणुकस्याणुत्वह्रस्वत्वे इति विभागाभावप्रसङ्गात्। परमाणुद्वयसंयोगस्य व्याप्यवृत्तित्वे द्व्यणुकस्यापि परिमण्डलत्वापत्तेः, द्व्यणुकोत्पादकं परमाण्वोस्संयोगमभ्युपगच्छतः तेनैव तयोः प्रदेशसिद्धेश्च। न हि परमाणू संयुज्यमानौ द्वावपि समानदेशौ संतौ संयुज्येते। मूर्तानां समानदेशताविरोधात्। अतः प्राक्प्रत्यग्भावेन, दक्षिणोत्तरभावेन, ऊर्ध्वाधरभावेन वा, भिन्नदेशस्थितौ संयुज्येते इत्येव वक्तव्यम्। तथासति यद्देशस्थितः परमाणुः येन परमाण्वन्तरेण संयुज्यते स तद्देशान्यदेशावच्छिन्नेनापि तेन किं संयोक्तुमर्हति, अनर्हत्वे वा कथं तस्मिन् प्रदेशभेदो न भवेदिति त्वमेव परिभावय। ननु परमाणूनां निरवयवत्वेऽपि तत्तद्दिगवच्छेदलभ्यः प्रदेशभेदो वक्तुं शक्य इति तत एव परमाणुद्वयसंयोगस्य प्रादेशिकत्वं द्व्यणुके परिमाणोत्कर्षश्च

भविष्यतीति चेन्न– दिग्विशेषसंयोगस्यापि परमाणावव्याप्यवृत्तित्वोपपाद-
कांशाभावेन व्याप्यवृत्तित्वापत्त्या तस्य परमाण्वंतरसंयोगाव्याप्यवृत्तित्वो-
पपादकत्वायोगात् । न हि कपिसंयोगतदभावावच्छेदकवृक्षमूलाग्रवत् व्य-
वस्थितदेशावच्छेदकाभावेऽपि यथाकथंचिदवच्छेदकभेदसद्भावमात्रेण पर-
माणुद्वयसंयोगस्याव्याप्यवृत्तित्वं घटत इति वक्तुं शक्यं । सर्वादिक्संयोगा-
नामपि व्याप्यवृत्तित्वाविशेषे किं दिक्संयोगः परमाण्वंतरसंयोगावच्छेदकइति
अत्रैव नियामकाभावेन सर्वदिक्संयोगानामपि तदवच्छेदकत्वप्राप्तौ अव-
च्छेदकभेदाभावात्, यथाकथंचिदवच्छेदकभेदलाभेऽपि व्यवस्थितदेशत्वा-
भावे तयोरव्याप्यवृत्तित्वानुपपादकत्वाच्च । अन्यथा पृथिव्यास्संख्यावत्त्वे
द्रव्यत्वमवच्छेदकं गंधवत्त्वे पृथिवीत्वमित्याद्यवच्छेदकभेदसत्त्वेन संख्यादी-
नामव्याप्यवृत्तित्वव्यवहारप्रसंगात् । तस्माद्व्यणुकोत्पादकसंयोगनिर्वाहार्थं
परमाणुष्ववयवरूपप्रदेशभेदोऽवश्यमभ्युपेयः । तथा त्र्यणुकोत्पादकद्व्यणु-
कत्रयसंयोगनिर्वाहार्थमपि सोऽभ्युपेयः । स हि कायपुस्तकसंयोगोहस्त-
पुस्तकसंयोगेनेव द्व्यणुकस्य द्व्यणुकांतरारंभकपरमाणुना सह संयोगो नि-
र्वाह्यः । कारणाकारणसंयोगात् कार्याकार्यसंयोग इति त्वयाऽभ्युपगत-
त्वात् । तथा च द्व्यणुकारंभकपरमाणौ तदारंभकपरमाण्वंतरसंयोगे प्रा-
क्सिद्धे स्थिते प्रदेशभेदं विना कथं त्र्यणुकोत्पत्तिसमये द्व्यणुकांतरसंयोगोऽपि
स्यात्, मूर्तानां समानदेशताविरोधादेव । यदितु मूर्तत्वेपि परमाणुषु समा-
नदेशताविरोधमर्यादा नेष्यते, तदा षण्णां परमाणूनां पिंडरूपं त्र्यणुकं पर-
माणुमात्रं भवेत् । तदाहुः– 'षट्केन युगपद्योगात् परमाणोष्षडंशता । ष-
ण्णां समानदेशत्वे पिंडस्स्यादणुमात्रक' इति । प्रागाद्यूर्ध्वाधरदेशवर्तिभिः
षड्भिः परमाणुभिः संबध्यमानोमध्यस्थः परमाणुष्षडंशः प्राप्नोति ।
भिन्नदेशत्वात्संबन्धानां । अथ समानदेशास्सर्वे संबंधाः, तदा सर्वेषामेषां
पिंडः परमाणुमात्रः प्राप्नोतीत्यर्थः।समानमिदं दूषणं द्व्यणुकेभ्यस्त्र्यणुकोत्पत्ता-
वपि। तस्मात्द्व्यणुकत्र्यणुकादिजननतत्परिमाणातिशयसिध्यर्थं परमाणु षडं-
शत्वमनिच्छद्भिरपि परमाणुवादिभिरंगीकार्यः । ननु तदंगीकारे तत्तदंशा-

नामपि उक्तन्यायेन सांशतायामनवस्था प्रसज्यते। तथाचानन्तावयवारब्धत्वाविशेषात् मेरुसर्षपयोस्तुल्यपरिमाणत्वप्रसंगः। अतस्सांशत्वमपि नांगीकारार्हमिति चेत्, तर्हि सांशत्वे त्वनवस्था निरंशत्वे द्व्यणुकोत्पत्त्याद्यनुपपत्तिरिति पक्षद्वयेऽपि समापतद्दोषं परमाणुकारणवादव्यसनमेव त्यक्त्वा सुखीभव। किं च परमाणूनां सांशतायां नास्ति दोषः मेरुसिद्धार्थयोरनन्तावयवारब्धत्वेऽपि आनन्त्यविशेषात्परिमाणविशेषोपपत्तेः। न हि पाद्मकल्पात्पूर्वं वाराहकल्पात्परं पाताळादूर्ध्वं रविमण्डलादधश्च अवच्छेद्यदेशानन्त्ययोर्द्रव्यत्वपृथिवीत्वादिपरापरजात्याधारव्यक्त्यानन्त्ययो र्मेरुमन्दरान्तर्गतपरमाण्वानन्त्ययोश्च न तारतम्यम्। यदि तु परमाणोस्सावयवतायामनित्यत्वापत्त्या स्वाभ्युपगतमूलकारणत्वासिद्धिप्रसंगात् सांशत्वं नेष्यते, तदा द्व्यणुकादिजननतत्प्रथिमानुपपत्तिरनिवार्या। तस्मादनवस्था। परमाण्वनित्यत्वद्व्यणुकादिजननतत्प्रथिमानुपपत्त्यन्यतरदूषणाक्रान्तः परमाणुकारणवाद एव हेयः। किं च प्रळये निश्चलेषु परमाणुषु सर्गाद्यकालद्व्यणुकारम्भकसंयोगोत्पादककर्मासम्भवेन तत्संयोगासम्भवादपि सहेयः। ननु 'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनं अणुमनसोश्चाद्यं कर्मेत्येतानि अदृष्टकारितानी'त्यभ्युपेयते। अतोऽदृष्टवशादुत्पन्नेन कर्मणा संयोगस्सम्भवतीति चेन्न। तददृष्टं यदि प्राणिषु समवेतं, यदि वा परमाणुषु, उभयथाऽपि तत्कर्म न भविष्यति। तस्य तत्कर्मकारणत्वे पूर्वकल्पोपार्जितस्य तस्य प्रळयेऽपि सत्त्वेन तदानीमपि ततस्तत्कर्मोत्पत्त्या जगत्कल्पनाप्रसंगात्। अथ 'विपाकादृष्टं कर्म कारणं कर्मेश्वररूपोभयविधजगत्कारणसाफल्यप्रतिपादनार्थस्येश्वरः कारणं पुरुषकर्मसाफल्यदर्शना'दित्याक्षपादसूत्रजातस्य व्याख्यानावसरे वार्तिककृता 'न ब्रूमः कर्मानपेक्ष ईश्वरः कारणमिति कर्म पुरुषस्य ईश्वरोऽनुगृह्णाति कोऽनुग्रहार्थः यद्यथाभूतं यस्य च यदा पाककालः तत्तदा तथा च विनियुङ्क्त'मिति प्रतिपादनात् अतो नायं दोष इति चेन्न। हरीतक्यादिद्रव्यस्येव आत्मगुणस्यादृष्टस्य विपाकासम्भवात्। फलकालागमो विपाकः सतु सर्गाद्यकालागम एवेति चेन्न। अनंतैः प्राणिभिरयुगपदनु-

ष्ठितविविधकर्मजनितादृष्टानां सर्गाद्यकालएव फलकालः, नतु ततः प्राग्द्विप-
रार्धात्मके प्रळये न कोपि क्षणइति कल्पनस्य अप्रामाणिकत्वात्। ननु सर्ग-
कालरूपेऽहनि निरंतरगतागतखिन्नानां प्राणिनां तत्समानपरिमाणं कालं
शर्वरीरूपं कृत्वा तस्मिन् तान् महासुषुप्तिं प्रापय्य विशिश्रमयिषोरीश्व-
रस्य इच्छया प्रळयमध्ये समागतफलकालान्यपि कर्माणि प्रतिबद्धशक्ति-
कानि भवंति। अत एव ब्रह्महंतुस्तद्देहपातानंतरं कल्पपर्यंतं यातनानुभवः
ततः परं सप्तसु जन्मसु क्षयरोगादितच्चिह्नानुवृत्तिरिति चोदितं फलं प्रळ-
याव्यवहितपूर्वकाले कृतब्रह्महननस्य पुंसः तद्देहपातानंतरमेव न भवतीति
चेन्न। त्वन्मते नित्यायांईश्वरेच्छायाः प्रळयेपि सत्त्वात्। न च परमाणुकर्मो-
त्पादकादृष्टोपधानाभावादीश्वरेच्छा परमाणुकर्मोत्पिपादयिषारूपा नभव-
तीति त्वया वक्तुं शक्यं। तस्यापि प्रळये सत्त्वात्। ममतु प्रळये प्राक्-
सिद्धानां प्राण्यदृष्टानामीश्वरस्येच्छांतराणांच सत्त्वेपि 'बहुस्यां प्रजायेय, ता-
सां त्रिवृतं त्रिवृतमेकैकां करवाणि, नामरूपे व्याकरवाणी' ति तदा-
नीन्तनसृष्टिसंकल्परूपाणां भाविनीनामीश्वरेच्छानामभावात् सर्गाभावः। एवं
तर्हि यस्मिन् काले तथा सङ्कल्परूपेश्वरेच्छा भवतीति त्वयेष्यते, तत्कालो-
पहितैव नित्येश्वरेच्छा मम परमाणुकर्मोत्पिपादयिषा भविष्यतीति चेत् उ-
च्यते— मया कश्चित् तादृक्संकल्पकालः स्वमनीषिकाकल्पितो न प-
रिगृह्यते, किंतु 'सदेवसोम्येदमग्रआसी' दित्यादिश्रुतितदुपबृंहणपुराणेति-
हासादिप्रमाणक द्विपरार्धात्मकमहाशर्वर्यंतरकालः परिगृह्यते। न च त-
वेश्वरं तदीयसृष्ट्यादिव्यापारं च युक्तिभिरेव कल्पयितुमिच्छतः एतस्मिन्
काले बहुभवनसंकल्पः ततोभूतानां क्रमेण सृष्टिः ततस्त्रिवृत्करणसंकल्प-
स्त्रिवृत्करणं च ततोनामरूपव्याकरणसंकल्पः तद्व्याकरणं चेत्यादिकं यु-
क्तिपथत्वमवतरति। न हि रामचरितादिकं रामायणादिप्रतिपन्नं युक्तिभिः
कल्पयितुं शक्यं। यथेश्वरे कालविशेषावच्छिन्नसृष्ट्यादिव्यापारे श्रुति-
श्शरणीकरणीया, तदेश्वरेपि सैव शरणीकर्तुं युक्तेति यथाश्रुत्यनंतकल्याण-
गुणाकरस्तदातदोदितैस्सङ्कल्पविशेषैर्जगद्व्यापारलीलां कुर्वन्नेवेश्वरोऽभ्युपेयः,

ननु श्रुतिषु स्वानभिमतांशं परित्यज्य नित्यज्ञानेच्छाप्रयत्नमात्रवान् स्वाभिमतसृष्टिव्यापारमात्रकर्ताऽभ्युपेयः । दूषितश्चानुमानिकेश्वरः शास्त्रयोनित्वाधिकरणे । तेनापि तस्य परमाणुकर्मोत्पादनप्रक्रियया स्रष्टृत्वं त्वदभिमतं निरस्तप्रायं । अतोऽप्रामाणिकपरमाणुकारणवादाभ्युपगमादसमंजसं वैशेषिकमतं । तथा समवायाभ्युपगमादप्यसमंजसं । अयुतसिद्धेष्ववयविगुणक्रियाजातिषु अयुतसिध्युपपादनार्थं हि समवायोभ्युपगम्यते, तदा समवायस्यापि संबंधांतरमपेक्षणीयं । अयुतसिद्धिसाम्यात् । एवं तस्य तस्यापि संबंधांतरस्यायुतसिध्युपपादकं संबंधांतरमपेक्षणीयमित्यनवस्थानात् । समवायस्याभावादिवत् स्वरूपसंबंधइष्यत इति चेत्, अवयव्यादिष्वपि स एवास्तु । ननु अवयव्यादीनामनंतत्वात् लाघवेन सर्वानुगतएकस्समवायः कल्प्यतइति चेन्न । एकस्य बहूनां च कल्प्यत्वे हि लाघवादेकस्यकल्पनं । इह बहूनां क्लृप्तत्वात् किमर्थमेकस्यापि कल्पनं । ननु बहूनां क्लृप्तत्वेपि तेषु संबंधत्वं कल्प्यं तत्तु नैकं कल्पयितुं शक्यं । अवयव्यादिस्वरूपानुगतैकसंबंधत्वानिर्वचनात् । अतोनंतसंबंधत्वकल्पनात् एकस्य समवायस्य तद्गतस्यैकस्य संबंधत्वस्य च कल्पनं लघ्विति चेन्न । अवयव्यादिषु तत्तदभावादिकं प्रति संबंधत्वस्यापि क्लृप्तत्वात्, तेष्ववयवादि निरूपितसंबंधत्वक्लृप्तिर्नास्तीति तान्यनंतानि कल्प्यानीतिचेन्न । निरूपकभेदेन संबंधत्वभेदे समवायेपि तद्भेदेन तान्यनंतानि कल्प्यानि समवायश्च कल्प्य इति समवायपक्ष एव गौरवापत्तेः । अवयवगुणक्रियाजातीस्तद्वतश्चायुतसिद्धत्वेन क्रोडीकृत्य अयुतसिद्धनिरूपितसंबंधत्वमेकमेव समवाये कल्प्यत इति चेन्न । एवं ताः क्रोडीकृत्य तेष्वेकसंबंधत्वकल्पनोपपत्तौ समवायकल्पन एव गौरवात् । किंच अवयवावयव्यादिषु समवायाभ्युपगमेऽपि स्वरूपसंबंधाभ्युपगमआवश्यकः । अन्यथा समवायविशेषण अवयवावयव्यादिषु आधाराधेयव्यवस्थित्यभावप्रसंगात् । तस्मादवयवादिष्ववयव्यादिनिरूपितमाधारस्वरूपं स्वरूपसंबंधत्वमेकं अवयव्यादिषु अवयवादिनिरूपितमाधेयस्वरूपं तदन्यदिति स्वरूपसंबंधद्वयेन विषयीभूतेन ' इह तंतुषु पटः '

इत्यादिप्रत्ययोर्निर्वाह्यः । समवायेन तन्निर्वहणे वायौ रूपसमवायसत्त्वेन वायौ रूपमिति प्रतीत्यापत्तेः । अतस्समवायस्थलेऽपि स्वरूपसंबंधस्यावश्यकत्वे तेनैवाधाराधेयभावप्रतीतेः निर्वहणीयत्वे च किं समवायेन । एतेन यदुक्तं काणादसूत्रे– 'इहेति यतः कार्यकारणयोस्ससमवाय' इति तन्निरस्तं । इहप्रत्ययस्य सर्वत्राधाराधेयभावरूपस्वरूपसंबंधद्वयविषयत्वावश्यंभावेन तेनैव विशिष्टप्रत्ययचारितार्थ्यात् । स्यादेतत् इह सूत्रे वर्णितप्रत्ययनिर्वाहकत्वेन समवायसिद्धिरुक्तेति सत्यं– नतु तन्निर्वाहकत्वं विषयतया विवक्षितं । तन्मते समवायस्याप्रत्यक्षत्वात् । किंतु कारणतया अवयवक्रियादिविशिष्टबुद्धीनामनुगतं किञ्चित्कारणं यत्सिध्यति ससमवायइति । मैवं– अवयवादिविशिष्टबुद्धीनां स्वयमननुगतत्वेनानुगतकारणापेक्षाभावात् विशिष्टबुद्धित्वेनानुगमे 'दंडी पुरुषः, घटस्य ज्ञानं, घटस्याभावः' इत्यादिषु विशिष्टबुद्धिष्वतिप्रसंगात् । स्फुटतरविवेकरहितसंबंधिद्वयगोचरविशिष्टप्रत्यक्षत्वेनानतिप्रसक्तेनानुगमइति चेत् तर्हि स्फुटतरविवेकराहित्यत्वेनानुगतीकृतानामवयवावयव्यादीनामेव तत्र कारणत्वमस्तु कृतं समवायकल्पनया। अतिप्रसक्तंचेदमुक्तविशिष्टबुद्धित्वं अभावाधिकरणयोर्विशिष्टबुद्धौ, पीतं सुवर्णमिति तदुपष्टंभकयोर्वैशिष्टबुद्धावपि । ननु दंडादिविशिष्टबुद्धिसाधारण्येन प्रत्यक्षविशिष्टबुद्धिमात्रे अनुगतं कारणं कल्प्यमानं नित्यत्वादेकत्वाच्च सर्वत्र संभवन् समवायएवेति सिध्यति । विषयभावं विनापि सर्वासु तासु तस्य कारणत्वसंभवादिति चेन्न । संयोगस्यानुगतकारणस्यसंभवात् । संतिहि चाक्षुषादिविशिष्टप्रत्यक्षेषु तत्तद्द्रव्येंद्रियसंयोगाः कारणत्वेन क्लृप्ताः। शब्दप्रत्यक्षत्वेप्यस्ति श्रोत्रमनस्संयोगः । तेषामेव संयोगत्वेनास्तु कारणता । किंच विशिष्टज्ञानत्वं विशेषणज्ञानकार्यतावच्छेदकं प्रत्यक्षत्वं इंद्रियकार्यतावच्छेदकमिति अवच्छेदकांतरोपपन्नकार्यताधिकरणवृत्तित्वात् नीलघटत्ववदर्थवशसंपन्नं विशिष्टप्रत्यक्षत्वं न कार्यतावच्छेदकमिति नतदवच्छेदेनानुगतकारणापेक्षास्ति । एतेन तंत्वादिनाशे तन्निष्ठावयवगुणादिकं यन्नश्यति तत्र तन्निष्ठावयव्यादिनाशत्वस्याननुगमात् , तत्संबंधिनाशत्वस्य तत्संयु-

क्ततृणादिनाशेऽतिप्रसक्तत्वात् तावदनुगतस्संबंधः सिध्यन् समवायः पर्यवस्येदिति चेन्न। समवायांगीकारेपि तंतुनाशे तंतुसमवायवतामंशूनां नाशप्रसंगानिवारणात्। न च समवायवत्त्वे सत्याधेयत्वरूपंसमवेतत्वमवच्छेदके निवेशनीयं, तथापि तंत्वाश्रिततृणादिनाशप्रसंगतादवस्थ्यात्, समवायस्यैकत्वेन तंतुसमवायस्य तृणेपि सत्त्वात्, अयुतसिद्धाधेयत्वस्यैव अक्लिष्टस्य क्लृप्तस्य कार्यतावच्छेदके निवेशयितुं युक्तत्वाच्च। नच तथासति तदयुतसिद्धाधेयस्य पटध्वंसादेर्नाशप्रसंगः। परपक्षेपि तंतुसमवेतजात्यादिनाशप्रसंगतौल्यात्। तंतुनाशे तत्समवेतकार्यनाश इति नियमश्चेत्तर्हि तन्नाशे तदयुतसिद्धाधेयस्य विनाशिनोनाशइति नियमोस्तु। नच ध्वंसनाशेनापि किञ्चिदनिष्टमापद्यते। प्रागभावध्वंसस्य घटस्येव तध्वंसस्यापि ध्वंसोपपत्तेः। घटतध्वंसयोरुभयोरपि प्रागभावप्रध्वंसत्वांगीकारेण प्रागभावानुन्मज्जनसमर्थने घटतध्वंसपरंपराया घटध्वंसत्वांगीकारेण घटानुन्मज्जनसमर्थनोपपत्तेः। तदेवं समवायासिद्धौ तद्घटितस्य समवायिकारणत्वस्यासिध्या त्र्यणुकद्व्यणुकसमवायिकारणत्वेन द्व्यणुकपरमाण्वनुमानं न प्रवर्ततइत्यतोप्यसमञ्जसः परमाणुकारणवादः। किञ्च समवायस्य नित्यत्वाभ्युपगमात् तदाश्रयाणामपि नित्यत्वमभ्युपगंतव्यं। अन्यथा संबन्धिनाशे संयोगवत् समवायस्यापि नाशप्रसङ्गात्। अतस्समवायाश्रयतया त्र्यणुकस्यापि नित्यत्वं त्वया वक्तव्यं स्यादित्यतोपि तत्कारणतया द्व्यणुकाद्यनुमानासिद्धिः। यद्युच्येत संबन्धिनाशनाश्यत्वे संयोगत्वं प्रयोजकं। लाघवात्। न संबन्धत्वमुपाधित्वादिति, तदेत्थं लाघवमनुसरता जगन्मूलकारणानुमानेप्यैक्यलाघवमनुसरणीयमिति तेन ब्रह्मणः प्रधानस्य वा सिद्धेर्न तेन परमाणुसिद्धिः। नच कार्यद्रव्यस्यावयवसंयोगारभ्यत्वनियमस्य पटादिषु दृष्टत्वान्नैकस्माद्द्रव्योत्पत्तिस्संभवतीति लाघवमिहाकिंचित्करमिति वाच्यं। एकावयविरूपेण क्षीरेण दध्यारंभे नियमभङ्गात्। क्षीरारंभकावयवाःपरस्परं संयुज्य पुनस्संयोगांतरं लब्ध्वा दध्यारभंत इति कल्पनायां प्रमाणाभावात् क्षीरनाशकारणानुपलब्धिवत् दध्युत्पत्तिवच्च तदुपपत्तिः न पयसः परिणामो गुणांतरप्रादुर्भावादि-

स्याचक्षपादसूत्राणां प्रमाणमूलत्वाभावात् स्थितेपि द्रव्ये पार्थिवपरमाणूनामिव गुणांतरप्रादुर्भावोपपत्तेः । तंतुसंयोगपटयोः कुविन्दव्यापारादिरूपसामग्र्यैक्येन समकालोत्पत्तिकतया पटस्य तंतुसंयोगारम्भ्यत्वासम्प्रतिपत्तेश्च । न च तंतुसंयोगनाशे पटनाशदर्शनात् अकारणनाशेन अकार्यनाशासम्भवात् पटतंतुसंयोगयोः कार्यकारणभावो वक्तव्य इति वाच्यम् । नाशयोरपि सामग्र्यैक्येन समकालत्वोपपत्तेः । किं च यदि जगन्मूलकारणं रूपादिमत्स्यात् तदा तत्र नित्यत्वनिरवयवत्वयोर्विपर्ययस्स्यात् । रूपादिमतामनित्यत्वसावयवत्वदर्शनादिति तर्कानुगृहीतेन त्र्यणुकमूलकारणं रूपादिरहितं नित्यत्वान्निरवयवत्वादित्यनुमानेन पराहतत्वादपि न रूपादिवत्परमाणुरूपकारणसिद्धिः । विपक्षे बाधकाभावात् व्याप्त्यसिध्या प्रशिथिलमूलस्तर्कइति चेत् त्र्यणुकं समवायिकारणारभ्यं महत्त्वेसति चाक्षुषत्वात् । तदपि त्र्यणुकसमवायिकारणं समवायिकारणारभ्यं महदारम्भकत्वादिति द्व्यणुकपरमाणुसाधकानुमानयोः को विपक्षबाधको दृष्टः । येन मदनुमानस्य दौर्बल्यं त्वदनुमानयोः प्राबल्यञ्च स्यात् । ननु त्र्यणुकसाधकानुमानेऽस्ति विपक्षबाधकतर्कः । तथा हि महत्त्वपरिमाणस्य जन्यत्वे महत्त्वावान्तरजातिरूपापकर्षमात्रं प्रयोजकम् । नतूत्कर्षापकर्षरूपतदवान्तरजातिद्वयं, गौरवात् । तथा च त्र्यणुकमहत्त्वस्य अपकृष्टमहत्त्वरूपतया जन्यत्वेन कारणापेक्षायां महत्त्वे स्वाश्रयसमवायिकारणगतसंख्यापरिमाणसंयोगविशेषाणामेव कारणत्वात् त्र्यणुकस्य समवायिकारणत्वमवश्यमभ्युपेयमिति, एवं तर्ह्युक्तरीत्यैव तर्कमूलव्याप्तावप्यस्ति विपक्षबाधकतर्कः । रूपादीनां जन्यत्वे रूपत्वादिकं प्रयोजकं अनुगतत्वाल्लघुत्वाच्च । न तु कार्यगतरूपत्वादिकम् । पार्थिवपरमाणुरूपाद्यननुगतत्वात् गुरुत्वाच्च । तथा च परमाणुषु रूपाङ्गीकारे अग्निसंयोगाजन्या रूपादयः स्वाश्रयकारणगतरूपादिजन्या इति त्वद्रीत्यैव जलपरमाणुगतरूपादीनां पार्थिवपरमाणुश्यामत्वस्य चोत्पत्तावपेक्षितानां रूपादीनामाश्रयत्वेन परमाणूनामवयवास्सिध्यन्तो न निवारयितुं शक्याः । सावयवत्वेचानित्यत्वमप्यनिवार्यमिति रूपादीनां जन्यत्वे रूपत्वादिकं

प्रयोजकमित्येतत् त्वयाऽप्यवश्यमेष्टव्यम् । अन्यथा त्र्यणुककारणत्वेन अनुमीयमानेषु द्व्यणुकेषु रूपाद्यसिद्धिप्रसङ्गात् । तेषु रूपादिमत्त्वानुमाने हि रूपादीनां कारणगुणपूर्वकत्वनियममूलएवहि तत्र विपक्षबाधकतर्कएष्टव्यः। किञ्च महत्त्वस्य जन्यत्वे परिमाणापकर्षः प्रयोजको युक्तः । अतएव आकाशादिगतपरममहत्त्वव्यावृत्तिसिद्धेः । नतु महत्वापकर्षः, विशेषरूपत्वात् दैर्घ्याननुगतत्वाच्च । तथा च यदि त्र्यणुकमूलकारणे अपकृष्टपरिमाणमभ्युपगम्येत तदा तस्य जन्यत्वेन कारणपरिमाणापेक्षया मूलकारणस्य सावयवत्वं प्रसज्येतेति तत्परिहाराय तस्मिन् परममहत्त्वमेवाभ्युपगंतव्यम् । न च कार्यद्रव्यस्य स्वन्यूनपरिमाणद्रव्यारभ्यत्वनियमात् दीर्घैस्तंतुभिर्दृढतरावर्तितैस्तन्न्यूनदैर्घ्यस्य विशालैः पटैरावर्तितैस्तन्न्यूनवैपुल्यस्य च सूत्रस्यारम्भदर्शनात् । तस्माद्बलवत्प्रत्यनुमानपराहतं रूपादिवज्जगन्मूलकारणानुमानम् । तथा यद्यनित्यत्वादिपरिहाराय परमाणूनां रूपादिशून्यत्वमुच्येत, तदा कार्यगुणानां कारणगुणपूर्वकत्वनियमासिद्धिः । तत्सिद्धये रूपादिमत्वांगीकारे च अनित्यत्वाद्यापत्तिरिति उभयथाऽपि दुष्टः परमाणुकारणवाद इति असमञ्जसं वैशेषिकमतम् । अतस्सांख्यपक्षस्य श्रुतिन्यायविरुद्धस्यापि सत्कार्यवादादौ क्वचिदंशे वैदिकपरिग्रहोऽस्ति । वैशेषिकपक्षस्य तु केनाप्यंशेन अपरिग्रहादत्यन्तमनपेक्षैव कार्या ॥

संग्रहकारिकाः ॥ अल्पानां संयोगाद्विपुलस्योत्पत्तिरीक्षिता लोके ।

तस्मादणवः कारणमनवयवास्तेऽनवस्थितेश्शान्त्यै ॥
तेषां प्रदेशभेदैस्संयोगे क्वानवस्थितेश्शान्तिः ।
नोचेत्तदयुतयोगेऽप्यस्तु प्रथिमा कथं कार्ये ॥
समवायिकारणञ्च त्रसरेणोर्नैव शक्यमनुमातुम् ।
बहुबाधकसद्भावात् समवायस्यैव निष्प्रमाणत्वात् ॥
तन्मूलकारणत्वस्य च रूपित्वादावनित्यतापत्तेः ।
रूपादिमतां लोके ह्यवयववत्त्वादनित्यता दृष्टा ॥

इति महद्दीर्घाधिकरणम् ॥२॥

समुदायउभयहेतुकेऽपि तदप्राप्तिः ॥१७॥
इतरेतरप्रत्ययत्वादुपपन्नमितिचेन्न संघातभावानिमित्तत्वात् ॥ १८ ॥
उत्तरोत्पादेचपूर्वनिरोधात् ॥ १९ ॥
असतिप्रतिज्ञोपरोधोयौगपद्यमन्यथा ॥२०॥
प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥२१॥
उभयथाचदोषात् ॥ २२ ॥
आकाशेचाविशेषात् ॥२३॥
अनुस्मृतेश्च ॥२४॥
नासतोदृष्टत्वात्॥२५॥
उदासीनानामपि चैवं सिद्धिः ॥२६॥

माध्यमिकयोगाचारसौत्रान्तिकवैभाषिकसंज्ञाश्चतुर्विधा बौद्धाः । ते सर्वेऽप्याद्विबुद्धस्य शिष्याः क्रमेण सर्वशून्यत्वबाह्यार्थशून्यत्वबाह्यार्थानुमेयत्वबाह्यार्थप्रत्यक्षत्ववादिनः । तत्र 'बुध्या विविच्यमानानां स्वभावो नावधार्यते । अतो निरभिलप्यास्ते निस्स्वभावाश्च दर्शिताः ॥ यथा यथा विचार्यन्ते तथा तथे'त्यादिन्यायैः गुरुणा सर्वशून्यत्वं बोधितेषु शिष्येषु ये गुरूक्तं तथैवांगीकृत्य पर्यनुयोगं नाकुर्वन् ते गुरूक्तस्य श्रद्धयांगीकरणादुत्तमाः, तत उपरि पर्यनुयोगाकरणादधमाश्चेत्युत्तमाधमत्वयोगात् मध्यमां स्थितिमास्थिता माध्यमिकाः । ये तु बाह्यार्थानां शून्यत्वमंगीकृत्य कथं विज्ञानस्यापि शून्यत्वं, जगदान्ध्यप्रसंगादिति पर्यनुयोगमकुर्वन्, ते गुरूक्तांगीकरणस्य आचारसंज्ञया तन्मते परिभाषितस्य तत उपरि पर्यनुयोगस्य योगसंज्ञया तन्मते परिभाषितस्य च सद्भावात् योगाचाराः । गुरुणा तान् प्रत्यान्तरं विज्ञानमात्रमस्ति, तदेव नीलाद्याकारं न तु तद्व्यतिरेकेण बाह्यं

नीलादिकमस्ति सहोपलम्भनियमेन नीलादीनां तद्विज्ञानानाञ्चाभेदसिद्धेः, भेदे गवाश्ववत्तन्नियमाभावप्रसङ्गात्, तदेव विज्ञानाकारात्मकं नीलादिकमनादिवासनावशात् बहिर्वदवभासत इति बोधिते कथं सर्वथैव बाह्यार्थस्य शून्यत्वं, बाह्यस्य नीलादेरवभासात्। अहमुल्लेखेन विज्ञानस्यान्तरतया इदमुल्लेखेन नीलादेर्बाह्यतया च भेदेऽवभासमाने सहोपलम्भनियममात्रस्याप्रयोजकस्याभेदसाधनाक्षमत्वात्, सहत्वोक्त्यैव भेदानुमतेश्चेति यैः पर्यनुयुक्तं, तान् प्रति सत्यमस्ति बाह्यं नीलादिकं न तु तत्प्रत्यक्षं अनुत्पन्नस्याविद्यमानस्य प्रत्यक्षत्वायोगात्, उत्पन्नस्य क्षणिकस्य स्थित्यभावात्।

किंतु उत्पद्यमानं नीलादिविज्ञाने स्वाकारं समर्प्य नश्यति। ततो विज्ञानगताकारेणातीतन्नीलादिकमनुमीयतइति बोधिते सति तैरित्थं शिष्यप्रश्नानुरोधेन कियत्पर्यंत मुपदेशसूत्रं प्रवर्तिष्यतइति सूत्रस्यांते पृष्टे गुरुणाऽभिहितं— भवन्तस्सूत्रस्यांतं पृष्टवन्तस्सौत्रांतिकाभवन्त्विति। अतस्ते सौत्रांतिकाः। ततो विज्ञानेनानुमेयं बाह्यमितीयं विरुद्धाभाषा। तस्यैव विज्ञानस्य तद्विषयप्रत्यक्षत्वात् प्रत्यक्षस्य कस्यचिदप्यर्थस्याभावे व्याप्तिसंवेदनस्थानाभावेन अनुमानाप्रवृत्तेश्चेति यैः पर्यनुयुक्तं ते वैभाषिकाः। तान् प्रति बाह्यप्रत्यक्षत्वमप्युपदिष्टं। एवं यथाश्रुतं स्व स्व प्रश्नोत्तरवाक्यार्थं श्रद्धानास्ते तथैव मतभेदानास्थिषत। तत्र वैभाषिकादिक्रमेण चतुर्विधानपि बौद्धान् निरसितुं क्रमेण चत्वार्यधिकरणानि। ततः क्षपणकान्निरसितुमेकमधिकरणम्। वैदिककापिलकणभुङ्निराकरणानन्तरमवैदिकास्ते निरस्यन्तइति अर्धवैनाशिकनिरासानन्तरं सर्ववैनाशिका निरस्यन्त इति पूर्वाधिकरणेन पेटिकासङ्गतिः वैभाषिकाद्यधिकरणानां त्रयाणां केषांचित् क्षणिकत्वमभ्युपगच्छन्तस्तार्किकाः अर्धवैनाशिकाः। ते हि जाठराग्निना पच्यमानानां भुक्तपीताहारावयवानां प्रतिक्षणमुपचयापचयवैषम्यात् अवयविशरीरमपि प्रतिक्षणमुपचयापचयवदन्यदन्यद्भवति। यद्यपि शरीरस्य प्रतिक्षणमुपचयापचयदर्शनं नास्ति, तथाऽपि वर्षधारानिपातैस्तटाकजलस्येव घटीयंत्रांक्षेपणैः कूपजलस्येव चान्ते तद्दर्शनात् यौक्तिकं प्रतिक्षणं किंचित्किंचिदुपचयापच-

यज्ज्ञानमस्त्येव । आहारावयवानां शरीरावयवत्वप्राप्त्या तदपचयोपचयाभ्यां शरीरापचयोपचयावश्यम्भावात् । यथा हि चन्द्रतारकादीनां मुहूर्तादिकालव्यवधानेन बहुदेशान्तरप्राप्तिदर्शनात् प्रतिक्षणं स्वल्पदेशांतरप्राप्तिज्ञानं यौक्तिकमस्तीत्यभ्युपगच्छन्ति । एवं प्रतिक्षणमवश्यम्भाविभिः खननपूरणादिभिः भूगोळकस्य, नदीजलसंसर्गशीकरोत्पतनैस्समुद्रस्य च उपचयापचयवत्त्वेन क्षणिकत्वमभ्युपगच्छन्ति। अतस्तेऽर्धवैनाशिकाः । बौद्धास्तु सर्वस्यापि प्रपञ्चस्य क्षणिकत्वमभ्युपगच्छन्तस्सर्ववैनाशिकाः । बौद्धेष्वपि वैभाषिकसौत्रान्तिकाः परमाणुवादिनइति काणादप्रत्यासत्त्या तदुभयसाधारणैस्सौत्रान्तिकासाधारणैश्चदूषणैरुभयेषां प्रथमाधिकरणे निरासः, द्वितीयाधिकरणे क्षणिकवादसाम्यात्योगाचाराणां. ततो बौद्धत्वसाम्यात् माध्यमिकानां, तदनन्तरमवैदिकत्वसाम्यात् क्षपणकानामितिविवेकः । यद्यपि क्षपणका अपि परमाणुवादिनः, तथापि वैभाषिकसौत्रांतिकैः खरस्नेहोष्णतेरणस्वभावाश्चतुर्विधाः परमाणवस्तैरभ्युपगम्यंते । परमाणूनां तार्किकैः स्थिरत्वैकांत्यवत् क्षणिकत्वैकांत्यंतैरभ्युपगम्यते। क्षपणकास्तु परमाण्वैकविध्यवादिनः स्थैर्याद्यनैकांत्यवादिनश्चेति वैभाषिकसौत्रांतिकानां तार्किकप्रत्यासत्त्यतिशयोस्तीति संगतिविशेषोद्रष्टव्यः । तत्र परमाणुवादिनांवैभाषिकसौत्रांतिकाएवमाहुः— रूपरसगंधस्पर्शस्वभावाः पार्थिवाः परमाणवः रूपरसस्पर्शस्वभावाआप्याः, रूपस्पर्शस्वभावास्तैजसाः, स्पर्शस्वभावावायवीयाः, भूभूधरसमुद्रवडबानलमहावाय्वात्मकभूतरूपेण संहन्यंते । तेभ्यश्च पृथिव्यादिभ्यः शरीरेंद्रियघटादिविषयरूपभौतिकसंघाताभवंति । सर्वत्र संघातः अवयवसमुदायएव । न तद्यतिरेकेण अवयविद्रव्यांतरोत्पत्तिरस्ति तदुत्पत्तौ तत्र चाक्षुषत्वाद्यर्थं पृथग्रूपादिमत्त्वस्य अभ्युपगंतव्यत्वात् । अवयवरूपादिव्यतिरिक्तस्य च अवयविनि रूपादेरनुपलंभात् । नहि नानावर्णैस्तंतुभिरारब्धे पटे तंतुगतनानारूपव्यतिरेकेण पटे रूपांतरं, अवयवभेदव्यवस्थितमधुराम्लरसव्यतिरेकेण आम्रफले रसांतरं अतिपक्वास्वपक्वभागभेदव्यवस्थितपूतिगंधसुरभिगंधव्यतिरेकेण नागवल्लीपर्णे गंधांतरं, भागभेदव्यवस्थितकठिनसुकुमारस्पर्शव्य-

तिरेकेण कदळीदळेस्पर्शांतरं, मूलमध्याग्रभागव्यवस्थितमहदल्पाल्पतरपरिमाणव्यतिरेकेण वृक्षे परिमाणांतरञ्च उपलभामहे । नानावर्णतंत्वारब्धेषु पटेषु चित्राख्यं रूपांतरं कैश्चिदभ्युपगतमिति चेत् तदन्यैर्दूषितमेव । 'चित्रं चेदेकता नस्यात् एकंचेच्चित्रता कथं । एकंच तच्च चित्रंचेत्येतच्चित्रतरं मह' दिति । रसादिषु तु अव्याप्यवृत्तित्वं केनापि नाभ्युपगतं । तस्मादणुहेतुको भूतसमुदायः भूतहेतुको भौतिकसमुदायइत्येवमणुभूतहेतुकसमुदायद्वयरूपएव बाह्यार्थः। सेयं प्रक्रियाऽनुपपन्ना । यतोऽणुभूतहेतुकसमुदायद्वये ऽभ्युपगम्यमाने जगदात्मकसमुदायभावः चेतनस्य तद्विषयव्यवहारश्च न प्राप्नोति । कुतः । अणूनां भूतानांच मेळनार्थव्यापारं विना हेतुत्वे सदा कार्योत्पत्त्यापत्तेः, मेळनहेतुव्यापारविशिष्टानामणूनां भूतानांच भूतभौतिकहेतुत्वं वक्तव्यं । न च तत्क्षणिकत्वे घटते। येषां व्यापारावेशः, तेषां मेळनक्षणे नष्टत्वात् । येषां मेळनं तेषां व्यापारक्षणानुत्पन्नत्वात् । यस्यचेतनस्येंद्रियसन्निकर्षः तस्य ज्ञानोत्पत्तिकाले, यस्य ज्ञानोत्पत्तिः तस्य हानादिव्यवहारकाले च नष्टत्वात् । केषांचिन्मेळनहेतुव्यापारेणान्येषां मेळनाभ्युपगमे कस्यचिदिंद्रियसन्निकर्षादिनाऽन्यस्य वेदनाद्यभ्युपगमे चातिप्रसंगात् । नच व्यापारवतां मेळनवतांचाणुभूतानामेकसंतानवर्तित्वात् इंद्रियसन्निकर्षवतो वेदनादिमतश्चेतनस्य एकसंतानवर्तित्वाच्चानतिप्रसंगः । क्षणिकसंतानव्यतिरिक्तस्य स्थिरस्य संतानस्य क्षणिकत्ववादिभिरनभ्युपगमात् । नन्वस्थिरेष्वपि स्थिरत्वभ्रांतिरूपाविद्याऽस्ति, साच रागादिहेतुः, रागादिपारवश्यंचाविद्याहेतुरिति अविद्यारागादेः प्रवाहस्तावदनुभवसिद्धः । तस्य शरीरेन्द्रियविषयादिरूपसमुदायभावाभावे अनुपपत्तेः तदाक्षिप्तसमुदायसिद्धिरप्रतिक्षेप्येति चेन्न । कारणाभावेन समुदायभावानुपपत्तावुक्तायां कारणोक्त्या हि तदुपपत्तिस्समर्थनीया । नचाविद्यारागादिः परमाण्वादिव्यापारनिरपेक्षस्समुदायहेतुः । शुक्तिरजतभ्रांतिरूपाविद्यारजतरागादिनाऽपि शुक्तेश्शुक्तिरूपसमुदायताप्रहाणेन रजतरूपसमुदायतापत्तिप्रसंगात् । अन्यस्याविद्ययान्यस्य रागादिजननेऽतिप्रसंगनाविद्यारागादिप्रवाहानुपपत्तेश्च । स्यादेतदन्यस्य

कर्मणा अन्यत्र संयोगजनने ऽतिप्रसंगइतिदोषो न बौद्धमते प्रसरति । न हि तैः क्षणिकेषु परमाण्वादिषु कर्मसंयोगावभ्युपगम्येते । किंतु देशांतरस्थेन देशान्तरस्थस्योत्पादः सकर्मप्रत्ययस्यालम्बनं, विप्रकृष्टदेशेन सन्निकृष्टदेशस्य उत्पादः ससंयोगप्रत्ययस्य । ततश्च यथा न्यायमते नानादिक्प्रभवशब्दमूलकशब्दपरम्पराजननक्रमेण बहूनां शब्दानां मेळने सति कोलाहलप्रत्ययः, एवं बहूनां परमाणूनां तथा पुञ्जीभावेसति भूभूधरादिप्रत्ययः । दृष्टंह्येकैकस्य केशस्य दूरे दृश्यत्वाभावेऽपि बहूनां केशानां कबर्यादिरूपेण पुञ्जीभावे सति तत्समुदायस्य दृश्यत्वं । न चादृश्यसमुदायस्यादृश्यत्वनियमः । अप्रयोजकत्वात् । एकैकस्य तन्तोस्स्यवनाकर्पणशक्त्यभावेऽपि तत्समुदायस्य तदाकर्षणशक्तिवत् एकैकस्य परमाणोरदृश्यत्वेऽपि तत्समुदायस्य दृश्यत्वोपपत्तेः । तदाहुः– 'प्रत्येकं दृष्ट्ययोग्यत्वेऽप्यणूनां दृश्यता भवेत् । मेळनेसति तन्तूनां नौकाद्याकृष्टिशक्तिव' दिति । तस्मान्न हेत्वसम्भवेन समुदायभावानुपपत्तिरिति चेत् एवमपि हेतुहेतुमद्भावो नोपपद्यते । उत्तरघटक्षणोत्पत्तिदशायां पूर्वघटक्षणस्य विनष्टत्वेन तस्य उत्तरघटक्षणं प्रति हेतुत्वानुपपत्तेः । बौद्धमते वस्तुतः कालो नास्ति । उत्पन्नेव स्वरसभंगुरो घटादिः क्षणकल्पनामात्रनिमित्तं भवति । स च घटादिः स्वोदयविनाशपरिकल्पितक्षणवत्त्वात् क्षणिक इत्युपचर्यते, वपुष्मान् शिलापुत्रक इतिवदिति तेषां प्रक्रिया । अतस्तन्मतमर्यादया घटएव क्षण इति सामानाधिकरण्येन घटः क्षण इति ग्रन्थेषु व्यवहारः । ननु नष्टस्य हेतुत्वासम्भवः, उक्तं हि तेषां तत्वसंग्रहे– 'भावानां कारणत्वं न नष्टतया अवस्थिततया वा । अपितु भूततया । भूतश्च स्थितो वा भवतु, नष्टो वा । कारणान्तरपौष्कल्ये सति स्वकार्यमविळम्बेन करोती' ति । दृष्टं हि बीजकृतदोहळसंस्कारस्य कालान्तरभाविपुष्पफलादिगतवर्णरसविशेषहेतुत्वं तस्मान्नष्टत्वेन हेतुत्वानापत्तिरिति चेत् । मैवं । यदि कार्यदशायामसदपि यदा कदाचित्पूर्वसत्त्वमात्रेण हेतुस्स्यात् तदा सर्वदा सर्वत्र सर्वस्याप्युत्पत्तिस्स्यात् । घटोत्पत्तिदशायामंकुरादेरपि उत्पत्तिस्स्यात् । अनादौ कालप्रवाहे नष्टस्य बी-

जादेस्सत्वात्। न च क्षेत्रतत्कर्षणादिसहकार्यभावदृशङ्कनीयः। तस्यापि नष्टस्य पूर्वसत्त्वाविशेषात्। दोहळद्रव्याणां तु यावत्कार्योत्पत्तिसूक्ष्मरूपेणानुवृत्तिरस्त्येव वृक्षायुर्वेदादिदोहळशास्त्रप्रसिद्धा। स्यादेतच्चिरनष्टस्य निर्व्यापारस्य माभूद्धेतुत्वं, स्वरूपेण स्वव्यापाररूपेण वा पूर्वक्षणवर्तिनस्तु स्यात्। अवश्यञ्च कारणस्य पूर्ववृत्तित्वं वाच्यम्। तेनैव कारणत्वोपपत्तौ किं कार्यकालवर्तित्वेन। लोके च विनष्टस्य बीजस्य अंकुरे, क्षीरस्य दधि, मृत्पिडस्य घटे च कारणत्वं दृष्टम्। यदि तु कारणस्य कार्यकालवृत्तित्वमपेक्ष्येत, तदा बीजादीनां विनाशोंकुरादिकारणं पूर्वघटक्षणविनाश उत्तरघटक्षणकारणमित्यस्त्विति चेत्। यद्येवं कार्यकालासतः कारणत्वमिष्यते, 'अधिपतिसहकार्यालम्बनसमनन्तरप्रत्ययाः चत्वारः चित्तचैत्तहेतव'इति हि बौद्धानां प्रतिज्ञा। तथा हि बुद्धसूत्रम्– 'चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्त्या उत्पद्यन्त' इति। अधिपतिरिंद्रियं। तद्धि ज्ञानस्य रूपादिषु पञ्चसु एकैकमात्रविषयत्वनियामकम्। नियामकश्च लोके अधिपतिरुच्यते। सहकारि आलोकादिकं। आलम्बनं घटादिकं। समनन्तरप्रत्ययः पूर्वज्ञानम्। एतान् चतुर्विधान् हेतून् प्राप्य चित्तं ज्ञानं चैत्याः तदभिन्नास्सुखादयश्च जायन्त इति प्रतिज्ञार्थः। इयं हीयेत प्रतिज्ञा। पूर्वक्षणवृत्तित्वाभावे कारणत्वायोगात्। उत्तरक्षणवृत्तित्वाभावे वर्तमानत्वग्राहिप्रत्यक्षविषयत्वायोगात्। अन्यथा कारणस्य विषयतासिध्यर्थं तस्यापि कार्योत्पत्तिक्षणे स्थित्यभ्युपगमे घटद्वये यौगपद्यं प्रसज्यते। अथैतद्दोषपरिजिहीर्षया कारणस्य कार्योत्पत्तिक्षणे स्थितिमनभ्युपगम्य कारणक्षण एव तस्य विषयत्वमप्यभ्युपगम्येत, तदा संप्रयोगज्ञानयोर्हेतुहेतुमतोः यौगपद्यं स्यात्। एतेन पूर्वक्षणविनाशस्योत्तरक्षणकारणत्वमपि निरस्तम्। तथा सत्यधिपत्यादिकारणत्वप्रतिज्ञाविरोधात्। किं च पराभिमतो निरोधाख्यो विनाश एव न संभवति। एवं हि ते कल्पयन्ति। सर्वत्र निरन्वयो निरनुवृत्तिक एव स निरोधशब्देनोच्यते, स द्विविधः स्थूलस्सूक्ष्मश्च। मुद्गरपातानन्तरं सर्वैरुपलभ्यमानो घटनाशस्स्थूलः प्रतिसंख्यानिरोधः, प्रतिसंख्या विषयत्वप्रतिकूला तदसत्त्व-

ग्राहिणी लौकिकानां बुद्धिः, तद्विपरीतः अप्रतिसंख्यानिरोधस्सूक्ष्मः, लौकिकोपलब्ध्ययोग्योयुक्त्या साध्यमानः प्रतिक्षणविनाश इति द्विविधोऽप्ययं निरन्वयविनाशो न सम्भवति। अविच्छेदात्। सदैवाविच्छिन्नतयाऽनुवर्तमानस्य द्रव्यस्य पूर्वावस्थाप्रहाणोत्तरावस्थापत्तिभ्यामेव नाशोत्पत्तिव्यवहारः। न तु द्रव्यस्य क्वचिदपि निरन्वयविनाशोऽस्तीत्यारम्भणाधिकरणे समर्थितत्वात्। अतो विनाशस्य कारणत्वं न सम्भवति। 'आकाशं द्वौ निरोधौ च नित्यं त्रयमसंस्कृतम्। बुद्धिबोध्यं त्रयादन्यत् संस्कृतं क्षणिकञ्च त' दिति बौद्धैः 'संस्कृतं कार्यमेवानित्यं, असंस्कृतमकार्यमाकाशादित्रयं तु नित्य' मिति नित्यत्वेनाभ्युपगतस्य निरोधद्वयस्य कारणत्वानुपपत्तेश्च, अविच्छेदेनानुवर्तमानस्य कारणत्वे सदा सर्वत्र सर्वकार्योत्पत्तिप्रसङ्गात्। तत्सहकारित्वेनाभिमतानामपि निरोधद्वयस्य नित्यत्वात्। किं च निरोधद्वयं आकाशं चेति त्रयमवस्थात्मकं तुच्छमिति बौद्धा मन्यन्ते। तत्र तुच्छात् कथं जगदुत्पत्तिः? तुच्छादुत्पत्तौ तुच्छस्य निर्विशेषत्वेन कारणविशेषकृतकार्यविशेषव्यवस्थित्यसम्भवात् घटक्षणानन्तरं सर्वस्य जगत उत्पत्तिस्स्यात्। तुच्छादुत्पद्यमानञ्च कार्यं तुच्छमेव स्यात्। तस्य सद्रूपतया प्रतीतिर्न स्यात्। सुवर्णरुचकादिन्यायेन कारणानुसारित्वात् कार्यस्य। अपिच– आकाशमपि तुच्छमिति बौद्धैरुच्यते। तत्कथमुपपद्यते। प्रतीयते हि स्पष्टमाकाशं 'अत्र श्येनः पतति, अत्र गृध्र' इति श्येनादिपतनदेशत्वेन। नन्वियं प्रतीतिश्चन्द्रसूर्यालोकविषयत्वेनोपपद्यते। महान्धकारे 'खद्योत इह पतती' ति प्रतीतिः खद्योतप्रकाशविषयत्वेनोपपद्यते। 'इह चन्द्र इह सूर्य' इति प्रतीतिरपि तत्तदालोकविषयत्वेनोपपद्यते। तदाश्रितस्याप्यालोकस्य स्वरूपसम्बन्धविशेषेण तदाधारतया प्रतीतिरप्युपपद्यते। 'वने तिलक' इति वृक्षसमुदायरूपस्य वनस्य स्वरूपसम्बन्धविशेषेण तिलकवृक्षाधारत्वप्रतीतिदर्शनात्। आकाशस्यापि हि श्येनाधारता स्वरूपसम्बन्धविशेषेणैवोपपादनीया। निबिडमूर्तद्रव्यस्य भूतलादेरिव तस्य मुख्यतया गुरुद्रव्याधारत्वासम्भवात्। किं च– 'इह पक्षी, नेह पक्षी' ति आधारत्वानाधारत्वप्रतीतिद्वयं अवयव-

भेदावच्छेदेन शक्यमुपपादयितुमालोके। नत्वाकाशे । तस्य निरवयवत्वात् । न चाकाशेऽपि तत्तदधःक्षितिभागभेद एव अवच्छेदकभेदस्स्यादिति वाच्यं। ऊर्ध्वाधरदेशयोः 'इह पक्षी, नेह पक्षी' ति प्रतीत्योस्तदभावात् । तस्माच्छ्येनपतनादिप्रतीतेरालोकविषयत्वसम्भवात् आकाशे सा न प्रमाणमिति चेन् उच्यते— अस्तितावत् 'प्राग्भागे श्येनः पतति प्रत्यग्भागे गृध्र' इत्यादिप्रतीतिः । तस्यां प्राग्देशादिरूपाधारः प्रतीयते । स एवाकाशः । तद्व्यतिरेकेण दिशोऽनंगीकारात् । तस्यैव तत्तदुपाधिभेदेन प्रागादिरूपत्वोपपत्तेः। न च वाच्यं तत्तदुपाधिसम्बन्धेन आलोक एव प्राग्भागादिरूपोऽस्त्विति । 'प्राग्भागे चन्द्रालोकः प्रत्यग्भागे तम' इत्यादिप्रतीतिष्वपि आलोकादेरप्याधारत्वेन प्रागादिदेशप्रतीतेः । एवं तर्हि प्राग्भागेऽवकाशोऽस्तीत्यादिव्यवहारेण अवकाशात्मकादाकाशादप्यन्यस्तदाधारो देशस्स्यादिति चेत् न । तत्रावकाशशब्दस्य निबिडमूर्तद्रव्यावस्थानविरोधिमूर्तद्रव्यान्तरनिरोधाभावपरत्वात् । अत एव 'प्राग्भागेऽवकाशोऽस्ति न प्रत्यग्भागे भुञ्जानैर्निबिड'इति क्वचिद्देशे अवकाशनिषेधोऽपि दृश्यते । न ह्याकाशस्य तत्र निषेधस्सम्भवति । सर्वगतत्वात् । असर्वगतत्वे चावरणापायेऽप्यवकाशाभावप्रसङ्गात् । न हि पूर्वमसन्नाकाशः । एवं च मूर्तद्रव्याभाव एवावकाशः तत्तदुपाध्यवच्छिन्नः प्रागादिव्यवहारालम्बनमस्तीत्यपि शङ्का निरस्ता । तस्य देशाधेयत्वेन प्रतीतेः, 'प्राग्भागेऽवकाशो नास्ति तत्र नीरन्ध्रमासते द्विजा'इति आवरणाभावरूपावकाशप्रतिषेधेऽपि प्रागादिदेशसत्त्वव्यवहाराच्च । नचैवमावरणाभावरूपावकाशस्येव प्राग्भागादिरूपदेशस्यापि देशाधेयत्वेन व्यवहारोऽस्ति । येन ततोऽपि व्यतिरिक्तो देशस्सिध्येत् । अयं प्राग्देश इत्यादिरेव हि व्यवहारः । न त्वस्मिन् देशे प्राग्देश इत्यादिरूपः । 'इहाकाश' इत्यपि लौकिकप्रतीतेस्तद्व्यतिरिक्तो देशस्स्यादिति चेन्न । लौकिकानामाकाशप्रतीतेरुपरि परितश्चावाङ्मुखेन्द्रनीलमहाकटाहवदवभासमाने मेरुशिखररत्नप्रभाविशेषत्वेनागमसिद्धे नीलद्रव्य एव व्यवस्थितत्वात् तस्य दिग्विशेषाधेयत्वेन प्रतीत्यविरोधात् । देशरूपस्याकाशस्य 'इदानीमिह घट'इत्यादि

प्रतीतिषु कालवत् पदार्थविषयत्वेन भानंविना क्वचिदपि लौकिकप्रतीतौ स्वातंत्र्येण भानानङ्गीकारात् । तस्मादाकाशस्य प्रामाणिकत्वात् 'आकाशं निरोधद्वयमिति तुच्छत्रयमेव नित्यं, सद्रूपमन्यत्सर्वं क्षणिक'मित्येतदयुक्तं। ननु क्षणिकत्वं प्रामाणिकं कथं प्रत्याख्यायते । प्रत्यक्षं हि वर्तमानवस्तुविषयं, अवर्तमानादतीतात् पूर्वक्षणवर्तिनोऽनागताच्चोत्तरक्षणवर्तिनस्स्वविषयं व्यावृत्तमवगमयति । यथा 'नीलो घट' इति नैल्यविशिष्टप्रत्यक्षं अरुणादिव्यावृत्तं घटमवगमयतीतिचेत् उच्यते– उदाहृतमभिज्ञाज्ञानं घटस्य वर्तमानकालसम्बन्धमिव 'सोऽयं घट' इति प्रत्यभिज्ञानं तस्यावर्तमानकालसम्बन्धमपि विषयीकरोति । अतस्तदनुसारादेकस्य वर्तमानावर्तमानकालद्वयसंबंधसिद्धौ क्रमिकत्वेन कालद्वयस्याविरोधोपपत्तेश्च वर्तमानकालसंबंधविषयं ज्ञानमयोगव्यवच्छेदमवगमयेत् नान्ययोगव्यवच्छेदं स्वावच्छेदेन वाऽन्ययोगव्यवच्छेदं । न तु सर्वात्मना । अत एव चित्रपटे नैल्यज्ञानं नानीलव्यावृत्तिं गमयति । प्रदेशविशेषावच्छेदेन वा तां गमयति । न हि धर्मयोरविरोधो धर्मिभेदेनैवोपपादनीयः । अपि तु सामानाधिकरण्यप्रमित्यनुदयेनापि । तदुदये तु स्वमनीषिकामात्रकाल्पितो विरोधो न प्रामाणिकानां हृदयंगमः । ननु स्मृतिप्रत्यक्षयोः क्लृप्तकारणाभ्यां 'स' इति 'अयं घट' इति च स्मृत्यनुभवरूपं ज्ञानद्वयमेव भवितु मर्हति । न प्रत्यभिज्ञारूपमेकज्ञानमिति चेन्न । तदिदं मया निहितं रजतमिति तदर्थिन इदमर्थे प्रवृत्तिदर्शनेन प्रत्यभिज्ञानस्यैकज्ञानत्वसिद्धौ तत्र कार्यबलात् तत्र संस्कारप्रत्यासत्तिसहितमिन्द्रियं कारणमिति कल्पनोपपत्तेः । ननु तथाऽपि प्रत्यभिज्ञाभ्रान्तिरूपैव क्रमसंवर्धमानेषु तरुगुल्मलतादिषु सन्ततसन्तन्यमानावयवोपचयापचयवत्सु गिरिसमुद्रादिष्वत्यन्तविलक्षणेषु बालवार्धक्यापन्नशरीरेष्वपि दृश्यते । अतः कूटसाक्षिणी प्रत्यभिज्ञा न क्वापि प्रमाणमिति चेन्न। उदाहृतप्रत्यभिज्ञानस्यावस्थाभेदेऽप्यवस्थावद्द्रव्यैक्यविषयत्वेन प्रामाण्योपपत्तेः । न हि प्रत्यभिज्ञानस्य अवस्थैक्यं विषयः येनाप्रामाण्यं भवेत् । किंत्ववस्थावद्द्रव्यैक्यमेव । न च आगमापाय्यवस्थातिरेकेणानेकावस्थानुयायि-

द्रव्यमेव नास्तीति वाच्यम् । तस्मिन्नन्तत उदाहृतप्रत्यभिज्ञानामेव प्रामाण्यसिध्या तत्प्रत्याख्यानायोगात् । ज्वालालूनपुनर्जातकेशनखादिप्रत्यभिज्ञामात्रस्य सादृश्यनिबन्धनभ्रान्तित्वकल्पनमपि न युक्तम् । बाधितज्ञानदृष्टान्तेन अबाधितज्ञानानामप्यप्रामाण्यकल्पने प्रमाणेन वस्तुसिद्धिमात्रस्य लोपप्रसङ्गात् । एतेन यद्बौद्धा वदन्ति– 'स्मृतिः पूर्वानुभूतेऽर्थे दर्शनं वार्तमानिके । तयोरत्यन्तभेदे च केनाभेदः प्रतीयताम् ॥ रूपशक्त्यादिभेदेन बालाद्वृद्धोऽतिभेदवान् । परस्मिन्पूर्वरूपस्य न लेशोऽप्युपलभ्यते ॥ परस्यापि न पूर्वत्र कथमेकन्तु तद्भवेत् । अवस्थानामयं भेदो नावस्थानवतो यदि ॥ अवस्था एव दृश्यन्ते न स्वप्नेऽपि ततो पर'मिति । ननु इदं सर्वं क्षणिकत्वनिराकरणहेतुजालं वैभाषिकमत इव न सौत्रान्तिकमते प्रवर्तते । तत्र यत्प्रत्यक्षविषयस्य तत्कारणत्वं न स्यादिति प्रत्यभिज्ञाविरोधापादनं तत्तावन्नप्रवर्तते । सा हि प्रतिज्ञा बाह्यार्थप्रत्यक्षत्ववादिनामेव । यच्च क्षणिकत्वकल्पनस्य प्रत्यभिज्ञाप्रत्यक्षेण बाधवचनं न तदपि प्रवर्तते । बाह्यार्थेषु प्रत्यक्षप्रत्यभिज्ञायामसिद्धेः । एवञ्च 'घटादि क्षणिकं अर्थक्रियाकारित्वात् शरीरादिवदिति बौद्धानां क्षणिकत्वानुमानमपि प्रत्यभिज्ञानबाधासिध्या निरुपद्रवं । अस्ति चात्रविपक्षबाधकतर्कस्सत्त्वोच्छित्तिप्रसंगः । अर्थक्रियाकार्यत्वमेव हि सत्त्वं । न ततोन्यज्जात्यादिरूपं । प्रमाणाभावात् । तच्चस्थायि वपक्षे न संभवति । तथा हि– स्थायी भावः स्वीयामर्थक्रियां क्रमेण कुर्यात् युगपद्वा । आद्ये कालांतरभाविनीं प्रत्यपि इदानीं समर्थो वा न वा । प्रथमेतावदिदानीमेव कुर्यात् । समर्थस्य क्षेपायोगात् । द्वितीये कालांतरेपि न कुर्यात् । नहीदानीमसमर्थः कालांतरे समर्थो भवति । युगपदिति पक्षे त्विदानीमेव कर्तव्यस्य सर्वस्य कृतत्वात् कालांतरे तस्यासत्त्वं भवेत् । ननु इह क्षणिकत्वानुमाने अस्ति प्रबलः प्रतिकूलतर्कः । क्षणिकत्वे हि त्वदुक्तविपक्षबाधकतर्कोपि न प्रवर्तते । तदुपयोग्यापाद्यापादकभूयस्सहचारदर्शनोपाध्यभावावधारणव्याप्तिग्रहणादीनामैकाधिकरण्यनियमात् । मैवं । एवमादीनामैकाधिकरण्यानियमे क्षणिकत्ववादिनामसंप्रतिपत्तेः । अतिप्रसं-

गशंका तु कार्यकारणभावस्य नियामकत्वेन निवारणीया। चैत्रमैत्रादयोहि प्रत्येकं कार्यकारणभावापन्ननिरंतरसन्तन्यमानालयविज्ञानक्षणनिचयात्मकाः। तस्मात् सौत्रांतिकपक्षे न कोपि दोष इत्यधिकया प्रत्यवतिष्ठमानानां सौत्रांतिकानां मतमित्थं— ज्ञानगतैर्नीलाद्याकारैः बाह्यार्थगतास्तेऽनुमीयंते। इंद्रियसन्निकृष्टेन नीलाद्यर्थेन जायमानं हि ज्ञानं स्वयमप्यर्थवन्नीलाद्याकारं भवति। तज्ज्ञानं स्वप्रकाशतया स्वात्मानं विषयीकुर्वत् स्वगतं नीलाद्याकारमपि विषयीकरोतीति ज्ञानस्य नीलादिषु नापरोक्ष्यानुभवः। नीलाद्यर्थिनो बहिः प्रवृत्तिस्तु नापरोक्षज्ञानात्। किंतु तदनन्तरभाविन आनुमानिकज्ञानात्। यथा वायुनिषेवणार्थिनश्शाखाचलनं दृष्ट्वा वृक्षमूले प्रवृत्तिः। न चाक्षुषशाखाचलनज्ञानात्। किं तु तल्लिंगवायुसञ्चारविषयानुमानिकज्ञानादिति। तत्रेदं दूषणं— इंद्रियसन्निकृष्टभावक्षणानन्तरक्षणे हि ज्ञानं जायते। तत्र तस्य भावक्षणस्य स्वधर्मसंक्रमणनिमित्तत्वं न युज्यते। असतः कुसुमादेः स्फटिकादिषु स्वधर्मसंक्रमणनिमित्तत्वादर्शनात्। तथाऽपि नीलादिसंक्रमणाभ्युपगमे तद्गतं पुरोवर्तित्व-नेदीयस्त्व-दवीयस्त्व-जडत्वादिकमपि संक्रामति न वा। संक्रामतिचेत्, आन्तरत्वज्ञानत्वादेस्तद्विरोधिनोऽवभासो न स्यात्। स्फटिके लौहित्यसंक्रान्तौ शौक्ल्यस्येव। अथ न संक्रामति दर्पणे मुखगतप्राङ्मुखत्वनेदीयस्त्वादिवत् तदा लिंगाभावात्तदवभासो न स्यात्। अतः क्षणिकवादे बाह्यार्थप्रत्यक्षस्येव तदनुमानस्यासम्भवात् अतस्तेषां व्यवहारसिध्यर्थं स्थायित्वमेवाङ्गीकरणीयम्। क्षणिकत्वेन भावानां यानीष्टप्राप्त्यनिष्टपरिहारार्थानि लौकिकानि विहितानि च कर्माणि तेषां यः कर्ता स न तत्फलभोक्ता। किंत्वन्य एवेत्यापत्तेरुदासीनानामपि फलसिद्धिस्स्यात्। कस्यापि कर्मसु प्रवृत्तिर्न स्यात्। भाविभोक्त्रैक्यभ्रमात् प्रवृत्तिरिति चेन्न। क्षणिकत्वनिश्चयवतःप्रवृत्त्यनुपपत्तेः। ननु भेदग्रहेऽपि पुत्रपौत्रादिपरम्परानुभाव्यफलेच्छया कर्मसु प्रवृत्तिदर्शनात्तथेहापि प्रवृत्तिस्स्यात्। तत्र कार्यकारणभावस्य नियामकत्वक्लृप्तेरिति चेत्। तर्हि पितृकृतानां सर्वेषां कर्मणां फलं पित्रनुभवादिफलस्मरणादिकञ्च पुत्रपौत्रादिपरम्परायां

भवेत् । कार्यकारणभावस्य स्वकीयविज्ञानसन्तान इव तस्यामपि सत्त्वात् । तस्मात् कार्यकारणभावस्यानियामकत्वात् फलादिव्यवस्थासिद्धये प्रत्यभिज्ञाप्रामाण्यनिर्वाहाय च आत्मनोऽन्येषां च स्थैर्यमेवाङ्गीकार्यम् । क्षणिकत्वानुमानस्य विपक्षबाधकतर्कस्तु न प्रवर्तते । समर्थस्यापि सहकारिसमवधानक्रमात् कार्यक्रमोपपत्तेरित्यादिक्षणिकत्वनिराकरणप्रपञ्चोऽन्यत्र द्रष्टव्यः ॥

संग्रहकारिका ॥

उक्ते वैभाषिकेण क्षणभवसमुदायद्वये सन्निकर्ष-
ज्ञानोपादानहानक्षितिजलदहनाद्युद्भवा नो घटन्ते ।
ज्ञानाकारानुमेयं तदसदपि तदा वक्ति सौत्रान्तिकाख्यो
नष्टार्थाकारसंक्रान्त्यघटनवचसा बोधनीयस्समन्दः ॥

इति समुदायाधिकरणम् ॥३॥

नाभाव उपलब्धेः ॥२७॥

वैधर्म्याच्च न स्वप्नादिवत् ॥२८॥

नभावोऽनुपलब्धेः ॥२९॥

क्षणिकत्वे नीलाद्यर्थानां प्रत्यक्षत्वमनुमेयत्वं वा न घटत इति वैशेषिकसौत्रांतिकमतयोरुक्तं दूषणं न योगाचारमते प्रवर्तते । नीलाद्यर्थानामान्तरविज्ञानरूपत्वेन स्वप्रकाशैस्तैरेव तत्प्रत्यक्षीकरणसंभवात् तदिति प्रत्यवस्थानात् सङ्गतिः । इदानीमिह योगाचारमतं घटपटादिज्ञानानां तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेण न घटत इत्यवश्यं ज्ञानेऽर्थसरूपं रूपमास्थेयम् । तावतैव सर्वव्यवहारोपपत्तेः । ज्ञानाकारनीलादिव्यतिरेकेण बाह्यार्थकल्पना नीलादीनां विज्ञानाकारत्वे च 'नीलादिकं ज्ञानाभिन्नं भासमानत्वात् ज्ञानसहोपलम्भनियतत्वात् ज्ञानव' दित्यनुमानञ्च । न च सहत्वस्य भेदगर्भत्वाद्द्वितीयहेतुर्विरुद्ध इति वाच्यम् । ज्ञानोपलम्भव्याप्योपलम्भविषयत्वस्य तदर्थत्वात्, तदविनाभावरूपस्य च व्याप्यत्वस्याभेदेऽपि सत्त्वात् । न

चाभेदे 'इदं जानामी' ति क्रियाकर्मभावरूपभेदावभासविरोधः । तस्य द्विचन्द्रज्ञानवद्भ्रान्तित्वात् । तदाहुः 'सहोपलम्भनियमादभेदो भेदतद्धियोः । भेदस्तु भ्रान्तिविज्ञानैः दृश्यश्चन्द्रइवाद्वय' इति । बाह्यस्य नीलादेः कथमान्तरज्ञानभेदावभासो भ्रम इति चेत्, बाह्यत्वावभासोऽपि भ्रम एव । उपरि स्थितानां नक्षत्रादीनामुचतां भूमिस्थत्वावभासवत् । एतेन 'अहं जानामी' ति कर्तृकर्मभावेन भेदावभासोऽपि व्याख्यातः । तदप्याहुः– 'अविभागोऽपि बुध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यत' इति । ननु वस्तुत एकस्य ज्ञानस्य 'अहमिदं जानामी' ति कर्तृकर्मक्रियात्मतया भेदेनैव स्फुरणं कथमिति चेत्, पूर्वपूर्ववासनावशात् । घटाकारज्ञानोत्पत्त्यनंतरं कपालाकारज्ञानोत्पत्तिस्तु वासनावैचित्र्यादिति । इदमयुक्तं । कर्तुः क्रियाकर्मतया बाह्यत्वेन प्रत्यक्षायां नीलाद्युपलब्धौ जाग्रत्यां तेषां ज्ञानाभेदानुमानानामनुत्थानात् । न च वाच्यं 'बाह्यं नीलादिकमुपयद्भिरपि ज्ञानानां नीलाद्याकारत्वमनुभवसिद्धमंगीकार्यं । तेनैव सर्वव्यवहारोपपत्तौ किं बाह्यार्थकल्पनया । न हि नीलाद्याकारद्वयमुपलभ्यत' इति । यतो नीलाद्यर्थविशेषविषयेच्छादिव्यवहारानुगुण्यमेव ज्ञानस्य नीलाद्याकारः । नतु बाह्यार्थस्येव मुख्यं नीलाद्याकारत्वमस्ति । नीलशीतोष्णादिसमूहालंबनानां परस्परविरुद्धानेकरूपत्वापत्तेः । स्वप्नदृष्टांतेन ज्ञानानां बाह्यार्थशून्यत्वकल्पनमपि नयुक्तं । बाधाबाधाभ्यां स्वप्नजागरितज्ञानयोर्वैधर्म्यात्, अर्थशून्यस्य ज्ञानस्य क्वचिदप्यनुपलब्ध्या स्वप्नज्ञानानामपि तादात्विकविषयत्वाच्च । वासनावैचित्र्यात् विचित्रज्ञानोदयसमर्थनमप्ययुक्तं, निरन्वयविनाशवादे वासनाधानस्याप्यसंभवात् ।

संग्रहकारिका ॥

विज्ञानमेव त्रिपुटं योगाचारस्य जल्पतः ।
निह्नुतिर्वेद्यवेदित्रोः उपलब्ध्यैव वार्यते ॥

इति उपलब्ध्यधिकरणम् ॥ ४ ॥

सर्वथाऽनुपपत्तेश्च॥३०॥

विज्ञानमात्रास्तित्ववादियोगाचारमतनिराकरणानंतरं तदप्यपलपतां माध्यमिकानां मतं निराक्रियत इति संगतिः। ते खलु एवमाहुः– 'नेष्टन्तदपि धीराणां विज्ञानं पारमार्थिकं। एकानेकस्वभावेन वियोगाद्वियदब्जवत्॥ विज्ञानानामपि नीलपीतशीतोष्णाद्येकानेकस्वभावत्वविकल्पदौस्थ्यान्न परमार्थसत् अतस्तुच्छत्वमेव तत्व' मिति। इदमयुक्तं। तुच्छत्वं प्रतिजानानस्य तत्तुच्छत्वं सत्त्वरूपमिति वा असत्त्वरूपमिति वा प्रकारांतरमिति वा अभिप्रायः। सर्वथाऽपि नसंभवति। लोके सत्त्वासत्वयोः नित्यानुवर्तमानद्रव्यावस्थाविशेषत्वेन आरंभणाधिकरणे प्रतिपादिततया तुच्छत्वं सत्त्वमेवेति वा, असत्त्वमेवेति वा, प्रकारांतरमिति वा, उपपादनासंभवात् सर्वेष्वपि कार्येषु सतएव कारणत्वेन केवलादसतः प्रकारांतरापन्नाद्वा कार्योत्पत्त्यभावात्। एतेन अभावात्मकत्वमेव तुच्छत्वं, चतुष्कोटिविनिर्मुक्तत्वं वा तुच्छत्वं। 'नसन्नासन्नसदसत् नचाप्यनुभयात्मकं। चतुष्कोटिविनिर्मुक्तं तत्त्वं माध्यमिकाविदु' रितिवचनादिति निरस्तं। भावातिरिक्ताभावानंगीकारेण अभावकारणतोक्तेः सत्कारणवादएव पर्यवसानात्। सद्बुद्धिशब्दवत् सत्त्वनिषेधादिबुद्धिशब्दानामपि देशकालपरिच्छिन्नवस्तुविषयत्वेन ततस्तुच्छत्वासिद्धेः। इदमिदानीमस्ति इदमेवंरूपंभवतीति सत्त्वबुद्धिशब्दयोरपि देशकालवस्तुपरिच्छिन्नसत्त्वविषयत्वेनैव लोके प्रसिद्धतया क्वचिदपि निरुपाधिकनिषेधासिद्धेः॥

संग्रहकारिका॥

सर्वशून्यत्ववादस्तु सर्वथानोपपद्यते।
यस्मात्सदसदित्युक्ती वस्त्ववस्थातदाश्रये॥

इति सर्वथानुपपत्त्यधिकरणम्॥९॥

नैकस्मिन्नसंभवात्॥३१॥

एवञ्चात्माकात्स्न्र्यम्॥ ३२॥

न च पर्यायादप्यविरोधोविकारादिभ्यः ॥ ३३ ॥
अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः ॥ ३४ ॥

निरस्तास्सौगताः । जैनानिरस्यन्ते । ते किलमन्यंते– जीवधर्माधर्मपुद्गलकालाकाशाख्यषड्द्रव्यात्मकंजगत्निरीश्वरं । तत्र जीवा बद्धयोगसिद्धमुक्तास्त्रिविधाः । धर्मो गतिमतां गतिहेतुर्व्यापी द्रव्यविशेषः । अधर्मस्स्थितिहेतुर्व्यापी द्रव्यविशेषः । पुद्गलस्त्वणुभूधरसमुद्रादिः । 'अभूदस्ति भविष्यती'ति व्यवहारहेतुरणुद्रव्यविशेषः कालः । आकाशोऽप्येकः । किंत्वनन्तप्रदेश इति । पुनश्चापरमपि संग्रहं कुर्वंति । जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षा इति । जीवा उक्ताः । अजीवो जीवभोग्यं सर्वं वस्तुजातं । आस्रवत्यनेन जीवो घटादिज्ञानरूपेणेत्यास्रव इंद्रियसंघातः । केचित्वास्रवति जीवे गच्छतिसति सर्वत्रानुगच्छतीति कर्मबंध आस्रव इत्याहुः । तदाह जिनदत्तः 'आस्रवः कर्मणा बंधो निर्जरस्तद्विमोचन'मिति । बंधः घातिकर्मचतुष्काघातिकर्मचतुष्कभेदेनाष्टविधः । तत्राद्यचतुष्कं जीवस्य ज्ञानदर्शनसुखवीर्यगुणानां मोक्षदशायामाविर्भविष्यतां प्रतिघातकं प्रवाहानादिपापरूपम् । द्वितीयचतुष्कं शरीर संस्थानतदभिमानतत्स्थिति तत्प्रयुक्तसुखादि निमित्तपुण्यमिश्रितत्वात् पुण्यरूपम् । निर्जरो निश्शेषं जीर्यत्यनेन कामक्रोधादिरिति व्युत्पत्त्या केशोल्लुंछनतप्तशिलारोहणादिरूपं तपः । संवर इंद्रियनिरोधः । स्वाभाविकात्मस्वरूपाविर्भावो मोक्षः । केचित्तु सततोर्ध्वगमनं मोक्षः । बंधमुक्तस्य ह्यूर्ध्वगमनं स्वभावः । यथा पञ्जरमुक्तशुकस्य, यथा वा निर्भिन्नस्य परिणतैरण्डबीजस्य, यथावा दृढपङ्कलिप्तस्य जलनिमज्जनप्रक्षीणपङ्कलेपस्य शुष्कालाबुफलस्य । इहत्वनादिकालप्रवृत्तबंधविगमात् सततोर्ध्वगमनं सर्वेषां लोकानामुपरि स्थितो निरवधिरलोकाकाशस्सततोर्ध्वगमनस्यावकाश इत्याहुः । तथा पठन्ति— 'गत्वा गत्वा निवर्तन्ते चन्द्रसूर्यादयो ग्रहाः । अद्यापि न निवर्तन्ते त्वलोकाकाशमार्गगा' इति ॥ अपरेत्वाविर्भूतज्ञानादिगुणस्योपरिदेशावस्थानं मोक्षइत्याहुः । सर्वमेतद्वस्तुजातं सप्तभङ्गीनयेन योजयन्ति ।

'स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यं, स्यादस्ति चावक्तव्यञ्च, स्यान्नास्तिचावक्तव्यञ्च, स्यादस्ति च नास्तिचावक्तव्यञ्चे'ति। अत्र सत्वासत्व-सदसत्व सदसद्विलक्षणत्व-रूपानिर्वचनीयत्व विषयाश्चत्वारः प्रकाराः । पुनश्चानिर्वचनीयत्वेन सह सत्वासत्वसदसत्वसंयोजनेन त्रयः प्रकारा इत्येवं सप्तप्रकारावादिभिरुत्प्रेक्षितुं शक्याः । ते सर्वेऽपि प्रकारा जैनैरीपदीपस्त्वाङ्गीकृतेषु सर्वेष्वपि पदार्थेषु वर्ण्यंते । स्याच्छब्द ईषदर्थ इति केचित् । अनैकान्त्यार्थ इत्यन्ये । उभयथाऽपि तिङन्तप्रतिरूपकमव्ययम् । सत्वे प्रदर्शितः सप्तभङ्गीनयस्स्यान्नित्यं स्यादनित्यमित्यादिरूपेण नित्यत्वभिन्नत्वादिधर्मेष्वपि समान इति तदिदं जैनमतमपि न युक्तम् । एकस्मिन्विनोपाधिभेदं विरुद्धानेकधर्मसमावेशासम्भवात् । नन्वेकस्मिन्नपि देशकालाद्युपाधिभेदेन विरुद्धधर्मसमावेशोऽभ्युपगम्यते । स न तत्रोपाधिभेदस्सम्भवतीत्येतावताऽभ्युपगम्यते । किं तु प्रमाणवत्त्वेन । अत एव पिंडत्वघटत्वयोः कालोपाधिभेदेन समावेशमभ्युपगच्छताऽपि सिद्धान्तिना जीवत्वेश्वरत्वादीनां तथा समावेशे प्रमाणन्नास्तीति तेषां यत्किंचिदुपाधिभेदेन समावेशो नाभ्युपगम्यते । एवञ्च प्रमाणाधीन एव धर्मसमावेशः । न तूपाधिसम्भवाधीन इति स्थिते सत्यत्वादिकं व्यवस्थापयाद्भिस्तैस्तैर्वादिभि रुपपादितानि सत्वासत्वसदसत्त्वादिषु प्रमाणानीति तेषां समावेशः कुतो न स्यादिति चेन्न । तैस्तैर्वादिभिरुत्प्रेक्षितानां सर्वेषां प्रामाण्यासंभवात् परस्परविरोधित्वेन केषांचिदाभासत्वावश्यंभावात् । अन्यथा प्रपंचसत्त्वादिवादिभिस्तदसत्यत्वादौ दोषाणामप्युच्यमानत्वेन तेषामप्यारोप्यत्वापत्त्याऽनैकांत्यवादिनस्तत्तद्वाद्युक्तदोषभाक्त्वस्यापि प्रसंगात् । एतेन यदुक्तं स्याद्वादमंजर्यां– 'अन्योन्यपक्षप्रतिपक्षभावाद्यथापरे मत्सरिणः प्रवादाः । नयानशेषानविशेषमिच्छन्नपक्षपाती समयस्तथान'इति, तन्निरस्तं । अपक्षपातेन सकलसमयोक्तसत्त्वादिसंग्रहे तत्तदुक्तासत्वदोषाणामपि संग्रहापत्तेः । ननु तर्हि लोकाविरोधेनैव सप्तभंगीनयं समर्थयामहे । सर्वसंप्रतिपन्नेन तावदेकस्य कालभेदेन सत्वासत्वे । अतस्तयोस्स्वस्वकालविवक्षया अस्तीति

नास्तीति च भंगद्वयं क्रमविवक्षया सदसदिदमिति तृतीयभंगः युगपत्सत्वासत्वविवक्षयाऽनिर्वचनीयमिति चतुर्थभंगः। न हि युगपदेकस्य सत्वमसत्वं च निर्वक्तुंशक्यं। युगपत्सत्वासत्वयोरनिर्वचनीयत्वेन सह सत्वस्यासत्वस्य क्रमिकोभयस्य च मेळनेऽवशिष्टं भंगत्रयमिति। तदाहानंतवीर्यः— 'तद्विधानाविवक्षायां स्यादस्तीति गतिर्भवेत्। स्यान्नास्तीति प्रयोगस्स्यात् तन्निषेधे विवक्षिते॥ क्रमेणोभयवांछायां प्रयोगस्समुदायभाक्। युगपत्तद्विवक्षायां स्यादवाच्यमशक्तितः॥ आद्यावाच्यविवक्षायां पंचमो भंग इष्यते। अंत्यावाच्यविवक्षायां षष्ठभंगस्समुद्भवी॥ समुच्चयेन युक्तश्च सप्तमो भंग उच्यत' इति। तस्मादविरोधेन सप्तभंगीनय उपपद्यत इति चेत्, यद्येवं पारिभाषिकोऽयं सप्तभंगीनयः तदास्वीक्रियत एव। घटादिस्स्वदेशेऽस्ति-अन्यदेशे नास्ति, स्वकालेऽस्ति-अन्यकाले नास्ति, स्वात्मनास्ति- अन्यात्मना नास्तीति देशकालप्रतियोगिभेदेन सत्वासत्वसमावेशे लौकिकपरीक्षकाणां विप्रतिपत्त्यभावात्। न चैतावता जैनाभिमतवस्त्वनैकांत्यसिद्धिः। स्वकाले सदेव अन्यकाले असदेवेत्यादिनियमक्षत्यभावात्। ननु सर्वधर्मानैकांत्यवादिनामेकत्वमपि न व्यवस्थितं। अतः 'स्यादनेक' मित्यनेकत्वपर्यायमादाय सत्वासत्वादिसमावेश उपपाद्यत इति चेन्न। प्रथमापेक्षितस्यैकत्वानेकत्वसमावेशस्याप्यविरोधेनोपपादयितुमशक्यत्वात्। संख्यैकांत्यानङ्गीकारे जीवधर्माधर्मादीनि षड्द्रव्याणीति स्वसिद्धान्तस्थित्युपन्यासायोगाच्च। किं बहुना। सर्वानैकान्त्यवादिनां 'अयमस्याः पुत्रः, अयमस्याः पतिः, अयमस्याः पिते'त्यादिव्यवस्थाया अप्यसिध्या तस्यां पुत्रादीनां मातृत्वाद्युचितव्यवहारा अपि न व्यवतिष्ठेरन्। तस्मात् सर्वबहिष्कार्योऽयमनेकान्तवादः। किं चात्मा देहपरिमाण इति जैनैरिष्यते। तदप्ययुक्तम्। मातङ्गशरीरं व्याप्य स्थितस्यात्मनो मशकशरीरप्रवेशे वैकल्यप्रसङ्गात्। मशकशरीरान्मातंगशरीरं प्रविशतस्तद्व्यापनसमर्थपरिणामाभावेन तत्र तस्य सर्वांगीणसुखानुभवाभावप्रसंगाच्च। ननु संकोचविकासवानात्मा तत्तच्छरीरानुसारेण संकोचरूपं विकासरूपं वा पर्यायमवस्थांतरमापद्यत इत्य-

भ्युपेयते। अतो न दोष इति चेन्न। तथासत्यात्मनो विकार तत्प्रयुक्तानित्यत्वादिप्रसंगात्। तस्मान्मोक्षदशायामात्मनो यदंत्यं परिमाणं तस्य तत्रैवावस्थानं जैनैरपि वक्तव्यं। तदनंतरं देहांतराभावेन तदुचितपरिमाणाप्रसक्तेः। अतो मोक्षदशावस्थितात्मस्वरूपवत् तत्परिमाणस्यापि नित्यत्वाविशेषात् तदेवात्मनस्स्वाभाविकं परिमाणमित्यंगीकर्तुं युक्तं। न तु संकोचविकासवत्त्वम्॥

संग्रहकारिका॥

सप्तभंगीनये कार्या न प्रत्याशा दिगंबरैः।
सत्वासत्वादियुगपत् नन्वेकस्मिन्नसंभवि॥

इति एकस्मिन्नसंभवाधिकरणं॥६॥

पत्युरसामञ्जस्यात् ॥३५॥

अधिष्ठानानुपपत्तेश्च ॥ ३६ ॥

करणवच्चेन्न भोगादिभ्यः ॥ ३७ ॥

अन्तवत्वमसर्वज्ञतावा ॥३८॥

सत्वासत्वादिविरोधाज्जैनानां मतमिव परस्परविरोधाद्वेदविरोधाच शैवानां मतमप्यसमंजसमित्युपपाद्यत इति संगतिः। कापाल-काळामुख-पाशुपत- सिद्धांतशैवाख्यचतुर्विधशैवमध्ये कापालानां काळामुखानांच मतं भाष्ये प्रदर्शितं। पाशुपतास्त्वित्थमाहुः- कार्यकारणयोगविधिदुःखांताः पंच पदार्थाः पशुपाशविमोक्षाय बोद्धव्याः। तत्र कार्याणि पृथिव्यादीनि पञ्चभूतानि, रूपादयः पञ्च गुणाश्चेति दशविधानि। करणानि ज्ञानेन्द्रियाणि पञ्च, कर्मेन्द्रियाणि पञ्च, मनोबुध्यहङ्काररूपाणि त्रीण्यन्तःकरणानीति त्रयोदशविधानि। ध्यानादिरूपो योगः। धर्मार्थव्यापारो विधिः। स व्रतद्वाररूपेण द्विविधः। भस्मस्नानभस्मशयनोपहारादिव्रतम्। भस्मस्नानं त्रिविधम्। त्रिषवणकर्तव्यं जलस्नानप्रतिनिधिरूपं नित्यमेकम्। मलमूत्रोत्स-

जेनक्षुतनिष्ठीवनादिषु कर्तव्यं जलशुद्धिप्रतिनिधिरूपानुस्नानाख्यं नैमित्तिकमन्यद्भस्मस्नानम् । भस्मशयनञ्च गृहस्थगृहेष्वन्तर्वह्निक्षितेन भस्मना कार्यं। उपहारष्षड्विधः— हसितगीतनृत्तहुडुक्कारनमस्कारजपभेदेन । तत्र हसितमट्टहासः । गीतं नृत्तञ्च यथारुचि गान्धर्वशास्त्रानादरेण । हुडुक्कारो जिह्वा तालुसंयोगेन निष्पाद्यमानो वृषभनादसदृशो नादः । यत्र लौकिका नभवंति तत्र चत्वार्येतानि गूढं प्रयोक्तव्यानि । जपः पञ्चब्रह्ममन्त्राणां नमस्कारः प्रसिद्धः । द्वाराणि क्रायनस्पन्दनमन्दयानशृङ्गारणापितत्करणापितद्भाषण भेदेन षड्विधानि । असुप्तस्यैव सुप्तलिङ्गप्रदर्शनं क्रायनम् । वातव्याध्यभिभूतस्येव शरीरावयवानां कम्पनं स्पन्दनम् । उपहतपादेन्द्रियस्येव गमनं मन्दयानम् । रूपयौवनसम्पन्नां कामिनीमवलोक्यात्मानं कामुकमिव यैर्विलासैः प्रदर्शयति, तदाचरणं शृङ्गारणम् । कार्याकार्यविवेकविकलस्येव लोकनिन्दितकर्मकरणमपितत्करणम् । व्याहतापार्थकादिशब्दोच्चारणमपितद्भाषणम् । दुःखान्तो द्विविधः । अनात्मकस्सात्मकश्च । अनात्मकस्सर्वदुःखानामत्यन्तोच्छेदः । सात्मकस्तु दृक्क्रियाशक्तिबललक्षणमैश्वर्यम् । तत्र दृक्छक्तिरेकाऽपि विषयभेदात्पञ्चधोपचर्यते । दर्शनं श्रवणं मननं विज्ञानं सर्वज्ञत्वं चेति । सूक्ष्मव्यवहितविप्रकृष्टाशेषचाक्षुषस्पार्शनादिविषयं ज्ञानं दर्शनम्। अशेषशब्दविषयं ज्ञानं श्रवणम् । निरवशेषशास्त्रविषयं ज्ञानं मननम् । ग्रन्थतोऽर्थतश्चासन्दिग्धं ज्ञानं विज्ञानम् । सर्वज्ञत्वं प्रसिद्धम् । क्रियाशक्तिरेकाऽपि त्रिविधोपचर्यते— मनोजवत्वं कामिरूपत्वं विकरणधर्मित्वञ्चेति । निरतिशयशीघ्रगामित्वं मनोजवित्वम् । कर्मानपेक्ष्य स्वेच्छयैवानन्तशरीरेन्द्रियाधिष्ठातृत्वं कामिरूपित्वम् । उपसंहृतशरीरेन्द्रियस्यापि निरतिशयैश्वर्यशालित्वं विकरणधर्मित्वम् । पशुपतिस्तु परमेश्वरस्सर्वत्रापि कार्ये निमित्तम् । पशूनां कर्मानपेक्ष्य स्वेच्छयैव फलप्रदः । निरतिशयस्वातंत्र्यशालित्वात् । न चैवं कर्मवैयर्थ्यम् । ईश्वरेच्छानुगृहीतकर्मणस्साफल्यात्, तदननुगृहीतस्य कर्मणः पर्जन्याननुगृहीतकृषिकर्मण इव वैफल्येऽपि दोषाभावात्, तदनुग्रहसम्भावनया कर्मसु प्रवृत्त्युपपत्तेः ।

सृष्टिक्रमोऽपि तादात्विकेश्वरेच्छाधीनः । न तु नियमेनाकाशादिरिति। एवंविधस्य पाशुपतमतस्य कापालकाळामुखमताभ्यां विरोधस्स्पष्टः। भस्मस्नानादेः क्रियातस्साम्येपि शवभस्मवत् किंचिद्भस्मभिक्षितं भस्मेति ग्राह्यभस्मस्वरूपेऽस्ति विरोधः। वेदेनचास्ति विरोधः। न हुड्कारादिकं वेदेषु तदुपबृंहणेषु स्पष्टमस्ति। शृङ्गारणं भस्मस्नानानुस्नानाभ्यां प्रत्याम्नानतया जलस्नानं जलशुद्धिनिवर्तनं प्राणिकर्मनियतसृज्यक्रमानपेक्षणश्चात्यंतं वेदमार्गविरुद्धं। एवं कापालादिशैवत्रयं परस्परविरोधाद्वेदविरोधाच्चासमंजसमिति सिद्धं। यद्यपि सिद्धांतशैवस्य नात्यंतं वेदविरोधोस्ति। वेदविरोधाभावे च कामिकादिवातुळांतानामष्टाविंशतितंत्ररूपाणामवांतरभेदानां परस्परविरोधस्त्वागमसिद्धांतदिव्यसिद्धांततंत्रसिद्धांततंत्रांतरसिद्धांतरूपपांचरात्रावांतरतंत्रभेदपरस्पराविरोधवत् तत्तत्तंत्रदीक्षिताधिकारिभेदेन समाधातुं शक्यः। कामिकादिषु शिवागमस्य वेदादुत्कर्षोक्तिश्च पांचरात्रस्य तत उत्कर्षोक्तिवत् समाधातुं शक्या । तथापि वेदप्रामाण्यमंगीकृत्यापि वेदं प्रच्छाद्य सिद्धांतशैवतंत्रेषु यदनुमानेनैवेश्वरप्रसाधनं कृतं तन्नूनं यथावेदमीश्वराभ्युपगमे प्रायः कारणवाक्येषु पुरुषोत्तमासाधारणेन नारायणनाम्ना कारणवस्तुनिर्देशात् स एव जगत्कारणं परब्रह्म भवेदिति तत्प्रच्छादनार्थमित्यवसीयते। अतस्तेषामनुमानेनेश्वरप्रसाधनमात्रस्यासामञ्जस्यमुद्भावयामः। लोके कुलालमृत्पिण्डादिभेददर्शनेन हि श्रुतिसिद्धजगन्निमित्तोपादानाभेदमविगणय्यानुमानेन केवलनिमित्तेश्वरः प्रसाध्यते। तर्हि लोकदर्शनेनैव शरीरित्वमप्यंगीकरणीयं। शरीरिण एव कुलालादेः कर्तृत्वदर्शनात्। न चाधिष्ठेयं मायादिकमेव तस्य शरीरं भवेत, स्वशरीरव्यापारे नियम्यातिरिक्तशरीरानपेक्षणस्य दृष्टत्वादिति वाच्यं। न हि शरीरमात्रमापादयामः। किं तु भोगाश्रयरूपं। भोगार्थं तथाभूतं शरीरमधितिष्ठतो हि सुखार्थं दुःखपरिहारार्थं वा काचित्कर्तृत्वं दृष्टं । तथा च कर्तृत्वनिर्वाहार्थं भोगाश्रयशरीराभ्युपगमे तन्मूलपुण्यपापवत्वं, शरीरस्यानित्यत्वनियमात् अंतवत्वं, जननमरणावृत्तिमतां किंचिज्ज्ञत्वदृष्टेरसर्वज्ञत्वं च, स्यात्। अतोऽ

नुमानेनेश्वरसिद्धिमिच्छतां यथाभिमतरूप ईश्वरो नसिध्येदिति । यत्तु शास्त्रयोनित्वाधिकरणे अनुमानेनेश्वरसिद्धौ ईश्वरानेकत्वादिकमपि सिध्येदिति दूषणमुक्तं, तदप्यत्रत्यदूषणमेव । अत्रैव सूत्रकारस्यानुमानदूषणकंठोक्तिदर्शनात् । तत्र तु सूत्रकृतां 'तंत्वौपनिषदमि'त्यादिश्रुतितात्पर्यविचारेणैव परमेश्वरस्य शास्त्रयोनित्वं व्यवस्थापितं । अतो न तेन पौनरुक्त्यं । 'रचनानुपपत्ते'श्चेति सांख्याधिकरणे मृद्घटादिन्यायेग सुखदुःखमोहात्मकस्य जगतस्तत्सरूपेण कारणेन भवितव्यमित्यनुमिमानं सांख्यं प्रति तर्हि तद्दृष्टांतेनैव चेतनाधिष्ठानेनैव भाव्यमित्येतावन्मात्रमापादितं । न तु स्वतंत्रमीश्वरानुमानमनवद्यमिति तेनेश्वरः प्रसाधितः । अतस्तत्रेश्वरानुमानमनुमोदितं । इह दूषितमिति न विरोधः ।

संग्रहकारिका ॥

पत्युर्मतं नादरणीयमेव परस्परेण श्रुतितोऽपि बाधात् ।
निमित्तमात्रेश्वरकल्पनाया मधिष्ठितेरप्यसमंजसत्वात् ॥

इति पशुपत्यधिकरणं ॥७॥

उत्पत्त्यसंभवात् ॥३९॥

न च कर्तुः करणम् ॥४०॥

विज्ञानादिभावे वा तदप्रतिषेधः ॥४१॥

विप्रतिषेधाच्च ॥४२॥

पाशुपतवत् पाञ्चरात्रस्यापि तंत्रत्वेनाप्रामाण्यमाशंक्य निरस्यत इति संगतिः । पाञ्चरात्रिणो भागवता मन्यन्ते— भगवान्नारायणः परंब्रह्म स वासुदेवादिचतुर्व्यूहात्मनाऽवतिष्ठते । तत्र वासुदेवः परिपूर्णषाड्गुण्यशाली । षड्गुणास्तु ज्ञानबलैश्वर्यवीर्यशक्तितेजांसि । तत्र चेतनाचेतनात्मकसकलप्रपञ्चगताशेषविशेषोल्लेखिततया सकलवस्तुगोचरं तस्य ज्ञानं ज्ञानमुच्यते । जगत्प्रकृतिभावश्शक्तिः । जगत्सृजतोऽस्य श्रमाभावस्तिलकाळकवदप्रयत्नेन स्व-

सृष्टसकलजगद्धरणञ्च बलम् । अप्रतिहतेच्छत्वमैश्वर्यम् । जगत्प्रकृतित्वेऽपि पयसो दधिभावेनेव विकारविरहो वीर्यम् । जगत्सृष्टौ सहकार्यनपेक्षत्वं पराभिभवसामर्थ्यञ्च तेजः । ततो ज्ञानबलोन्मेषेण सङ्कर्षणरूपः प्रादुर्भवति । ततो वीर्यैश्वर्योन्मेषेण प्रद्युम्नरूपः । ततश्शक्तितेजस्समुन्मेषणानिरुद्धरूपः ।। सङ्कर्षणादयश्च जीवमनोऽहङ्काररूपाः । एवं चतुर्व्यूहं भगवन्तं प्रत्यहं पाञ्चकालिकेनाभिगमनादिपञ्चकेन वार्षशतिकादिव्रतेन समाराध्य पुरुषः क्लेशैर्मुच्यते । तत्राभिगमनं प्रातर्भगवन्मन्त्रजपस्तुतिनमस्कारादिकम् । ततः पूजार्थपुष्पादिसम्पादनमुपादानम् । ततः पूजनमिज्या । ततो भगवच्छास्त्रतदनुगुणपुराणागमश्रवणादिकं स्वाध्यायः । ततस्सायंसन्ध्यानन्तरं भगवति चित्तसमाधानं योग इति । तदिदमयुक्तमिति पूर्वपक्षः । तथा हि— पाञ्चरात्रे जीवस्योत्पत्तिराम्नायते । 'वासुदेवात्सङ्कर्षणो नाम जीवो जायते । सङ्कर्षणात्प्रद्युम्नसंज्ञं मनो जायते । तस्मादनिरुद्धसंज्ञोऽहङ्कारो जायत' इति । न च जीवस्यानादेरुत्पत्तिस्सम्भवति । न च सङ्कर्षणादीनां जीवाद्यभिमानित्वमनेनोच्यत इति वाच्यम् । तथा सति 'सङ्कर्षणो नाम जीव' इत्याद्यनुपपत्तेः । अनेन हि प्रसिद्धानामेव जीवमनोऽहङ्काराणां पाञ्चरात्रपरिभाषया सङ्कर्षणप्रद्युम्नानिरुद्धनामानि विधीयन्ते । ततश्च सङ्कर्षणादिनामभिरनूद्य तस्मिन् शास्त्रे यद्विग्रहायुधादिविधानं तत्ककाराद्यक्षराणां वर्णविशेषविधानवत् तेषामेव ध्यानार्थमिति सिध्यति । न तु मनोऽभिमानिनो देवाः तत्तद्विग्रहायुधादिविशिष्टा इति । किं च जीवस्योत्पत्तिरिव जीवात् कर्तुः मन आदिकरणोत्पत्तिश्च न सम्भवति । 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' ति परस्मादेव ब्रह्मणो मनआद्युत्पत्तिश्रवणात् । तस्मात् पाञ्चरात्रस्यापि वेदविरोधादप्रामाण्यमिति ।।

सिद्धान्तस्तु— पाञ्चरात्रे वासुदेवाज्जीवस्य जीवादिभ्यो मन आदीनामुत्पत्तिश्च नोक्ता । किं तु जीवाद्यधिष्ठातॄणां सङ्कर्षणादिव्यूहानां प्रादुर्भाव एव 'अजायमानो बहुधा विजायत' इति श्रुतिसिद्ध उक्तः । 'जनीप्रादुर्भाव' इति च धातुः । न तु प्रसिद्धानां जीवादीनां सङ्कर्षणादिसंज्ञा

उक्तः । तत्र जीवादिशब्दानां नियाम्यवाचिनां तत्तन्नियन्तृव्यूहविशेषपरत्वाच्छरीरवाचिनां शरीरिपर्यन्तत्वस्यापृथक्सिद्धप्रकारवाचिनां प्रकारिपर्यंतत्वस्य च द्वितीयाध्याये व्युत्पादयिष्यमाणत्वात् , पाञ्चरात्र एव जीवं प्रकृत्य 'सह्यनादिरनन्तश्च पारमार्थ्येन निश्चित' इति तस्योत्पत्तिप्रतिषेधाच्च । तस्माद्भगवता वासुदेवेन प्रणीतं पाञ्चरात्रं प्रमाणमूर्धन्यमेवेति ॥

संग्रहकारिका ॥

जीवोत्पत्त्यभिधानान्नग्राह्यं पाञ्चरात्रमिति चेन्न ।
व्यूहाभिव्यक्त्युक्तेस्तत्र निषेधाच्च जीवजनेः ॥

इति उत्पत्त्यसम्भवाधिकरणम् ॥८॥

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीमदद्वैतविद्याचार्यश्रीविश्वाजिद्याजिश्रीरङ्गराजाध्वरिवरसूनोरप्पयदीक्षितस्य कृतौ चतुर्मतसारे नयमयूखमालिकाख्ये द्वितीयपरिच्छेदे द्वितीयस्याध्यायस्य द्वि ती यः पा दः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ द्वितीयस्याध्यायस्य तृतीयःपादः ॥

सांख्यादितंत्राणां न्यायाभासमूलत्वाद्विप्रतिषेधाच्चासामंजस्यमुक्तं । इदानीं स्वपक्षस्यापि वियदुत्पत्त्यनुत्पत्त्यादिविषयश्रुतिविप्रतिषेधदोषोस्तीति प्रतिबंदीं मनसि विपरिवर्तमानां निरसितुं तदभावख्यापनाय ब्रह्मकार्यस्य प्रपञ्चस्य कार्यताप्रकारः पादद्वयेन विशोध्यते । नन्वेवं सति वियदादि कार्यत्वप्रसाधनस्य परोक्तदोषपरिहारार्थेन प्रथमपादेन संगत्या तदानंतर्यं

स्यात् । कारणविषयपादद्वयानंतरं कार्यविषयपादद्वयारंभ इति चेत् तर्हि कार्यविषयस्यास्य पादद्वयस्याध्यायसंगतिरेव न स्यात् । प्रथमाध्यायनिरूपिते वेदांतानां जगत्कारणब्रह्मसमन्वये परिपंथिनो विरोधस्य समाधानं हि द्वितीयाध्यायार्थ इति चेत् उच्यते— कारणविषयश्रुतीनां ब्रह्मणि समन्वयो वियदाद्युत्पत्तिश्रुतीनां स्वार्थसमन्वयमपेक्षते । अन्यथा वियन्नित्यत्वे पवनादीनां वियदादिजन्यत्वे च ब्रह्म कथं वियदादिकस्य कारणं भवेत् । कथंच ब्रह्म सर्वस्य कार्यस्य कारणं स्यात् । अतो वियदाद्युत्पत्तिश्रुतिसमन्वयचिंता, तदनुबंधेन जीवनित्यत्वज्ञातृत्वाणुत्वादिचिंता । अथवा 'विप्रतिषेधाच्चासमंजस' मित्यादिसूत्रैस्सांख्यादिदर्शनानां परस्परविरोधादप्रामाण्ये समर्थिते वेदांतेष्वपि वियदादेर्जीवस्यचोत्पत्त्यनुत्पत्तिश्रुतीनां जीवस्य ज्ञातृत्वज्ञानरूपत्वादिश्रुतीनां च परस्परविरोधेनाप्रामाण्ये तेषां कारणविषयेप्यप्रामाण्यशंकया निर्विचिकित्सं प्रामाण्यं नसिध्येदिति प्रथमाध्यायनिरूपितकारणविषयश्रुतिसमन्वयाक्षेपकतया ज्ञातृत्वादिविचारस्यापि साक्षादेव संगतिरनुसंधेया । इह प्रथमं वियदुत्पत्तिस्समर्थ्यते—

नवियदश्रुतेः ॥१॥

अस्तितु ॥२॥

गौण्यसंभवाच्छब्दाच्च ॥ ३ ॥

स्याच्चैकस्य ब्रह्मशब्दवत् ॥४॥

प्रतिज्ञाहानिरव्यतिरेकात् ॥ ५ ॥

शब्देभ्यः ॥६॥

यावद्विकारंतु विभागो लोकवत् ॥७॥

एतेन मातरिश्वा व्याख्यातः ॥८॥

असंभवस्तु सतोऽनुपपत्तेः ॥९॥

वियदुत्पद्यते नवेति तदुत्पत्तिप्रतिपादनक्षमश्रुतिसंभवासंभवाभ्यां संशये पूर्वपक्षः— वियन्नोत्पद्यते । तदुत्पत्तिप्रतिपादनक्षमश्रुत्यभावात् । छांदोग्ये तावत् तद्विषया श्रुतिरेव नास्ति । तैत्तरीयकाथर्वणादिषु सत्यपि सा न तदुत्पत्तिप्रतिपादनक्षमा । निरवयवत्वेन सर्वगतत्वेन च तस्य नित्यत्वावगमात् । नच द्वितीयहेतोरसिद्धिः । क्वचिदपि तदभावस्य बुध्यारोहासंभवात् । अत्र वियन्नास्तीति निषेधस्य व्याहतत्वात् । यत्र निषिध्यते तस्यैव देशस्य वियद्रूपत्वात् । अतस्तैत्तिरीयकश्रुतौ वियतिश्रुता संभूतश्रुतिः 'एतस्माज्जायते प्राणोमनस्सर्वेंद्रियाणि च । खंवायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' त्याथर्वणे वियत्यनुषक्ता जायतेश्रुतिश्च गौण्येव वाच्या । न च श्रुतानुषक्तयोस्सम्भूतशब्दयोर्जायतेशब्दयोश्चार्थभेदे कश्चिद्दोषः । आथर्वणएव 'तपसा चीयते ब्रह्म ततोऽन्नमभिजायते । तस्मादेतद्ब्रह्म नाम रूपमन्नं च जायत' इति श्रुतयोरपि ब्रह्मशब्दयोर्मुख्यामुख्यत्वदर्शनात् वियदुत्पत्तिवादिनाऽपि 'आकाशवत्सर्वगतश्च नित्य' इति श्रुतौ सकृच्छ्रुतयोर्नित्यसर्वगतशब्दयोः एकत्र मुख्यत्वस्य अन्यत्रामुख्यत्वस्य च अङ्गीकर्तव्यत्वाच्चेति । एवं प्राप्ते सिद्धान्तः—

यत्र तेजसः प्राथम्यं श्रुतं, तत्रैव छान्दोग्ये मृत्पिण्डादिदृष्टान्तपूर्वकं एकविज्ञानेन सर्वविज्ञानं यत्प्रतिज्ञातं तस्याहानिः आकाशस्यापि ब्रह्मकार्यत्वेन तदव्यतिरेकादेव भवति । तेनाकाशस्य ब्रह्मकार्यत्वं छान्दोग्यश्रुतेरप्यनुमतमवसीयते । 'सदेव सोम्येदमग्रआसी'दिति सृष्टेःप्रागेकत्वावधारणं 'ऐतदात्म्यमिदं सर्व' मिति सर्वस्य ब्रह्मात्मत्वप्रतिपादनमित्यादिशब्दैश्च तथाऽवसीयते । एवंचैभिश्शब्दैराकाशस्यापि साधारण्येन ब्रह्मविकारत्वेऽध्यवसिते तस्य विशिष्यापि ब्रह्मणो विभागरूपोत्पत्तिरुक्तैव भवति । यथा लोके 'सर्व एते देवदत्तस्य पुत्रा' इति सामान्येनाभिधाय केषांचिद्विशिष्य तत उत्पत्तिवचनेन सर्वेषामपि तत उत्पत्तिरुक्तैव भवति । एवं सति छान्दोग्ये तेजस्सृष्टिप्राथम्यश्रवणं कथमितिचेत् न खलु ब्रह्मणा तेजःप्रथमं सृष्टमिति श्रुतम् । येन श्रुतिप्राप्तं तत्प्राथम्यं स्यात् । किंतु

तेजस्सृष्टिः प्रथमपठितेति स्थानप्रमाणतस्तत्प्राथम्यं प्राप्नोति । नच स्थानप्रमाणं 'आकाशस्सम्भूत' इति सम्भूतश्रुतेरीष्टे। आकाशस्य नित्यत्वसाधको निरवयवत्वहेतुरप्रयोजकः । श्रुत्युदाहृतैकमृत्पिण्डारब्धघटशरावादिन्यायेन परिणामवादे निरवयवस्याप्यनित्यत्वोपपत्तेः । नच इह वियत् नास्तीति निषेधस्य व्याहत्या सर्वगतत्वसिद्धिः। तत्र इहप्रत्ययवेद्यस्य निबिडमूर्तद्रव्याभावरूपावकाशपरत्वोपपत्तेः । इह अवकाशे स्थातव्यमित्यादिव्यवहारेषु तस्यापि इहप्रत्ययवेद्यत्वात् । एवं सति 'वायुश्चान्तरिक्षं चैतदमृत' मिति वियदमृतत्वश्रुतेः का गतिरितिचेत्, वाय्वमृतत्वश्रुतेर्या गतिः सैव । स्पष्टोत्पत्तिकस्य वायोरपि ह्यमृतत्वं श्रूयते । किं बहुना । ब्रह्मव्यतिरिक्तं यद्यावदस्ति अव्यक्तमहदहङ्कारतेजःप्रभृतिकं, तत्सर्वमपि वियद्वायुवदुत्पत्तिमदेव । सर्वविज्ञानप्रतिज्ञाद्यनुरोधात् ॥

संग्रहकारिकाः ॥

वियन्नित्यं निरंशत्वादमृतत्वस्य च श्रुतेः ।
सृष्टौ च तेजःप्राथम्याद्गौणी तज्जननश्रुतिः ॥
असाधकं निरंशत्वममृतत्वममर्त्यवत् ।
श्रुतं न तेजःप्राथम्यं बाधः पाठेन कल्पने ॥
तस्माज्जनिमदाकाशं मरुच्च महदादिभिः ।
एवं हि सर्वविज्ञानप्रतिज्ञाद्युपपद्यते ॥

इति वियदधिकरणम् ॥१॥

तेजोऽतस्तथाह्याह ॥ १० ॥

आपः ॥ ११ ॥

पृथिवी ॥१२॥

अधिकाररूपशब्दान्तरेभ्यः ॥ १३ ॥

तदभिध्यानादेव तु तल्लिङ्गात्सः ॥१४॥

विपर्ययेण तु क्रमोऽतउपपद्यते च ॥१५॥
अन्तराविज्ञानमनसी क्रमेण तल्लिङ्गादिति
चेन्नाविशेषात् ॥ १६ ॥
चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोभाक्तस्तद्भाव-
भावित्वात् ॥ १७ ॥

ब्रह्मव्यतिरिक्तं सर्वं ब्रह्मकार्यमिति निर्णीतम् । इहेदं चिन्त्यते–किं तेजःप्रभृतीनां पूर्वपूर्वस्माद्वाय्वादेरुत्पत्तिः, तेषां ब्रह्मकार्यत्वं तु परम्परया, उत पूर्वपूर्वशरीरकात्परमात्मनस्तेषामुत्पत्तिरिति । तत्र पूर्वःपक्षः । पूर्वपूर्वस्मादेवोत्पत्तिः । 'वायोरग्निः, अग्नेरापः, अद्भ्यःपृथिवी' ति श्रुतिराह । ननु 'तदैक्षत बहुस्यां प्रजायेयेति तत्तेजोऽसृजत तत्तेज ऐक्षत तदपोऽसृजत ता आप ऐक्षन्त ता अन्नमसृजन्ते' ति ईक्षापूर्वकं तेजःप्रभृतीनां स्रष्टृत्वं श्रूयते । नचेक्षणमचेतनानां सम्भवति । अत ईक्षणलिंगात् तेजआदिशब्दाः तत्तच्छरीरकपरमात्मपरा इति तेजश्शरीरात् परमात्मनोऽपां अप्छरीरकात् ततः पृथिव्याश्चोत्पत्तिर्वक्तुं युक्ता । न च 'ता अन्नमसृजन्ते' ति अन्नशब्देन कथं पृथिव्यभिधीयत इति वाच्यम् । महाभूतसृष्ट्यधिकारात् । 'यदग्नेरोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्ये'ति त्रिवृत्कृतमहाभूतरूपोक्तिप्रकरणे अन्नस्य रूपोक्तेः, समानप्रकरणे 'अद्भ्यः पृथिवी' ति पृथिवीवाचकशब्दान्तरश्रवणाच्च । अतस्तेजआदिशब्दास्तत्तच्छरीरकपरमात्मपरा वाच्याः । अन्तर्याम्यधिकरणे सर्वेषां परमात्मशरीरत्वस्य उक्तत्वादितिचेत् मैवं– तथासति तेज आदिशब्दानां तत्तच्छरीरके परमात्मनि लक्षणया श्रुतहानिप्रसङ्गात् । न चेक्षणलिंगेन श्रुतिबाधनं युक्तम् । किंतु श्रुत्यनुसारात् ईक्षणमेव गौणं वक्तुं युक्तम् । 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च । खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी' त्याथर्वणमंत्रोऽपि पुत्रपौत्रप्रपौत्रादिरीत्या साक्षात्परम्परासाधारण्येन ब्रह्मकार्यत्वपरतयोपपद्यते । एवं प्राप्ते सिद्धान्तः–

चं कर्तृत्वस्यानौपाधिकत्वे यावद्द्रव्यभावित्वमिति नियमः, बदरफले श्याम-रक्तरूपयोरनौपाधिकयोरपि यावद्द्रव्यभावित्वादर्शनादिति सिद्धांतितं। अने-नैवात्मनः कर्तृत्वसमर्थनेन बुद्धिगतं कर्तृत्वमात्मन्यध्यस्यत इति वदंतो मृषावादिनोऽपि पराकृताः। अन्तःकरणमिति लोकवेदयोः करणत्वेन प्रसि-द्धाया बुद्धेः कर्तृत्वासंभवात्। 'शक्तिविपर्यया'दिति सूत्रे बुद्धेः करणशक्ति-र्हीयेत। कर्तृशक्तिश्चापद्येत। सत्यां च कर्तृशक्तौ कर्तृशक्तियुक्तायास्त-स्याः करणमन्यत्कल्पनीयं स्यात्। शक्तोऽपि हि कर्ता लोके करणमुपा-दाय प्रवर्तत इति। ततश्च नाममात्रे विवादस्स्यात्। नार्थभेदः कश्चित्। करणव्यतिरिक्तस्य कर्तृत्वाभ्युपगमादिति परैरुक्तत्वात् 'गुहां प्रविष्टा'विति सूत्रे च वस्तुतो नैकस्यापिकर्तृत्वं बुद्धेरचेतनत्वादात्मनो निर्विकारत्वादिति परैरेवोक्तत्वाच्चांतःकरणगतं कर्तृत्वमात्मन्यध्यस्यत इत्युक्तिः पुर्वापरविरुद्धे-वेत्यास्तांतावत्॥ इति कर्त्रधिकरणम्॥९॥

परात्तु तच्छ्रुतेः॥४०॥

'कर्ताशास्त्रार्थवत्त्वा'दिति प्रतिपादितं जीवानां कर्तृत्वं न परमात्मा-यत्तं। तथात्वे हि प्रवृत्तिनिवृत्त्योस्सालभंजीकावदस्वतंत्रं जीवं नियोजयतो-विधिनिषेधशास्त्रयोरानर्थक्यं स्यादिति पूर्वपक्षे प्राप्त उच्यते–

'परात्तुतच्छ्रुतेः।' तुशब्दः पक्षं व्यावर्तयति। तच्च कर्तृत्वं परात् परमात्मायत्तमित्यर्थः। 'य आत्मानमंतरोयमयती'ति तत्कर्तृत्वस्य परा-यत्तत्वश्रवणात्।

नन्वेवं विधिनिषेधशास्त्रानर्थक्यं तत्राह–

कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धा-वैयर्थ्यादिभ्यः॥४१॥

परमात्मा जीवकृतं पूर्वप्रयत्नमपेक्ष्य तदनुमतिदानेन प्रवर्तयति। एवं सति विधिप्रतिषेधावैयर्थ्यानुग्राहकत्वादिकं सिध्यति। स भगवान् पु-

रुषोत्तमः अवाप्तसमस्तकामस्सर्वज्ञस्सर्वेश्वरस्सत्यसंकल्पस्स्वमाहात्म्यानुगुणलीलाप्रवृत्तः एतानि कर्माणि समीचीनानि एतान्यसमीचीनानीति कर्मद्वैविध्यं सर्वं विधाय तदुपादानोचितदेहेंद्रियादिकं तन्नियमनशक्तिञ्च सर्वेषां क्षेत्रज्ञानां सामान्येन प्रदिश्य स्वशासनाववोधिशास्त्रञ्च प्रदर्श्यांतरात्मतयाऽनुप्रविश्यानुमंतृतया च नियच्छंस्तिष्ठति। ते च क्षेत्रज्ञास्तदाहितशक्तयः तत्प्रदिष्टकरणकळेबरादिकाः तदाधाराः स्वयमेव स्वेच्छानुगुण्येन पुण्यापुण्यरूपे कर्मणी उपाददते। ततश्च पुण्यरूपकर्मकारिणं स्वशासनानुवर्तिनं ज्ञात्वा धर्मार्थकाममोक्षैर्वर्धयते। शासनातिवर्तिनं च तद्विपर्ययेण योजयति। अतस्स्वातंत्र्यदयाळुत्वादिवैकल्यचोद्यस्य नावकाशः। दया हि नाम स्वार्थनिरपेक्षा परदुःखासहिष्णुता। सा च स्वशासनातिवृत्तिव्यवसायिन्यपि वर्तमाना न गुणायावकल्पते। प्रत्युतापुंस्त्वमेवावहति। तन्निग्रह एव तत्र गुणः। अन्यथा शत्रुनिग्रहादीनामगुणत्वप्रसंगात्। स्वशासनातिवृत्तिव्यवसायनिवृत्तिमात्रेणानाद्यनंत कल्पोपचितदुर्विषहानंतापराधानंगीकारेण निरतिशयसुखसंवृद्धये स्वयमेव प्रयतते। यथोक्तं–'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकं। ददामि बुद्धियोगं तं येन मामुपयांति ते' इति। ननु कूपे पतन्तं बालकं दृष्ट्वा उपेक्षमाणस्यानुमतिं कृतवतो वा पुंसो नैर्घृण्यादिप्रसक्तिवत् स्वाहितकर्मप्रवृत्तपुरुषविषये उपेक्षकत्वे वा अनुमंतृत्वे वा प्रयोजकत्वे वा सर्वेश्वरस्य तस्य निर्दयत्वादिकमवश्यंभावीति चेन्न। शास्त्रप्रवर्तनमुखेन सामान्येनाहितप्रवृत्तिनिवारणस्य कृतत्वान्नोपेक्षणं। तत्तत्प्रवृत्तिकाले तु विशेषतो निवारकत्वाभावलक्षणमुपेक्षकत्वं तु स्वतंत्रस्य न पर्यनुयोज्यं। एतादृशस्वातंत्र्यमेव दोष इति चेत्, तत्र किं प्रमाणं। न प्रत्यक्षं। तस्येश्वरविषये अप्रमाणत्वात्। नाप्यनुमानं। तत्र हि किमीश्वराख्यं धर्मिणं शास्त्रैकसमधिगम्यमभ्युपेत्य तत्स्वातंत्र्यस्य दोषत्वमनुमीयते। उतानभ्युपगम्य। अनभ्युपगमे हेतोराश्रयासिद्धिः। अभ्युपगमे धर्मिग्राहकेण शास्त्रेण तस्य गुणत्वेन प्रतिपन्नत्वात् कालात्ययापदिष्टत्वं। चिकीर्षापूर्वककृतिमत्वेन सालभंजिकाविलक्षणतया जीवस्य कर्तृ-

त्वान्नशास्त्रानर्थक्यं ॥ प्रवर्तकज्ञानचिकीर्षोत्पादकत्वेन साफल्यात्। कालादिवत् साधारणकृतिहेतोरीश्वरस्य न वैषम्यादिप्रसक्तिश्च। उक्तञ्च भगवता पराशरेण 'निमित्तमात्रमेवासौ सृज्यानां सर्गकर्मणी'ति। निमित्तमात्रं साधारणमित्यर्थः। गीतञ्च भगवताऽपि– 'तस्य कर्तारमपि मां विध्यकर्तारमव्यय'मिति। साधारणं कर्तारं विद्धि असाधारणकर्तारं न विद्धीति हि तस्यार्थः। उक्तञ्च व्यासार्यैः– 'वैयर्थ्यं यावता न स्याद्विधानप्रतिषेधयोः। नियंतृत्वश्रुतेस्तावान् संकोचो न स्वतः पर' इति।

नन्वेवं साधारणकारणत्वादिभिरेव सर्वकार्योत्पत्तिसंभवे ईश्वरस्य प्रयोजकत्वानुमंतृत्वादिकं कुतोऽभ्युपगंतव्यमिति चेत्, कल्पनायामेवेदृशचोद्यावकाशः। 'अंतः प्रविष्टश्शास्ता ज्ञानानां सर्वात्मा, एष ह्येव साधु कर्म कारयती'त्यादिप्रमाणप्रतिपन्नार्थे ईदृशचोद्यानवकाशादिति। जीवस्य परमात्मायत्तकर्तृत्वे न कोऽपि दोषः। यत्वत्र परैरुक्तं– 'ससमानस्सन्नुभौ लोकौसंचरति ध्यायतीव लेलायतीवे' ति इवशब्दप्रयोगात् कर्तृत्वमात्मनो नास्त्येवेति तदसत्। पूर्वाधिकरणे सांख्याभिमतकर्तृत्व मात्मनः पूर्वपक्षीकृत्य कर्तृत्वस्य परैरपि सिद्धांतितत्वात्। वस्तुस्थितौ चिंत्यमानायामचेतनत्वात् कूटस्थत्वाच्च नांतःकरणस्य वा चितो वा कर्तृत्वमित्यभ्युपगमस्य, परस्पराविवेकेन परस्परधर्माध्यास इत्यभ्युपगमस्य च; परेषां सांख्यानाञ्च साम्येन सांख्यपक्षात्परपक्षे वैषम्याभावेन 'कर्ताशास्त्रार्थवत्त्वा' दित्यधिकरणविरोधस्य परपक्षे दुर्निरसत्वात्। न च "यथाचतक्षोभयथे" त्यत्र तत्त्वमसीत्यादिभिर्बहुकृत्वः कर्तृत्वाद्यनर्थानाश्रयब्रह्माभेदबोधनात्कर्तृत्वमपरमार्थ इति परैरुक्तमिति वाच्यं। 'यो वै बालाक एतेषां पुरुषाणां कर्ते' त्यादिवाक्यैर्ब्रह्मणस्सर्वकर्तृत्वाभेदेन ब्रह्माभेदबोधने सर्वकर्तृत्वापातेनाकर्तृत्वाप्रसक्तेः, 'दृश्यते त्वग्र्यया बुद्ध्या, मनसा तु विशुद्धेन, ध्यायंतो मनसैव च' मिति करणत्वेन प्रतिपन्नस्य मनसः कर्तृत्वं 'योवेदेदं जिघ्राणी ति स आत्मा' 'एष हि द्रष्टा श्रोता मंता कर्ता बोद्धा विज्ञानात्मा पुरुष' इति कर्तृत्वेन प्रतिपन्नस्याकर्तृत्वमित्युक्तेरयुक्तत्वात् विज्ञान

शब्दिताया बुद्धेः कर्तृत्वे करणांतराभ्युपगमप्रसंगात् प्रकृतिविवेकलक्षण, समाधौ प्रकृतेः कर्तृत्वासंभवेन आत्मन एव कर्तृत्वमास्थेयमिति 'शक्तिविपर्ययात्' समाध्यभावाच्चे' ति सूत्रयोः स्वयमेवोक्तत्वाच्च। कर्तृत्वादिबंधस्यात्मगतत्वाभावे बंधमोक्षयोर्वैयधिकरण्यप्रसंगात्। न च कर्तृत्वाद्यनर्थाश्रयांतःकरणतादात्म्याध्यासाधिष्ठानभावलक्षणो वा 'अविद्यास्तमयो-मोक्षस्सा संसार उदाहृत' इत्युक्तरीत्या तदध्यासहेत्वविद्यालक्षणबंधो वा आत्मगतस्संभवतीति वाच्यं। 'तदधीनत्वादर्थव' दिति सूत्रे अविद्यात्मिका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणोजीवाः, तदेवाव्यक्तं क्वचिदाकाशशब्दनिर्दिष्टं 'एतस्मिन्नु खल्वक्षरे गार्गि आकाश ओतश्च प्रोतश्चेति, क्वचिदक्षरशब्दोदितं 'अक्षरात्परतः पर' इति श्रुतेः। क्वचिन्मायेति निर्दिष्टं 'मायां तु प्रकृतिं विद्यादि' ति मंत्रवर्णादिति शंकरभाष्ये परमेश्वराश्रिताया एवाविद्यायाः प्रतिपादनेन तन्मते जीवचैतन्ये संसारासंभवात्। न च वाचस्पतिना परमेश्वराश्रयेत्यत्र 'परमेश्वरंविषयत्वेनाश्रयती' ति परमेश्वराश्रया परमेश्वरविषयेत्यर्थः। विद्यास्वरूपस्य परमात्मनोविद्याश्रयत्वासंभवात्। यस्यां स्वरूपप्रतिबोधरहिताश्शेरत इत्यत्रापि यस्यामविद्यायां सत्यां शेरते जीवा इत्येवार्थः। अतश्च जीवाश्रया एवाविद्याः। न चाविद्योपाधिभेदाधीनो जीवभेदः, जीवभेदाधीनोऽविद्योपाधिभेद इति परस्पराश्रयादुभयासिद्धिरिति वाच्यं। बीजांकुरन्यायेनानादित्वादुभयसिद्धेरिति अविद्यानां जीवाश्रितत्वमेव समर्थितामिति वाच्यं। न च तस्याः जीवाश्रयत्वं। जीवशब्दवाच्यस्य कल्पितत्वात्, आविद्यकत्वाज्जीवशब्दवाच्यस्य, जीवशब्दलक्ष्यस्य तु ब्रह्माव्यतिरेकेण ब्रह्माश्रयत्वपक्षस्यैवाश्रितत्वापातादित्यानंदगिरिप्रभृतिभिस्तस्य पक्षस्य दूषिततया 'आश्रयत्वविषयत्वभागिनी निर्विशेषचितिरेव केवला। पूर्वसिद्धतमसो हि पश्चिमे नाश्रयो भवति नापि गोचर' इत्युक्तरीत्या चिन्मात्रस्यैवाविद्याश्रयत्वेन जीवस्य बंधाश्रयत्वासंभवात्। न च बंधो मोक्षश्च न जीवाश्रितः, अपि

तु, चिन्मात्राश्रितएव, अतस्संभवत्येवबंधमोक्षयोस्सामानाधिकरण्यमिति वाच्यं । अस्मिन्पक्षे मुक्तिर्नाम चिन्मात्राश्रितांतःकरणतादात्म्याध्यासाधिष्ठानभावापादकाऽविद्यानिवृत्तिरेव वाच्या । तत्रचाविद्यैक्यपक्षे एकमुक्तौ सर्वमुक्तिप्रसंगः । नचकस्यापि मुक्तिर्नास्तीति शक्यं वक्तुं । 'शुकस्तु मारुताच्छीघ्रां गतिं कृत्वांतरिक्षगां । दर्शयित्वा प्रभावं स्वं सर्वभूतगतोऽभवत् ॥ तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदे, तद्यो यो देवानां प्रत्यबुध्यत स एव तदभव'दित्यादिप्रमाणविरोधप्रसंगात् । अतोऽविद्यानानात्वेऽभ्युपगंतव्ये तत्र च, चिन्मात्राश्रितसर्वाविद्यानामेकविद्यानिवर्त्यत्वे एकमुक्तौ सर्वमुक्तिप्रसङ्गदोषतादवस्थ्यात् , एकाविद्यानिवृत्तिमात्राभ्युपगमे चाविद्यांतराश्रयत्वस्य, चिन्मात्रे पूर्वमिव स्थितत्वेनांतःकरणतादात्म्याध्यासाधिष्ठानभावलक्षणसंसारानिवृत्तेस्तदवस्थत्वात् । अतस्सोऽप्यनुपपन्नः । नन्वहमिति भासमाने, अविद्यांतःकरणोपाधिभेदभिन्ने चिदंशे अविद्यानिवृत्तिरुद्देश्येति चेन्न । अविद्याया अन्तःकरणस्य वा न दर्पणादिवत् प्रतिबिंबनोपाधित्वं संभवति। दर्पणाद्युपाधिप्रतिहतनायनरश्मिगृह्यमाणस्य बिंबस्यैव प्रतिबिंबतया, चक्षुषा अगृह्यमाणस्य चिदंशस्य प्रतिबिंबत्वासंभवेन घटादिवदवच्छेदकतयोपाधित्वे वक्तव्ये अन्तःकरणस्य संचरत उपाधित्वे अवच्छेद्यचैतन्यप्रदेशस्य भिन्नभिन्नतया कृतहानाकृताभ्यागमप्रसंगेन व्यापिन्या एवाविद्याया अवच्छेदकतयोपाधित्वे वक्तव्ये सर्वस्याप्यविद्यांतर्गतचित्प्रदेशस्य सर्वाविद्यावृतत्वेन एकस्य ब्रह्मविद्यया एकाविद्याया नाशेऽप्यविद्यांतरायत्तसंसारतादवस्थ्यात्, अविद्यावच्छिन्नाविकारप्रदेशे अनवच्छिन्नस्य ब्रह्मणोऽवस्थानासंभवेन ब्रह्मणो विकारांतरवस्थानप्रतिपादकांतर्यामिब्राह्मणानांजस्यप्रसंगाच्च । अंतर्यामिब्राह्मणस्य जीवविषयत्वाभावस्यांतर्याम्यधिकरणसिद्धत्वात् । नहि घटानवच्छिन्नाकाशस्य घटांतरवस्थितिस्संभवति । 'अत्र ब्रह्मसमश्नुत 'इति तन्मते अत्रैवब्रह्मभावावेदकश्रुतिव्याकोपश्च स्यात् । अविद्यावच्छिन्नदेशे अनवच्छिन्नब्रह्मभावासंभवात् । विकारांतरवस्थितस्य च गीताचार्यस्य भगवतः कृष्णस्य जीवत्वमेव स्यात् । ततश्च चिदाश्रित-

सर्वाविद्यानिवृत्तिकामनारूपमुमुक्षाया असंभवात्, एकाविद्यानिवृत्तिमात्रेण संसारस्यानपायात्, मुमुक्षाब्रह्मविचारादिकं वा एतादृशविवेकशालिनां न-स्यात् । अतएव न प्रतिबिंबोनाप्यवच्छेदो जीवः । अपितु कौंतेयस्यैव राधेयत्ववत् ब्रह्मण एवाविकृतस्याविद्यया जीवभाव इति पक्षोऽपि व्युदस्तः। तथासति नित्यमुक्तश्रुते र्निर्विषयत्वप्रसङ्गात् । पारमार्थिकशोकाभावाभि-प्राया नित्यमुक्तत्वश्रुतिरिति चेत् मोक्षे शोकाभावश्रुतेरपि पारमार्थिकशो-काभावविषयत्वप्रसंगात् । 'विवादगोचरतापन्नप्रमाणज्ञानं स्वप्रागभावव्य-तिरिक्तस्वविषयावरणस्वनिवर्त्यस्वदेशगतवस्त्वंतरपूर्वक' मित्यज्ञानस्य ज्ञा-नसमानाधिकरणत्वस्य विवरणे प्रतिपादितत्वात्, 'जडस्याज्ञानाश्रयत्वे च भ्रांतिसम्यग्ज्ञानयोरपि तदाश्रयत्वप्रसंग' इति विवरणकृतोक्तत्वाच्च, ज्ञात्रा-श्रितत्वेऽज्ञानस्य तदधीनं कर्तृत्वादिकमपि तस्यैव । ततश्चाज्ञानस्य ज्ञाना-श्रयशुद्धजीवाश्रितत्वात् कर्तृत्वादिकमप्यज्ञानाश्रयशुद्धजीवाश्रितमेवेति सि-द्धं । ततश्च ' ध्यायतीवेति जीवशब्दप्रयोगः परतंत्रप्रभौ ' प्रभुरिवे ' त्यु-क्तिवत् । अतः परतंत्रकर्तृत्वाश्रयत्वाज्जीवस्य इवशब्दप्रयोग उपपद्यत-इत्येवास्थेयम् ॥

इति परायत्ताधिकरणं ॥६॥

अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके ॥४२॥

'ज्ञाज्ञौ द्वावजावीशनीशा ' वित्यादिभेदश्रुत्यनुरोधादभेदवादो जा-त्याद्यभेदाभिप्रायेण गौणोनेतव्यः । अथवा ' तत्त्वमस्याद्यभेदश्रुत्यनुरोधा-द्भेदव्यपदेश औपाधिकभेदपरतया नेतव्यइत्येवं पूर्वपक्षे प्राप्त उच्यते—

अंशोनानाव्यपदेशादन्यथाचापि दाशकितवादित्वमधीयत-एके ॥ नानाव्यपदेशात् = भेदव्यपदेशात् । अन्यथाचापि = अभेदनापि व्यपदेशात् , श्रुतिद्वयानुग्रहाय ब्रह्मणोंशोजीवइत्यवमन्यते । चिदचिद्वि-शिष्टं हि ब्रह्मणस्स्वरूपं । तत्र विशेषणभूताचिदंशस्यांतर्भूतत्वादभेदव्यप-

देशोपपत्तिः । विशेष्यापेक्षया विशेषणस्य भिन्नत्वाद्भेदव्यपदेशस्याप्युपपत्तिः । 'ब्रह्मदाशा ब्रह्मदासाब्रह्मेमे कितवाउते'ति दाशकितवादीनामपि ब्रह्मत्वमेके शाखिनः अधीयते । नास्याभेदव्यपदेशस्य गौणत्वं वक्तुं युज्यते । नापि सृज्यत्वसंहार्यत्वादिलक्षणभेदव्यपदेशस्य मानांतरासिद्धार्थाभिधायिनोऽनुवादित्वं गौणत्वं वा वक्तुं युज्यते । अतोव्यपदेशद्वयमुख्यत्वायनीलगोत्वाद्यपृथक्सिद्धविशेषणभूतरूपजात्यादिविशिष्टद्रव्यस्य यथा रूपजात्यादिविशेषणमंशः एवमपृथक्सिद्धविशेषणभूतशक्तिस्थानीयो जीवोंऽश इत्यर्थः ॥

मंत्रवर्णात् ॥४३॥

'पादोऽस्य विश्वाभूतानी'ति मंत्रवर्णेन सर्वजीवानां भूतशब्दितानां पादशब्दितांशत्वप्रतिपादनाच्च जीवो ब्रह्मविशेषणांशः ।

अपि स्मर्यते ॥४४॥

'ममैवांशो जीवलोक' इति गीतावचनाच्च अंशत्वं । ननु जीवस्यांशत्वे जीवस्य ब्रह्मैकदेशत्वावश्यंभावेन तद्गता दोषाः ब्रह्मणि स्युः । नेत्युच्यते ॥

प्रकाशादिवत्तु नैवं परः ॥४५॥

तुशब्दश्चोद्यं व्यावर्तयति । परः परमात्मा । एवं नजीववद्दुष्टः । प्रकाशादिवत् । यथा प्रकाशगोत्वादिविशिष्टप्रभावद्गवादिद्रव्यस्य प्रभा गोत्वादिकमंशः, तादृशोऽयमंशः । नतु घटाकाशादिवत् तदेकदेशरूपः । अतो न जीवदोषेण परस्य दुष्टता ।

स्मरंति च ॥४६॥

स्मरंति च पराशरादयः । 'एकदेशस्थितस्याग्नेर्ज्योत्स्नाविस्तारिणी यथा । परस्य ब्रह्मणशक्तिस्तथेदमखिलं जग'दिति प्रकाशाद्यंशसाम्यं ।

ननु सर्वेषां जीवानां ब्रह्मांशत्वे समाने केषां चिद्वेदाध्ययनाद्यनुज्ञा-केषांचित्परिहार इति व्यवस्था कथं संगच्छतां । तत्राह—

अनुज्ञापरिहारौ देहसंबंधाज्ज्योतिरादिवत् ॥४७॥

यथाऽग्न्यादेरेकरूपस्यैव श्रोत्रियचंडालागारादिसंबंधवशेन हेयत्वोपा-देयत्वे, एवं ब्रह्मांशत्वाविशेषेऽपि जीवानां त्रैवर्णिकात्रैवर्णिकशरीरसंयोगा-द्वेदाध्ययनाद्यनुज्ञापरिहारावुपपद्येते ।

असंततेश्चाव्यतिकरः ॥४८॥

प्रतिशरीरं भिन्नानां जीवानामणुत्वेन सर्वत्रासंततत्वात् न भोगव्य-तिकरदोषोऽपि भवति ।

ननु जीवब्रह्मभेदपक्षेऽपि अविद्याकृतोपाधिभेदाद्भोगसंकर उपप-त्स्यते । तत्राह—

आभास एव च ॥४९॥

अखंडैकरसप्रकाशमात्रस्वरूपस्य ब्रह्मण अविद्याकृतस्वरूपतिरोधान-तत्पूर्वकोपाधिभेदपरिकल्पनहेतुराभास एव । प्रकाशस्वरूपस्य तिरोधानं हि प्रकाशनाश एवेति पर्यवस्येत् ।

ननु पारमार्थिकोपाध्युपहितब्रह्मजीववादे उपाधिभेदहेतुभूतानाद्यदृ-ष्टवशाद्भोगव्यवस्था भविष्यति । तत्राह—

अदृष्टानियमात् ॥५०॥

ब्रह्मस्वरूपस्य छेदनभेदनाद्यसंभवेन सर्वेषामप्यदृष्टानामनियतत्वान्न भोगव्यवस्था सिध्येत् ।

ननु अदृष्टहेतुभूताभिसंध्यादिव्यवस्थया अदृष्टव्यवस्था तद्द्वारा भोगव्यवस्था च भविष्यतीत्यत्राह—

अभिसंध्यादिष्वपि चैवं ॥५१॥

अभिसंध्यादीनामपि छेदनाद्यनर्हब्रह्मस्वरूपमात्रसंबंधित्वादव्यवस्था तदवस्थैव ।

प्रदेशभेदादिति चेन्नांतर्भावात् ॥५२॥

ननु ब्रह्मस्वरूपस्यैकत्वेऽप्युपाधिसंबंधिप्रदेशभेदादुपपद्यते भोगव्यवस्थेति चेन्न । उपाधीनां तत्र तत्र गमनात्सर्वप्रदेशानां सर्वोपाध्यंतर्भावेन भोगव्यतिरेकस्तदवस्थ एव प्रदेशभेदेनोपाधिसंबंधेऽपिसर्वस्य ब्रह्मप्रदेशत्वात् सर्वसंबंधिदुःखं ब्रह्मण एव स्यादिति ब्रह्मभावो महाननर्थआपद्येतेति । अतो जीवो ब्रह्मणो विशेषणांश इति स्थितं ॥

इति अंशाधिकरणम् ॥ ७ ॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताबिरुदांचितैः श्रीमद्रंग रामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां द्वितीयाध्यायस्य

तृतीयः पादः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ।

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ।

श्रीः

श्रीमते हयवदनपरब्रह्मणेनमः ।

॥ श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

तथा प्राणाः ॥ १ ॥

'असद्वा इदमग्रआसीत् तदाहुः किंतदासीदिति ऋषयो वावते अग्रे सदासीत्तदाहुः के ते ऋषय इति प्राणावा ऋषय' इति जगदुत्पत्तेः प्राक् प्राणशब्दितानामिन्द्रियाणां सद्भावश्रवणात् प्राणोत्पत्तिवादिश्रुतयो जीवोत्पत्तिवादिश्रुतिवदन्यथा नेया इति पूर्वपक्षे प्राप्त उच्यते–

तथा प्राणाः । वियदादिवत् प्राणशब्दवाच्यानीन्द्रियाण्युत्पद्यन्त एव । सदेव सोम्येदमग्रआसीत्, आत्मावा इदमेकएवाग्र आसी' दित्यादिपु प्राक्सृष्टेरेकत्वावधारणात्, 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि चे' ति इंद्रियाणामाहत्योत्पत्तिश्रवणाच्च उत्पद्यन्त एव । नचेन्द्रियोत्पत्तिवादो

जीवोत्पत्तिवदन्यथा नेयः, बाधकाभावात् । 'प्राणा वा ऋषय' इत्यत्र प्राणशब्दस्य सार्वज्ञ्यवाचि ऋषिशब्दसमानाधिकृततया परमात्मवाचित्वे- नेन्द्रियवाचित्वाभावात् ॥

कथं तर्ह्येकस्मिन् परमात्मनि 'प्राणावाव ऋषय' इति बहुवचनो- पपत्तिरिति चेत् तत्राह–

गौण्यसंभवात्तत्प्राक्छ्रुतेश्च ॥२॥

बहुवचनश्रुतिर्गौणी । तत्र बहुत्वासम्भवात् । परमात्मन एव सृष्टेः प्रागवस्थानश्रुतेः, तस्यैव प्राणशब्देन प्रतिपादनीयत्वात् ॥

तत्पूर्वकत्वाद्वाचः ॥३॥

वागादीन्द्रियस्य वागिन्द्रियकार्याभिलपनकर्मभूतनामवाच्यवियदा- दिसृष्टिपूर्वकत्वात् प्रळये वागिन्द्रियादिकार्यशब्दाभिलापादिप्रयोजनाभा- वात् न प्रळये तेषामवस्थानमिति स्थितम् ॥

इति प्राणोत्पत्त्यधिकरणम् ॥१॥

सप्तगतेर्विशेषितत्वाच्च ॥४॥

इंद्रियाणि सप्तैव । 'सप्तइमे लोका' येषु चरंति प्राणा गुहाशया निहितास्सप्त सप्त' तिसप्तानामेव गतिश्रवणात् । "यदा पंचावतिष्ठंते ज्ञानानि मनसा सह । बुद्धिश्च न विचेष्टे'तेति योगदशाया मिंद्रियाणां परि गणितत्वाच्च सप्तैवेति प्राप्त उच्यते–

हस्तादयस्तुस्थितेऽतोनैवं ॥५॥

शरीरे स्थिते आदानादिकार्योपयोगित्वात् हस्तादयोहींद्रियाण्येव । अतो नैवं दशमे पुरुषे प्राणा आत्मैकादश इति आत्मशब्देन मनोऽभि- धीयते । 'इन्द्रियाणि दशैकंच, एकादशं मनश्चात्रे'ति श्रुतिस्मृतिभ्यां इन्द्रि- यसंख्या निश्चिता । न्यूनसंख्यावादा उपकारविशेषाभिप्रायाः अधिकसं- ख्यावादा मनोवृत्तिभेदादिति युक्तमाश्रयितुं ॥

इति सप्तगत्यधिकरणम् ॥२॥

अणवश्च ॥६॥

'सर्वएव समास्सर्वे अनंता' इत्यानंत्यश्रवणात् प्राणशब्दितानामिंद्रियाणां विभुत्वमिति पूर्वपक्षे प्राप्त उच्यते-

अणवश्च 'तमुत्क्रामंतं प्राणोनूत्क्रामती' त्यादिनोत्क्रांतिश्रवणात् परिमितत्वे सिद्धे उत्क्रांत्यादौ पार्श्वस्थैरनुपलभ्यमानत्वादणवश्च प्राणा भवंति। 'अनंतानुपास्त'इत्यानंत्यश्रुतिस्तु दर्शनश्रवणाद्यनंतकार्यविशिष्टतया तदुपासनविधिपरेति गंतव्यं ।

श्रेष्ठश्च ॥७॥

'आनीदवातं स्वधया तदेक'मिति महाप्रळये प्राणकार्यानन‌श्रवणात् मुख्यप्राणोत्पत्तिवादो जीवोत्पत्तिवादवन्नेतव्य इति शंकायामाह- प्राणश्चोत्पद्यते । ' श्रेष्ठप्राणोऽपि इंद्रियवदुत्पद्यते । आनीदवात ' मिति परब्रह्मणएकस्यैव विद्यमानत्वमुच्यते । न मुख्यप्राणस्य । 'अवात'मिति वायुमात्रसत्तायास्तत्रैव प्रतिषिद्धत्वात् ॥

इति प्राणाणुत्वाधिकरणं ॥३॥

न वायुक्रिये पृथगुपदेशात् ॥८॥

मुख्यःप्राणः किंवायुमात्रं उत तदीयस्पन्दनक्रिया उत वायुरेव कश्चिदवस्थाविशेषमापन्न इति विशये 'यः प्राणस्सवायुरि'ति श्रुतेः वायुमात्रं प्राणः । अथवा उच्छ्वासनिश्वासात्मकवायुक्रियायां प्राणशब्दप्रसिद्धेः क्रियावा स्यादिति पूर्वपक्षे प्राप्त उच्यते-

न वायुक्रिये पृथगुपदेशात् । 'एतस्माज्जायते प्राणो मनस्सर्वेंद्रियाणि च । खं वायुर्ज्योतिराप' इति वाय्वपेक्षया पृथगेव द्रव्योत्पत्तिप्रकरणे व्यपदेशान्नवायुमात्रं तत्क्रिया वा प्राणः ॥

तर्हि किमग्निवद्भूतान्तरं, नेत्याह —

चक्षुरादिवत्तुतत्सहशिष्ट्यादिभ्यः ॥९॥

चक्षुरादिवदयं जीवोपकरणविशेषः नतत्वांतरं, प्राणसंवादादिषु चक्षुरादिभिस्सह प्राणस्य शासनं श्रूयमाणं हि तत्साम्यमवगमयति । तथा मुख्यः-

प्राणइत्यादिव्यपदेशोऽपि प्राणशब्दितचक्षुरादिसाजात्यमेवावगमयतीत्यर्थः॥

ननु प्राणस्यापि जीवोपकरणत्वे तद्वदुपकारविशेषक्रिया वक्तव्या ।
तदभावान्नोपकरणत्वमित्यत्राह—

अकरणत्वाच्च नदोषस्तथा हि दर्शयति ॥१०॥

करणं क्रिया । उपकारकक्रियाराहित्याद्यो दोषः स न संभवति । शरीरधारणलक्षणोपकारकक्रियां हि श्रुतिरेव दर्शयति— 'अहमेवैतत्पञ्चधात्मानं विभज्यैतद्बाणमवष्टभ्य विधारयामी'ति 'प्राणेन रक्षन्नपरं कुलाय'मिति च ॥

नन्वेवं नामभेदात्कार्यभेदाच्च प्राणापानादयस्तत्त्वांतरं स्युः, नेत्युच्यते—

पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥११॥

यथा 'कामस्सङ्कल्पोविचिकित्सा श्रद्धाश्रद्धे'त्यादिवचनान्मनएव कार्यभेदाद्यथा कामादिशब्दैर्व्यपदिश्यते, कामादयो नमनसस्तत्त्वांतरं, एवं 'प्राणोपानोव्यानउदानस्समान इत्येतत्सर्वं प्राणएवे'तिवचने प्राणस्यैकस्यैव कार्यभेदात् प्राणापानव्यानोदानादित्ववचनान्नतत्वान्तरं प्राणापानादयः, इति सिद्धांतितं । अत्र च धर्मभूतज्ञानावस्थाविशेषाः कामादयो मनसस्तत्त्वांतरमेवेति कथं कामादीनां तत्वान्तरत्वनिषेधइति वाच्यम् ॥ 'कामादिरूपज्ञानपरिणामहेतुत्वावस्थस्य मनसएव कामादिशब्दैरभिधानान्नतत्त्वांतरं कामस्सङ्कल्प'इत्यादिवाक्ये कामादिशब्दितमिति व्यासार्यैरुक्तत्वात्॥

इति वायुक्रियाधिकरणम् ॥४॥

अणुश्च ॥१२॥

वाजसनेयके प्राणविद्यायां 'यद्वैव सन्नः प्लुषिणा समो मशकेन समो नागेन समएभिस्त्रिभिर्लोकैस्समोऽनेन सर्वेण' "ति श्रुत्या यथा घटमध्यदीपप्रभा तावन्मात्रव्यापिनी प्रासाददीपप्रभा च प्रासादव्यापिनी एवं मुख्यप्राणोऽपि ब्रह्मादिपिपीलिकांतशरीरेषु तत्तच्छरीरानुरूपव्याप्तिमत्वेन विभुस्स्यादिति पूर्वः पक्षः । सिद्धांतस्तु 'तमुत्क्रामंतं प्राणो नूत्क्रामती'ति इंद्रियाणामिव मुख्यप्राणस्यापि उत्क्रांतिश्रवणादणुत्वमिति ॥

इति श्रेष्ठाणुत्वाधिकरणं ॥५॥

ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् ॥

जीवस्य यत्स्वभोगसाधनशरीराद्यधिष्ठातृत्वं न तत्परमायत्तमिति
पूर्वपक्षे प्राप्त उच्यते—

ज्योतिराद्यधिष्ठानं तु तदामननात्प्राणवता शब्दात् । प्राणवता
जीवेन सह ज्योतिरादीनां अग्न्यादिदेवतानां यत्प्राणविषयमधिष्ठानं जीव-
वागग्न्यादिदेवताभिश्च क्रियमाणं प्राणकर्मकाधिष्ठानं यत् तत् तदामननात्
तस्य परमात्मन आमननात्सङ्कल्पादेव भवति । 'योऽग्नौ तिष्ठन्नग्नेरन्तरोय-
मग्निर्न वेद यस्याग्निश्शरीरं योऽग्निमन्तरोयमयति, य आत्मनि तिष्ठ' न्नि-
त्यादिशब्दात् ॥

तस्य च नित्यत्वात् ॥ १४ ॥

सर्वेषां परमात्मनाधिष्ठितत्वस्य यावत्स्वरूपभावित्वाच्चेति स्थितम् ॥

इति ज्योतिराद्यधिष्ठानाधिकरणम् ॥ ६॥

त इंद्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥१५॥

किं सर्वे प्राणशब्दनिर्दिष्टा इन्द्रियाणि उत मुख्यप्राणव्यतिरिक्ता
एवेति विशये जीवोपकरणत्वाविशेषात् प्राणशब्दवाच्यत्वाविशेषाच्च
मुख्यप्राणश्चेन्द्रियाणीति पूर्वपक्षे प्राप्त उच्यते—

त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् । त एव वागादय इन्द्रि-
याणि । न तु श्रेष्ठप्राणः । ततः श्रेष्ठप्राणादन्यत्रैव इतरेष्वेव 'इंद्रियाणि
दशैकञ्च' तीन्द्रियत्वव्यपदेशात् । किं च 'भेदश्रुतेः' 'एतस्माज्जायते प्राणो
मनस्सर्वेन्द्रियाणि चे' ति प्राणापेक्षया इन्द्रियाणां भेदव्यपदेशात् न श्रेष्ठः
प्राण इन्द्रियं । न च तत्रैव 'मनस्सर्वेन्द्रियाणि चे' ति मनसोऽपि भेदव्यप-
देशादिन्द्रियत्वाभावश्शक्यशङ्कः । 'मनष्षष्ठानीन्द्रियाणि, इन्द्रियाणि
दशैकञ्चे'त्यादीनां मनस इन्द्रियान्तर्भावग्राहकप्रमाणानां परोक्तरीत्या 'गा-
मग्निं ब्राह्मणं चैव त्रीणि तेजांसि न स्पृशे' दित्यत्र अतेजोभ्यां गोब्राह्मणा-
भ्यां तेजस्संख्यापूरणवत्, 'वेदानध्यापयामास महाभारतपञ्चमा' नित्यादा-
ववेदेन भारतेन वेदसंख्यापूरणवच्च, अनिन्द्रियेण मनसेन्द्रियसंख्यापूरकतया

ऽन्यथासिद्धत्वेऽपि 'इन्द्रियाणां मनश्चास्मी' त्यनन्यथासिद्धप्रमाणसद्भावेन मनस इन्द्रियत्वध्रौव्यात्, मुख्यप्राणे इन्द्रियत्वग्राहकप्रमाणाभावाच्च। अतः 'प्राणो मनस्सर्वेन्द्रियाणी'ति श्रुतौ प्राणे न गोबलीवर्दन्यायावतारः, मनसि तु तदवतारोस्त्येवेति द्रष्टव्यं ॥

भेदश्रुतेर्वैलक्षण्याच्च ॥१९॥

'एतस्यैव सर्वे रूपमभवन्नि'ति चक्षुरादीन्द्रियाणां तदधीनप्रवृत्तिरवलक्षणकार्यवैलक्षण्यदर्शनाच्च इंद्रियेभ्यो भिन्न एव प्राण इति ॥

इति इन्द्रियाधिकरणम् ॥७॥

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥१७॥

"अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी"ति स्वांशत्वेनात्मभूतस्य जीवस्यैवानुप्रवेशव्याकरणकर्तृत्वाभिधानात्, परदेवतायाः स्वेन रूपेणानुप्रवेशानुक्तेः, हिरण्यगर्भस्य नामरूपव्याकर्तृत्वस्य पुराणादिषु प्रसिद्धत्वात्, परमात्मांशभूतो हिरण्यगर्भ एव प्रवेशनामरूपव्याकरणयोः कर्ता। नचैवं 'व्याकरवाणी'ति परमात्मनोऽभिसन्धिर्नोपपद्यत इति वाच्यम्। जीवसमष्ट्याश्रयस्य प्रवेशव्याकरणकर्तुर्हिरण्यगर्भस्य परमात्मांशतयाऽत्यन्तभिन्नत्वाभावेन तद्गतनामरूपव्याकर्तृत्वस्य प्रवेशसमानाधिकरणस्य स्वनिष्ठतया परमात्मनोऽनुसन्धानोपपत्तेः, प्रयोजककर्तृतयाऽपि 'व्याकरवाणी' त्यभिसन्ध्युपपत्तेश्च। यदि पुनः परमात्मन स्साक्षात्कर्त्रभावो भवेत् तर्हि 'अनेन जीवेने' त्यनर्थकं। जीवस्य कर्तृत्वाभावेन 'चारेणानुप्रविश्य परसैन्यं सङ्कलयानी'तिवत् करणत्व एव तृतीया वाच्या। करणत्वञ्च तदोपपद्यते, यदि परमात्मा प्रयोजककर्ता जीवश्च प्रयोज्यकर्ता स्यात्। प्रयोजककर्तुर्हि साक्षात्कर्ता करणं भवति प्रधानक्रियोद्देशेन प्रयोजकेन प्रयोज्यकर्तुर्व्याप्रियमाणत्वात्। अतः 'जीवेने' ति करणत्वेन निर्दिश्यमानो जीवस्साक्षात्कर्तेत्यवसीयते। अतस्तेजोबन्नानि प्रविश्य हिरण्यगर्भ एव नामरूपे व्याकरोति। अतो हिरण्यगर्भकर्तृकैव नामरूपव्याक्रियेति पूर्वपक्षेप्राप्तउच्यते–

संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् । संज्ञामूर्तिक्लृप्तिः नामरूपव्याकरणं त्रिवृत्करणं कुर्वतः परमात्मन एव । न हिरण्यगर्भस्य । 'अनेनैव जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरोत् तासां त्रिवृतं त्रिवृतमेकैकामकरो' दिति त्रिवृत्करणनामरूपव्याकरणयोस्समानकर्तृकत्वावगमात् । न च त्रिवृत्करणं हिरण्यगर्भकर्तृकं सम्भवति । हिरण्यगर्भस्य त्रिवृत्कृततेजोऽन्नोत्पादितब्रह्माण्डसृष्टत्वावेदनेन तस्य त्रिवृत्करणकर्तृत्वासम्भवात् । अतो जीवसमष्टिशरीरकस्सन् परमात्मा नामरूपे व्याकरोदिति सिद्धम् । 'अनेन जीवेनात्मनाऽनुप्रविश्ये' त्यस्योपपत्तिस्तु तद्वाक्यविवरणदशायामेवोक्ता तत्रैवानुसन्धेया ॥

ननु 'यदग्ने रोहितं रूपं तेजसस्तद्रूपं, अन्नमशितं त्रेधा विधीयत' इत्युत्तरत्र चतुर्मुखसृष्टाग्न्यादिषु त्रिवृत्करणप्रकारप्रदर्शनात् त्रिवृत्करणमपि चतुर्मुखकर्तृकमेवेत्यत्राह—

मांसादिभौमं यथाशब्दमितरयोश्च ॥१८॥

यदुक्तमण्डसृष्ट्युत्तरकालं चतुर्मुखसृष्टदेवादिविषयोयं "तासां त्रिवृतं त्रिवृतमेकैकामकरो" दिति त्रिवृत्करणोपदेश इति तन्नोपपद्यते । "अन्नमशितं त्रेधा विधीयते" इत्यत्र मांसमनसोः पुरीषादणुत्वेनाणीयस्त्वेन च व्यपदिष्टयोराप्यत्वतैजसत्वप्रसंगात् ॥ यद्यदपेक्षया सूक्ष्मं तत्तस्य कारणं । अत एव हि पार्थिवाप्यतैजसानामुत्तरोत्तरसूक्ष्मतयोत्तरोत्तरकारणत्वं । ततश्च पुरीषस्य स्थविष्ठत्वात्पार्थिवत्वं, ततस्सूक्ष्मस्य मांसस्याप्यत्वं, ततोणिष्ठस्य मनसस्तैजसत्वमभ्युपगंतव्यं । तथा "आपः पीता" इत्यत्रापि स्थविष्ठस्य मूत्रस्य पार्थिवत्वं मध्यमस्य लोहितस्याप्यत्वं ततोऽणीयसः प्राणस्य तैजसत्वमभ्युपगंतव्यं । तथा "तेजोऽशित" मित्यत्रापि स्थूलस्यास्थ्नः पार्थिवत्वं, मध्यमाया मज्जाया आप्यत्वं, अणिष्ठाया वाचस्तैजसत्वमभ्युपगंतव्यं । न चैवमिष्यते । प्रथमपर्याये पुरीषवन्मांसमनसी अपि पार्थिवे एव प्रतिपाद्येते । "अन्नमशितं त्रेधा विधीयते" इति प्रक्रमात् । तथा द्वितीये पर्याये मूत्रलोहितप्राणानामब्विकारत्वं प्रति-

पाद्यते । तृतीयपर्याये अस्थिमज्जावाचां तेजोविकारत्वमेव प्रतिपाद्यते । अतः "तासां त्रिवृतं त्रिवृतमेकैकामकरो" दित्युक्तत्रिवृत्करणप्रकारः अन्नमशितमित्यादिनानुप्रदर्श्यते । तथा सति हि मनःप्राणवाचां तिसृणामपि अणीयस्त्वेन "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वागि" ति विरुध्येत । अतः प्रागेव त्रिवृत्कृतानां पृथिव्यादीनां पुरुषं प्राप्तानां "अन्नमशित "मित्यादिना एकैकस्य त्रेधा परिणाम उच्यते । अंडसृष्टेः प्रागेव तेजोबन्नानां त्रिवृत्करणेन भवितव्यं । अत्रिवृत्कृतानां तेषां कार्यारंभासामर्थ्यात् । अन्योन्यसंयुक्तानामेवहि कार्यारंभसामर्थ्यं । तदेव च त्रिवृत्करणं । तथा च स्मर्यते- "नानावीर्याः पृथग्भूतास्ततस्ते संहतिं विना । नाशक्नुवन् प्रजास्स्रष्टुमसमागत्य कृत्स्नशः । समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्याविशेषांताह्यंडमुत्पादयंति त " इति अत एव च " अनेनैव जीवेनात्मनानुप्रविश्य नामरूपे व्याकरोत् । तासां त्रिवृतं त्रिवृतमेकैकामकरो"दिति पाठक्रमोऽप्यर्थक्रमेण बाध्यते । अण्डान्तर्वर्त्यग्न्यादिषु त्रिवृत्करणप्रदर्शनं तु श्वेतकेतोश्शुश्रूषोरंडांतर्वर्तित्वेन तस्य बहिष्ठवस्तुषु त्रिवृत्करणप्रदर्शनायोगात् । त्रिवृत्कृतानां कार्येष्वग्न्यादिषु त्रिवृत्करणप्रदर्शनं कृतमित्यविरोधः । नन्वंडांतर्गतानां सर्वेषां त्रिवृत्कृततेजोबन्नरूपत्वे व्यवस्थिततेजोबन्नव्यवहारः कथं स्यादित्यत्राह-

वैशेष्यात्तु तद्वादस्तद्वादः ॥१९॥

'पृथिव्यंशानां भूयस्त्वे पृथिवीव्यवहारः । जलांशानां भूयस्त्वे जलव्यवहार' इति व्यवहारव्यवस्थोपपद्यत इत्यर्थः । 'तद्वादस्तद्वाद' इति सूत्रे द्विरुक्तिरध्यायसमाप्तिद्योतनार्था ॥ इति संज्ञामूर्तिक्लृप्त्यधिकरणं ॥

इति चतुष्षष्टिप्रबंधनिर्माणसमुचितसर्वतंत्रस्वतंत्रताविरुदाङ्कितैः श्रीमद्रङ्गरामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां द्वितीयाध्यायस्य चतुर्थःपादः ॥

द्वितीयोऽध्यायस्समाप्तः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

तृतीयोऽध्यायः ॥

तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥ १ ॥

लोकांतरं गच्छतो जीवस्य देहारंभकभूतसूक्ष्माणां तत्रैव सुलभतया नभूतसूक्ष्मपरिष्वक्ततया गमनमिति प्राप्त उच्यते—

तदंतरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ।

पूर्वत्र " संज्ञामूर्तिक्लृप्ति " रिति सूत्रे मूर्तिशब्देन निर्दिष्टो देहस्तच्छब्देन परामृश्यते । तदंतरप्रतिपत्तौ देहांतरप्रतिपत्त्यर्थं जीवो भूतसूक्ष्मैः परिष्वक्त एव रंहति गच्छतीत्यर्थः । पंचाग्निविद्यायां " वेत्थ यथा पंचम्यामाहुतावापः पुरुषवचसो भवन्ती " ति पंचस्वप्याहुतिष्वप्छब्दितानां भूतसूक्ष्माणां हूयमानतया संबंधं सिद्धवत्कृत्यैवापां पंचम्यामाहुतावापः पुरुषवचसो भवंतीति कथं वेत्थेति प्रश्नात् द्युपर्जन्यपृथिवीपुरुषयोषिद्रूपेष्वग्निष्वापश्श्रद्धासोमवृष्ट्यन्नरेतोरूपेण हूयमानास्सत्यः पंचम्यां रेतआहुतौ पुरुषाकारेण परिणमंतीति प्रतिवचनदर्शनाच्चाप्छब्दितभूतसूक्ष्मपरिष्वक्तएवारोहावरोहयोस्संचरतीति भावः ॥

ननु "आपः पुरुषवचसो भवंती" त्यपामेव पुरुषवचस्त्वं प्रतिपाद्यते नभूतांतराणामिति तत्राह—

त्र्यात्मकत्वात्तु भूयस्त्वात् ॥२॥

तुशब्दश्चोद्यव्यावृत्त्यर्थः । केवलानामपां देहारंभकत्वासंभवेन त्र्यात्मकत्वादप्छब्दो भूतांतरस्याप्युपलक्षकः । तर्हि कुतोऽप्छब्देन निर्देश-

इत्यत्राह–भूयस्त्वात् । तेजोबन्नलक्षणभूतत्रयमध्ये देहस्य लोहितप्रचुरतया अपांभूयस्त्वादप्छब्देन निर्देशइतिभावः ।

प्राणगतेश्च ॥३॥

"तमुत्क्रामंतं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामंतं सर्वे प्राणा अनूत्क्रामंती" ति इंद्रियाणामपि सहगतिश्रवणात् भूतसूक्ष्मपरिष्वक्ततया जीवगमनाभावे निराश्रयाणामिंद्रियाणां गमनासंभवात् भूतसूक्ष्मपारिष्वक्तस्यैव गमनमभ्युपगंतव्यं । "गृहीत्वैतानि संयाति वायुर्गंधानिवाशया" दिति इन्द्रियाणां च नयनस्य स्मरणात्तेषां चाश्रयतया भूतसूक्ष्माणां गतिरभ्युपगन्तव्या ।

अग्न्यादिगतिश्रुतेरितिचेन्नभाक्तत्वात् ॥४॥

"यत्रास्य पुरुषस्य मृतस्याग्निंवागप्येति वातं प्राणश्चक्षुरादित्य' मित्यादिना प्राणानां मरणकाले अग्न्यादिष्वाप्ययश्रवणान्नप्राणानां जीवेन सह गतिस्संभवतीति चेन्न । अग्न्यादिष्वप्ययश्रवणस्य भाक्तत्वात् । "ओषधीर्लोमानिवनस्पतीन्केशा" इति लोमकेशानामप्योषधिवनस्पत्यप्ययश्रवणात् तस्य च प्रत्यक्षबाधितत्वेन ओषधिवनस्पतिषु लोमकेशाप्ययस्य भाक्तत्वस्याभ्युपगंतव्यत्वात् तत्सहपठितानामग्न्यादिषु वागाद्यप्ययानामपि भाक्तत्वमेव । ततश्च "अग्निंवागप्येती" त्यस्यायमर्थः । "अग्निर्वाग्भूत्वामुखं प्राविश" दिति अग्नेर्वागधिष्ठातृतया मुखप्रवेशप्रतिपादनान्मरणकाले म्रियमाणपुरुषवागधिष्ठातृतां परित्यज्यानधिष्ठातृरूपेण वर्तत इति ।

प्रथमेऽश्रवणादितिचेन्न ता एव ह्युपपत्तेः ॥५॥

यदुक्तं प्रश्नप्रतिवचनाभ्यां द्युपर्जन्यादिषु भूतसूक्ष्मपरिष्वक्तस्यैव जीवस्य गमनमिति तन्नोपपद्यते । प्रणवएव विस्वर इति न्यायेन प्रथमाहुतावेव 'तस्मिन्नेतस्मिन्नग्नौ देवाश्श्रद्धां जुह्वती'ति प्रथमपर्याये श्रद्धाया

एवंहोम्यत्वश्रवणेन अप्च्छब्दितभूतसूक्ष्माणां होम्यत्वाश्रवणादिति चेन्न । यदि प्रथमे पर्याये अप्च्छब्दितव्यतिरिक्तायाः श्रद्धायाहोम्यत्वं तर्हि प्रश्न-प्रतिवचनयोः अपांपंचम्यामाहुताविति निर्देशो नोपपद्येत । अपांपञ्चमाहुति-संबंधो हि तदितराहुतिचतुष्टयसंबंधएवोपपद्यते । बुद्धिविशेषलक्षणश्रद्धाया आत्मतो निष्कृष्य होमस्यानुपपत्तेश्च श्रद्धाशब्देन आपएवोच्यन्ते । 'श्रद्धा-वाआप.' इति श्रुतेः ।

अश्रुतत्वादितिचेन्नेष्टादिकारिणांप्रतीतेः ॥६॥

द्युपर्जन्यादिषु प्रश्नप्रतिवचनवशाद्भूतसूक्ष्माणां गमनसंभवेऽपि न तत्परिष्वक्तस्य जीवस्य गमनं, अश्रुतत्वादितिचेन्न । उत्तरत्र पितृयाण-वाक्ये– 'मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशाचंद्रमसमेषसोमो-राजे ' ति द्युलोकं प्राप्तस्येष्टादिकारिणोजीवस्य सोमराजभावश्रवणाद-त्रापि " तस्या आहुतेस्सोमोराजासंभवती " ति द्युलोकं प्रविष्टानां भूत-सूक्ष्माणां सोमराजभावश्रवणात्, अत्रापि " आपःपुरुषवचसो भवंती" ति अप्छब्देन नकेवलभूतसूक्ष्मगात्रमुच्यते अपितु तत्परिष्वक्तोजीवः । पुरु-षशब्दाभिलपनीयत्वमपि तत्परिष्वक्तस्य जीवस्यैव । ततश्च " आपःपु-रुषवचसोभवंती " त्यत्राबादिशब्दानां तत्परिष्वक्तजीवपरत्वात् भूतसूक्ष्म-परिष्वक्तस्यैव जीवस्य गमनं सिद्धम् । ननु " तंदेवा भक्षयन्ती " ति सोमराजभावं प्राप्तस्य भक्ष्यमाणत्वश्रवणात् जीवस्यानदनीयत्वात् पितृयाण-मार्गे सोमराजशब्दनिर्दिष्टो नजीवइत्यत्राह—

भाक्तंवाऽनात्मवित्त्वात्तथाहि दर्शयति ॥ ७ ॥

देवभक्ष्यमाणत्ववचनं भाक्तं । केवलेष्टादिकारिणामनात्मवित्त्वात्, अनात्मविदाश्च " यथा पशुरेवं सदेवाना " मितिश्रुतिदर्शनेन पशु-वद्भोगोपकरणत्वात् " तन्देवा भक्षयन्ती " त्युक्तिरुपपद्यते । अतो भूत-सूक्ष्मपरिष्वक्तएव जीवो गच्छतीति स्थितं ।

इति तदन्तरप्रतिपत्त्यधिकरणं ॥१॥

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवञ्च ॥८॥

"यावत्संपातमुषित्वे" ति संपातशब्दितसर्वकर्मफलस्य तत्रैवोपभोक्तव्यत्वश्रवणात् "प्राप्यांतं कर्मणस्तस्य यत्किंचेह करोत्ययं। तस्माल्लोकात्पुनरेत्यस्मै लोकाय कर्मण" इति बृहदारण्यके श्रवणात्, सर्वं कर्मफलं भुक्त्वा निरनुशय एवावरोहति जीवः। अनुशयः भुक्तशिष्टं कर्म। एवं प्राप्त उच्यते-

कृतात्ययेऽनुशयवान्दृष्टस्मृतिभ्यां यथेतमनेवञ्च ।

कृतस्य कर्मणोऽत्यये अवसाने अनुशयवानेव प्रत्यवरोहति जीवः। दृष्टस्मृतिभ्यां श्रुतिस्मृतिभ्यामित्यर्थः। "तद्यइहरमणीय चरणाअभ्याशोहयदि" ति श्रुतेः, "वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततश्शेषेण विशिष्टदेशजातिकुलरूपायुश्श्रुतवृत्तवित्तसुखमेधसो जन्मप्रतिपद्यन्ते विष्वञ्चो विपरीताविनश्यन्तीति स्मरणाच्च। अतस्सानुशयाएवावरोहंति। "यावत्संपातमुषित्वे" त्यादिकंतु फलदानप्रवृत्तकर्मविशेषविषयं। तत्रच 'अथैतमेवाध्वानंपुनर्निवर्तंते यथेतमाकाश'मिति श्रवणाद्यथागमनं प्रत्यागमनं। "आकाशाद्वायुं वायुर्भूत्वा धूमोभवती" ति श्रवणात्। अनेवंच। येन प्रकारेण गतं तदन्येनप्रकारेणावरोहंतीत्यर्थः।

चरणादितिचेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥९॥

ननु 'रमणीयचरणा अभ्याशोहयत्ते रमणीयां योनिमापद्येर' न्नित्यादिना सदसच्चरणयोरेव सदसत्प्राप्तिहेतुत्वं श्रूयते। चरणं आचारः शीलं वृत्तमिति पर्यायाः। ततश्च "रमणीयचरणा" इतिश्रुतिवशादवरोहतां सदसद्योनिजन्महेतुभूतचरणशब्दिताचारानुवृत्तावपि न कर्मशेषानुवृत्तौ प्रमाणमस्तीति चेन्न। चरणश्रुतिःकर्मोपलक्षणार्थेतिकार्ष्णाजिनिराचार्यो मन्यते। केवलाचरणशब्दिता दाचारात्सुखदुःखहेतुभूतयोनिप्राप्त्यसंभवात्।

आनर्थक्यमितिचेन्न तदपेक्षत्वात् ॥१०॥

ननु संध्यावन्दनाद्याचारस्य सुखदुःखहेतुत्वाभावे आनर्थक्यमिति

चेन्न । तदपेक्षत्वादग्निहोत्रादिपुण्यकर्मणः । "संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मस्वि' ति श्रवणात् संध्यावंदनाद्याचारवतएव वैदिककर्मण्यधिकारात् ।

सुकृतदुष्कृतेएवेति तु बादरिः ॥११॥

"पुण्यं कर्माचरति पापं कर्माचरती' ति सुकृतदुष्कृतकर्मसु चरतिशब्दप्रयोगात् चर्यत इति चरणमिति व्युत्पत्त्या सुकृतदुष्कृतेएव चरणशब्दाभिधेये । 'यान्यनवद्यानिकर्माणि तानि सेवितव्यानि यान्यस्माकं सुचरितानि तानित्वयोपास्यानी'तिकर्माचारयोः पृथङ्निर्देशस्तु गोबलीवर्दन्यायादुपपद्यते । वैतानिकानितु कर्माणि कर्माणीत्युच्यंते । इतराणितु आचारशब्देनाभिलप्यंते । अतश्चरणशब्देन सुकृतदुष्कृतयोरेवाभिलापइति बादरिराचार्यो मन्यत इति स्थितं ।

इति कृतात्ययाधिकरणं ॥२॥

अनिष्टादिकारिणामपिच श्रुतम् ॥१२॥

'येवै केचास्माल्लोकात्प्रयंति चंद्रमसमेव तेसर्वे गच्छंती'त्यविशेषश्रवणात् इष्टादिकारिणामिव अनिष्टादिकारिणामपि चंद्रप्राप्तिरस्त्येवेत्यर्थः । तर्हि सुकृतकारिणां दुष्कृतकारिणांच चंद्रप्राप्तिसत्वे कोविशेषइत्यत्राह—

संयमनेत्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥ १३ ॥

तुशब्दश्शंकांव्यावर्तयति । संयमने यमशासनेसति इतरेषां अनिष्टादिकारिणां यमयातनाः अनुभूय चंद्रारोहावरोहौ । 'अयं लोको नास्तिपरइति मानी पुनः पुनर्वशमापद्यतेम' इति अनिष्टादिकारिणां दुष्कृतकारिणां यमवश्यतादर्शनात् ।

स्मरंतिच ॥१४॥

'सर्वेचैते वशं यान्ति यमस्य भगवन्किल' इति यमवश्यतास्मरणात् ।

अपि सप्त ॥१५॥

पापकृतां गंतव्यत्वेन रौरवादीन् सप्तनरकानपि स्मरंति ।
ननु सप्तसु लोकेषु गच्छतां कथं यमसदनप्राप्तिस्तत्राह —

तत्रापि तद्व्यापारादविरोधः ॥१६॥

तेष्वपि सप्तसु यमाज्ञयैव गमनादविरोधः । अत अनिष्टादिकारिणामपि यमलोकं प्राप्य स्वकर्मानुरूपं यातनाश्चानुभूय पश्चात् चंद्रारोहावरोहौ स्त इति प्राप्ते उच्यते—

विद्याकर्मणोरितितु प्रकृतत्वात् ॥१७॥

तुशब्दश्शंकानिवृत्त्यर्थः । देवयानपितृयाणे हि फलभूते विद्याकर्मणोरित्यवसीयते । 'तद्य इत्थं विदुर्येचेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसंभवन्ति । अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसंभवन्ती' ति. विद्याकर्मणी प्रकृत्य हि. देवयानपितृयाणे आम्नायेते । अतो विद्याकर्मविधुरेष्वनिष्टादिकारिषु देवयानपितृयानासंभवात् न चंद्रप्राप्तिः । 'यवै केचास्माल्लोकात् प्रयंती'ति वचनं इष्टादिकारिसर्वविषयं नेतव्यं ।

नन्वनिष्टादिकारिणां चंद्रप्राप्त्यभावे पञ्चमाहुत्यसंभवात् शरीरारंभएव नोपपद्यते तत्राह—

न तृतीये तथोपलब्धेः ॥१८॥

'तानीमानि क्षुद्राण्यसकृदावृत्तीनि भूतानि भवन्ति जायस्वम्रियस्वेत्येतत् तृतीयं स्थान' मिति; तृतीयस्थानशब्दितानामनिष्टादिकारिणां क्षुद्रजन्तूनां न पञ्चमाहुत्यपेक्षा । तथाह्युपलभ्यते 'तेनासौ लोको न संपूर्यत'इति । तृतीयस्थानेन हि असौ चंद्रलोको न प्राप्यतइति हि तस्यार्थः ।

स्मर्यतेऽपिच लोके ॥१९॥

केषांचित्पुण्यकर्मणामपि द्रौपदीधृष्टद्युम्नप्रभृतीनां पञ्चमाहुत्यनपेक्ष्यैव देहारंभो भारतादिषु स्मर्यते ।

दर्शनाच्च ॥ २० ॥

'तेषां खल्वेषां भूतानां त्रीण्येव बीजानि भवंति अण्डजं जीवजमुद्भिज्ज' मिति श्रुत्युपात्ताण्डजजीवजोद्भिज्जलक्षणभूतजातिमध्ये केषाञ्चिदुद्भिज्जानां वृक्षादीनां पञ्चमाहुत्यनपेक्षा लोके दृष्टा ।

ननु 'तेषां खल्वेषां भूतानां त्रीण्येवे' त्यवधारणं नोपपद्यते । स्वेदजानामत्रानुपात्तत्वात् तत्राह—

तृतीयशब्दावरोधस्संशोकजस्य ॥ २१ ॥

संशोकजस्य स्वेदजस्यापि 'अण्डजं जीवजमुद्भिज्ज 'मित्यत्र तृतीयेनोद्भिज्जशब्देनावरोधस्संग्रहो विवक्षित इत्यर्थः । अतः केवलपापकर्मणां चंद्रप्राप्तिर्न भवतीति स्थितं ।

इति अनिष्टादिकार्यधिकरणं ॥३॥

तत्स्वाभाव्यापत्ति रुपपत्तेः ॥२२॥

" यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवती " त्यादावाकाशादिभावोऽपि देवमनुष्यादिभाववत्तच्छरीरकत्वलक्षण एवास्त्विति पूर्वपक्षे प्राप्त उच्यते——

" तत्स्वाभाव्यापत्तिरुपपत्तेः " । तत्स्वाभाव्यापत्तिः आकाशादिसादृश्यापत्तिरित्यर्थः । स्वभाव एव स्वाभाव्यं । " वर्तमानसामीप्य " इत्यादिवत् स्वार्थिकः ष्यञ् । अतः तत्स्वाभाव्यापत्तिः तत्सादृश्यापत्तिरित्यर्थः । चन्द्रमण्डले शरीरारम्भकाणां भूतसूक्ष्माणां कर्मक्षये द्रवीभूतानामाकाशगतानां भेदकाकारप्रहाणेनाकाशादिसादृश्ये तदुपश्लिष्टानुशयिनोऽप्याकाशसमा भवन्तीत्यर्थः । कुतः ? उपपत्तेः । सुखदुःखोपभोगाय हि तच्छरीरसंसर्गः । नह्यनुशयिनं प्रत्याकाशादेर्जीवान्तरशरीर-

भूतस्य तद्भोगाश्रयत्वमस्ति । युगपद्भोक्तृद्वयसमावेशे तयोः परस्परविरुद्धभोगार्थतया शरीरोन्मथनप्रसङ्गात् । ननु अवरोहन्तो जीवा एव तत्तदभिमानिदेवताभवंत्विति चेन्न । सर्गाद्यकालमारभ्याप्रलयमाकाशाद्यभिमानिदेवताना मनुशयिभ्योऽन्यासां क्लृप्तानां सत्वेनक्षुक्षणमवरोहतामनुशयिनामाकाशाद्यभिमानिदेवतात्वानुपपत्ते रिति स्थित ।

इति तत्स्वाभाव्यापत्त्यधिकरणं ॥४॥

नातिचिरेण विशेषात् ॥ २३ ॥

आकाशप्राप्तिप्रभृति यावद्व्रीह्यादिप्राप्ति किं तत्र तत्र नातिचिरं तिष्ठति उतानियम इति विशये नियमहेत्वभावा दनियम इति प्राप्त उच्यते–

नातिचिरेण विशेषात् । आकाशादितो नातिचिरेण निष्क्रमणं । कुतः ? विशेषात् । उत्तरत्र व्रीह्यादि प्राप्तौ 'अतोवै खलुदुर्निष्प्रपतर' मिति विशिष्य कृच्छ्रनिष्क्रमणाभिधानादिति स्थितं ।

इति नातिचिराधिकरणं ॥५॥

अन्याधिष्ठिते पूर्ववदभिलापात् ॥२४॥

'व्रीहियवा ओषधिवनस्पतयः तिलमाषाइति जायन्ते' इत्यनेनानुशयिनां व्रीह्यादिभाव उच्यते । तत्र देवोजायते मनुष्यो जायत इतिवदिह 'तिलमाषा इति जायन्त' इति श्रवणाद्व्रीह्यादिशरीरका एवानुशयिनोभवंतीति प्राप्त उच्यते–

अन्याधिष्ठिते पूर्ववदभिलापात् । अवरोहतां जीवानां जीवान्तराधिष्ठिते व्रीह्यादौ संश्लेषमात्रं । कुतः ? पूर्ववदभिलापात् । 'आकाशाद्वायुं वायुर्भूत्वा धूमोभवती' त्यादौ आकाशादिभावे हेतुभूतकर्मकीर्तनाभावाद्यथा आकाशादिषु संश्लेषमात्रं, एवं व्रीह्यादिस्थावरभावहेतुभूतकर्म कीर्तनाभावात् । उत्तरत्रैव 'रमणीयचरणा अभ्याशोहयदि' ति ब्राह्म-

णादिभावएव हेतुभूतस्य कर्मणः कीर्तनात् व्रीह्यादौ जीवान्तराधिष्ठिते संश्लेषमात्रमेव ॥

अशुद्धमिति चेन्न शब्दात् ॥२५॥

इष्टादिकर्मणां पशुहिंसामिश्रत्वात् हिंसायाश्च 'नहिंस्या'दिति निषिद्धत्वेनानिष्टसाधनत्वेन पापतया तन्मिश्रतया सुकृतकर्मणामशुद्धत्वात् सुकृतांशस्य फलं स्वर्गेऽनुभूय हिंसांशस्य स्थावरादिभावलक्षणं फलमवरोहन्ननुभवतु । ननु 'नहिंस्या'दिति निषेधः विहितक्रत्वर्थहिंसाव्यतिरिक्तविषयोऽस्त्विति चेन्न । पुष्ट्यादिरूपेष्टसाधनघृतपानादौ मोहादिरूपानिष्टसाधनत्वस्य च दर्शनेनोत्सर्गापवादन्यायस्यात्रानवतारात् । अतो यागाद्यनुप्रविष्टहिंसाफलत्वेन स्थावरभावोऽनुभोक्तव्य इतिचेन्न । प्रवर्तनानिवर्तनारूप विधिनिषेधयोरविरोधस्य वक्तुमशक्यतया सतिच विरोधे सामान्यविशेषन्यायेन निषेधस्य विहितहिंसाव्यतिरिक्तविषयत्वात् । वस्तुतस्तु यागीयपशुहिंसायाः हिंसात्वस्यैवाभावात् । 'नवाउवेतन्म्रियसे नरिष्यसी' ति मंत्रवर्णाद्धिंसात्वाभावस्यैव प्रतिपादनात् । नरिष्यसि नहिंस्यस इति हि तस्यार्थः । ननु 'नरिष्यसी' ति मंत्रवर्णाद्धिंसात्वाभावाभ्युपगमेन म्रियस इति मंत्रवर्णात्तन्मरणस्य मरणत्वमपि न स्यात् । ततश्च नम्रियस इतिवन्नरिष्यसीत्युक्तिरप्यौपचारिकीत्येवाश्रयणीयम् । मरणोद्देश्यकमरणानुकूलव्यापारत्वस्यैव हिंसात्वरूपत्वादितिचेत् नमरणोद्देश्यकमरणानुकूलव्यापारत्वं हिंसात्वम् । कशाताडनतप्तसन्दंशिनीपाटनक्रकचदारणादीनां मरणोद्देश्यकमरणानुकूलव्यापारत्वाभावेन हिंसात्वाभावप्रसंगात् । अतस्तीव्रदुःखजननौपयिकव्यापारत्वस्यैव हिंसापदप्रवृत्तिनिमित्तत्वे वक्तव्ये व्रणादिचिकित्सके तादात्विकतीव्रवेदनोत्पादके हिंसकत्वव्यपदेशाभावेन बलवदहिताजनकत्वेसति तद्वेदनाजनकव्यापारत्वं तद्धिंसात्वमित्याश्रयणीयम् । ततश्च व्रणचिकित्सया जायमानस्यारोग्यरूपहितस्य तादात्विकवेदनापेक्षया बलवत्त्वान्नहिंसात्वमिति स्थिते पशुमरणानुकूलव्यापारस्य पशुवेदनाजनकत्वेऽपि स्वर्गप्राप्त्यादिलक्षणस्य पशुहितस्य बलवत्त्वान्न

हिंसात्वं । अतः ' नहिंस्या ' दिति निषेधाविषयत्वात् क्रत्वर्थपशुहिंसाया न पापजनकत्वमिति तद्वशेनावरोहतोऽनुशयिनो नव्रीह्यादिभावापत्तिरिति ॥

रेतस्सिग्योगोऽथ ॥२६॥

' इतश्चौपचारिकं व्रीह्यादिजन्मवचनम् । व्रीह्यादिभाववचनानन्तरं ' योयोह्यन्नमत्ति योयोरेतस्सिञ्चति तद्भूयएवभवती ' ति रेतस्सिग्भावोऽनुशयिनां श्रूयमाणो यथा नमुख्यः, एवं व्रीह्यादिभावोऽपीत्यर्थः ॥

योनेश्शरीरम् ॥ २७ ॥

योनिप्राप्तेः पश्चादेवानुशयिनां ब्राह्मणादिशरीरप्राप्तिश्रवणात् ततः प्राक्नशरीरपरिग्रहः , किंतु संश्लेषमात्रम् । यत्र पुण्यापुण्यकर्मणी तत्रैव सुखदुःखे । यत्र सुखदुःखे तत्रैव तद्धेतुभूतं शरीरम् । ततश्चाकाशादिषु कर्मकीर्तनाभावेन तत्फलभूतसुखाद्यनुभवाभावात् नतद्धेतुभूतं शरीरमिति न योनिप्राप्तेः प्राक्छरीरपरिग्रह इति स्थितं ॥

इति अन्याधिष्ठिताधिकरणम् ॥६॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताविरुदांचितैः श्रीमद्रंग रामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां तृतीयाध्यायस्य प्र थ म : पा द : ॥

श्रीमते हयवदनपरब्रह्मणे नमः ।

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ।

॥ श्रीः ॥

श्रीमते हयवदनपरब्रह्मणे नमः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

संध्ये सृष्टिराहहि ॥१॥

' नतत्र रथा नरथयोगा ' इति वाक्ये संध्ये स्वप्नस्थाने जीवकर्तृकैव सृष्टिराम्नायते । ' सहिकर्ते ' ति स्वप्नदशं प्राक् प्रस्तुतं जीवमेव स इति शब्देन परामृश्य तस्य कर्तृत्वं श्रुतिराहहि ।

निर्मातारञ्चैके पुत्रादयश्च ॥ २ ॥

एके शाखिनः 'यएषसुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाण' इति कामानां निर्मातारं जीवमामनंति। अत्र कामशब्देन काम्यमानाः पुत्रादयो वर्ण्यंते । पूर्वं हि 'सर्वान् कामान् छंदतः प्रार्थयस्व, शतायुषः पुत्रपौत्रान्वृणीष्वे' ति पुत्रादयोहि कामाः प्रकृताः । अतो जीवएवात्र कर्तृत्वेनाभिधीयते । न च जीवस्य कथमीदृशं सृष्टिसामर्थ्यमिति वाच्यं । प्रजापतिवाक्ये जीवस्यापि सत्यसङ्कल्पत्वादेराम्नानात् । नच तत्संसारदशायां तिरोहितमिति वाच्यं, मुक्ताविव स्वप्नदशायामाविर्भावादिति द्वाभ्यां सूत्राभ्यां पूर्वपक्षे प्राप्त उच्यते–

मायामात्रंतु कात्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥३॥

तुशब्दः पक्षं व्यावर्तयति । मायाशब्दोह्याश्चर्यत्वं प्रवृत्तिनिमित्तीकृत्य भगवत्संकल्पवाची । 'मायावयुनं ज्ञान' मिति निघंटुपाठाच्च मायाशब्दो ज्ञानरूपसङ्कल्पवचनः । मायामात्रं भगवत्संकल्पमात्रसृष्टम् । नतु जीवसृष्टमित्यर्थः । तत्र हेतुः कात्स्न्येनानभिव्यक्तस्वरूपत्वादिति । जीवस्य सत्यसंकल्पत्वादिब्राह्मरूपस्य प्रजापतिवाक्योदितस्य संसारदशायां सर्वात्मनाऽनभिव्यक्तत्वात् न तस्य कर्तृत्वसंभावनाऽपि । 'सहि कर्ते' ति हिशब्देन प्रसिद्धस्यैव कर्तृतया निर्देशात् । स्वप्नदृश एव कर्तृत्वे स्वाहितचोरव्याघ्रादेस्सृष्टिर्नोपपद्यते । 'इमान् स्वाप्नान्पदार्थानद्राक्ष' मिति प्रतिसन्धानप्रसंगाच्च । 'कामं कामं पुरुषो निर्मिमाण 'इत्यत्र ' तदेव शुक्रं तद्ब्रह्मे'त्युक्त्या तस्य वचनस्य ब्रह्मविषयत्वाच्च न जीवस्य स्रष्टृत्वं ॥

ननु स्वाभाविकस्यापहतपाप्मत्वादेस्सत्यसंकल्पत्वपर्यंतस्यानभिव्यक्तिः किन्निबंधनेत्यत्राह–

पराभिध्यानात्तु तिरोहितं ततोह्यस्य बंधविपर्ययौ ॥

पराभिध्यानात् परमात्मसंकल्पात् तत्तिरोहितं भवति । तत्संकल्पादेवहि अस्य जीवस्य बंधोमोक्षश्च । 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽ

निरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विंदते अथ सोऽभयं गतो भवति यदाह्येवैष एतस्मिन्नुदरमंतरं कुरुते अथ तस्य भयंभवति, एषह्येवानंदयाती ' ति श्रवणात् ॥

देहयोगाद्वा सोऽपि ॥ ५ ॥

सोऽपि तिरोभावः सृष्टिकाले देहयोगद्वारेण वा भवति प्रळयकाले सूक्ष्माचिच्छक्तियोगद्वारेण वा भवतीत्यर्थः ।

सूचकश्च हि श्रुतेराचक्षतेच तद्विदः ॥ ६ ॥

स्वाप्नार्थोहि शुभाशुभसूचकः ' यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धितत्र जानीयात्तस्मिन् स्वप्ननिदर्शने, स्वप्ने पुरुषं कृष्णं कृष्णदन्वं पश्यति स एनं हंती' ति श्रुतेः । आचक्षतेच स्वप्नाध्यायविदस्तथा । ततश्च यदीयं स्वप्नदृष्टिर्जीवकर्तृका तर्हि शुभसूचकानेव सृष्ट्वा पश्येत् नाशुभसूचकान् । अतः न जीवकर्तृकेयं सृष्टिरित्युभयलिंगपादे स्थितं । यदत्र परैरुच्यते स्वप्नसृष्टेस्सत्यत्वे रथादिसृष्टिवदादित्यादेरपि सृष्ट्यभ्युपगमे जाग्रद्दशावत् स्वप्नेऽपि ज्योतिरंतरव्यतिकरसत्त्वात् स्वप्रकाशत्वस्य दुर्विवेचतास्यात । अतः स्वप्नदृष्टानां सत्यत्वं प्रकरणविरुद्धमिति, तदसत् । परमतेऽपि, मनसः प्रकाशकस्य सत्त्वेन स्वप्ने स्वयंज्योतिष्ट्वसाधनमसंगतमेवहि स्यात् । तस्माल्लोकप्रसिद्धादित्याद्यभावेऽपि स्वकीयज्ञानेन भासकत्वात् स्वयंज्योतिष्ट्वमस्तीत्यत्रैवास्याः श्रुतेस्तात्पर्यमिति सिद्धम् ॥ इति संध्याधिकरणम् ॥ १ ॥

तदभावो नाडीषु तच्छ्रुतेरात्मनिच ॥ ७ ॥

'तद्यत्रैतत्सुप्तस्समस्तस्संप्रसन्नः किञ्चिन्नविजानाति आसु तदा नाडीषु सृप्तोभवति, ताभिः प्रत्यवसृप्य पुरीततिशेते, य एषोऽन्तर्हृदय आकाशस्तस्मिन्शेते' इति नाडीपुरीतद्ब्रह्मणां सुषुप्तिस्थानत्वश्रवणात्, समुच्चये सप्तम्यवगतनिरपेक्षाधारत्वप्रतीतिभंगप्रसंगात् युगपदनेकस्थानवृत्त्यसंभवाच्च विकल्पइति पूर्वपक्षे प्राप्त उच्यते—

तदभावो नाडीषु तच्छ्रुतेरात्मनिच । तदभावः पूर्वनिर्दिष्टस्वप्नाभावः । सुषुप्तिरितियावत् । नाडीषु, आत्मनि परमात्मनि, चकारात्पुरीततिचेत्यर्थः । तच्छ्रुतेः पूर्वोदाहृतवाक्येषु नाडीपुरीतद्ब्रह्मणां त्रयाणामपि सुषुप्तजीवाधारत्वश्रुतेरित्यर्थः । नाडीमार्गेणैव गत्वा पुरीतदाख्यं हृदयवेष्टनमांसपिंडं तत्र हृदयांतर्वर्तिनि ब्रह्मणि शयाने जीवे प्रसादे शेते खट्वायां शेते पर्यंके शेत इतिवन्नाडीषु शेते पुरीतति शेते ब्रह्मणि शेत इति निर्देशात् त्रयस्याप्युपपत्तेः समुच्चये संभवति पाक्षिकबाधगर्भो विकल्पो नांगीकार्यः । साक्षात् स्थानंतु ब्रह्मैवेति ॥

अतः प्रबोधोऽस्मात् ॥८॥

यतः ब्रह्मैव सुषुप्तिस्थानं अत एव सुप्तस्य 'सत आगम्य नविदु' रिति ब्रह्मण एव नित्यवत् प्रबोधश्श्रूयमाण उपपद्यते इति सिद्धांतः ।

इति तदभावाधिकरणम् ॥२॥

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥९॥

सुप्तस्य मुक्ताविषयतया ब्रह्मणि लीनस्य पुनर्देहसम्बन्धाभावादन्य एवोत्तिष्ठति सुप्तिरहितपुरुषेषु वैदिककर्मणाञ्च साफल्यं भविष्यतीति प्राप्त उच्यते— स एव तु स एवोत्तिष्ठति । कुतः? कर्मानुस्मृतिशब्दविधिभ्यः । सुप्तेः प्राक्कृतं कर्म तेनैव भोक्तव्यम् । अन्यथा कृतहानादिप्रसङ्गात् । 'योऽहं सुप्तस्सोऽहं जागर्मी'ति अनुस्मृतेः, 'त इह व्याघ्रो वा सिंहो वेत्यादिशब्दान्मोक्षार्थविधिवैयर्थ्यप्रसङ्गाच्च न सुषुप्तिर्मुक्तितुल्या । अत एव प्रजापतिविद्यायां 'नाह खल्वयमेवं सम्प्रत्यात्मानं जानाती'ति अज्ञत्वेन सुप्तिर्निन्द्यते । मनसैवैतान् कामान् पश्यन् रमत इति मुक्तिस्तद्विलक्षणतया प्रतिपाद्यते । अतो न सुप्तिर्मुक्तिरिति स एवोत्तिष्ठतीति ततश्च स एवाहमस्मीति प्रत्यभिज्ञावशात् सुप्तौ लयो न पुनरुक्तविरोधीति भावः ॥

इति कर्मानुस्मृतिशब्दविध्यधिकरणम् ॥३॥

मुग्धेऽर्धसंपत्तिः परिशेषात् ॥१०॥

जाग्रत्स्वप्नसुषुप्तिमरणानामन्यतमो मोह इति पूर्वपक्षे प्राप्तउच्यते—मुग्धेऽर्धसंपत्तिः परिशेषात्। नतावन्मुग्धो जागरितावस्थो भवितुमर्हति इंद्रियैर्विषयानिरीक्षणात्। नापि स्वप्नान् पश्यति। निस्संज्ञत्वात्। नापि मृतः। तस्य प्राणोष्मणोरभावात्। नच सुषुप्तः। तद्वैलक्षण्यात्। सुप्तोहि प्रसन्नवदनो निमीलितनेत्रश्च। तस्मान्मोहोनाम मृतेरर्धसंपत्तिः अर्धमृतिरितियावत्। मरणं हि सर्वप्राणवियोगः। सर्वप्राणवियोगोपक्रमकतिपयप्राणसंपत्तिर्मूर्च्छा। तत्रौषधादिवशात् कर्मशेषेच सति वाङ्मनसे प्रत्यागच्छतः। असति तस्मिन् प्राणोष्माणावप्यपगच्छतः। तस्मादर्धमृतिर्मूर्च्छेति स्थितं॥

इति मुग्धाधिकरणम् ॥४॥

नस्थानतोऽपि परस्योभयलिङ्गं सर्वत्रहि ॥११॥

संसारिजीवस्येव ब्रह्मणोऽपि मनुष्यादिदेहांतरवस्थित्या तत्प्रयुक्तसुखदुःखभोक्तृत्वमपि प्रसजेत्। यद्यपि परमात्मनो देहांतरवस्थितिप्रयुक्तभोक्तृत्वमाशंक्य परितो दह्यमानगृहान्तर्वर्तित्वे देवदत्तयज्ञदत्तयोरविशिष्टेऽपि तत्स्वामिनस्तदभिमानिनो देवदत्तस्येव यज्ञदत्तस्य तत्कृतदुःखादर्शनवत् देहान्तर्वर्तित्वे जीवपरयोरविशिष्टेऽपि 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्न्यो अभिचाकशीती' ति श्रुत्यनुसारेण देहाभिमानिजीववन्नपरस्य भोक्तृत्वमिति 'संभोगप्राप्तिरितिचेन्न वैशेष्या' दिति सूत्रे स्थितम्। तथा स्मृतिपादेऽपि सर्वस्यापि परमात्मशरीरतया शरीरं प्रति स्वामित्वमपि परमात्मनोऽस्तीति मनुष्यादिशरीरस्वामिनस्तदन्तर्वर्तिनः परमात्मनो भोक्तृत्वमवर्जनीयमिति जीवेश्वरस्वभावाविभाग इति पूर्वपक्षं प्राप्य शरीरस्वामित्वेऽपि तदन्तर्वर्तित्वेऽपि नित्याविर्भूतापहतपाप्मत्वादिगुणकस्य परमात्मनो न भोक्तृत्वप्रसङ्गः। यथा लोके राजशासनानुवर्तिनां तदतिवर्तिनाञ्च राजानुग्रहनिग्रहसुकृतसुखदुःखयोगेऽपि न राज्ञि तत्प्रसक्तिः। एवं न परमात्मनि शा-

स्तरि न भोक्तृत्वप्रसक्तिरिति 'भोक्त्रापत्तेरविभागश्चेत्स्याल्लोकव'दित्यधिकरणे स्थितम्। तथाऽपि शासकस्यापि राज्ञः स्वेच्छयाऽपि पूयशोणितादिकर्दमिते कारागृहे वसतो दुःखसम्बन्धापरिहारवत्परमात्मनोऽपि स्वेच्छया हेयेषु मनुष्यादिशरीरेषु वसतो दुःखसम्बन्धोऽपरिहार्यः। ब्राह्मणादिशरीरस्यामित्वाच्च ब्राह्मणादिशब्दवाच्यत्वावश्यंभावेन 'ब्राह्मणो यजेत' त्यादिविधिकिङ्करत्वावश्यंभावेन कर्मवश्यत्वादेरप्यवश्यंभावादिति पूर्वपक्षे प्राप्ते उच्यते—

नस्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि। मनुष्यादिदेहस्थानप्रयुक्तं भोक्तृत्वं परस्य नसंभवति 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासस्सत्यकामस्सत्यसङ्कल्प' इतिश्रुत्या सर्वत्रहि विद्यमानं परंब्रह्म हेयप्रत्यनीकत्वकल्याणैकतानत्वरूपोभयलिङ्गयुक्तमेवभवति। अतो नभोक्तृत्वप्रसङ्गः।

भेदादितिचेन्न प्रत्येकमतद्वचनात् ॥१२॥

यथा जीवस्यापहतपाप्मत्वादिगुणाष्टकयुक्तस्यापि मनुष्यादिदेहयोगरूपावस्थाभेदाद्भोक्तृत्वं, एवं परमात्मनोऽपि किन्नस्यादितिचेन्न। अन्तर्यामिब्राह्मणे 'एषत आत्माऽन्तर्याम्यमृत' इति अन्तर्यामिणः परस्य ब्रह्मणोनित्याविर्भूतगुणाष्टकत्वलक्षणामृतत्वं श्रूयते। अतो न जीवसाम्यम् ॥

अपिचैवमेके ॥ १३ ॥

अपिच एकेशाखिनः 'तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्यो अभिचाकशीती' ति जीवपरयोर्भोक्तृत्वाभोक्तृत्वलक्षणं वैषम्यमधीयते ॥

अरूपवदेव हि तत्प्रधानत्वात् ॥१४॥

सर्वशरीर्यपि ब्रह्म अरूपवदेव अशरीरितुल्यमेव 'आकाशोहवै नामरूपयो र्निर्वहिता ते यदन्तरे' ति नामरूपकार्यास्पृष्टत्वे सति नामरूपनिर्वोढृत्वस्य प्रतिपादनेन मनुष्यादिनामरूपसम्बन्धकृतकार्यस्य तत्राप्रसक्तेः। अतस्सर्वत्र विद्यमानमपि ब्रह्मोभयलिङ्गमेव ॥

ननु ब्रह्मणः कल्याणगुणा न संति 'अथात आदेशो नेति नेती' ति प्रतिषेधादितिचेत् तत्राह ॥

प्रकाशवच्चावैयर्थ्यात् ॥१५॥

यथा 'सत्यंज्ञानमनन्तं ब्रह्मे' ति श्रुत्यवैयर्थ्याय ज्ञानादिरूपत्वमभ्युपगम्यते, एवं 'सत्यकामस्सत्यसङ्कल्प' इत्यादिश्रुत्यवैयर्थ्याय कल्याणगुणगणोऽप्यभ्युपगन्तव्यः ॥

ननु 'सत्यं ज्ञान' मिति ज्ञानस्वरूपत्वप्रतिपादनादेव ज्ञानस्य गुणाश्रयत्वासम्भवादर्थाद्गुणा निषिद्धा इतिचेत्तत्राह—

आह च तन्मात्रम् ॥ १६ ॥

'सत्यं ज्ञान' मिति श्रुतिर्ब्रह्मणो ज्ञानरूपतामात्रं प्रतिपादयति, न गुणाश्रयतां प्रतिषेधति । तेजोरूपस्य सूर्यस्य प्रभारूपतेजोऽन्तराश्रयत्ववत् ज्ञानरूपस्यापि ब्रह्मणः सार्वज्ञ्याद्याश्रयत्वमुपपद्यते ॥

दर्शयतिचाथो अपिस्मर्यते ॥१७॥

दर्शयति च वेदान्तगणः 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्, पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रियाचे' ति ब्रह्मण उभयलिङ्गत्वम् । स्मर्यते च 'योमामजमनादिञ्च वेत्ति लोकमहेश्वर'मित्यादिभिः ॥

अतएवचोपमासूर्यकादिवत् ॥१८॥

यत एवं तत्तत्स्थानस्थितस्यापि तद्दोषास्पृष्टत्वं अतएव 'आकाशमेकं हि यथा घटादिषु पृथग्भवेत् । तथाऽऽत्मैकोऽप्यनेकस्थो जलाधारेष्विवांशुमान् ॥ एकएव हि भूतात्मा भूतेभूते व्यवस्थितः । एकधा बहुधाचैव दृश्यते जलचन्द्रव' दिति जलगतसूर्यप्रतिबिंबादिवदिति दृष्टांतो युज्यते ॥

अम्बुवदग्रहणात्तु नतथात्वम् ॥१९॥

तुशब्दश्चोद्यं द्योतयति । अम्बुवदिति सप्तम्यन्ताद्वतिः । परमात्मनो नतथात्वं, सूर्यप्रतिबिंबादिसाम्यं न सम्भवतीत्यर्थः । कुतः? अम्बुवदग्रहणात् अम्बुनि यथा प्रतिबिंबो गृह्यते न तथा हि परमात्मा गृह्यते । तत्र हि अजलस्थमेव प्रतिबिंबं जलस्थमिव गृह्यते, अतस्तत्र तद्गतदोषासंस्पर्शो युज्यते । प्रकृते च विकारान्तर्वर्तिनि ब्रह्मणि तद्गतदोषासंस्पर्शो न युज्यते वक्तुं ॥

वृद्धिह्रासभाक्त्वमंतर्भावादुभयसामञ्जस्यादेवंदर्शनाच्च।

विकारान्तर्भावप्रयुक्तविकारगतवृद्धिह्रासादिभाक्त्वलक्षणो यो दोषः सनापतति। तद्गततया प्रतीयमानस्यापि तद्गतदोषास्पृष्टत्वांशे आकाशसूर्यरूपदृष्टान्तद्वयसामञ्जस्यसम्भवात् 'सिंह इव माणवक'इत्यादौ विवक्षितकार्यांश एव दृष्टान्तत्वदर्शनाच्च, न सर्वथा साम्यं दृष्टान्तदार्ष्टान्तिकयोरपेक्षितमिति भावः ॥

ननु 'द्वेवाव ब्रह्मणो रूपे' इति प्रकृतस्य मूर्तामूर्तात्मकप्रपञ्चस्य 'यथामाहारजनं वास' इत्यादिनोपक्षिप्तस्याकारविशेषस्य च, 'अथात आदेशो नेति नेती'ति प्रतिषेधात् निर्विशेषमेव ब्रह्म, अतो नोभयलिंगत्वमिति तत्राह—

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीतिच भूयः ॥

प्रकृतैः 'द्वेवाव ब्रह्मणो रूपे' इत्यादिना प्रतिपादितैः रूपैर्ब्रह्मणो यदेतावत्त्वं परिच्छिन्नत्वलक्षणो यः प्रकारः तं इतिशब्देन परामृश्य नेति नेतीति निषेधति । न तु स्वरूपेण ब्रह्मसम्बन्धिरूपं निषेधति । न हि श्रुतिः स्वयमेव मानान्तराप्राप्तं मूर्तामूर्तात्मकप्रपञ्चरूपत्वं ब्रह्मणः प्रतिपाद्य स्वयमेव निषेधतीति युज्यते वक्तुं, 'प्रक्षाळनाद्धि पङ्कस्य दूरादस्पर्शनं वर'मिति न्यायात् । अतएव निषेधानन्तरमपि ब्रह्मणो भूयो गुणजातं ब्रवीति श्रुतिः । 'नह्येतस्मादिति नेत्यन्यत्परमस्ती'ति स्वरूपतो गुणतश्च सर्वोत्कृष्टत्वं प्रतिपाद्यते । 'अथ नामधेयं सत्यस्य सत्य'मिति नामधेयरूपगुणवत्ता च प्रतिपाद्यते । अतः 'नेति नेती' ति प्रकृतैतावत्त्वमात्रस्य निषेधः ॥

तदव्यक्तमाह हि ॥ २२ ॥

तद्ब्रह्म अव्यक्तं मानान्तरागम्यमिति श्रुतिराह 'न चक्षुषा गृह्यते नापि वाचे'ति । ततश्च मानान्तरागम्यस्य श्रुत्येकसमधिगम्यस्य ब्रह्मस्वरूपस्यवा मूर्तामूर्तात्मकप्रपञ्चशरीरकत्वस्य वा न निषेधो युक्तः ॥

अपिसंराधने प्रत्यक्षानुमानाभ्याम् ॥२३॥

संराधनं=सम्यक्प्रीणनम् । भक्तिरूपापन्ननिदिध्यासनम् । तस्मिन् सत्येव साक्षात्कारः नान्यथेति 'ततस्तु तं पश्यति निष्कळं ध्यायमानः, नाहं वेदैर्नतपसा न दानेन नचेज्यया । भक्त्या त्वनन्यया शक्य अहमेवं-विधोऽर्जुने' ति श्रुतिस्मृतिभ्यामवगम्यते ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात्।२४।

निदिध्यासनजन्यसाक्षात्कारदशायाञ्च ब्रह्मस्वरूपभूतानन्दज्ञानादि-तुल्यतया 'अहंमनुरभवं सूर्यश्चे' ति ब्रह्मशरीरभूतमनुसूर्यादिप्रपञ्चस्यापि तत्त्वविद्भिर्वामदेवादिभिस्साक्षात्क्रियमाणत्वात् ब्रह्मस्वरूपवत्तच्छरीरभूत-मूर्तामूर्तात्मकप्रपञ्चस्याप्यबाधितत्वं सिद्धम् । ब्रह्मस्वरूपप्रकाशश्च कथं भ-वतीत्याकांक्षायामाह– प्रकाशश्च कर्मण्यभ्यासादिति । संराधनात्मके ध्यान-रूपे कर्मण्यभ्यासात् प्रकाशो भवति, 'ध्याननिर्मथनाभ्यासाद्देवं पश्येन्नि-गूढव' दिति श्रुत्युक्तेरितिभावः ॥

अतोऽनंतेन तथा हिं लिंगम् ॥२५॥

अतः उक्तैर्हेतुभिरनन्तेन कल्याणगुणेन विशिष्टंब्रह्म । तथाहि सत्येव उभयलिङ्गं ब्रह्म उपपन्नं भवतीत्यर्थः ॥

इति उभयलिंगाधिकरणम् ॥९॥

उभयव्यपदेशात्त्वहिकुंडलवत् ॥२६॥

'द्वेवाव ब्रह्मणो रूपे' इत्यादिनोक्तमचिद्वस्तुनो ब्रह्मरूपत्वं किं ब्रह्म-स्वरूपस्यैवाचिद्रूपेण परिणामाद्भवति, उत परस्मिन् ब्रह्मणि अचिद्वस्तुनि च एकजातियोगात् उत जीववद्ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनेति संशयः । भि-न्नाभिन्नत्वरूपोभयव्यपदेशोपपत्तये ब्रह्मैवाचिद्रूपेण परिणमतइति प्रथमःपक्षः। तथा सति ब्रह्मणो निर्दोषता बाध्यत इति एकजातियोगेनेति द्वितीयःपक्षः। एवंसति 'आत्मैवेदंसर्वंब्रह्मैवेदंसर्व' मितिब्रह्मस्वरूपस्यैवसर्वशब्दवाच्यत्वव्यप-देशबाधस्स्यात् । नह्येकैव गोव्यक्तिःखंडो गौरित्यादिसर्वगोव्यक्तिवाचिशब्दै-

रभिधीयते । अतो जीवस्येव ब्रह्मशरीरतया ब्रह्मविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वमिति राद्धान्तः । सूत्रार्थः– तुशब्दोऽवधारणे । अहिःकुण्डलभावादिवत् ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थानं नानात्वैकत्वरूपोभयव्यपदेशात् ॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २७ ॥

वाशब्दोऽनन्तरोक्तव्यावृत्त्यर्थः । यथा प्रकाशतदाश्रययोस्तेजस्त्वैकजातियोगादभिन्नत्वमेवमचिद्ब्रह्मणोरपि ॥

पूर्ववद्वा ॥२८॥

वाशब्दः पक्षद्वयव्यावृत्त्यर्थः । पूर्ववद्यथा 'अंशो नानाव्यपदेशात्, प्रकाशादिवत्तु नैवं पर' इत्युभयव्यपदेशोपपत्तये ब्रह्मणो निर्दोषत्वसिद्धये च प्रकाशजातिगुणशरीरवत् पृथक्सिध्यनर्हविशेषणतया जीवस्य ब्रह्मांशत्वमुक्तम् । एवमचिद्वस्तुनोऽपि अचिद्वस्तुवाचिशब्देनाचिद्वस्तुविशिष्टंब्रह्मैवाभिधेयमिति 'आत्मैवेदं सर्व'मित्यभेदव्यपदेशोपपत्तिः, विशेषणविशेष्ययोस्स्वरूपस्वभावभेदज्ञापनाय विशेषणविशेष्ये निष्कृष्य भेदेन व्यपदेशश्चोपपद्यते ब्रह्मणो निर्दोषत्वञ्च ॥

प्रतिषेधाच्च ॥२९॥

'सवा एष महानज आत्मा विजरो विमृत्युः, नास्य जरयैतज्जीर्यति, विजरो विमृत्यु' रित्यादिब्रह्मणोऽचिद्धर्मप्रतिषेधाच्च विशेषणविशेष्यभावेनैव अंशांशिभाव इत्यर्थः ॥

इति अहिकुण्डलाधिकरणम् ॥६॥

परमतस्सेतून्मानसंबन्धभेदव्यपदेशेभ्यः ॥ ३० ॥

वेदान्ते जगत्कारणतया प्रतिपाद्यमानस्यात्मनः 'अथ य आत्मा ससेतुर्विधृति'रिति सेतुत्वश्रवणात् सेतोश्च प्राप्यान्तरप्रापकत्वस्यैव दर्शनेन ब्रह्मणोऽपि प्राप्यान्तरप्रापकता प्रतीयते न तु स्वयंप्राप्यता । किञ्च 'एतं सेतुं तीर्त्वे' ति तरितव्यत्वाभिधानेन एतस्य प्राप्यत्वाभावाविष्करणात्

वेदान्तेषु 'चतुष्पात् ब्रह्मषोडशकल'मित्युन्मानश्रवणान्नेदमपरिमितं, अपरिमितस्योन्मानासम्भवात्। अतो वेदान्तेषु अपरिमितत्वेन प्रतीयमानमन्यदेवेति प्रतीयते। किंच, 'अमृतस्य परं सेतु' मिति अमृतस्य वस्त्वन्तरस्य प्राप्यप्रापकत्वलक्षणस्सम्बन्धः षष्ठ्या प्रतीयते। न हि स्वस्मिन्नेव प्राप्यप्रापकत्वलक्षणस्सम्बन्धस्सम्भवति। किंच, 'तेनेदं पूर्णं पुरुषेण सर्व'मिति प्रतिपादितपुरुषादपि 'ततो यदुत्तरतर' मित्यादिभिरधिकस्य निर्देशात् परस्मादपि ब्रह्मणः परमन्यत् व्यपदिश्यते। अतएभ्यो हेतुभ्यः परस्मादपि ब्रह्मणोऽन्यत् परमभ्युपगन्तव्यमिति पूर्वपक्षे प्राप्त उच्यते—

सामान्यात्तु ॥३१॥

'यआत्मा स सेतु'रिति व्यपदेशः 'एषां लोकानामसम्भेदाये' ति वाक्यशेषश्रुतासङ्करकारित्वलक्षणधर्मसामान्यनिबन्धनः। न तु प्राप्यान्तरप्रापकत्वलक्षणधर्मनिबन्धनः। 'एतं सेतुं तीर्त्वे'त्यत्र तरतिश्च प्राप्तिवचनः 'वेदान्तं तरती'तिवन्नोल्लंघनवचनः॥

यदुक्तमुन्मानव्यपदेशादस्य परिमितत्वं प्रतीयत इति तत्राह—

बुद्ध्यर्थः पादवत् ॥३२॥

यथा 'मनोब्रह्मेत्युपासीतेत्यध्यात्मं तदेतच्चतुष्पाद्ब्रह्म वाक्पादःप्राणः पादश्चक्षुःपादः श्रोत्रं पाद इत्यध्यात्म'मित्यत्र ब्रह्मप्रतीकभूतमनआदौ वागादिपादत्वव्यपदेशोपदेश उपासनार्थः, न तु तात्त्विकः, मनसो वागादिपादत्वासम्भवात्, एवमपरिच्छिन्नस्य ब्रह्मणः 'प्राचीदिक्कला प्रतीची दिक्कला दक्षिणा दिक्कला उदीची दिक्कला एष वै सोम्य चतुष्कलः पादो ब्रह्मणः प्रकाशवान्नामे' त्युक्तदिगादिलक्षण चतुष्कलपादसम्बन्धासम्भवादुपासनार्थ एव॥

ननु स्वयमनुन्मितस्य कथमुपासनार्थतयाऽप्युन्मानप्रतीतिस्तत्राह—

स्थानविशेषात् प्रकाशादिवत् ॥ ३३ ॥

यथा प्रकाशाकाशादेरपरिच्छिन्नस्यापि वातायनाद्युपाधिवशेन परिच्छिन्नत्वानुसन्धानम्, एवं इहापि अभिव्यक्तिस्थानभूतप्रागाद्युपाधिवशेन उन्मितत्वानुसन्धानमुपपद्यते ॥

यदुक्तं 'अमृतस्य परं सेतु' मिति सम्बन्धव्यपदेशेनामृताद्भेदोऽवगम्यत इति तत्राह—

उपपत्तेश्च ॥ ३४ ॥

'यमेवैष वृणुते तेन लभ्य' इति स्वप्राप्तेः स्वयमेव साधनतया जोघुष्यमाणे ब्रह्मणि स्वेनैव प्राप्यप्रापकत्वलक्षणसम्बन्धव्यपदेशस्यापि नानुपपत्तिः ॥

यदुक्तम्– 'ततो यदुत्तरतर'मिति अधिकं वस्तु प्रतिपाद्यत इति तत्राह–

तथाऽन्यप्रतिषेधात् ॥३५॥

'यस्मात्परन्नापरमस्ती' ति पूर्ववाक्ये तदतिरिक्तोत्कृष्टवस्तुनो निषेधेन तद्विरुद्धतया 'ततो यदुत्तरतर' मिति अनन्तरवाक्ये तदधिकवस्तूपक्षेपासम्भवाच्चतो यदुत्तरतरमित्यत्र ततश्शब्दः पूर्वोपपादितस्य पुरुषपारम्यस्य उपसंहारपरः । न तु पूर्वप्रतिपादितपुरुषस्य प्रतिपिपादयिषितवस्त्वन्तरावधित्वप्रतिपादनपरः । यद्वा 'तेनेदं पूर्ण' मिति पूर्ववाक्ये सर्वमिदमिति प्रथमान्तनिर्दिष्टतया प्रधानस्य जगतएव 'ततो यदुत्तरतर'मिति तच्छब्देन ग्रहणं युक्तम् । यदुक्तं 'परात्पर' मिति परभेदो व्यपदिश्यत इति तन्न 'नह्येतस्मादिति नेत्यन्यत्परमस्तीति' इति नेतिशब्दनिर्दिष्टात् एतस्मात् ब्रह्मणोऽन्यत्परन्नास्तीत्यन्यस्य परस्य प्रतिषेधात् । 'परात्परं पुरुष' मिति श्रुतिस्तु 'अक्षरात्परतः पर' इति अक्षरापेक्षया परस्मात्समष्टिजीवात्परमदृश्यत्वादिगुणकं प्रकृतं भूतयोन्यक्षरपुरुषमेव प्रतिपादयतीत्यर्थः ।

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥३६॥

अनेन ब्रह्मणा सर्वगतत्वं सर्वस्य जगतो व्याप्तत्वं आयामशब्दादिभ्योऽवगम्यते । आयामशब्दस्तावत् 'तेनेदं पूर्णं पुरुषेण सर्वं, अन्त-

बहिश्च तत्सर्वं व्याप्य नारायणः स्थित' इत्यादिः। आदिशब्देन 'ब्रह्मैवेदं सर्वं' मित्यादयो गृह्यन्ते। अतो न परब्रह्मणोऽन्यत्प्राप्यमस्तीति स्थितम्॥

इति पराधिकरणम् ॥७॥

फलमतउपपत्तेः ॥३७॥

ऐहिकामुष्मिकं शास्त्रीयं फलं कर्मण एव स्यात, तस्य फलसाधनत्वश्रवणादिति पूर्वपक्षे प्राप्तेऽभिधीयते–

फलमतउपपत्तेः। कर्मभिराराधितादस्मादेव परमपुरुषात्फलं। सर्वज्ञस्य सर्वशक्तेः ब्रह्मणस्सेवाराधितराजवत्फलप्रदत्वोपपत्तेः॥

श्रुतत्वाच्च ॥ ३८ ॥

'सवा एष महानज आत्माऽन्नादो वसुदान' इति तस्यैव फलप्रदत्वस्य श्रुतत्वात्॥

पूर्वपक्षमाह —

धर्मं जैमिनिरतएव ॥ ३९ ॥

कर्मोपासनरूपाराधनात्प्रसन्नस्य परमपुरुषस्य फलदातृत्वे कर्मानुष्ठानानन्तरमेव प्रसादो वक्तुन्नशक्यते। परमस्वतन्त्रस्य प्रसादेसति फलविळम्बायोगात्, कीर्तनादिना फलजननाभावप्रसङ्गाच्च। भाविसंकीर्तनेन फलजननमनुसन्धाय हठात्प्रसीदतश्च असार्वज्ञ्यप्रसङ्गात्, प्रयाजानुष्ठानानन्तरमेव प्रधानानुष्ठाने अङ्गान्तरवैकल्येऽपि फलनिष्पत्तिप्रसङ्गात्, सर्वेश्वरप्रसादस्य वन्ध्यत्वायोगात्। तस्मात्कर्मभिरपूर्वे निष्पन्ने तस्य सङ्कीर्तनादिना नाशहेतुरहितस्य फलजननौन्मुख्ये सति परमपुरुषः प्रसीदतीति वक्तव्यम्। ततश्च अवश्याभ्युपगतापूर्वेणैव निर्वाहे किमीश्वरद्वारप्रसादकल्पनया। न च 'तृप्तएवैन' मित्यादिवाक्यशेपश्रुतदेवताप्रसादकल्पनमयुक्तमिति वाच्यम्। कृषिकर्मणि 'साहाय्यं कृतवद्भिर्भवद्भिरेवेदं फलं दत्त'मिति प्रशंसावाक्यवत् तादृशवाक्यशेपस्य कर्माङ्गभूतदेवताप्रसादपरत्वोपपत्तेः।

तस्मात् यागदानाख्यधर्ममेव जैमिनिः फलप्रदं मन्यते । अत एव उपपत्तेः शास्त्राच्च कृष्यादीनां फलसाधनत्ववत् यागदानादीनां विनश्वराणामप्यपूर्वद्वारेण फलसाधनत्वोपपत्तेः 'यजेत स्वर्गकाम'इति विधिप्रत्ययेन प्रकृत्यर्थयागस्यैव फलसाधनत्वश्रवणात् ॥

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥४०॥

बादरायणस्त्वाचार्यः पूर्वोक्तमेव परमात्मनः फलप्रदत्वं मन्यते । हेतुव्यपदेशात् 'यजदेवपूजाया' मिति प्रीतिहेतुत्ववाचिना पूजाशब्देन यागस्य देवताप्रीतिहेतुत्वव्यपदेशात्, 'स एवैनं भूतिं गमयती' त्यादिकर्मविधिशेषवाक्येषु कर्माराधितदेवताया एव यागादेः प्रीतिहेतुत्वावगमात् 'अहं हि सर्वयज्ञानां भोक्ता च प्रभुरेवचे' ति फलप्रदायित्वलक्षणप्रभुत्वस्य परमात्मन्येव स्मृतत्वात्, आशु विनश्यतः कर्मणो विधिवाक्यश्रुतकालान्तरभाविफलसाधनत्वनिर्वाहाय द्वारापेक्षायां वाक्यशेषप्रतिपन्नदेवताप्रीतिरूपद्वारपरित्यागेन आत्मसमवेतादृष्टरूपद्वारपरिकल्पनस्यानुचितत्वात्, कर्मप्रीतः परमात्मैव फलप्रद इति स्थितम् ॥

इति फलाधिकरणम् ॥८॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताविरुदाञ्चितैः श्रीमद्रङ्ग
रामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां
श्रीशारीरकशास्त्रार्थदीपिकायां तृतीयाध्यायस्य
द्वि ती यः पा दः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥
॥ श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥१॥

नानाशाखास्वाम्नातानि वैश्वानराक्षरोपासनादीनि अभ्यासप्रकरणान्तराभ्यां भिद्यन्ते । इतरथा पुनश्श्रवणलक्षणाभ्यासस्य प्रकरणान्तरस्य च वैयर्थ्यप्रसङ्गादिति शाखान्तराधिकरणपूर्वपक्षन्यायेन पूर्वपक्षे प्राप्ते उच्यते–

सर्ववेदान्तेषु प्रतीयमानं वैश्वानराद्युपासनमेकमेव । चोदनाद्यविशेषात् । चोदना तावद्वैश्वानरमुपासीतेत्यादिकैकरूपैव । ब्रह्मप्राप्तिरूपफलसंयोगोऽप्यविशिष्टः । उपायस्वरूपमप्यविशिष्टम् । वैश्वानरविद्येति समाख्याऽप्यविशिष्टा । अतः 'एकं वा संयोगरूपचोदनाख्याविशेषा' दिति शाखान्तराधिकरणसिद्धान्तसूत्रोक्तन्यायेनोपासनैक्यमेव, स्वीकृतम् ॥

भेदान्नेतिचेदेकस्यामपि ॥२॥

शाखान्तरे अभ्यासप्रकरणान्तरवशेन विद्याभेदावश्यम्भावान्नविद्यैक्यं । ननु विद्यैक्ये पुनश्श्रवणवैयर्थ्यप्रसङ्गादिति चेन्न । एकस्यामपि विद्यायामध्येतृभेदात् पुनश्श्रवणसार्थक्योपपत्तेः न विद्याभेदः । ननु विद्यैक्ये मुंडकाम्नाताक्षरविद्यायाः शाखान्तरोदिताक्षरविद्यैक्येन 'तेषामेवैतां ब्रह्मविद्यां वदेत शिरोव्रतं विधिवद्यैस्तु चीर्ण'मित्याथर्वणिकमात्रानुष्ठेयशिरोव्रताङ्गकत्वं शाखान्तराधीताक्षरविद्याया अपि स्यात् । नचेष्टापत्तिः । शिरोव्रतशून्यानामनाथर्वणिकानामक्षरविद्यानिष्ठा न स्यात् । अत आथर्वणिकमात्रानुष्ठेयशिरोव्रतांगकमुण्डकाम्नाताक्षरविद्यायाः शाखान्तराधीताक्षरविद्या भिद्यतइत्यभ्युपगन्तव्यमितिचेत् तत्राह–

स्वाध्यायस्य तथात्वे हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ॥३॥

तथात्व इति निमित्तसप्तमी । स्वाध्यायस्य तथात्वसिध्यर्थं अध्ययनजन्यसंस्कारभाक्त्वसिध्यर्थं शिरोव्रतोपदेशः । शिरोव्रतांगकाध्ययनेन उपनिषद्रूपस्वाध्यायस्य संस्कारो भवति । उपनिषदध्ययनांगं शिरोव्रतं, न विद्यांगम् । 'नैतदचीर्णव्रतोऽधीत' इति शिरोव्रतस्याध्ययनसंयोगावगमात् । समाचाराख्ये आथर्वणिकग्रंथे 'इदमपि वेदव्रतेन व्याख्यात' मिति शिरोव्रते वेदव्रतशब्दप्रयोगाच्चाध्ययनांगमेव शिरोव्रतं नविद्यांगम् । 'सववच्च तन्नियमः' । यथा सप्तसूर्यादयः शतौदनपर्यंताः सवहोमा आथर्वणिकैकाग्निसंबंधात्तत्रैव नियता भवंति, एवं शिरोव्रतमपि आथर्वणिकाध्ययनसंबंधात्तत्रैव नियतं भवति ॥

दर्शयति च ॥४॥

दर्शयति च श्रुतिरुपासनस्य सर्ववेदान्तप्रत्ययत्वम् । तथा हि छांदोग्ये— 'तस्मिन्यदन्तस्तदन्वेष्टव्य' मित्युक्त्वा 'किं तदत्र विद्यते यदन्वेष्टव्य' मिति प्रश्नपूर्वकमपहतपाप्मत्वादिगुणाष्टकविशिष्टः परमात्मा तस्मिन्नुपास्य इत्युक्तम् । तैत्तिरीयके तु छान्दोग्यस्थं प्रतिनिर्देशमुपजीव्य 'तत्रापि दह्रं गगनं विशोकस्तस्मिन्यदन्तस्तदुपासितव्य' मिति गुणाष्टकविशिष्टस्य परमात्मन उपासनमुच्यते । तदेतदुपजीवनं विद्यैक्यं दर्शयति ॥

एवं सिद्धस्य विद्यैक्यस्य प्रयोजनमुच्यते—

उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ॥५॥

एवं सर्ववेदान्तेषु समाने सत्युपासने वेदान्तान्तराम्नातगुणा वेदान्तान्तरे उपसंहर्तव्याः, विधिशेषवदर्थाभेदात् । यथा एकस्मिन्वेदान्ते श्रुतो वैश्वानरदहरादिविधिशेषो गुणः तद्विद्यासम्बन्धात्तदुपकारायानुष्ठीयते, तथा वेदान्तान्तरोदितोऽपि गुणः तत्संबंधित्वाविशेषात्तदुपसंहर्तव्यः । चशब्दोऽवधारणे ॥

इति सर्ववेदान्तप्रत्ययाधिकरणम् ॥१॥

अन्यथात्वं शब्दादितिचेन्नाविशेषात् ॥६॥

वाजिनां तावत् 'द्वयाह वै प्राजापत्या देवाश्चासुराश्चे'त्यारभ्य 'तेह देवा ऊचुर्हन्तासुरान्यज्ञ उद्गीथेनात्ययामे'ति उद्गीथेनासुरविध्वंसनं प्रतिज्ञायोद्गीथे वागादिमनःपर्यन्तदृष्टावसुरैरभिभवमुक्त्वा 'अथहेममासन्यं प्राणमूचु'रित्यादिनोद्गीथे प्राणदृष्ट्याऽसुरपरिभवमुक्त्वा 'भवत्यात्मना पराऽस्य द्विषन् भ्रातृव्यो भवति यएवंवेद' इति शत्रुपराजयफलायोद्गीथे प्राणदृष्टिर्विहिता। एवं छंदोगानामपि 'देवासुराह वै. यत्र संयेतिर' इत्यारभ्य 'तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम ' इत्युद्गीथेनासुरपराभवं प्रतिज्ञाय तद्वदेवोद्गीथे वागादिदृष्टौ दोषमभिधाय 'अथ ह य एवायं मुख्यःप्राणस्तमुद्गीथमुपासाञ्चक्रिर' इत्यादिनोद्गीथे प्राणदृष्ट्याऽसुरपराभवमुक्त्वा 'यथाऽश्मानमाखणमृत्वा विध्वँसतएवँहैव सविध्वँसते य एवंविदि पापं कामयते' इति शत्रुपराभवायोद्गीथे प्राणदृष्टिर्विहिता। तत्रोभयत्राध्यस्तप्राणभावस्योद्गीथस्यैवोपास्यत्वश्रवणेन रूपभेदाच्छत्रुपराभवरूपफलसंयोगाविशेषादुद्गीथविद्येति समाख्यैक्याच्च तयोरैक्यमिति पूर्वपक्षः। तत्र राद्धान्तच्छायया परिचोद्य परिहरति— अन्यथात्वं शब्दादितिचेन्नाविशेषात् ॥

वाजसनेयके— 'ते हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत्' इत्युद्गानकर्तरि प्राणदृष्टिविधानात्, छान्दोग्ये— 'अथ ह यएवायं मुख्यःप्राणस्तमुद्गीथमुपासाञ्चक्रिर' इति उद्गानकर्मणि प्राणदृष्टिविधानाच्छब्दादुपास्यरूपान्यथात्वप्रतीतेर्भेद इति चेन्न। देवासुरसंग्रामोपक्रमादिबहुसारूप्यात् वाजसनेयकेऽपि 'हन्तासुरान्यज्ञ उद्गीथेनात्ययामे' त्युद्गीथेनोपक्रमात्तदविरोधाय 'तेभ्य एष प्राण उदगायत्' इत्युद्गानकर्मरूपएवोद्गीथे पाक्रादिषु सौकर्यातिशयविवक्षया पच्यत ओदनः स्वयमेवेत्योदने कर्तृत्वोपचारवदुद्गानकर्मण्येव कर्तृत्वोपचारोपपत्तेरुद्गीथएवोभयत्राप्युपास्यः। अतो विद्यैक्यमिति प्राप्ते प्रचक्ष्महे ॥

नवा प्रकरणभेदात्परोवरीयस्त्वादिवत् ॥७॥

नवेति पूर्वपक्षं व्यावर्तयति । प्रकरणभेदात् छान्दोग्ये 'ओमित्येतदक्षरमुद्गीथमुपासीत' इति प्रकृतोद्गीथावयवप्रणवविषयकमुपासनम् । वाजसनेयके प्रणवस्याप्रकृतत्वात् 'उद्गीथेनात्ययामे'ति कृत्स्नोद्गीथस्यैव प्रस्तुतत्वात्कृत्स्नोद्गीथविषयकमेवोपासनम् । अतो रूपभेदाद्विद्याभेदः । किंच छांदोग्ये उद्गीथस्याध्यस्तप्राणभावस्योपास्यत्वं । वाजिनां तु " अथ हेममासन्यं प्राणमूचुस्त्वं न उद्गायेति तथेति तेभ्य एष प्राण उदगायत् ' इत्यध्यस्तप्राणभावस्योद्गातुरुपास्यत्वं । न च वाजसेनयके उद्गातुरुपास्यत्वे 'उद्गीथेनात्ययामे'त्युपक्रमविरोधश्शंकनीयः । उद्गातुरुपासने उद्गीथस्यानुप्रविष्टतयोपक्रमावगतस्योद्गीथस्यापरित्यागात् । अत्र च वक्तव्यं बृहदारण्यकप्रकाशिकायामुक्तम् । तत्रैवानुसंधेयम् ॥

संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥ ८ ॥

ननूद्गीथविद्येति संज्ञैक्याद्विद्यैक्यमुक्तमिति चेन्न । तत्संज्ञैक्यं विधेयभेदेऽप्यस्त्येव । यथाऽग्निहोत्रसंज्ञा नित्याग्निहोत्रे कुंडपायिनामयनाग्निहोत्रे च । एवं छांदोग्यगतप्रथमप्रपाठकोदितासु बह्वीषु विद्यासूद्गीथविद्येति संज्ञैक्यस्य दर्शनाच्च तदप्रयोजकमिति भावः ॥

व्याप्तेश्च समञ्जसम् ॥ ९ ॥

छांदोग्ये प्रथमप्रपाठके उत्तरास्वपि विद्यासु ' ओमित्येतदक्षरमुद्गीथमुपासीते ' त्यादिपूद्गीथावयवस्य प्रणवस्य व्याप्तत्वेन न तन्मध्यपातित्वादस्या अपि विद्याया उद्गीथावयवप्रणवविषयत्वमेव । ततश्च छांदोग्यवाजसनेयकोद्गीथविद्यायाश्चाध्यस्तप्राणभावोद्गानकर्तृविषयत्वात् प्रधानभूतोपास्यभेदे बह्वर्थवादसारूप्यस्याप्रयोजकत्वाद्विद्याभेद इति स्थितम् ॥

इति अन्यथात्वाधिकरणम् ॥ २ ॥

सर्वाभेदादन्यत्रेमे ॥ १० ॥

छांदोग्यवाजसनेयकयोः कौषीतकिनामुपनिषदि च दशमेऽध्याये

' यो ह वै ज्येष्ठं च श्रेष्ठं च वेद ज्येष्ठश्च ह वै श्रेष्ठश्च भवती ' त्यारभ्य प्राणविद्या पठ्यते । तत्र सर्वगतस्य प्राणस्य ज्यैष्ठ्यश्रैष्ठ्यगुणकत्वं वाक्चक्षुश्श्रोत्रमनसां वसुमत्तासंपादकत्वसमविषमभूतलादिप्रदर्शकत्वसंपद्धेतुभूतवेदशास्त्रतदर्थश्रवणादिसंपादकत्वस्रक्चन्दनादि विषयज्ञानरूपभोगायतनत्वलक्षणवसिष्ठत्वप्रतिष्ठात्वसंपत्त्वायतनत्वरूपगुणवत्त्वं, वागादीनांच श्रैष्ठ्यविषयपरस्परविवादेन ब्रह्मसभोपसर्पणं ' यस्मिन्वउत्क्रांते शरीरानवस्थितिस्सवश्श्रेष्ठ'इति ब्रह्मवचनं, तत्परिचिक्षिपया वागादीनामेकैकस्य शरीरादुत्क्रम्य पर्यटनं, तस्मिन् शरीर इंद्रियाणांच यथापूर्वमवस्थानं, प्राणस्योत्क्रमणप्रवृत्तौ तेषां विशरणं, ततो भीतानां वागादीनां 'मोत्क्रमीस्त्वं नश्श्रेष्ठ' इति मुख्यप्राणं प्रति प्रार्थनमित्येतत्सर्वं क्रमेण वर्णितम् । कौषीतकिशाखायांतु छांदोग्यवाजसनेयकवत् ' यदहं वसिष्ठाऽस्मि त्वं तद्वसिष्ठोऽसी ' त्यनेन प्रकारेण प्राणे वागादिगतवसिष्ठत्वादिसमर्पणं नोक्तं । अतो वागादिगतवसिष्ठत्वादेः प्राणाधीनत्वाप्रतीत्या वागादीनां स्वातंत्र्यप्रतीतेः छांदोग्यवाजसनेयकाम्नातप्राणविद्यातः कौषीतक्याम्नातप्राणविद्याया भेदप्रतिभोद्गमः । तथा तस्यामेवोपनिषदि चतुर्थेऽध्याये– ' अथातोनिश्श्रेयसादानं सर्वावै देवता अहं श्रेयसे विवदमाना अस्माच्छरीरादुच्चक्रमुस्तद्दारुभूतं शिश्ये अथैनं वाक्प्रविवेश तद्वाचाऽवदच्छिश्यएवे'त्यादिना 'अथैनचक्षुः प्रविवेश तद्वाचाऽवदच्चक्षुषापश्यच्छिश्यएव अथैनत्प्राणः प्रविवेश तत्ततएव समुत्तस्थौ तद्देवाः प्राणे निश्श्रेयसं विजित्य प्राणमेव प्रज्ञात्मानमभिसंभव' न्निति प्राणराहित्यदशायामपि वागादीनां स्वकार्यकरत्वप्रदर्शनेन छांदोग्यैक्याप्रतीतेरिति पूर्वपक्षे प्राप्त उच्यते–

सर्वाभेदादन्यत्रेमे– बहुसारूप्यप्रतीतौ किंचिद्वैरूप्यस्य प्रत्यभिज्ञाविरोधित्वाभावाद्विद्यैक्यमिति । प्रतिज्ञातप्राणज्यैष्ठ्यश्रैष्ठ्योपपादनप्रकारस्य निरुत्त्यपि शाखास्वभेदाच्छाखांतरीयविद्यायां शाखांतरविद्यागतगुणोपसंहारः कर्तव्य इति सूत्रार्थः ॥ इति सर्वाभेदाधिकरणम् ॥३॥

आनंदादयः प्रधानस्य ॥११॥

यथा विद्यांतरे श्रुतानां संयद्वामत्वादीनां गुणानां न विद्यांतरे उपसंहारः, तथा सत्यत्वज्ञानत्वादीनामपि विद्याविशेषप्रकरणश्रुतानां न विद्यान्तरे उपसंहारः प्रापकाभावादिति पूर्वपक्षे प्राप्ते उच्यते—

आनन्दादयः प्रधानस्य । प्रधानस्य गुणिनो ब्रह्मणः सर्वेषु उपासनेष्वभेदाद्गुण्यपृथग्भूतानां आनंदादीनां गुणानामपि सर्वेषु उपासनेषु उपसंहारः ॥

नन्वेवं प्रियशिरस्त्वादीनामपि सर्वेषूपासनेषूपसंहारः प्राप्नोति । तत्राह—

प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥१२॥

प्रियशिरस्त्वादीनां ब्रह्मणो बुध्युपारोहाय कल्पितत्वेन ब्रह्मगुणत्वाभावात् नोपासनान्तरे तेषां प्राप्तिः । यदि हि ब्रह्मणाशिरःपक्षपुच्छाद्यवयवभेदस्स्यात्, तर्हि ब्रह्मणो मध्यप्रदेशे उपचयः, शिरःप्रदेशे अपचयः, इत्यादिकं पक्षिवत् प्रसज्येत । नचानन्तस्य ब्रह्मणस्तदुपपद्यते ॥

ननु प्रियशिरस्त्वादीनां अब्रह्मगुणतया सर्वविद्योपसंहाराप्राप्तावपि संयद्वामत्वादीनां ब्रह्मगुणानां सर्वविद्यासूपसंहारः प्राप्नोति, ब्रह्मगुणानामानन्त्येनोपसंहारोऽशक्यश्च । तत्राह—

इतरेत्वर्थसामान्यात् ॥१३॥

इतरेतु आनन्दादयः अर्थसामान्यात् प्रयोजनसामान्यात् ब्रह्मस्वरूपावगतिलक्षणप्रयोजनैक्यात् सर्वासु परविद्यासूपसंहर्तव्याः । ततश्च स्वरूपनिरूपकाः धर्मास्सत्यज्ञानत्वानन्दत्वादयस्सर्वासु परविद्यासु उपसंहर्तव्याः । निरूपितस्वरूपधर्माः सत्यकामत्वादयः न सर्वासु परविद्यासूपसंहर्तव्याः ॥

ननु प्रियाशिरस्त्वादीनां वस्तुतो ब्रह्मधर्मत्वाभावे तदुपदेशः किमर्थ इत्यत्राह—

आध्यानाय प्रयोजनाभावात् ॥१४॥

आध्यानाय बुध्यारोहणाय प्रियशिरस्त्वादिरुपदिश्यते । प्रयोजनान्तरस्याभावात् ॥

आत्मशब्दाच्च ॥१५॥

'अन्योन्तरआत्मानन्दमय' इति आनन्दमयस्यात्मशब्देन निर्देशात् आत्मनश्च शिरःपक्षपुच्छाद्यसम्भवात्, प्रियशिरस्त्वादिकं बुध्यारोहाय कल्पितमित्येवावसीयते ॥

ननु 'अन्योन्तरआत्मा प्राणमय' इत्यात्मशब्दस्यानात्मस्वपि पूर्वं प्रयुक्तत्वात् 'अन्योऽन्तरआत्माऽऽनन्दमय' इत्यात्मशब्दस्य परमात्मविषयत्वं कथं निश्चीयते तत्राह–

आत्मगृहीतिरितरवदुत्तरात् ॥१६॥

'अन्योन्तरआत्मानन्दमय' इत्यत्र आत्मशब्देन परमात्मन एव ग्रहणम् । इतरवत्– यथा इतरत्र 'आत्मावा इदमेक एवाग्र आसीत् स ईक्षत लोकान्नु सृजा' इत्यादिषु आत्मशब्देन परमात्मन एव ग्रहणं तद्वत् । कुत एतत्– उत्तरात् । 'सोऽकामयत प्रजायेये'ति आनन्दमयविषयादुत्तराद्वाक्यात् ॥

अन्वयादितिचेत्स्यादवधारणात् ॥१७॥

पूर्वत्र प्राणमयादिषु अनात्मस्वात्मशब्दान्वयदर्शनान्नोत्तरान्निश्चेतुं शक्यत इति चेत्, स्यादवधारणात् । स्यादेव निश्चयः । कुतः? अवधारणात् । पूर्वत्रापि 'तस्माद्वा एतस्मादात्मन आकाशस्सम्भूत' इति परमात्मन एव बुध्याऽवधारितत्वात् । अन्नमयादन्तरे प्राणमये प्रथमं परमात्मबुद्धिरवतीर्णा, तदनन्तरञ्च प्राणमयादन्तरे मनोमये, ततो विज्ञानमये, तत आनन्दमये प्रक्रान्ता परमात्मबुद्धिस्तदन्तराभावात्, तदुत्तराच्च 'सोऽकामयते'ति वाक्यात्, प्रतिष्ठितत्युपक्रमेऽपि अपरमात्मनि परमात्मबुध्या आत्मशब्दान्वय इति निरवद्यम् । नचानन्दमयेऽपि अपरमात्मत्वबुध्या आत्मशब्दप्रयोग इति शंक्यम् । तद्वदत्रान्तरानुपदेशात् बाधकाभावात् । नन्वितरव्यावृत्तब्रह्मस्व-

रूपप्रतिपत्तिकाले सत्यत्वज्ञानत्वादीनां न प्रतीयमानत्वनियमस्सम्भवति, अस्थूलत्वादिना वा अन्तर्यामित्वजगत्कारणत्वलक्ष्मीपतित्वनिरुपाधिकसर्वज्ञत्वादिभिर्वा इतरव्यावृत्तब्रह्मस्वरूपप्रतीतिस्सम्भवात् । अत आनन्दादीनां सत्यकामत्वसंयद्वामत्वादीनाञ्च वैषम्यं दुर्विवेचमिति चेत्, अत्र केचित्–धर्मा हि द्विविधाः विशेष्यस्वरूपनिष्ठाः सविशेषणस्वरूपनिष्ठाश्च । ये विशेष्यस्वरूपनिष्ठाः आनन्दत्वादयः ते सर्वानुयायिनः । इतरे तु व्यवस्थिताः जगत्कारणत्वस्य प्रकृतिपुरुषकालविशिष्टलक्षणतया तदुपयुक्तसार्वज्ञ्यादेरपि तथात्वान्नसर्वानुयायित्वम् । अयंभावः– केचिद्धर्माः स्वरूपप्रयुक्तास्सततैकरूपाः निर्विकाराः । अत एव 'यच्च कालान्तरेणापि नान्यसंज्ञामुपैति वै । परिणामादिसम्भूतां तद्वस्तु नृपतच्च किं ॥ अनाशी परमार्थश्च प्राज्ञैरभ्युपगम्यते' इत्यादिभिरुपपादिताःपरमार्थशब्दवाच्यसर्वज्ञत्वसर्वनियंतृत्वादिलक्षणास्ते सर्वविद्यानुयायिनः । संयद्वामत्वसर्वज्ञत्वादयस्तु धर्माः स्वरूपव्यतिरिक्तसततैकरूपत्वशून्यप्रकृतितत्कार्यजीवकालेश्वरधर्मभूतज्ञानघटिताः, न ते एकरूपाः । ईश्वरधर्मभूतज्ञानस्यापि नानाविधसङ्कल्पत्वादिलक्षणविकारशालितया ऐश्वर्यतत्क्रियाणामप्यनेकरूपत्वात्तद्घटितधर्माणामपि नैकरूपत्वम् । अत एव न परमार्थशब्दितत्वञ्च । अतस्तेषां न सर्वानुयायित्वम् । ज्ञानत्वानन्तत्वसत्यत्वादीनां तु न तथेति वैषम्यमाहुः । अन्येतु स्वरूपप्रतीत्यन्तर्गता धर्मास्सर्वविद्यानुयायिनः । स्वरूपप्रतीत्यन्तर्गतत्वं स्वरूपान्तर्गतत्वमेव । ज्ञानत्वानन्दत्वादयस्तु स्वरूपाभिन्नधर्माः । अत एव परैरपि 'आनन्दो विषयानुभवो नित्यत्वञ्चेति संति धर्मास्तेचापृथक्त्वेऽपि पृथगिवावभासन्ते' इत्युक्तम् । अतश्च ये स्वरूपाभिन्ना धर्माः ते सर्वविद्यानुयायिनः । सर्वज्ञत्वसर्वकर्तृत्वादयस्तु धर्मभूतज्ञानक्रियादिरूपा धर्मिस्वरूपभिन्ना इति न सर्वानुयायिनः । अपरे तु स्वरूपोपदेशपरवाक्यप्रतिपन्नानां सर्वविद्यानुयायित्वं, नोपासनार्थोपदिष्टानाम् । न च 'यस्सर्वज्ञस्सर्ववि' दित्यादिषु स्वरूपोपदेशपरवाक्यप्रतिपन्नतया सार्वज्ञ्यादीनामपि सर्वविद्यानुयायित्वप्रसङ्ग इति वाच्यम् । तस्याप्युपासनविध्यश्रवणेऽपि तत्परत्वात् । अत

एव 'संभृतिद्युव्याप्त्यपिचात' इत्यधिकरणेऽनारभ्य श्रुतानामश्रुतोपासनविधीनामप्युपासनार्थत्वं सिद्धवत्कृत्यैव किं सर्वविद्यानिवेशः उताल्पायतनव्यतिरिक्तास्विति चिंता प्रवर्तिता । नचैवमुपासनार्थत्वे सार्वज्ञ्यादीनां अपारमार्थ्यप्रसङ्ग इति वाच्यम् । बाधकाभावेन सत्यत्वात् । अत एव 'ध्यानार्थेऽप्युपदेशे तद्गुणक ईश्वरस्ध्यती' ति व्यतिहारसूत्रे शंकरभाष्येऽप्युक्तं । इतरथा परमते सत्यकामत्वादीनां वागादिप्रादत्वादिवत् व्यावहारिकसत्यत्वस्यापि अभावप्रसंगादित्याहुः ॥ इति आनन्दाद्यधिकरणम् ॥४॥

कार्याख्यानादपूर्वम् ॥१८॥

'लंभुकोहवासोभवती'त्यर्थवादोपबृंहितात् 'किंमेवासोभविष्यतीत्यापइतिहोचुस्तस्माद्वाएतदशिष्यंतःपुरस्ताच्चोपरिष्टाच्च अद्भिःपरिदधती'ति छांदोग्ये श्रवणात् अपां वासस्त्वानुसंधानं प्रतीयते । बृहदारण्यके काण्वशाखायां– 'तद्विद्वांसःश्रोत्रिया अशिष्यंतआचामंति अशित्वाचाचामन्ति एतमेव तदनमनग्नं कुर्वंतो मन्यंते तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेवतदनमनग्नं कुरुत' इति अनग्नत्वचिंतनात् वासस्त्वचिंतनविधिरपि प्रतीयते । 'आचामे' दिति आचमनविधिप्रत्ययश्रवणात् आचमनविधिस्स्पष्टं प्रतीयते । तत्र च द्वयोरपि विधेयत्वे गौरवात् एकस्यैव विधेयत्वे वक्तव्ये 'आचामे' दित्याचमने स्पष्टविधिश्रवणात् स्मृत्याचारप्राप्ताचमनातिरिक्तं आचमनांतरं विधीयते । वासस्त्वादिश्रवणं तु कथंचित् स्तुतिरूपतया नेतव्यमिति प्राप्तेऽभिधीयते–

कार्याख्यानादपूर्वम् ॥ विधेरप्राप्तविषयत्वस्वाभाव्यात् आचमनस्य स्मृत्याचाराभ्यामेव प्राप्तत्वात् आचमनांतरविधाने विनिगमकानुपलंभात् अप्राप्तं आचमनीयास्वप्सु वासस्त्वानुसंधानं विधीयते छांदोग्ये आचमनस्यैवाप्रतीतेः शाखांतरेपि वासस्त्वानुसंधानस्यानुगतत्वात् तदेव विधीयत इति सिद्धांतः ॥ इति कार्याख्यानाधिकरणम् ॥५॥

समानएवंचाभेदात् ॥१९॥

एकस्यामेव वाजसनेयशाखायां अग्निरहस्ये ' स आत्मानमुपासीत मनोमयंप्राणशरीरं सत्यसंकल्पमाकाशात्मान ' मिति श्रुतशांडिल्यविद्यातः 'मनोमयोयंपुरुषोभास्सत्यं तस्मिन्नंतर्हृदये यथा व्रीहिर्वायवोवा, सएष सर्वस्य वशीसर्वस्येशानः सर्वस्याधिपतिस्सर्वमिदं प्रशास्तियदिदं किंचे ' ति श्रुता शांडिल्यविद्या भिद्यते । सत्यसंकल्पत्वरूपवशित्वरूपगुणभेदादिति प्राप्त- उच्यते—

समान एवं चाभेदात् ॥ उभयत्रापि मनोमयत्वादिके समाने सति वशित्वादेस्सत्यसंकल्पत्वविततिरूपत्वेन वशित्वसत्यसंकल्पत्वयोरभेदाद्रूपभेदाभावाद्विद्यैक्यमिति सिद्धांतः ॥

इति समानाधिकरणम् ॥६॥

संबंधादेवमन्यत्रापि ॥२०॥

'य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्ष' न्नित्यादिना अक्ष्यादित्यवर्तितया व्याहृतिशरीरकतयाचोपास्यत्वेनोपदिष्टस्य ब्रह्मणः 'तस्योपनिषदहरित्यधिदैवतं, तस्योपनिषदहमित्यध्यात्म ' मिति ये अहरित्यहमिति च रहस्यनामनी उपदिष्टे ते किं स्थानविशेषनियते अतश्चाहरिति नाम आदित्यमण्डलस्थानविशिष्टस्यैव, अहमिति च नामाक्षिस्थपुरुषस्यैवेति नियमोऽस्ति उत नेति चिंतायां पूर्वपक्ष उच्यते—

यथा मनोमयत्वादिविशिष्टस्यैकत्वादुपास्यैक्येन विद्यैक्यात् शांडिल्यविद्यायां गुणोपसंहारः, एवमक्ष्यादित्यसम्बन्धिनो ब्रह्मणस्सत्यस्य व्याहृतिशरीरकस्यैकत्वेन विद्यैक्यात् तत्संबंधिनोर्नाम्नोरप्यनियमेन स्थानद्वयेऽप्युपसंहार इति । एवं प्राप्त उच्यते—

नवाविशेषात् ॥२१॥

'य एष एतस्मिन्मण्डले पुरुषो यश्चायन्दक्षिणेऽक्षन् पुरुषः तावेतावन्योन्यस्मिन् प्रतिष्ठिता'विति द्वित्वसंख्यया प्रधानोपास्यभेदप्रतीतेः, आदि-

त्याक्षिस्थानभेदेन रूपभेदाच्च, विद्याभेदान्नामनोरनियमेन स्थानद्वयेऽप्युपसंहारः ॥

दर्शयति च ॥२२॥

'तस्यैतस्य तदेव रूपं यदमुष्यरूप' मित्यादिच्छान्दोग्यश्रुतिरेव स्थानभेदे परस्परगुणाप्राप्तिं दर्शयति हि चाक्षुषे पुरुषे आदित्यपुरुषरूपाद्यतिदेशेन । यदि हि स्थानभेदेऽपि परस्परगुणप्राप्तिः तर्ह्यतिदेशानर्थक्यमेव स्यात् । अत आदित्यस्थानविशिष्टस्यैवाहरिति नाम अक्षिस्थस्यैवाहमिति नामेति व्यवस्थेति स्थितम् ॥

इति संबंधाधिकरणम् ॥७॥

संभृतिद्युव्याप्त्यपिचातः ॥२३॥

ब्रह्मज्येष्ठा वीर्या संभृतानि ब्रह्माग्रे ज्येष्ठं दिवमाततान । ब्रह्म भूतानां प्रथमो हि जज्ञे तेनार्हति ब्रह्मणा स्पर्धितुं कः ' इति राणायनीयानां खिलमंत्रश्श्रूयते । अत्र परिच्छेदातीते ब्रह्मणि व्यापकत्वादिकथनस्य स्वरूपोपदेशार्थत्वाभावेन उपासनार्थत्वस्य सिद्धतया स्वप्रकारतयोपासनविध्यश्रवणेन अनारभ्याधीतस्य द्युव्याप्त्यादेः प्रकरणांतरगतविद्यार्थत्वे वक्तव्येनियामकाभावादस्थूलत्वादिवत् सत्यत्वादिवच्च सर्वविद्यार्थत्वे प्राप्तउच्यते—

संभृतिद्युव्याप्त्यपिचातः ॥ संभृतिद्युव्याप्तीति द्वंद्वादेकवद्भावः । संभरणं द्युव्यापनञ्च अतस्स्थानवशात् व्यवतिष्ठते । अल्पस्थानासु दहरशांडिल्यविद्यासु अल्पत्वद्युव्यापकत्वयोर्विरोधात् लिंगवशादल्पायतनानवरुद्धविद्यास्वेव व्यवतिष्ठते । नचैवमल्पायतनासु दहरशांडिल्यविद्यासु विरोधादनुपसंहारेऽपि । स्वाभाविकानंत्यस्याप्युपसंहाराभावेन सत्यत्वज्ञानत्वानंतत्वादेस्सर्वविद्यानुसंधानस्य ' आनंदादयःप्रधानस्ये ' त्यधिकरणे सिद्धस्य विरोधस्स्यादिति वाच्यं । स्वाभाविकानंत्यस्य औपाधिकाल्पायतनत्वस्य चानुसंधाने विरोधाभावात् ॥ इति संभृत्यधिकरणम् ॥८॥

पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥२४॥

'तस्यैवं विदुषोयज्ञस्यात्मायजमान' इति श्रुतायाः पुरुषविद्यायाः 'पुरुषोवावयज्ञ' इति छांदोग्यश्रुतापुरुषविद्यानाभिन्ना पुरुषविद्येति समाख्यैक्यात् पुरुषसंबंधिषु यज्ञावयवत्वकल्पनासामान्यात् मरणावभृथसाम्याचेति पूर्वपक्षे प्राप्त उच्यते–

पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥

उभयत्राम्नातयोः पुरुषविद्यात्वेपि विद्याभेदोस्त्येव । कुतः? इतरेषामनाम्नानात् । 'यत्सायं प्रातर्मध्यंदिनं च तानिसवनानि' इत्यादिना तैत्तिरीयाम्नातानां छांदोग्ये अनाम्नानात्, त्रेधाविभक्तपुरुषायुषस्यैव छांदोग्ये सवनत्वेनाभिधानात्छांदोग्यश्रुताशिशिषादीक्षादित्वपरिकल्पनस्यतैत्तिरीयकेऽदर्शनात् यजमानपत्न्यादिपरिकल्पनानांच भिन्नभिन्नत्वात् छांदोग्ये 'पुरुषोवाव यज्ञ' इति श्रुतस्यपुरुषस्य यज्ञत्वपरिकल्पनस्य तैत्तिरीयकेऽदर्शनाच्च विद्याभेद एव । नच 'तस्यैवंविदुषो यज्ञस्ये' त्यत्र षष्ठ्यंतयोस्सामानाधिकरण्याश्रयणेन पुरुषे यज्ञत्वकल्पनं तैत्तरीयकेप्यस्तीति वाच्यं ॥ पुरुषस्यैव यज्ञत्वे तस्यैव यजमानत्वेच विरोधात् । किंच पुरुषे यज्ञत्वकल्पने हि विद्वान्यज्ञ आत्मायजमान इत्येव वक्तव्यं स्यात् । नत्वेकवाक्यतया विदुषोयज्ञस्यात्मा यजमानइति । अतो 'विदुषोयज्ञस्ये' ति व्यधिकरणे षष्ठ्यौ विद्वत्संबंधियज्ञस्येति । ततश्च 'प्रणवएव विस्वर' इति न्यायेन पुरुषस्य यज्ञत्वपरिकल्पनैकरूप्याभावाच्च विद्याभेद एव । यद्वा विदुषोयज्ञत्वकल्पनमिति भाष्यस्वारस्यात् समानाधिकरणे षष्ठ्यौ । नचैवंसति विद्वान्यज्ञस्तस्यात्मा यजमान इति वाक्यभेदश्शंकनीयः । 'विदुषोयज्ञस्यात्मा यजमान' इति सिद्धवत्कारेण विद्वान्यज्ञइत्यस्यार्थस्य सिद्धत्वात् । न च विदुषि यज्ञत्वकल्पने यज्ञत्वयजमानत्वयोरेकनिष्ठत्वविरोध इति वाच्यम् । विद्वच्छब्देन कार्यकारणसंघातविशिष्टस्य आत्मशब्देन निष्कृष्टविशेष्यमात्रस्य च प्रतिपादनसंभवेन विरोधाभावात् । न च विद्यैक्यप्रसक्तिः । छांदोग्याम्नातायाः पुरुषविद्यायाः 'प्रहषोडशंवर्षशतं जीवती' ति षोडशाधिकवर्षशतं जीवनं

फलत्वेनाम्नातं । तैत्तिरीयके तु श्रुतायाः पुरुषविद्यायाः 'ब्रह्मणे त्वामहस-ओमित्यात्मानं युंजीते' ति पूर्वानुवाकविहितब्रह्मविद्यायाः 'ब्रह्मणोमहिमानमाप्नोती' ति ब्रह्मप्राप्तिफलिकायास्सन्निधौ पठितत्वात् 'फलवत्सन्निधौ अफलंतदंग' मिति न्यायेन ब्रह्मविद्यांगतया ब्रह्मप्राप्तिफलत्वमेव । अतः फलसंयोगभेदाद्विद्याभेदस्सिद्धः । न च तैत्तिरीयकपुरुषविद्यायाः पूर्वानुवाकविहितब्रह्मप्राप्तिफलकत्वे पुनः फलकीर्तनं व्यर्थमिति वाच्यम् । 'सोमापौष्णं त्रैतमालभेत पशुकाम' इति श्रुतेन पशुना प्रधानफलेन 'ऊर्वा-उदुंबरऊर्क्पशव' इत्यंगभूतोदुंबरतायास्स्तुतिवत् अंगभूतपुरुषविद्याया अंगिभूतब्रह्मविद्याफलभूतब्रह्मप्राप्तिजनकत्वेन स्तुत्यर्थंवा, पूर्वानुवाकोक्तब्रह्मप्राप्तेर्दक्षिणोत्तरायणनिमित्तकसूर्यचंद्र सायुज्यप्राप्तिपूर्वकत्वलक्षणगुणविधानार्थं वा पुनः कीर्तने न वैयर्थ्यमित्यलं प्रसक्तानुप्रसक्त्या ॥

इति पुरुषविद्याधिकरणम् ॥९॥

वेधाद्यर्थभेदात् ॥२५॥

आथर्वणिकादीनां तत्तदुपनिषदारंभेपठितानां 'शुक्रंप्रविध्ये' त्यादीनां मंत्राणां 'देवाहवै सत्रं निषेदु' रित्यादि बृहदारण्यकारंभपठितब्राह्मणप्रतिपादितप्रवर्ग्यादेश्च कर्मणो लिंगादिबलेन अन्यत्र विनियुक्तत्वेपि विद्यासन्निधिपाठानर्थक्यपरिहाराय विद्यार्थत्वमिति प्राप्त उच्यते— सन्निधिपाठस्य दिवाकीर्त्यत्वारण्यपाठ्यत्वादिकार्यार्थतयाप्युपपत्तेः बलवद्भिर्लिंगादिभिः अभिचाराध्ययनज्योतिष्टोमाद्यर्थत्वावसायात् मंत्रप्रतिपाद्यस्य वेधाद्यर्थस्य विद्यार्थत्वाभावेन विद्यार्थाद्भेदात् न तत्प्रकाशनद्वारा विद्याशेषत्वं अपित्वभिचारादिशेषत्वमिति सिद्धांतः । अतएव बृहदारण्यके प्रवर्ग्योपसन्नपरप्रथमद्वितीयाध्याययोर्विद्यासन्निधौ पाठेपि न विद्यार्थत्वं । ननु 'उपावा अश्वस्य मेध्यस्ये'त्यादिमंत्राणामश्वमेधादिकर्मविषयत्वेन विद्यार्थत्वाभावात् कथं ब्रह्मोपनिषद्भागसंगतिरिति चेत्, ब्रह्मदृष्टिविधिरूपतया ब्रह्मा-

त्मकप्रतिपादनपरतयाच यथाकथंचित् ब्रह्मसंबंधित्वेन तत्साहित्योपपत्तेः। अतएवाश्वमेधब्राह्मणादेश्च तत्संगतिरिति द्रष्टव्यम् ॥

इति वेधाद्यधिकरणम् ॥१०॥

हानौ तूपायनशब्दशेषत्वात्कुशाच्छंदस्तुत्युपगानवत्तदुक्तम् ॥२६॥

छंदोगाः 'धूत्वाशरीर'मिति पुण्यपापयोर्हानिं, शाट्यायनिनः 'सुहृदस्साधुकृत्या'मित्यादिनाप्रियाप्रियेपुसंक्रमणं,कौपीतकिनः'तत्सुकृतदुष्कृते धूनुत'इत्यादिना पुण्यपापयोर्हानिसंक्रमणेच प्रतिपादयंति । हान्युपायनोभयचिंतनानां किंवैकल्पिकत्वं उत समुच्चय इति संशये पृथगाम्नानात् समुच्चयांगीकारे तस्य कौपीतकिवाक्यसिद्धत्वेन शाखांतराम्नानवैयर्थ्यप्रसंगाच वैकल्पिकत्वमेव। नचानेकशाखापाठस्याध्येतृभेदेन परिहरणीयता अविशेषपुनश्श्रवणाभावादिति पूर्वपक्षे प्राप्तउच्यते—

केवलहानेः केवलोपायनस्यच श्रूयमाणस्य परस्परसमुच्चयस्यावश्यकत्वेन उपायनशब्दस्य हानिवाक्यशेषत्वमेवोचितम् । यथा 'औदुंबर्यः कुशा' इति वाक्यस्य वानस्पत्याइति वाक्यशेषत्वं । 'देवच्छंदांसि पूर्व'मिति क्रमविशेषप्रतिपादकवाक्यस्य 'देवासुराणां छंदोभि'रितिवाक्यशेषत्वं।'समयाविषिते सूर्ये षोडशिनस्स्तोत्रमुपाकरोती'ति वाक्यस्य 'हिरण्येनषोडशिनस्स्तोत्रमुपाकरोती'ति वाक्यशेषत्वं। 'नाध्वर्युरुपगायेदि'ति वाक्यस्य 'ऋत्विजउपगायंती'ति वाक्यशेषत्वं। एवमत्राप्युपायनवाक्यस्य हानिवाक्यशेषत्वमभ्युपगन्तव्यम् । अतो विकल्पस्यान्याय्यत्वात् उभयचिंतनस्यैव सर्वविद्याङ्गत्वं वक्तव्यमिति ॥

इति हान्यधिकरणम् ॥११॥

सांपरायेतर्त्तव्याभावात्तथाह्यन्ये॥२७॥

कौषीतकिनामुपनिषदि– 'विरजान्नदींमनसात्येति तत्सुकृतदुष्कृते धूनुते' इति विरजानद्यतिक्रमणहेतुतया तदनंतरभाविसुकृतदुष्कृतधूनन-श्रवणात् 'अश्व इव रोमाणि विधूय पापं चन्द्रइव राहोर्मुखात्प्रमुच्य । धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी'ति 'तस्य पुत्रादायमुपयंति सुहृदस्साधुकृत्यां द्विषंतः पापकृत्या'मिति श्रुत्योः विरोधे देहवियोगपुत्रदा-यसंक्रांतिसमकाल एव सुकृतदुष्कृतहानसंक्रमणश्रवणात् कर्मैकदेशस्य देह-वियोगकाले नाशः । शेषस्तु विरजानद्यतिक्रमणकाल इति प्राप्तउच्यते–

सांपराये तर्तव्याभावात्तथाह्यन्ये ॥ सांपराये देहापक्रमणकाल-एव सुकृतदुष्कृतविनाशः। ततऊर्द्ध्वं तत्साध्यस्य प्राप्तव्यस्य सुखदुःखफल-स्याभावात् । तथाह्यन्ये शाखिनः ब्रह्मविदश्शरीरत्यागानंतरं फलानुभवा-भावमधीयते– 'तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथ संपत्स्य' इति ॥

छंदतउभयाविरोधात् ॥२८॥

अर्थस्वाभाव्याद्देहवियोगकालएवकर्मनाश इति निश्चिते तयोरवि-रोधाय 'विरजांनदींमनसात्येति तत्सुकृतदुष्कृतेधूनुते'इति वाक्यस्थस्यतच्छ-ब्दस्य छंदतः यथेष्टमन्वयोंगीकर्तव्यः ॥

गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ॥२९॥

सुकृतदुष्कृतैकदेशस्य देहवियोगकाले हानिः, शेषस्याध्वनि हानिरि-त्युभयथाभ्युपगमएव देवयानगतिश्रुतेरर्थवत्त्वं । इतरथा हि देहवियोगकालएव सर्वकर्मक्षये सूक्ष्मस्यापि विनाशेन केवलस्यात्मनोदेवयानासंभवेन देवयान-श्रुतेरर्थशून्यत्वमेव स्यात् । उत्तरमाह–

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥३०॥

देहोत्क्रांतिकालएव सर्वकर्मक्षयउपपन्नः । क्षीणकर्मणोपि मुक्तस्य 'सएकधाभवति त्रिधाभवती' ति शरीरलक्षणार्थोपलब्धेः क्षीणकर्मणोपि विदुषः विद्यामाहात्म्यात् सूक्ष्मदेहानुवृत्तिसंभवेन देवयानगमनसम्भवात् । यथा लोके सस्यादिसमृध्यर्थमारब्धेपि तटाकादिके सस्यादिसमृद्धीच्छा-

यां तठाकादिनिर्माणहेतुभूतायां नष्टायामपि पानीयपानाद्यर्थतया तटाकादि स्थाप्यते, एवं कर्महेतुकसूक्ष्मदेहो नष्टेऽपि कर्मणि विद्याफलाय स्थाप्यते । ननु देहवियोगकालएव कर्मक्षय इति नसंभवति 'क्षीयंतेचास्य कर्माणि तस्मिन् दृष्टे परावर' इति श्रुत्या सर्वकर्मविनाशस्य विद्यारंभकालएव 'तदधिगमउत्तरपूर्वाघयो'रिति सूत्रे प्रतिपादनादिति चेन्न । ब्रह्मविदइष्टानिष्टफल दित्सालक्षणपरमात्मप्रीत्यप्रीतिरूपसुकृतदुष्कृतयो श्रुतस्तोऽवस्थाश्श्रुताः विनाशोऽश्लेषः धूननमुपायनश्चेति । विनाशः पूर्वाघविषयः । कर्मफलदित्साप्रतिबंधलक्षणोऽश्लेषः उत्तराघविषयः । तौ यद्ययमुपासकः प्रकृतमुपासनं समापयेत् पूर्वोत्तरयोः कर्मणोः फलं नदास्यामीत्येवं रूपभगवत्संकल्परूपौ उत्तरपूर्वाघाश्लेषविनाशौ दर्शनसमानाकारज्ञानारंभकालएव भवतइति 'तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशा'विति सूत्रोक्तन्यायेन प्रतिपद्यते । अन्तिमप्रत्ययपर्यंतोपासननिर्वृत्त्यनंतरं विनष्टाश्लिष्टयोरेव कर्मणोः फलं नैव दास्यामीति भगवत्संकल्परूपं विधूननं देहवियोगकाले भवति । तस्मिन्नेव सूत्रे तत्प्रियाप्रियजनेषु एतदीयसुकृतदुष्कृतानुरूपेष्टानिष्टफलदित्सालक्षणमुपायनञ्च भवतीति देहवियोगकालएव सर्वकर्मक्षयउपपन्नः॥

ननु देहवियोगकाल एव कर्मनाशे वसिष्ठावांतरतपःप्रभृतीनां पुत्रजन्मादिनिमित्तसुखदुःखानुभवोनस्यादित्यत्राह–

यावदधिकारमवस्थितिराधिकारिकाणाम् ॥३१॥

आधिकारिकाणां वसिष्ठादीनां यावदधिकारं कर्मावतिष्ठते । प्रारब्धस्य भोगैकनाश्यत्वात् । यत्तूक्तं परैः 'पुण्यपापे विधूय निरंजनः परमं साम्यमुपैती'ति श्रुतायां परमसाम्यापत्तौ निरंजनस्य गमनासंभवात् परमसाम्यापत्तेर्देशांतरप्राप्त्यनपेक्षत्वाच्च, देवयानस्य पथोनावश्यकता । आत्मैकत्वदर्शिनामाप्तकामादीनां इहैव दग्धाशेषक्लेशबीजानां आरब्धाशेषकर्मक्षपणव्यतिरेकेणापेक्षितव्याभावात् । पर्यंकविद्यादिषु तु पर्यंकारोहणब्रह्मगंधप्रवेशादीनामिष्टदेशांतरप्राप्तिसापेक्षत्वात् तत्रैव पंथाअपेक्षितः । न हि ग्रामापेक्षितः पंथा आरोग्यप्राप्तावपेक्ष्यतेइति 'गतेरर्थवत्त्वमुभयान्यथाहिविरोधः।

उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवदि ' ति सूत्राभ्यां प्रतिपादितं । तथा ' एवमेवास्य परिद्रष्टुरिमाप्पोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छंती'तिश्रुतेः ब्रह्मविदः प्राणानां ब्रह्मण्येव लयः 'कलाःपंचदश प्रतिष्ठा'इति कलानां पृथिव्यादिस्वकृतौ लयप्रतिपादनं तु लौकिकदृष्ट्यभिप्रायमिति कलाप्रलयाधिकरणे स्थितं । सोपि कलाप्रळयो निरवशेष इति ' भिद्येते तासां नामरूपे पुरुषः सएषोऽकलोऽमृतो भवतीति 'अविभागोवचना'दित्यत्र प्रतिपादितं । अतो न मुक्तस्य अर्चिरादिना मार्गेण गमनमित्युक्तं ' अनियमस्सर्वेषामविरोध ' इत्यस्मिन्नधिकरणेऽपि उपकोसलविद्यायांच अर्चिरादिगते राम्नानात् तद्विद्यानिष्ठानामेव अर्चिरादिगतिरिति पूर्वपक्षं कृत्वा श्रवणात् ' शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते । एकया यात्यनावृत्तिमन्यया वर्तते पुन ' रित्यनुमानशब्दितात् स्मरणाच्च सर्वविद्यासाधारण्यमाश्रयणीयं द्विराम्नानस्य उभयत्र चिंतनार्थत्वेनाप्युपपत्तेरिति परैरप्युक्तत्वात् तद्विरोधः । न च सगुणविद्यासाधारण्यमेवास्मिन्नधिकरणे प्रतिपादितं न तु निर्गुणविद्यासाधारण्यमपीति वाच्यं । निर्गुणविद्यायाएवाप्रामाणिकत्वात् । 'सवाएषमहानज आत्मा योयं विज्ञानमयः प्राणेषु, यएषोन्तर्हृदयआकाशस्तस्मिन् शेत ' इति बृहदारण्यकषष्ठाध्यायगताया निर्गुणविद्यात्वेन पराभिमताया दहरविद्यायाः छांदोग्यगतसगुणविद्यैक्यस्य हृदयायतनत्वसेतुत्वलोकासंभेदहेतुत्वादिसामान्येन ' कामादीतरत्र तत्रचायतनादिभ्य ' इत्यस्मिन्नधिकरणे सूत्रकृतैव समर्थितत्वात्, परैरपि तथा व्याख्यातत्वात् । न च निर्गुणब्रह्मस्तुत्यर्थमेव सगुणविद्यासंबंधिगुणोपसंहारस्संभवतीति वाच्यं । निर्गुणस्य परस्य ब्रह्मणः गुणवत्तया अवरब्रह्मत्वेन प्रतिपादनस्य प्रत्युत निंदात्वेन स्तुतित्वासंभवात् । अतएव 'व्यतिहारोविशिंषन्तिहीतरव ' दित्यत्र, ' तद्योहं सोसौ योसौ सोहमिति असंसारिण ईश्वरचिंतने ' ब्रह्मदृष्टिरुत्कर्षा ' दिति न्यायोनुगृहीतोभवतीति ईश्वरस्य असंसार्यात्मचिंतननिष्कर्षः प्रसज्येत । अतोद्विरूपा मतिर्नकर्तव्येति पूर्वपक्षं कृत्वा आम्नानबलात् द्विरूपाऽपि मतिः कर्तव्या । नन्वेवमुत्कृष्टस्यापि निकर्षप्रसङ्गइत्युक्तं

तत्किमिदानीं सगुणेब्रह्मण्युपास्यमाने तस्य वस्तुतो निर्गुणस्य निकृष्टताभवति । ननु कस्मैचित्फलाय निर्गुणस्य गुणवत्तया ध्यानमात्रंक्रियतें । नतावतातस्य निकृष्टताभवतीति चेत् इहापि व्यतिहारानुचिंतनमात्रमुपदिश्यते फलाय । नतु निकृष्टता भवत्युत्कृष्टस्येत्येवं निर्गुणस्य सगुणत्वे निकर्षप्रसक्तिमभ्युपेत्य वस्तुतो निकर्षो नास्तीति शंकरभाष्यवाचस्पत्ययोर्व्याहृतत्वेन निंदावहस्य गुणकीर्तनस्य स्तुत्यर्थत्वासंभवात् । किंच लोके हि स्तुतिर्विधेयरुच्युत्पादनेन सप्रयोजना । नचात्र निर्गुणस्य तज्ज्ञानस्यवा विधेयत्वमस्ति, नवा गुणवत्त्वेन स्तुतेर्निर्गुणप्रतिपत्त्युपयोगोऽस्ति । किंच निर्गुणविद्याम्नातवशित्वादिगुणानां न छांदोग्यगतसगुणविद्यायामाध्यानायोपसंहारसंभवः । यत्र वशित्वादयः श्रूयंते तत्रापि तेषां ध्येयत्वेनाभिधानात् अन्यत्र मतानामपि नध्येयत्वं संभवतीति तैरेवोक्तत्वात् स्तुत्यर्थत्वमपि नसंभवति । सत्यकामत्वादि सामर्थ्यादेव सर्वेश्वरत्वसिध्या स्तुतेस्सिद्धत्वेन सत्यकामत्वांतर्भूतवशित्वकीर्तनेन स्तुतेरसंभवात् । कठवल्लीषु परभिमतनिर्गुणब्रह्मप्रकरणे ' शतं चैकाचहृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवंति ' इति उत्क्रांतिगत्योः प्रतिपादनात् । निर्गुणविद्यात्वेन पराभिमतायां भूमविद्यायामपि ' सएकधाभवति त्रिधाभवती ' ति अनेकशरीरपरिग्रहश्रवणेन निर्विशेषब्रह्मभावापत्ते रप्रतिपादनात् । नचास्यवाक्यस्य सगुणविद्यासूत्कर्षः कल्पनीयइति वाच्यम् । ' सर्वंहपश्यःपश्यति सर्वमाप्नोति सर्वशः ' इति प्राक्प्रस्तुतस्यैव 'सएकधाभवती'ति तच्छब्देन परामर्शेन तथोत्कर्षकल्पने प्रमाणाभावात् । तथा निर्गुणविद्यात्वेन पराभिमतप्रजापतिविद्यायां ' एषसंप्रसादोऽस्माच्छरीरात्समुत्थाय परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ' इति शरीरादुत्क्रांतेः श्रवणात् । न च शरीरात् समुत्थानं शरीरविविक्तात्मसाक्षात्कारइति वाच्यम् । ' अशरीरो वायुरभ्रं विद्युत्स्तनयित्नुरशरीराणि यथैतान्यमुष्मादाकाशात् समुत्थाय परंज्योतिरुपसम्पद्य स्वेनरूपेणाभिनिष्पद्यंते ' इति दृष्टांतानुगुण्येनैव दार्ष्टान्तिकेऽप्यर्थस्य वर्णनीयत्वात् । शरीर-

विविक्तात्मसाक्षात्कारस्यापदार्थत्वादवाक्यार्थत्वात् । तथा निर्गुणविद्यात्वेनाभिमतसद्विद्यायां 'तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथसंपत्स्ये' इति प्रारब्धावसाने ब्रह्मसंपत्तिमुक्त्वा तदुत्तरखंडे 'यदाऽस्य वाङ्मनसि संपद्यते मनः प्राणे प्राणस्तेजसि तेजःपरस्यांदेवताया' मिति ब्रह्मसंपत्त्यर्थतया उत्क्रांतेः प्रतिपादितत्वाच्च । तथा वाजसनेयके षष्ठे तदभिमतनिर्गुणविद्यायामेव 'अणुःपंथावितत: पुराणोमांस्पृष्टोऽनुवित्तोमयैव । तेन धीरा उपयंति ब्रह्मविदस्स्वर्गं लोकमितऊर्ध्वाविमुक्ताः' इति गतिप्रतिपादनाच्च । 'समानाचासृत्युपक्रमादमृतत्वञ्चानुपोष्ये' ति विद्वदविदुषोरुत्क्रांतिसाम्यस्य सूत्रकृता कण्ठतएव प्रतिपादितत्वाच्च अर्चिरादिगतिस्सगुणविद्याविषये त्येतन्नप्रामाणिकानां हृदयमधिरोहति । 'कार्यं बादरिरस्यगत्युपपत्तेः' इति नित्यपरब्रह्मविद एवार्चिरादिगतिरिति बादरिमतस्य 'परं जैमिनिर्मुख्यत्वा' दिति परब्रह्मोपासकाना मर्चिरादिगतिरिति जैमिनिमतापेक्षया प्राङ्निर्दिष्टस्य सिद्धांतसूत्रत्वायोगात् 'चरणादितिचेन्नोपलक्षणार्थेति कार्ष्णाजिनिः । सुकृतदुष्कृते एवेति तु बादरिः । उत्क्रमिष्यत एवंभावादित्यौडुलोमिः । अवस्थितेरितिकाशकृत्स्नः । स्वामिनः फलश्रुतेरित्यात्रेयः । आर्त्विज्यमित्यौडुलोमिः तस्मैहि परिक्रीयते' इत्यादिषु सर्वत्र पाश्चात्यस्यैव सूत्रकृदभिमतत्वदर्शनेन 'कार्यं बादरिरस्यगत्युपपत्तेरिति बादरिमतस्य सिद्धांतसूत्रत्वाभ्युपगमस्यासंगतत्वात् । निर्विशेषब्रह्मभावस्यैव मुक्तिरूपत्वे 'संकल्पादेव तच्छ्रुतेः । अभावं बादरिराहह्येवं । भावं जैमिनिर्विकल्पामननात् । द्वादशाहवदुभयविधं बादरायणोऽत' इत्यादीनां 'अनावृत्तिश्शब्दात्' इत्यंतानामर्थशून्यतैव स्यात् । 'न च संकल्पादेव तच्छ्रुते' रिति सूत्रे इतउपरि सगुणविद्याफलप्रपञ्च इति कल्पतरुकारेणोक्तत्वात् सर्वं सगुणविद्याफलभूतावान्तरमुक्तिविषयमिति वाच्यम् । यदि हि मुक्तिद्वैविध्यं सूत्रकृदभिमतं स्यात् तर्हि 'य आत्मा अपहतपाप्मे'त्यादि मुक्तौ ब्रह्मरूपाविर्भाववाक्यं अवान्तरमुक्तिपरं 'एवं वा अरेयमात्मा अनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघनएवे' ति निरस्ताशेषप्रपञ्चबोधात्मकत्वेन स्वेन रूपेण निष्पत्तिप्रति-

पादकं वाक्यं तु परममुक्तिपरमिति व्यवस्थायास्सुवचतया व्यावहारिकपारमार्थिकत्वाभ्यां व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य ‘ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायण ’ इति सूत्रस्यासङ्गतिप्रसङ्गात् । तथा ‘ अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशत ’ इति अशरीरत्वप्रतिपादकं वाक्यं परममुक्तिपरं ‘ स एकधा भवति त्रिधाभवती ’ ति शरीरयोगप्रतिपादकं वाक्यं अवान्तरमुक्तिपरमिति व्यवस्थाया वक्तुं सुशकत्वेन सत्यामिच्छायां स शरीरत्वं अन्यदा अशरीरत्वमिति व्यवस्थाप्रतिपादकत्वेन त्वदभिमतस्य ‘ द्वादशाहवदुभयविधं बादरायणोऽत ’ इति सूत्रस्यासङ्गतिप्रसङ्गात् । ‘ अतएवचानन्याधिपति ’ रिति सूत्रे अतएव सत्यसङ्कल्पत्वात् चशब्दोक्तायास्सस्वराड्भवतीति श्रुतेश्चानन्याधिपतिर्मुक्तोभवति नास्यान्योऽधिपतिर्भवतीत्यर्थः । इदमपि सगुणोपासनया हिरण्यगर्भं प्राप्तस्येति यत्परैरुक्तं तदत्यन्तासङ्गतं, तस्य हिरण्यगर्भेश्वररूपाधिपतिसत्त्वेनानन्याधिपतित्वस्य वक्तुमशक्यत्वादित्यलमतिचर्चया ॥

इति सांपरायाधिकरणम् ॥१२॥

अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ॥३२॥

उपकोसलविद्यायाश्चार्चिरादिगतेः पाठात् यस्यां विद्यायामर्चिरादिगतिः श्रूयते, तन्निष्ठानामेवार्चिरादिगत्याब्रह्मप्राप्तिः, नान्येषाम् । न च ‘तद्यइत्थं विदुर्येचेमेऽरण्ये श्रद्धातपइत्युपासते ‘ श्रद्धांसत्यमुपासत ’ इति सर्वब्रह्मविद्यासाधारण्यं श्रुतमिति वाच्यम् । तथासत्युपकोसलविद्यायामर्चिरादिगतिश्रुतिवैयर्थ्यप्रसंगादिति पूर्वपक्षे प्राप्ते उच्यते—

‘ अनियमस्सर्वेषामविरोधश्शब्दानुमानाभ्याम् ’ । सर्वेषां सर्वोपासननिष्ठानामर्चिरादिमार्गेणैव गंतव्यत्वात् एतद्विद्यानिष्ठानामेवेति नियमो नास्ति । तथाहि नियमेसति ‘ येचेमेऽरण्ये श्रद्धातप ’ इत्युपासते ‘श्रद्धांसत्यमुपासते, अग्निर्ज्योतिरहश्शुक्लष्पण्मासाउत्तरायणम् । तत्र प्रयाता गच्छंति ब्रह्म ब्रह्मविदोजना’इति श्रुतिस्मृतिभ्यां विरोधप्रसंगः । उपकोसल-

विद्यायां पुनराम्नानन्तु 'येचेमेऽरण्ये श्रद्धातपइत्युपासत' इति पंचाग्निविद्यावाक्यप्राप्तसर्वब्रह्मविद्यासाधारणार्चिरादिगत्तेरपुनरावृत्तिविधानार्थमनुवादइति।

इति अनियमाधिकरणम् ॥१३॥

अक्षरधियांत्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥३३॥

'एतद्वै तदक्षरं गार्गि ब्राह्मणाअभिवदन्त्यस्थूलमनण्वह्रस्व' मित्यादिनिर्दिष्टाः अक्षरसंबंधिनः अस्थूलत्वादयः प्रपञ्चप्रत्यनीकतारूपाः सर्वकर्मत्वसर्वकामत्वादिवत् सर्वासु परविद्यासु नोपसंहर्तव्याः। उपसंहारे प्रमाणाभावात्। न च स्वरूपनिरूपकाणां सत्यत्वज्ञानत्वादिधर्माणां सर्वपरविद्योपसंहारस्य 'आनंदादयः प्रधानस्ये' त्यधिकरणसिद्धत्वात्तद्वदेवास्थूलादिकं किन्नस्यादिति चेन्न। सत्यत्वादिकमन्तरेण ब्रह्मस्वरूपस्यैव प्रत्येतुमशक्यतया सत्यत्वादेस्सर्वविद्योपसंहारेऽप्यस्थूलत्वादीनामभावरूपाणां 'लब्धरूपे क्वचित्किञ्चित्तादृगेव निषिध्यत' इतिन्यायेन ब्रह्मप्रतीत्यनंतरभाविप्रतीतिकानां ब्रह्मस्वरूपप्रतीत्युपयोगित्वाभावेन सर्वपरविद्योपसंहारे प्रमाणाभावादिति प्राप्त उच्यते—

अक्षरधियांत्ववरोधस्सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम्॥

अक्षरब्रह्मसंबंधिनीनामस्थूलत्वादिधियां सर्वासु परविद्यास्ववरोधः संग्रहणं कर्तव्यं। कुतः। सामान्यतद्भावाभ्यां सर्वेषूपासनेषूपास्यस्याक्षरब्रह्मणस्समानत्वात्, अस्थूलत्वादीनां ब्रह्मप्रतिपत्तावन्तर्भावाच्चेत्यर्थः। यथा सत्यत्वादिकमंतरेण ब्रह्मस्वरूपं प्रतिपत्तुमशक्यम्, तथा अस्थूलत्वादिकमंतरेण जीवव्यावृत्तं ब्रह्मस्वरूपं सत्यज्ञानादिवाक्यैर्नप्रतिपत्तुं शक्यं। सत्यत्वादेः प्रत्यगात्मसाधारणत्वेन प्रत्यगात्मव्यावृत्तत्वाभावात्। स्थूलत्वादिभेदानर्हत्वन्तु नजीवसाधारणम्। ततश्चास्थूलत्वादीनां निषेधरूपतया सत्यादिवाक्यजन्यब्रह्मप्रतीत्युपजीवकत्वेऽपि स्वेतरसमस्तव्यावृत्तब्रह्मस्वरूपप्रतीत्यर्थमस्थूलत्वादिकं सकलपरविद्योपसंहार्यमेव।

इयदामननात् ॥३४॥

आभिमुख्येन मननं आमननम् । ध्यानमितियावत् । आमननात् ध्यानाद्धेतोः । ध्यानार्थमियदेवापेक्षितं न सर्वकर्मत्वसर्वकामत्वादिकमपि । तेनविनाऽपि इतरव्यावृत्तब्रह्मस्वरूपस्य प्रत्येतुं शक्यतया न सर्वकर्मत्वादेस्सर्वपरविद्योपसंहारः । अपितु यत्र प्रकरणे आम्नातं तत्रैव व्यवतिष्ठते । अस्थूलत्वादिकंतु सामर्थ्यरूपलिंगवशात्सर्वविद्यानुयायि ।

इति अक्षराध्यधिकरणम् ॥१४॥

अन्तराभूतग्रामवत् स्वात्मनोऽन्यथाभेदानुपपत्तिरितिचेत् नोपदेशवत् ॥३५॥

अन्तरशब्दाद्भावप्रधानात् 'सुपांसुलुगि' ति तृतीयैकवचनस्याकारादेशेऽन्तरेति रूपम् । अन्तरा अन्तरत्वेनेत्यर्थः । अन्तराशब्दो मध्यवचनोऽप्यस्ति । तयोरेकशेषेण सूत्रेऽयमन्तरेति निर्देशः । ततश्चायमर्थः—उपस्तब्राह्मणे 'एषत आत्मा सर्वान्तर' इति सर्वान्तरत्वेन निर्देशः भूतग्रामवत् स्वात्मनः भूतग्रामवान्यः स्वात्मा भूतग्रामशब्दिताचेतनान्तर्यामी यः प्रत्यगात्मा तद्विषयकः । न तु परमात्माविषयकः । 'प्राणेन प्राणिती' ति प्राणितृत्वादिजीवधर्मस्य वाक्यशेषे कीर्तनात् । कहोळब्राह्मणं तु अशनायाद्यतीतत्वरूपपरमात्मलिंगात् परमात्मविषयकमेव । यदि ब्राह्मणद्वयमपि परमात्मविषयं स्यात्, तह्युपस्तेन पृष्टे प्रत्युक्ते च परमात्मस्वरूपे कहोळस्य पुनः प्रश्नः प्रतिवचनंचासङ्गतं स्यात् । अतो वेद्यभेदात् विद्याभेद इति पूर्वपक्षे प्राप्ते 'नोपदेशवत्' । न वेद्यभेदो युज्यते 'यत्साक्षादपरोक्षात् ब्रह्म य आत्मा सर्वान्तर' इति मुख्यब्रह्मत्वलक्षणसाक्षात्ब्रह्मत्वसर्वदेशकालसन्निहितत्व लक्षणापरोक्षत्व सर्वान्तर्यामित्व रूपपरमात्मलिंगविशिष्ट विषयत्वेन प्रश्नद्वयस्याप्येकविषयत्वावश्यंभावात्, 'यः प्राणेन प्राणिती' ति वाक्यशेपश्रुतस्यापि निरुपाधिकसर्वप्राणिप्राणनहेतुत्वस्य परमात्मलिंगत्वात्, उत्तरत्र

'न दृष्टेर्द्रष्टारं पश्ये'रित्यादिना इन्द्रियाधीनदर्शनादीनां कर्तारं प्रत्यगात्मानं प्राणनस्य कर्तृत्वेनोक्त इति न मन्वीथा इति प्रत्यगात्मव्यावृत्तेः प्रतिपादितत्वाच्च, उपस्तप्रश्नप्रतिवचनमपि परमात्मविषयमेव । अत एव कहोळप्रश्ने– 'यदेव साक्षादपरोक्षात् ब्रह्मे'ति एवकारेण पूर्वपृष्टाधिकाविषयत्वं व्यावर्तितम् । नन्वेवं सति पुनःप्रश्नवैयर्थ्यमितिचेन्न । उपदेशवत् । यथा सद्विद्यायां 'उततमादेशमाक्ष्य' इति प्रक्रान्ते सदुपदेशे 'भगवांस्त्वेवमेतत् ब्रवी'त्विति 'भूय एव माभगवान्विज्ञापयत्वि'ति प्रश्नस्य, 'सय एषोऽणिमैतदात्म्यमिदं सर्वं'मिति प्रतिवचनस्य च भूयोभूय आवृत्तिस्सतो ब्रह्मणस्तत्तन्माहात्म्यविशेषप्रतिपादनाय दृश्यते, तद्वदेकस्यैव सर्वान्तरभूतस्य कृत्स्नप्राणिप्राणनहेतोः परस्य ब्रह्मणः अशनायाद्यतीतत्वादिरूपब्रह्मलिंगान्तरप्रतिपादनाय कहोळस्य पुनःप्रश्नोपपत्तेः ॥

व्यतिहारो विशिंषन्तिहीतरवत् ॥३६॥

हि यस्माद्धेतोरेकमेव परमात्मानं याज्ञवल्क्यवचनानि सर्वप्राणिप्राणनहेतुत्वाशनायाद्यतीतत्वादिधर्मैर्विशिंषन्ति, तस्माद्धेतोर्वेद्यैक्याद्विद्यैक्येन व्यतिहारः ब्राह्मणद्वयश्रुतानां गुणानामितरेतरत्रोपसंहारः कर्तव्यः । इतरवत् । यथा सद्विद्यायां वेद्यैक्यप्रयुक्तविद्यैक्यबलात् 'भूय एव मा भगवान्विज्ञापयत्विति तथा सोम्येतिहोवाचे'ति प्रश्नप्रतिवचनभेदेऽपि सर्वप्रतिवचनगतानां सर्वेषां धर्माणां सर्वत्रोपसंहारः, तद्वत् ॥

ननु सद्विद्यायामपि प्रश्नप्रतिवचनभेदात् भेद एवास्त्वित्यत्राह–

सैव हि सत्यादयः ॥३७॥

सैव हि सच्छब्दाभिहितवादेवतैव हि 'तत्सत्यं सआत्मे'ति श्रुता । सत्यत्वादयश्च धर्माः 'उद्दालको हारुणिः श्वेतकेतुं पुत्रमुवाचे'त्यारभ्य प्रवृत्तेषु नवस्वपि खण्डेष्वनुगताः दृश्यमानाः वेद्यैक्यमवगमयंति । अतो न दृष्टान्तासिद्धिशङ्का कार्येति स्थितम् ॥

इति अंतरत्वाधिकरणम् ॥१९॥

कामादीतरत्र तत्रचायतनादिभ्यः ॥३८॥

यएषोऽन्तर्हृदयआकाशस्तस्मिन् शेते सर्वस्यवशी सर्वस्येशान' इति आकाशशयानत्ववशित्वादिगुणविशिष्टतयोपास्यः छांदोग्यदहरविद्याप्रतिपादितापहतपाप्मत्वादिगुणाष्टकविशिष्टाकाशाद्भिन्नः। अतो रूपभेदाद्विद्याभेद इति पूर्वपक्षे प्राप्तेऽभिधीयते ॥

कामादीतरत्र तत्रचायतनादिभ्यः ॥ तत्रचेतरत्रच स्थलद्वयेऽपि कामादिविशिष्टं ब्रह्मैवोपास्यम्। हृदयायतनत्वसेतुत्वविधरणत्वादिभिर्विद्यैक्यप्रत्यभिज्ञानात्, वाजसनेयकश्रुतवशित्वादीनां छान्दोग्यश्रुतसत्यसङ्कल्पत्ववितितिरूपतया रूपभेदाभावात्, 'परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत' इति, 'अभयं वै ब्रह्म भवती' तिचोभयत्रापि ब्रह्मप्राप्तिरूप फलसंयोगाविशेषाच्च। इयांस्तु विशेषः— छान्दोग्ये दहराकाशे परमात्मधर्मसद्भावात् आकाशशब्दितस्य परमात्मत्वं न भूताकाशत्वम्। वाजसनेयके तु आकाशे शयान एव परमात्मलिंगसद्भावात् शयानस्यैव परमात्मत्वं आकाशस्य तु भूताकाशत्वमिति ॥

ननु 'नेह नानास्ति किंच न, एकधैवानुद्रष्टव्यमेतदप्रमेयं, स एष नेति नेती' त्यादिपूर्वोत्तरवाक्यैः निर्गुणमेवेह ब्रह्म प्रतिपाद्यते। छान्दोग्ये तु सगुणम्। अतो निर्गुणसगुणब्रह्मविद्ययोरैक्यासम्भवात् वाजसनेयकश्रुतमोक्षार्थनिर्गुणोपासने गुणानां लोप एवेत्यत्राह—

आदरादलोपः ॥३९॥

वाजसनेयकेऽपि 'सर्वस्य वशी सर्वस्येशानः एष सर्वेश्वर एष भूताधिपतिरेषभूतपाल' इति भूयो भूयो गुणोपदेशाद्गुणेष्वादरः प्रतीयते। अतो वाजसनेयकश्रुतदहरविद्याया अपि सगुणत्वादेव न गुणानां लोपः कार्यः। 'नेह नाने' त्यादिनिषेधानामब्रह्मात्मकनिषेधपरत्वेन विहितगुणनिषेधपरत्वाभावात्। ननु छान्दोग्ये— 'तद्य इहात्मानमनुविद्य ब्रजन्त्येतांश्च सत्यान् कामांस्तेषां सर्वेषु लोकेषु कामचारो भवती' ति छान्दोग्यदहरविद्यायास्सर्व-

लोककामचारलक्षणसांसारिकफलसम्बन्धः प्रतीयते । वाजसनेयके तु 'अभयं वै ब्रह्म भवती'ति मुक्तिफलकत्वम् । अतो नानयोर्विद्ययोरैक्यमित्यत्राह–

उपस्थितेऽतस्तद्वचनात् ॥४०॥

उपस्थिते ब्रह्मोपसंपन्ने प्रत्यगात्मनि अतः उपसंपत्तेरेव हेतोः सर्वलोककामचारः श्रूयते 'परंज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति तस्य सर्वेषु लोकेषु कामचारो भवती'ति । सर्वबन्धनविनिर्मुक्तानुभाव्यफलतया हि सर्वलोककामचारः श्रूयते । अतः छान्दोग्यगतदहरविद्याऽपि मुक्तिफलैव । अतो न विद्याभेद इति तत्र स्थितम् । एतेन वाजसनेयकगतहार्दविद्या निर्गुणविद्येति वदन्तः परे प्रत्युक्ताः । तथा हि सति छान्दोग्यसगुणहार्दविद्यैक्यसमर्थनस्य च परस्परगुणोपसंहारसमर्थनस्य चासङ्गतिप्रसङ्गात् । न च निर्गुणायामपि विद्यायां ब्रह्मस्तुत्यर्थमेव सगुणविद्यासम्बन्धिगुणोपसंहारस्सम्भवतीति वाच्यम् । निर्गुणस्योत्कृष्टस्य परस्य ब्रह्मणस्सगुणत्वरूपापकर्षप्रतिपादनेन निंदायाएव प्रतीयमानतया स्तुतेरप्रतीतेः । अत एव 'व्यतिहारो विशिंषन्ती'ति सूत्रे वस्तुतो निर्गुणस्य ब्रह्मणस्सगुणत्वेनोपासनमात्रेण निकर्षो नास्ति ब्रह्मणो वस्तुतो निर्गुणत्वादिति परैरेव सगुणत्वे अपकर्षमङ्गीकृत्य तस्यावास्तवत्वेन परिहारस्य कृतत्वात् । किंच– लोके हि स्तुतिर्विधेये रुच्युत्पादनेन स प्रयोजना । नचात्र निर्गुणस्य तज्ज्ञानस्य वा विधेयत्वमस्ति । प्रतिपाद्ये च निर्गुणे ब्रह्मणि सगुणत्वप्रतिपादनलक्षणास्तुतिश्च निर्गुणप्रतिपत्तिलक्षणशेषिविरुद्धा । अतः 'कामादीतरत्रे'त्यधिकरणे परेषां विद्यैक्यगुणोपसंहाराभिलपनं दुरुपपादमिति यत्किंचिदेतदित्यास्तान्तावत् । यच्चेदमुच्यते निर्गुणवाक्यसन्निधिपाठितस्य 'सर्वस्य वशी'त्यादिगुणगणसमर्पकवाक्यस्य निषेध्यानुवादकतयैकवाक्यत्वसम्भवे वाक्यभेदेन गुणप्रापकता न युक्तेति, तत्र ब्रूमः– तावद्वशित्वादीनां गुणानामन्यतोऽप्राप्तेः श्रुतिप्राप्तस्य श्रुत्या निषेधे अहिंसावाक्यमग्नीषोमीयहिंसाया, अग्रहणवाक्यञ्च षोडशीग्रहणस्य, 'असद्वे'त्यादिवाक्यञ्च ब्रह्मसत्त्वस्य, निषेधकं किन्नस्यात् । किं च– 'मृडमृदे'

स्यादिविधिः 'नित्याने' त्यादिनिषेधस्येव सगुणवाक्यमेव निर्गुणत्वनिषेधकं किन्नस्यात् । न च जगत्कर्तृत्वाक्षिप्तसार्वज्ञ्यादिगुणाः निषेधायाऽनूद्यन्त इति वक्तुं शक्यम् । तथासति जगदारोपाधिष्ठानत्वेन कुसमयसिद्धं ब्रह्मसत्त्वं 'असद्वा इदमग्रआसी' दिति निषेद्धुं 'सत्यं ज्ञानमनन्त' मित्यनूद्यते, ज्ञान निवर्त्यत्वश्रुत्याक्षिप्तं विश्वमिथ्यात्वं 'नेहनानास्ती' त्यनूद्यते 'विश्वं सत्यं मघवाना' इति वाक्येन प्रतिषेद्धुमिति किं नस्यात् । सत्यत्वंहि मिथ्यात्वप्रतिषेधएव । 'आत्मैवेदं सर्व' मिति वाक्यप्राप्तो जीवब्रह्माभेदः 'तत्वमसी' त्यनूद्यते 'द्वासुपर्णे' ति निषेद्धुमितिच किन्नस्यात् । 'नेहनानास्तिकिंचने' ति वाक्ये किंचनेत्यनेनैव निषेध्यसमर्पणस्य सिद्धतया निषेध्यसमर्पणाय 'एषसर्वेश्वर' इत्यादीनामनपेक्षितत्वाच्च । नहि 'नसुरां पिबे' दित्यत्र निषेध्यसमर्पणाय सुरां पिबे' दिति वाक्यांतरमपेक्षितम् । वशित्वादीनां निषेधार्थमनुवादे 'सनसाधुना कर्मणा भूया' निति निषेध्यानां कर्मकृतोत्कर्षादीनामिव ब्रह्मणि तेषां व्यावहारिकसत्यत्वस्याप्यभावप्रसंगात् । यच्चेदमुच्यते सगुणनिर्गुणवाक्यविरोधे परत्वेन निर्गुणवाक्येनापच्छेदन्यायेन सगुणवाक्यं बाध्यत इति तदेतत्सकलजनविदितसामान्यविशेषन्यायानभिज्ञानात् । 'कोहि मीमांसको ब्रूयाद्विरोधे शास्त्रयोर्मिथः । एकंप्रमाणमितरत्त्वप्रमाणं भवेदिति' । लोकेहि सामान्यंविशेषेण, सावकाशं निरवकाशेन,नित्यं नैमित्तिकेन, नैमित्तिकं काम्येन, अतिदिष्टमुपदिष्टेन, बाध्यमानमपि स्वोचितसत्यवस्तुसमर्पणेन संभावनीयं दृष्टं, नतु मिथ्याभूतवस्तुविषयकतया । ततश्च सगुणवाक्यस्य मिथ्याभूतवस्तुविषयसमर्पणेन संभावनां कुर्वन् कथन्नोपहास्यः । अतोऽत्रापच्छेदनयानवतारादुत्सर्गापवादनयेन निषेधस्य विशिष्य विहितेतरगुणाविधित्वस्य वक्तव्यत्वात्, उपाध्यनुक्तिपूर्वकमुक्तानां गुणानां निरुपाधिकत्वस्य स्वतः प्राप्तत्वात् 'स्वाभाविकी ज्ञानबलक्रियाचे' ति स्वाभाविकत्वश्रुतेः 'नान्योहेतुर्विद्यत ईशनाये' ति ईश्वरत्वस्याहेतुकत्वश्रवणात्, सत्यस्सोऽस्यमहिमे' तिच 'सत्यकामा' इति च तेषां गुणानां सत्यत्वस्यापि प्रतिपादनात्, तेषां मानांतराप्राप्तानां

निषेधार्थमनुवादइत्यप्यसंभवात्, क्वचिद्गुणानामुपास्यत्वश्रवणमात्रेणासत्यत्वे ' उत्तरस्मिंस्तापनीये शैब्यप्रश्नेऽथकाठके । मांडूक्यादौच सर्वत्र निर्गुणोपास्तिरीरिते ' ति परैरप्युपास्यत्वेनाभ्युपगतस्य निर्गुणस्याप्यसत्त्वप्रसंगाच्च । ' यस्सर्वज्ञस्सर्ववि ' दिति स्वरूपोपदेशपरवाक्येपूपासनाविध्यश्रवणेऽपि गुणानां श्रवणाच्च । ' तमेवंविद्वानमृतइहभवती ' ति सगुणज्ञानस्य मोक्षहेतुत्वश्रवणेनच गुणानां सत्यत्वमवश्याभ्युपगंतव्यम् । गुणनिषेधश्रुतयस्तु अध्यात्मशास्त्रे गुणशब्दवाच्यत्वेन प्रसिद्धसत्वादिगुणनिषेधपराइत्येवाभ्युपगन्तव्यम् । 'कस्मादुच्यते ब्रह्मेति बृहन्तोह्यस्मिन्गुणाः, 'नहि तस्य गुणास्सर्वे सर्वैर्मुनिगणैरपि । वक्तुं शक्या वियुक्तस्य सत्त्वाद्यैरखिलैर्गुणैः, नांतं गुणानां गच्छंति तेनानंतोऽयमीरितः, तवानन्तगुणस्यापि षडेव प्रथमे गुणाः, वर्षायुतैर्यस्य गुणा नशक्या वक्तुं समेतैरपि सर्वलोकैः । महात्मनश्शंखचक्रासिपाणे र्विष्णोर्जिष्णोर्वसुदेवात्मजस्य, चतुर्मुखायुर्यदि कोटिवक्त्रो भवेन्नरः क्वापि विशुद्धचेताः । सते गुणानामयुतैकमंशं वदेन्नवा देववरप्रसीद, यथा रत्नानि जलधे रसंख्येयानि पुत्रक । तथागुणाह्यनन्तस्य असंख्येया महात्मनः, इषुक्षयान्निवर्तंते नांतरिक्षक्षितिक्षयात् । मतिक्षयान्निवर्तंते नगोविंदगुणक्षयात्, समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशाद्धृतभूतसर्गः । इच्छागृहीताभिमतोरुदेह स्संसाधिताशेषजगद्धितोऽसौ ॥ तेजोबलैश्वर्यमहावबोधसुवीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकलानयत्र क्लेशादयस्संति परावरेशे ' इत्यादिप्रमाणानामनांजस्यमेव परमते । उक्तञ्च वरदाचार्यैः-- ' यद्ब्रह्मणो गुणशरीरविकारभेदकर्मादिगोचरविधिप्रतिषेधवाचः । अन्योन्यभिन्नविषयानविरोधगंधमर्हंति तन्नविधयः प्रतिषेधबाध्या ' इति । अनयैवदिशा अंतर्यामिब्राह्मणादिषु ' यआत्मनि तिष्ठन्नि ' त्यादिवाक्यैर्जीवब्रह्मणोर्नियंतृनियाम्यभावलक्षणस्य भेदस्य विहितत्वात्, निषेधस्य तदितरविषयत्वस्यैव युक्तत्वात्, समस्तहेयरहितस्य ब्रह्मणो हेयाश्रयजीवैक्यस्यायुक्तत्वात्, हेयस्यापारमार्थ्येऽपि तस्य निरसनीयतया हेयत्वस्यावर्जनीयत्वात्, तत्प्रतिभटतयोक्तस्य ब्रह्मणस्तत्संबंधावह-

वस्त्वैक्यासंभवात्, सर्वज्ञस्य ब्रह्मणः स्वसंकल्पेन स्वगतहेयस्य तद्विषयविभ्रमस्य वोपादानायोगात्, असर्वज्ञत्वे सर्वज्ञश्रुतिविरोधात्, सर्वशक्तेः स्वगतहेयानिवारकत्वायोगात्, 'पृथगात्मानं प्रेरितारञ्च मत्वे' ति पृथक्ज्ञानस्य मोक्षहेतुत्वावेदनात्, 'यस्मात्क्षरमतीतोऽहमि' त्युक्तवैलक्षण्यज्ञानवतएव 'असंमूढस्समर्त्ये' ष्विति असंमूढत्वप्रतिपादनात्, जीवब्रह्मणोर्नियन्तृनियाम्यभावलक्षणभेदस्य मानांतराप्राप्तत्वात्, विहितस्य निषेधायोगात्, उपासनार्थत्वाश्रयणस्य 'अथ योऽन्यां देवतामुपास्त' इति वाक्यप्रतिपन्नैक्येऽपि संभवात्, ऐक्यस्य स्वरूपोपदेशवाक्यप्रतिपन्नत्ववत् स्वरूपोपदेशपरांतर्यामिब्राह्मणप्रतिपाद्यत्वस्य नियंतृनियाम्यभावलक्षणभेदेऽपि सत्त्वाच्च। भेदनिषेधश्रुतयस्तुपृथक्सिद्धत्वलक्षणाब्रह्मात्मकभेदनिषेधपराइत्येव स्थितमित्यलं प्रसक्तानुप्रसक्त्या॥

इति कामाद्यधिकरणम्॥१६॥

तन्निर्धारणानियमस्तद्दृष्टेःपृथग्घ्यप्रतिबंधः फलं॥४१॥

'ओमित्येतदक्षरमुद्गीथमुपासीते' त्यादिना विहितानामङ्गावबद्धोपासनानामव्यभिचरितक्रतुसम्बन्धिजुहूपस्थापितक्रतुफल निराकांक्षपर्णतादिवत् अव्यभिचरितक्रतुसम्बन्ध्युद्गीथोपस्थापितक्रतुफलेनैव नैराकांक्ष्यात् 'तदेव वीर्यवत्तरंभवती' ति वीर्यवत्तरत्वादिश्रवणानामर्थवादत्वाद्व्रीहिप्रोक्षणपर्णतादिवदङ्गत्वात् उपासनानि क्रतौ नियमेनोपादेयानीति पूर्वपक्षे प्राप्ते उच्यते–

तन्निर्द्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम्॥ निर्धारणं निश्चयेन मनसोऽवस्थापनम्। ध्यानमित्यर्थः। तस्योपासनस्यानियमः नियमेनाननुष्ठानम्। 'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' त्यनियमदर्शनात्, तस्योपासनस्य प्रबलकर्माप्रतिबन्धरूपवीर्यवत्तरत्वलक्षणफलान्तरवत्त्वेन कर्माङ्गत्वाभावादित्यर्थः। अयं भावः– पर्णतोदुम्बुरत्वादिस्थले विधिविभक्त्यश्रवणादर्थवादेनैव विधिशक्तिमुपजनय्य पुनस्तेनैव फलसमर्पणे विरम्य व्यापाराद्वाक्यं भिद्येत। उपासनायान्तु विस्पष्टविधिश्रवणान्नफल-

विधित्वे वाक्यभेदशङ्का। अतः पर्णतोदुम्बरतादिविध्यपेक्षया उपासनविधे-वैषम्यात्फलविधित्वं सम्भवतीति ॥

इति तन्निर्धारणानियमाधिकरणम् ॥१७॥

प्रदानवदेव तदुक्तम् ॥४२॥

'तद्य इहात्मानमनुविद्य व्रजंती'ति दहराकाशोपासनमुक्त्वा 'एतांश्च सत्या-न्कामा' नित्यपहतपाप्मत्वादिगुणानामुपासनस्य पृथगभिधानान्नानापहतपा-प्मत्वादिगुणोपासनदशायां न धर्मिस्वरूपं चिंतनीयम्। ततश्च प्रथमं दहरा-काशाख्यं धर्मिस्वरूपमनुसन्धाय तस्यापहतपाप्मत्वविजरत्वविशोकत्वसत्य-कामत्वसत्यसङ्कल्पत्वरूपाः कामा इत्येव चिंतनीयम्। न तु 'अपहतपाप्मा विजरो विमृत्यु'रिति गुणिनोऽपि चिंतनमिति पूर्वपक्षे प्राप्तउच्यते—

प्रदानवदेव तदुक्तम् ॥

यद्यपि दहराकाश एव अपहतपाप्मत्वादिगुणानां गुणी। स च प्रथमं चिंतितः, तथाऽपि स्वरूपमात्रात् गुणविशिष्टाकारस्य भिन्न-त्वात् प्रकृते च 'अस्मिन्कामास्समाहिता' इति ब्रह्मणि कामसमा-धानमुक्त्वा के ते कामा इत्याकांक्षायां निष्कृष्य अपहतपाप्मत्वं विजरत्वमि-त्यनुक्त्वा 'अपहतपाप्मा विजरो विमृत्यु'रिति तत्तद्विशिष्टविशेष्यपर्यन्त-तया निर्देशादनेनैवाकारेणानुसन्धानं कर्तव्यमिति श्रुतेराशय उन्नीयते। अतो वैशिष्ट्यानुसन्धानार्थं विशेष्यचिंतनमप्यावर्तनीयं। प्रदानवत्- तदुक्तं सांकर्ये– 'नानावा देवतापृथक्त्वा'दिति प्रतिपादितं नानाप्रदानाधिकरण-मित्थमस्ति। त्रैधातवीयेष्टिः 'इन्द्राय राज्ञपुरोडाशमेकादशकपालं निर्वपेत् इन्द्रायाधिराजायेन्द्राय स्वराज्ञ' इति त्रिपुरोडाशा। तेषां पुरोडाशानामुपर्यु-पर्यधिश्रयणं सर्वेषु युगपदवदानञ्च विहितम्। तेषां पूर्वार्धादवदानं प्रकृति-वत् कर्तुं शक्यं तथा मध्यादवदानं कर्तुमशक्यं पुरोडाशानां मध्ये नळकप्र-वेशाद्युपायेनं मध्यादपि युगपदवदानं ग्राह्यम्। एवंस्थिते प्रदानमपि युग-पत् कर्तव्यं क्रमेणवेति संशये 'तेषां पृथक्प्रदानमवदानैकत्वा'दिति सूत्रेण

अवदानवत्प्रदानमपि युगपदेव कर्तव्यमिति पूर्वपक्षः । तत्रेदं सिद्धान्तसूत्रं 'नानावा देवतापृथक्त्वा'दिति । त्रयाणां युगपद्द्रव्याणां भेदाद्विशिष्टरूपाणां देवतानाञ्च भेदात्त्रिभिर्द्रव्यदेवतासम्बन्धैः कल्प्यानाञ्च यागानां भेदात्तत्तद्देवतोद्देशेन क्रमिकाणि प्रदानानि कर्तव्यानीति सूत्रार्थः ॥

इति प्रदानाधिकरणम् ॥१८॥

लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ॥४३॥

सहस्रशीर्षमित्यस्यानुवाकस्य प्रकृतदहरविद्योपास्य निश्चायकत्वमेव युक्तं। न तु सर्वपरविद्योपास्यनिश्चायकत्वम् । कुतः 'सहस्रशीर्ष'मित्यादिद्वितीयानिर्देशेन पूर्वानुवाकोदितोपासनासम्बन्धे 'तस्मिन्यदन्तस्तदुपासितव्य'मिति उपासिगतेन कृत्प्रत्ययेन उपास्यस्य कर्मणोऽभिहितत्वादुपास्ये द्वितीयानुपपत्तेः । विश्वमेवेदंपुरुषः, तत्त्वं नारायण ' इत्यादिप्रथमानिर्देशात् द्वितीयार्थाश्रयणे विद्यामुपासीतेति विधिपदाध्याहारप्रसङ्गाच्च । ' येनावृतं खञ्च महीं दिवञ्च ' इत्यादिवत् प्रथमार्थे द्वितीया आश्रयणीया । तथा च पूर्वानुवाकोदितदहरविद्योपास्यविशेषसमर्पकतया तदेकवाक्यत्वसम्भवे वाक्यभेदकल्पनाया अयुक्तत्वात् ' पद्मकोशप्रतीकाश ' मित्यस्मिन्ननुवाके प्रकृतदहरविद्याप्रत्यभिज्ञानात् प्रकृतहानानौचित्याच्चे ' ति पूर्वपक्षे प्राप्त उच्यते—

लिङ्गभूयस्त्वात्तद्धिवलीयस्तदपि ॥ यद्यपि दहरविद्या प्रकृता, तदेकवाक्यत्वञ्च युक्तं, तथाऽपि सकलपरविद्योपास्य निर्द्धारणार्थत्वे बहूनि लिंगान्युपलभ्यंते । तत्तत्परविद्यावाक्यगतानि परब्रह्मपरतत्त्वादिपदरूपाणि चिह्नानीह वाक्ये दृश्यन्ते । यदि प्रकृतविद्योपास्यदेवताविशेषसमर्पकमिदंवाक्यजातंस्यात , परब्रह्मपरतत्त्वादिप्रयोगो नारायणपदावृत्तिश्चनस्यात् । एकेन नारायणपदेनैव समीहितसिद्धेः । अतः परब्रह्मादिपदवाच्यस्य नारायणत्वविधानायैव अयं संरम्भः ' शिवश्च नारायणः शक्रश्च नारायण'इतिवत् परंब्रह्मापि नारायणः परतत्त्वमपि नारायण इति वाक्यभेदोऽपि न दोषाय । तल्लिंगं प्रकरणाद्बलीयः । तदप्युक्तं पूर्वकांडे— ' श्रुतिलिंगवाक्यप-

करणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षा' दिति । न च सकलपरविद्योपास्यनिश्चायकत्वे 'पद्मकोशप्रतीकाश' मिति दहरविद्योपास्यविशेषणोपसंहारो नयुक्तइति वाच्यम् । 'ऐतदात्म्यमिदं सर्व' मिति सामान्येन निर्दिष्टस्य 'तत्त्वमसी' ति विशेषे उपसंहारवत् सकलपरविद्योपास्यतया अभिहितस्य नारायणस्य प्रकृतदहरविद्योपास्यतया उपसंहारे दोषाभावादिति स्थितम् ॥

इति लिंगभूयस्त्वाधिकरणम् ॥१९॥

पूर्वविकल्पः प्रकरणात्स्यात् क्रियामानसवत् ॥४४॥

तत्र मनश्चितादयो विद्यामयाग्नयः क्रियामयक्रत्वंगतया क्रिया । एवं एषाञ्च विहितानां फलाकांक्षायां पूर्वत्र 'असद्वा इदमग्रआसी' दितीष्टकचिताग्नेः प्रस्तुतत्वात् तस्यच क्रत्वव्यभिचारित्वेन क्रतूपस्थापकत्वात् तेन च क्रतोस्सन्निहिततया सन्निहितेन क्रतुना एकवाक्यतैव कल्प्यते । न च तस्य क्रतोरिष्टकचितारन्यवरुद्धत्वात् कथं तत्र विद्यामयस्य मनश्चितादेरग्नेस्समावेशइति वाच्यम् । विकल्पेन समावेशोपपत्तेः । नचैककार्यत्वएव विकल्पस्यात्, नहीष्टकचिताग्नेः विद्यामयमनश्चिताद्यग्नेश्चैककार्यत्वं संभवति, इष्टकचिताग्निकार्यस्याग्निधारणस्य विद्यामयैर्मनश्चितादिभिः कर्तुमशक्यत्वादिति वाच्यम् । 'अभागिप्रतिषेधा'दिति सूत्रे वार्तिके 'पशुकामश्चिन्वीते'त्यग्नेः पश्वर्थत्वश्रवणात् पश्वादिलक्षणफले विद्यामयस्यापि साधनत्वसंभवात् विकल्पोपपत्तेः । नच विद्यारूपस्य क्रियांगत्वं नदृष्टमिति वाच्यम् । द्वादशाहे दशमेऽहनि अविवाक्यनामके विहितस्य मानसग्रहस्य विद्यामयस्यापि क्रियामयक्रत्वंगत्वदर्शनात् ॥

अतिदेशाच्च ॥४५॥

'तेषामेकैकएव तावान्यावानसौ पूर्व' इति विद्यामयेषु मनश्चितादिषु इष्टकचिताग्निकार्यातिदेशात् तद्वदेव क्रियामयक्रतूपकारकाइति प्राप्त उच्यते—

विद्यैवतु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥

मनश्चितादिः विद्यैव विद्यामयक्रत्वंगभूतेत्यर्थः । विद्यारूपत्वस्य पूर्वपक्षेऽपि सत्वेन तस्यासाधनीयतया विद्याशब्दस्य विद्यामयक्रतुशेषत्वार्थकत्वस्यैव युक्तत्वात् । निर्धारणात्विद्याचितएवेति निर्धारणादित्यर्थः । विद्यामयानामेव मनश्चितादीनां विद्याचितएवेत्युक्तिश्शेषिणोऽपि विद्यामयत्वमेव, न क्रियामयत्वमिति प्रतिपादयति । नच विद्यामय एव क्रतुरित्यत्र नदृश्यत इति वाच्यम् । यत्किंच यज्ञे कर्मक्रियते यत्किंच यज्ञीयं कर्मेति वाक्येन यज्ञानां तदङ्गानाञ्च मनोमयत्वप्रतिपादनेन विद्यामयक्रतोर्दर्शनाच्च विद्यामयक्रतुशेषत्वमेवेत्यर्थः ॥

ननु 'यत्किंच यज्ञे कर्म क्रियते यत्किंच यज्ञीयं कर्म मनसैव तेषु तन्मनोमयेषु मनश्चित्सु मनोमयः क्रियत' इत्यत्र विद्यामयक्रतुप्रतीतावपि विध्यश्रवणात् न विद्यामयक्रतुशेषता, अपि तु पूर्वप्रस्तुतेष्टकचित्यग्न्युपस्थितत्वात्तच्छेषतैव उचिता, अतो विद्यामयक्रतुशेषता बाध्यतइत्यत्राह—

श्रुत्यादिवलीयस्त्वाच्च न बाधः ॥४७॥

श्रुतिलिंगवाक्यानां प्रकरणात् बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः कर्तुं शक्यते । 'विद्ययाहैवेते एवंविदश्चिताभवन्ती'ति वाक्यगता विद्ययेति तृतीया श्रुतित्वेन विवक्षिता । न तु तृतीयायांश्शेषत्वश्रुतित्वेऽपि न शेषित्वश्रुतित्वं अतो विद्ययेति तृतीयाश्रुत्या न विद्यामयक्रतोश्शेषित्वं प्रतिपादयितुं शक्यत इति चेत्तर्हि 'तेहैते विद्याचितएव विद्ययाहैवैतेएवंविदश्चिताभवन्ती'ति वाक्यद्वयगतएवकारःश्रुतित्वेन विवक्षितोऽस्तु । ततश्चैवकारश्रुत्या विद्याव्यतिरिक्तक्रियामयक्रतुशेषत्वे व्युदस्ते विद्यामयक्रतुशेषत्वमर्थात्सिध्यति । तथा 'तान्हैतानेवंविदे सर्वाणि भूतानी'ति सर्वभूतसर्वकालव्यापिचयनस्य मनसा सम्पाद्यस्य परिमितकर्तृकक्रियामयक्रत्वनुप्रवेशासामर्थ्यात् सामर्थ्यलक्षणलिंगविरोधेन क्रियामयक्रत्वनुप्रवेशे व्युदस्ते विद्यामयक्रतुशेषत्वं सिध्यति । तथा 'एवंविदे सर्वाणि भूतानि विचिन्वंती'तिविद्यासमभिव्याहाररूपवाक्यवशादपिविद्यामयक्रतुशेषत्वसिद्धिः॥

ननु एवंविद इति चतुर्थीश्रुत्यैव विद्यायाश्शेषित्वावगमात् समभिव्याहारलक्षणवाक्यस्य विद्यामयक्रतुशेषत्वं कुतोऽभ्युपेयमिति चेत् 'एवंविद' इति चतुर्थीश्रुत्या विद्यावतश्शेषित्वबोधनेऽपि विद्यायाश्शेषित्वाबोधनेन वाक्येनैव विद्यामयक्रतोश्शेषत्वस्य बोधनीयत्वात् ।

ननु विद्यामयक्रतौ विध्यनुपलम्भात् कथं तच्छेषत्वमित्यत्राह—

अनुबंधादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तं ॥४८॥

यज्ञानुबन्धिग्रहस्तोत्रशस्त्रादीनां 'मनसाऽस्तुवत मनसाऽशंस'न्नित्यादिना आम्नातत्वात् तेषांच क्रत्वव्यभिचारित्वात् क्रियामयस्य च क्रतोरसंभवस्योक्तत्वात् विद्यामयक्रतुविधिरुन्नीयते । यथा 'स यदि सोमं विभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्य तास्संपिष्यदधन्युन्मृज्य तमस्मै भक्षं प्रयच्छेत् न सोम'मित्यत्र यागार्थद्रव्यसंस्कारभक्षणसङ्गत्या स्तिभिनीचमसेषु यागान्वयकल्पनस्य दृष्टत्वात् । अनुबन्धादीत्यादिशब्देन श्रुत्यादयः पूर्वोक्ता गृह्यन्ते। प्रज्ञान्तरपृथक्त्ववत् । यथा प्रज्ञान्तरं दहरविद्यादिकं क्रियामयात् क्रतोः पृथग्भूतं श्रुत्यादिभिरवगम्यते, एवमनुबन्धादिभिर्विद्यामयः क्रतुः कल्प्यत इत्यर्थः । दृष्टश्चानुवादसरूपेषु कल्प्यमानो विधिः । तदुक्तं 'वचनानित्वपूर्वत्वा'दिति ॥

ननु 'तेषामेकैकएव तावान्यावानसौ पूर्व'इत्यतिदेशेन प्रकृतेष्टकचिताग्नितुल्यत्वावगमात् क्रियामयक्रत्वनुप्रवेशोऽवगम्यत इतिचेत्तत्राह—

नसामान्यादप्युपलब्धेर्मृत्युवन्नहिलोकापत्तिः ॥४९॥

नह्यतिदेशबलात् सर्वथा साम्यं वक्तव्यम् । येन क्रियामयक्रत्वनुप्रवेशस्स्यात्।स्वशेषिभूतक्रतुद्वारा फलजनकत्वरूपविवक्षितसामान्यमात्रेणाप्यतिदेश उपपद्यते । 'स एष एव मृत्युर्यएष एतस्मिन्मण्डले पुरुष' इत्यत्र संहर्तृत्वसामान्यविवक्षयाऽपि मृत्युशब्दः प्रयुक्तः । न तु सर्वथा साम्यं विवक्षितत्वा । तथात्वे मृत्युवन्मण्डलपुरुषस्यापि मृत्युलोकप्राप्तिस्स्यात् । अतो विवक्षितसाधर्म्यमात्रेणापि 'तेषामेकैक एव तावा' नित्यतिदेश उपपद्यते ॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबंधः ॥५०॥

परेण च ब्राह्मणेन अस्यापि मनश्चिताद्यभिधायिनश्शब्दस्य ताद्विध्यं तद्विधत्वं विद्यामयप्रतिपादकत्वमवगम्यते। परस्मिन् हि ब्राह्मणे 'अयं वाव लोकएषोऽग्निश्चितस्तस्याप एव परिश्रितो मनुष्या यजुष्मत्य इष्टका'इत्यारभ्य 'सर्वोऽग्निर्लोकंपृणामभिसंपद्यते सयोहैतदेवं वेद लोकंपृणामेनं भूतमेतंत्सर्वमभिसंपद्यत' इति सर्वभूताभिसंपत्तिफलायाः क्रियामयकत्वनंगभूताया विद्यायाः प्रतिपादनदर्शनेन मनश्चितादीनां सांपादिकाग्नीनां न क्रियामयकत्त्वनुप्रवेशित्वम्। ननु मनश्चितादीनां क्रियानुबंधाभावे अग्निरहस्ये कर्मकांडेऽनुबंधः किमर्थमित्यत्राह— 'भूयस्त्वात्त्वनुबंधः'। मनश्चितादिषु संपादनीयानामग्न्यंगानां भूयस्त्वात् तत्सन्निधाविहानुबंधः कृत इति स्थितम् ॥

इति पूर्वविकल्पाधिकरणम् ॥२०॥

एकआत्मनश्शरीरे भावात् ॥५१॥

किं कर्तृत्वादिविशिष्टं प्रत्यगात्मनस्सांसारिकस्वरूपमनुसन्धेयम्। उत प्रजापतिवाक्योदितापहतपाप्मत्वादि लक्षणस्सांसारिकरूपव्यतिरेकएवानुसन्धेय इति विशये कर्तृत्वादिविशिष्टमेव रूपमनुसन्धेयम्। शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावात् इति पूर्वपक्षे प्राप्त उच्यते—

व्यतिरेकस्तद्भावभावित्वान्नतूपलब्धिवत् ॥५२॥

प्रजापतिवाक्योदितापहतपाप्मत्वादिलक्षणस्सांसारिकस्वरूप एवानुसंधेयः। न तु कर्तृत्वादिविशिष्टस्वरूपमपि। कुतः? तथोपासने सत्येव तत्क्रतुन्यायेन तादृशात्मस्वरूपफलप्राप्तेर्भावित्वात्। ननु प्रजापतिविद्यायाः प्रकरणाद्दहरविद्याशेषत्वेन विद्यान्तरशेषत्वे प्रमाणाभावइतिचेन्न। प्रजापतिवाक्योदितप्रत्यगात्मब्रह्मविद्यायाः ब्रह्मप्राप्तिपूर्वकापहतपाप्मत्वादिगुणाष्टकविशिष्टस्वात्माविर्भावलक्षणमोक्षरूपफलस्य तत्क्रतुन्यायेन तादृशस्वात्मोपासनसाध्यत्वेन

सर्वब्रह्मविद्यांगत्वसिद्धेः सर्वपराविद्यास्वपि प्रजापतिवाक्योदितापहतपाप्मत्वादिलक्षणसांसारिकरूपव्यतिरेकस्यैवानुसन्धेयत्वात्। नतूपलब्धिवत्। यथा ब्रह्मस्वरूपोपलब्धिः यथावस्थितब्रह्मानुसन्धानादेव, तथाऽऽत्मोपलब्धिरपि॥ यथा प्रकरणविशेषश्रुतानां सत्यत्वज्ञानत्वादिस्वरूपनिरूपकधर्माणां 'आनन्दादयः प्रधानस्येत्य'धिकरणोक्तन्यायेन सर्वब्रह्मविद्यापेक्षितब्रह्मस्वरूपप्रतिपत्त्युपयोगितया सामर्थ्यरूपाल्लिंगात् प्रकरणभङ्गेन सर्वब्रह्मविद्यासाधारण्यमाश्रीयते, यथा वा 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति विद्याविशेषप्रकरणश्रुतानां वेदानुवचनादीनां सर्वब्रह्मविद्यापेक्षितचित्तनैर्मल्योपयोगित्वलक्षणसामर्थ्यरूपलिंगवशेन सर्वविद्यासाधारण्यं, तथैव प्रजापतिवाक्योदितप्रत्यगात्मविद्याया अपि सर्वविद्यासाधारण्यं न्याय्यमिति॥

इति शरीरेभावाधिकरणम्॥२१॥

अंगावबद्धास्तु न शाखासुहि प्रतिवेदम्॥५३॥

'ओमित्येतदक्षरमुद्गीथमुपासीते' त्यादौ निर्विशेषसामान्येन व्यवहारासंभवाद्विशेषाकांक्षायां तत्तच्छाखागताना मेवोद्गीथव्यक्तीनां सन्निहितत्वात् तन्मात्रविषयत्वमेव उद्गीथश्रुतेर्युक्तम्। ततश्च तांडिशाखागतरसतमत्वकामाप्तिहिरण्मयपुरुषाकाशादिदृष्टिविशिष्टोपासने तांडिशाखागतोद्गीथव्यक्तेरेव क्रतुमध्यप्रयुक्ताया उपास्यत्वं। नतु शाखांतरगतोद्गीथव्यक्तेः। न च सर्वशाखागतोद्गीथानामैक्यं शंक्यं, स्वरादिभेदेन उद्गीथव्यक्तीनां भिन्नत्वात्। नचोद्गीथश्रुते स्सङ्कोचलक्षणबाधप्रसंग इति वाच्यम्। शुक्लपटमानयेत्यादौ पटशब्दस्य व्यक्तिविशेषार्थकत्वेऽपि 'जातिव्यक्तीगृहीत्वेह वयंतु श्रुतलक्षिते। कृष्णादि यदिमुञ्चामः काश्रुतिस्तत्र पीड्यत' इतिन्यायेन श्रुत्यर्थभूतायाः पटत्वजातेः, लक्ष्यायाव्यक्तेश्चापरित्यागेन पटश्रुत्यबाधइत्युक्तरीत्या उद्गीथश्रुतेरप्यबाधात् तत्तच्छाखागतोद्गीथमात्रविषयत्वमेवेति पूर्वपक्षे प्राप्ते उच्यते—

अङ्गावबद्धास्तु नशाखासुहि प्रतिवेदम् । तुशब्दः पूर्वपक्षव्यावृत्त्यर्थः । उद्गीथाद्यंगावबद्धा उपासनास्तत्तच्छाखागतोद्गीथव्यक्तिष्वेव न व्यवतिष्ठेरन्, अपितु प्रतिशाखं संबध्येरन् । शुक्लं पटमानयेत्यादौ शुक्लपदसमभिव्याहारान्यथानुपपत्त्या विशिष्टैकार्थप्रत्यायनायाविशेषप्रवृत्तश्रुतेः पीडनेऽपि प्रकृते तादृशबाधकाभावेनाविशेषप्रवृत्तोद्गीथश्रुतेः सन्निधिमात्रेण सङ्कोचाभावात् शाखान्तरगतः क्रतुमध्ये प्रयुज्यमानउद्गीथः शाखान्तरोक्तोपासनप्रकारेणाप्युपास्य इत्यर्थः ॥

मंत्रादिवद्वाऽविरोधः ॥५४॥

शाखान्तराम्नातानां मंत्रादीनां शाखांतराम्नातक्रतुसंबंधवत् शाखांतरगतोपासनानामपि शाखांतरगतोद्गीथसंबंधे विरोधाभावादिति स्थितम् ॥

इति अङ्गावबद्धाधिकरणम् ॥२२॥

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥५५॥

छान्दोग्ये वैश्वानरविद्यायां द्युमूर्धादिव्यस्तोपासनेषु औपमन्यवादिभिरुक्तेषु 'अत्यन्नं पश्यति प्रियं भवत्यस्य ब्रह्मवर्चसं कुले य एत वैश्वानरमुपास्त' इति व्यस्तोपासनेषु फलश्रवणाद्व्यस्तोपासनमेव प्रामाणिकम् । 'यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मस्वन्नमत्ती' ति व्यस्तोपासनसमुदायानुवाद एव । न तु समस्तोपासनविधिः । अथवा अनेन वाक्येन समस्तोपासनमपि विधीयते । अतो द्वयमपि प्रामाणिकम् । अल्पफलार्थिभिर्व्यस्तोपासनं कर्तव्यम् । फलभूमार्थिभिस्तु समस्तोपासनं कर्तव्यमिति पूर्वपक्षः । सिद्धान्तस्तु—

भूम्नस्सामस्त्यस्य ज्यायस्त्वंप्रामाणित्वकम् । तथा हि दर्शयति श्रुतिः व्यस्तोपासनेऽनर्थं ब्रुवती । 'मूर्धाते व्यपतिष्यद्यन्मान्नागमिष्य' इति 'अंधो भविष्यो यन्मान्नागमिष्य'इति । नचेदं नहिनिंदान्यायेन समस्तोपासनप्रशंसार्थमेव किं न स्यादिति वाच्यम् । अग्निहोत्रं प्रकृत्य श्रुतेन 'जर्तिलय-

वाग्वावा जुहुयात् गवीधुकयवाग्वावा न ग्राम्यान् पशून्हिनस्ति नारण्या' निति वाक्येन जर्तिलगवीधुकशब्दवाच्यारण्यतिलारण्यगोधूमकृतयवाग्वो-र्विकल्पेनाग्निहोत्राहुतौद्रव्यत्वविधानेग्राम्यारण्यपशुहिंसारहिततया तयोस्स्त-वनेऽपि 'अथोखल्वाहुरनाहुतिर्वैजर्तिलाश्च गवीधुकाश्च पयसाग्निहोत्रं जुहु-या'दिति तदनन्तरं जर्तिलादिप्रतिक्षेपेण पयोविधिदर्शनादेकवाक्यतया जर्ति-लयवाग्वेत्यादेः ग्राम्यारण्यपशुहिंसाराहित्येन प्रशस्ततया होमार्हा अपि जर्ति-लागवीधुकाश्च यदपेक्षया दुष्टास्तत्पयएव प्रशस्तमिति पयस्स्तुत्यर्थत्वमे-कवाक्यतानुरोधादिति । 'नचेदन्यं प्रकल्पयेत् प्रक्लृप्तावर्थवादस्स्या'दिति पूर्वतंत्राधिकरणे किंचिद्विधिपूर्वकं तन्निंदायां विध्यन्तरश्रवणेसति तदेकवा-क्यतानुरोधात् पूर्वप्रवृत्तयोर्विधिनिंदयोस्तदर्थवादत्वमिति समर्थितम् । तद्वदे-वेहापि युक्तम् ॥ ननु जर्तिलगवीधुकयोः पयसासह संबंधाभावात् जर्तिलगवी-धुकयवागूविधानयोरर्थवादतयैव विध्येकवाक्यता समर्थनीयेति तत्रतथाऽस्तु। इहतु भूमविद्यायां नामादीनां सत्येन ब्रह्मणासह भूयस्त्वावधित्वेन संबद्धानां प्रासङ्गिकोपासनविधिवत् समस्तोपासनाविषयेण वैश्वानरात्मना द्यादित्या-दीनां तदवयवत्वेन सम्बद्धानां प्रासङ्गिकोपासनविधिः किं न स्यादितिचेत् मैवं । व्यस्तोपासननिंदनेन 'मूर्धात्वेष आत्मन इतिहोवाच' त्यादिवाक्येषु तु शब्दकृतेन द्यादित्यानां स्वतंत्रोपास्यत्वव्यवच्छेदेन 'तान्होवाचैते वै खलु यूयं पृथगिवेममात्मानं वैश्वानरं विद्वांसोऽन्नमात्थे' ति व्यस्तोपासनानां भ्रम-मूलत्वोद्घाटनेन भूतविद्यावैषम्यस्य बहुविधस्य सत्त्वेन जर्तिलयवागून्याय-स्यैव अत्र प्रवृत्त्यौचित्यात् । क्रतुवत् । यथा 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जात' इति विहितस्य क्रतोः 'यदष्टाकपालो भवती' त्यादिरर्थवादः । नत्वष्टाकपालादिद्रव्यविधायकः । एवं 'अत्यन्नं पश्यति प्रिय'मित्यादिव्यस्तो-पासनश्रवणमर्थवादः । तस्मात्समस्तोपासनमेव प्रामाणिकमिति ॥

इति भूमज्यायस्त्वाधिकरणम् ॥२३॥

नानाशब्दादिभेदात् ॥५६॥

नानाशाखागतानां मोक्षैकफलानां सद्विद्याभूमविद्यादीनां किमेकविद्यात्वं उतविद्याभेदइतिसंशये सर्वासुविद्यासु वेद्यस्य ब्रह्मणएकत्वेन रूपभेदाभावात् विद्यैक्यमिति पूर्वपक्षे प्राप्तउच्यते– विद्याः परस्परं विभिन्ना एव पूर्वकांडोदितशब्दांतराभ्यासादिविधेयभेदापादकहेतुसद्भावात् । यद्यपि वेद उपासीतेत्यादि शब्दानां पर्यायत्वेनाविच्छिन्नस्मृतिसंततिरूपैकार्थबोधकत्वात् तादृशस्मृतीनांच ब्रह्मैकविषयत्वं, तथापि तत्तद्विद्याप्रकरणप्रतिपादित जगदेककारणत्वापहतपाप्मत्वादि विभिन्न विशेषणविशिष्टब्रह्मविषयप्रत्ययावृत्तिबोधकत्वेन विद्यानां परस्परभेदस्यावश्याभ्युपेयत्वात् ॥

इति शब्दाभेदाधिकरणम् ॥२४॥

विकल्पोविशिष्टफलत्वात् ॥५७॥

सद्विद्यादीनां ब्रह्मप्राप्तिफलकानामेकस्मिन् पुरुषे समुच्चयोवा विकल्पोवेतिसंशये अग्निहोत्रदर्शपूर्णमासादीनां स्वर्गैकफलानां भूयस्त्वापेक्षयायथैकस्मिन्नधिकारिणि समुच्चयः तथा एकस्मिन्नेवपुरुषे ब्रह्मानुभव भूयस्त्वापेक्षया समुच्चयस्स्यादिति पूर्वपक्षे प्राप्त उच्यते–

विकल्पोविशिष्टफलत्वात् ॥ तासांविद्यानां विकल्पएव । ब्रह्मानुभव विरोध्यनाद्यविद्याकर्म निरसनपूर्वकानवधिकातिशयानंद ब्रह्मानुभवरूपफलस्य सर्वविद्यासाधारण्यात् विकल्पएव ॥

काम्यास्तुयथाकामं समुच्चीयेरन्नवापूर्वहेत्वभावात् ॥

ब्रह्मप्राप्तिव्यतिरिक्तानां फलानां काम्यत्वेन यथेष्टं समुच्चयोवा विकल्पोवाभवतु । परिमितफलानां कर्मणां फलभूयस्त्वापेक्षायां एकस्मिन्नधिकारिणिसमुच्चयस्य तदभावे विकल्पस्यच अग्निहोत्रदर्शपूर्णमासादिषु दृष्टत्वात् । अपरिमितफलासु ब्रह्मविद्यासु नतादृशन्यायावतारः ॥

इति विकल्पाधिकरणम् ॥२५॥

अंगेषु यथाश्रयभावः ॥५९॥

अङ्गेष्वाश्रितानामुपासनानां क्रतोर्बहिः प्रयोगासम्भवेनाश्रयतन्त्रत्व-स्य वक्तव्यतया प्रयोगवचनेनाश्रयाणामुद्गीथादीनां समुच्चयनियमेनाश्रिता-नामपि समुच्चयनियमो युक्तः । इतरथा तदाश्रितत्वानुपपत्तेरित्यर्थः ।

शिष्टेश्च ॥६०॥

'गोदोहनेन पशुकामस्य प्रणयेदि'तिवदधिकारान्तराश्रवणेनोद्गीथमुपा-सीतेत्युद्गीथाङ्गतयोपासनविधानाच्च नियमेनोपासनोपादेया । न च वीर्यव-त्तरत्वरूपफलार्थत्वस्य 'तन्निर्धारणानियम' इत्यत्रोक्तत्वात्कथं तस्योद्गीथा-ङ्गत्वमिति वाच्यम् । 'उद्गीथमुपासीते'ति वाक्येनोपासनस्योद्गीथरूपाश्रयसं-बंधे वीर्यवत्तरत्वरूपफलसम्बन्धे च बोध्यमाने वाक्यभेदप्रसङ्गात् । न च वाक्यभेदभीत्या तस्य फलविधित्वासम्भवेऽपि तस्य फलाकांक्षायां रात्रिस-त्रन्यायेन वीर्यवत्तरत्वस्यैवार्थवादिकस्य फलत्वकल्पनं सम्भवतीति वाच्यम् । पर्णतादावपि तथा प्रसङ्गात् ॥

समाहारात् ॥ ६१ ॥

'होतृषदनाद्धैवापि दुरुद्गीथमनुसमाहरती'त्युपासनस्य समाहारनि-यमो दृश्यते । उद्गातृकृतवेदनहानिप्रयुक्तोद्गीथवैगुण्यस्य होतृकर्तृकप्रणवो-द्गीथैकत्वविज्ञानेन समाधानोक्त्योपासनस्यावश्यकत्वप्रतीतेरित्यर्थः ॥

गुणसाधारण्यश्रुतेश्च ॥६२॥

उपासनगुणस्योपास्यस्य प्रणवस्य 'तेनेयं त्रयीविद्यावर्तत ओमि-त्याश्रावयत्योमिति शंसत्योमित्युद्गायती'ति साधारण्यश्रुतेश्चोपासनावश्य-कता गम्यते । प्रकृतपरामर्शिना तेनेतिशब्देन उपास्यस्य प्रणवस्यैव प्रतीतेः । अतः उपासननियमोऽस्तीति प्राप्त उच्यते—

न वा तत्सहभावाश्रुतेः ॥६३॥

न वा क्रतुपूपादाननियम उद्गीथोपासनादेः । कुतः । तत्सहभावा-

श्रुतेः उद्गीथाङ्गभावाश्रुतेरित्यर्थः । वीर्यवत्तरत्वरूपफलार्थतया गोदोहनतुल्यत्वेन क्रत्वर्थत्वाभावादिति भावः । न च पर्णतादेरपि पुरुषार्थत्वप्रसंगः । पर्णताया जुहूसम्बन्धेऽप्यव्यापाररूपतया फलनिष्पादकत्वाभावेन फलाकांक्षाया एवाभावात्फलकल्पनाया अप्रसक्तेः फलाकांक्षासिध्यर्थं क्रतूपरागेण व्यापाररूपतां सम्पादयितुं जुहूलिंगेन क्रतुमुपस्थाप्य तत्सम्बन्धबोधकशब्दो वा कल्प्यः, जुहूशब्दस्य जुहूसंबन्धिक्रतुलक्षकत्वं वा कल्प्यम् । ततश्च क्रतुफलेनैव नैराकांक्ष्याद्रात्रिसत्रन्यायेनार्थवादिकफलकल्पना न समुन्मिपति । इहोपासनायास्स्वयंव्यापाररूपायाः क्रतूपरागमन्तरेणैव फलाकांक्षा सम्भवति । सत्याञ्च फलाकांक्षायां वाक्यशेषस्यैव फलसमर्पकतया परिणामसंभवे फलवत्कर्मान्तरबोधकवाक्यकल्पनाद्यनपेक्षणात् । तस्माद्वाक्यशेपश्रुताय तस्मै फलायोद्गीथाद्याश्रयविशिष्टोपासनविधिरित्येव युक्तम् । नचोपासनानामाश्रयतन्त्रत्वात्सत्याश्रये तत्तन्त्राणामुपासनानामप्यावश्यकत्वमिति वाच्यम् । इदमेवह्युपासनानामाश्रयतन्त्रत्वं यदाश्रयेसत्येव वृत्तिर्नान्यदाऽस्तीति, न तु यावदाश्रयसत्त्वं वृत्तिरिति ततश्च कामोपबद्धत्वादुपासनानां कामनानाञ्चानित्यत्वात्तदवबद्धानामप्युपासनानामनित्यत्वमेव ॥

दर्शनाच्च ॥ ६४ ॥

'एवंविद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षती' ति ब्रह्मणो वेदनेनैव सर्वेषां रक्षणं ब्रुवती श्रुतिरुद्गातृप्रभृतीनां वेदनस्यानियमं दर्शयतीति स्थितम् । केचित्तूद्गीथविद्यायाः क्रत्वर्थत्वाभावे 'अन्यथात्वं शब्दादितिचेत्' इत्यधिकरणे उद्गीथविद्यायाः क्रत्वर्थत्वेन क्रतुसाद्गुण्यफलकत्वेऽप्यार्थवादिकमपि फलं तदविरुद्धं ग्राह्यमिति देवताधिकरणे प्रतिपादितमिति भाष्यं विरुध्येत । तथा पुरुषार्थाधिकरणे 'यदेवविद्यया करोती' ति विद्यायास्तृतीयाश्रुत्या कर्मांगत्वप्रतिपादनान्न विद्यातः पुरुषार्थ इति 'तच्छ्रुतेः' इति सूत्रेण पूर्वपक्षे कृते तत्र विद्याशब्दस्य प्रकृतोद्गीथविद्याविषयत्वेनोद्गीथविद्यामात्रस्य कर्मांगत्वेऽपि नब्रह्मविद्यायाः कर्मांगत्वमस्ती-

त्येतदर्थप्रतिपादकयोः ' असार्वत्रिकी ' इति सूत्रतद्भाष्ययोर्विरोधश्च स्यादतश्चास्येव क्रत्वर्थत्वम् । न च ' तन्निर्धारणानियमः ' । ' अंगेषु यथाश्रयभावः ' इत्यधिकरणद्वयविरोधः । तयोर्नियतक्रत्वर्थत्वप्रतिक्षेपमात्रपरत्वात् । नच क्रत्वर्थत्वेऽप्यार्थवादिकफलस्वीकारे पर्णताया अप्यपापश्लोकश्रवणफलकत्वप्रसंग इति शङ्क्यम् । प्रस्तरप्रहरणस्य क्रत्वर्थस्यापि सूक्तवाकमन्त्रप्रतिपाद्यफलार्थत्ववदुपकोसल विद्यांगभूताय ।अक्षिविद्यायाः ' नास्यावरपुरुषाः क्षीयंते ' इति प्रतिपन्नब्रह्मविद्याविरोधितदुपयोगिफलार्थत्ववच्च क्रत्वर्थाया अपि पर्णताया अर्थवादप्रतिपन्नक्रत्वविरुद्धफलार्थत्वे नदोष इति भाष्यकाराशयइति वदंति। अन्येतु 'अन्यथात्वं शब्दात्' इत्यत्र भाष्यस्यान्वारुह्योक्तत्वात् क्रत्वर्थत्वं नभाष्यकृदभिमतमिति वदंति ॥

इति यथाश्रयभावाधिकरणम् ॥२६॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताबिरुदाञ्चितैः श्रीमद्रङ्ग रामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां तृतीयाध्यायस्य

तृ ती यः पा दः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ तृतीयस्याध्यायस्य चतुर्थः पादः ॥

पुरुषार्थोऽतश्शब्दादिति बादरायणः ॥१॥

गुणोपसंहारानुपसंहारसिद्धिहेतुभूता विद्यैकत्वनानात्वचिंता कृता । इदानीं कर्मांगिकया विद्यया पुरुषार्थोवा, विद्यांगकात्कर्मण इतिवेति चिंता-यां 'ब्रह्मविदाप्नोति परं, तमेवं विद्वानमृतइह भवती' त्यादिश्रुतिभिः विद्ययैव पुरुषार्थ इति बादरायण आचार्यो मन्यते ॥

अथ पूर्वपक्षिमतम्—

शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥२॥

विद्यायाः कर्मसु कर्तृभूतात्मस्वरूपयाथात्म्यविषयकत्वेन कर्तृसंस्कार-द्वारा क्रतुशेषत्वात् तत्र फलश्रवणमर्थवाद एव, यथा द्रव्यगुणकर्मसंस्कारक-र्मसु परार्थत्वात्फलश्रुतिरर्थवादस्स्यादिति पूर्वकाण्डोक्ताधिकरणन्यायेन अ-न्येषु द्रव्यादिषु फलश्रवणस्यार्थवादत्वं तथाऽत्रापि वक्तुं युक्तम् ॥

आचारदर्शनात् ॥३॥

जनकादीनां ब्रह्मविदग्रेसराणां 'कर्मणैव हि संसिद्धिमास्थिता' इति कर्मस्वेव प्राधान्येनानुष्ठानदर्शनात् विद्यैव कर्मांगम् ॥

तच्छ्रुतेः ॥ ४ ॥

'यदेव विद्यया करोती' ति विद्यासामान्यस्य तृतीयाश्रुत्या कर्मांगत्वबोधनात् विद्याकर्मांगं । न हि प्रकरणादुद्गीथमात्रविषयत्वं वक्तुं शक्यम् । प्रकरणापेक्षया प्रबलयाश्रुत्या विद्यासामान्याङ्गत्वबोधनात् ॥

समन्वारम्भणात् ॥ ५ ॥

'तं विद्याकर्मणी समन्वारभेते' इति विद्याकर्मणोस्साहित्यमेकस्मिन्नधिकारिणि विद्यायाः कर्माङ्गत्वसम्भव एव उपपन्नं भवेत् । न च वैपरीत्यं किं न स्यादिति वाच्यम् । पूर्वोक्तेन कर्तुरात्मनः कर्मशेषत्वप्रतिपादनादिना विद्यायाः कर्माङ्गत्वसिद्धेः ॥

तद्वतो विधानात् ॥६॥

'वेदमधीत्ये' ति अध्ययनवतः कर्मविधानात् अध्ययनस्य अर्थज्ञानपर्यंतत्वेन अनुष्ठेयज्ञानस्य अनुष्ठानाङ्गत्वेन विद्यायाःकर्माङ्गत्वसिद्धिरिति।

नियमात् ॥ ७ ॥

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा' इति श्रुत्या कृत्स्नस्य पुरुषायुषः कर्मस्वेव विनियोगेन कर्मशेषत्वात् कर्मण एव प्राधान्यं । अन्येषां तु तच्छेषत्वमिति विद्यायाः कर्मशेषत्वसिद्धिः । एवंप्राप्ते सिद्धान्तः—

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥८॥

विद्ययैव पुरुषार्थः । कर्मकर्तृजीवापेक्षया अनन्तकल्याणगुणाकरत्वेन विलक्षणस्य परब्रह्मण उपास्यत्वोपदेशात् । 'अपहतपाप्मा विजरो विमृत्युर्विशोक' इत्यादिवेदनोपदेशवाक्येषु अविद्यादिहेयसम्बन्धयोग्यजीवापेक्षया विलक्षणस्य परब्रह्मण उपास्यत्वदर्शनात्, तादृशपरब्रह्मविषयिण्या विद्ययैव निरतिशयपुरुषार्थसिद्धिरिति ॥

तुल्यं तु दर्शनम् ॥ ९ ॥

ब्रह्मविदां कर्मानुष्ठानवदननुष्ठानस्यापि 'किमर्था वयं यक्ष्यामह' इत्यादिषु दर्शनात् कर्मणो विद्यापेक्षयाऽङ्गित्वे अंगिलोपस्यान्याय्यत्वेन कदाचिदप्यननुष्ठानस्यान्याय्यत्वात् कर्मणां विद्यांगत्वमेव न्याय्यम् । न च एकस्मिन्नधिकारिणि कर्मणां त्यागानुष्ठाने कथं सम्भवतइति वाच्यम्। फलाभिसन्धिराहित्यसाहित्याभ्यामनुष्ठानाननुष्ठानोपपत्तेरिति ॥

असार्वत्रिकी ॥ १०॥

'यदेव विद्यया करोती' ति सामान्यतः यच्छब्देनानूदितस्य विद्यया क्रियमाणत्वे प्रापकप्रमाणाकांक्षायां प्रकरणात्सन्निहितस्योद्गीथस्यैव उपस्थितत्वेन तादृशोद्गीथविद्यामात्रविषयत्वमेव तादृशश्रुतेर्न्याय्यमिति ॥

विभागश्शतवत् ॥ ११ ॥

'तं विद्याकर्मणी समन्वारभेते'इत्यत्र विभिन्नफलयोः विद्याकर्मणोः एकाधिकारिणं प्रति साहित्यस्य क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्यत्र क्षेत्रार्थं शतं रत्नार्थं शतमितिवत् उपपन्नत्वात् नांगांगिसाहित्यमिति भावः ॥

अध्ययनमात्रवतः ॥ १२ ॥

'वेदमधीत्ये'ति अध्ययनमात्रवतो विधानात् अध्ययनविधेः अक्षरराशिग्रहणमात्रपर्यवसन्नत्वेन फलसाधनकर्मप्रतिपादकत्वात्स्वाध्यायस्य तन्निर्णयफलकविचारे पुरुषस्य स्वतएव प्रवृत्तेः कर्मज्ञानापेक्षिणः कर्मविचारे मोक्षार्थिनः ब्रह्मविचारे प्रवृत्तिरिति न विद्या कर्मांगम् ॥

अध्ययनविधेरर्थज्ञानपर्यन्तत्वेऽपि शास्त्रजन्यज्ञानापेक्षया उपासनात्मकज्ञानस्य भिन्नत्वात् शास्त्रजन्यब्रह्मस्वरूपज्ञानस्य कर्मांगत्वप्रसक्तिरेव नास्ति अतो न विद्या कर्मांगम् ॥

नाविशेषात् ॥ १३ ॥

'कुर्वन्नेवेह कर्माणी'ति आत्मविदः यावज्जीवं कर्मानुष्ठानविधानात् विद्या स्वतन्त्रफलसाधनभूतकर्माङ्गमिति न युक्तम्, पूर्वोक्तश्रुतेः विद्यांगकर्मविषयत्वेनाप्युपपत्तेः । 'कर्मणैव हि संसिद्धि'मिति वाक्यस्य अंगिभूतोपासनस्य यावज्जीवमनुवर्तमानत्वेन अंगभूतकर्मणामपि यावज्जीवमनुष्ठानस्यावश्यकत्वेन विरोधाभावात् ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

'कुर्वन्नेवेह कर्माणी' ति वाक्यस्य 'ईशावास्यमिदं सर्व' मिति विद्याप्रकरणात् विद्यामाहात्म्यात् सर्वदा कर्म कुर्वन्नपि कर्मजन्यफलाऽलेपइति विद्यास्तुत्यर्थं सर्वदा कर्मानुष्ठानानुमतिपरत्वात् न विद्या कर्मांगम् ॥

कामकारेणचैके ॥१५॥

एकेशाखिनः ब्रह्मविद्यानिष्ठस्य इच्छया गार्हस्थ्यत्यागमधीयते। विद्यायाः कर्मांगत्वे अंगानुरोधेन अंगित्यागस्यानुपपन्नत्वात् विद्यायाः कर्मांगत्वं न सम्भवति ॥

उपमर्दं च ॥ १६ ॥

'भिद्यते हृदयग्रंथि'रित्यत्र ब्रह्मविद्यया पुण्यापुण्यरूपकर्मणां विनाशस्य प्रतिपादनात् कर्मविनाशिकायाः विद्यायाः विनाश्यकर्मांगत्वासम्भवात् न विद्या कर्मांगम् ॥

ऊर्ध्वरेतस्सु च शब्दे हि ॥१७॥

ऊर्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्यादर्शनात् तेषां अग्निहोत्रादिकर्माभावात् विद्यायाः न कर्मांगत्वम्। न च 'यावज्जीव'मिति श्रुत्या अग्निहोत्रादीनां यावज्जीवानुष्ठानप्रतिपादनात् ऊर्ध्वरेतस्सद्भावप्रतिपादकस्मृतेः श्रुतिविरुद्धत्वेनाप्रमाणत्वात् तादृशाश्रमविशेषस्यैवासिद्धिरिति वाच्यम्। 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ती'त्यादिश्रुत्या आश्रमविशेषप्रतिपादनात् यावज्जीवश्रुतेः तादृशाश्रमोपयुक्तवैराग्यशून्यपुरुषविषयत्वाच्च न विद्या कर्मांगं॥

परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥१८॥

'त्रयोधर्मस्कन्धा'इत्यत्र नाश्रमान्तरविधानं, प्रकृतस्य प्रणवकरणकब्रह्मोपासनस्य स्तुत्यर्थमनुवादमात्रं। एवं 'येचेमेऽरण्य'इत्यस्यापि देवयानविधिपरत्वेन आश्रमान्तरविधायकत्वाभावात् 'वीरहावा एष देवानां योऽग्निमुद्वासयते' इति ऊर्ध्वरेतोरूपाश्रमविशेषनिंदासत्वाच्च ऊर्ध्वरेतोरूपाश्रमविशेषस्याभावं जैमिनिराचार्यो मन्यते—

अनुष्ठेयं बादरायणस्साम्यश्रुतेः॥१९॥

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयमितिबादरायण आचार्यो मन्यते। 'त्रयो धर्मस्कंधा' इति ब्रह्मनिष्ठस्तुत्यर्थमनुवादः गृहस्थाश्रमवदितराश्रमाणामपि समानः। अनुवादस्यप्रापकप्रमाणसापेक्षत्वमपि इतरेषां समानं। 'त्रयो-

धर्मस्कंधाः यज्ञोध्ययनंदानमिति प्रथमस्तपएवद्धितीयो ब्रह्मचार्याचार्यकुल-वासीतृतीय' इतिवाक्येन त्रित्वेनसंग्रहपूर्वकं प्रथमोद्धितीयस्तृतीय इतित्रेधा-विभागान्यथानुपपत्त्यायज्ञोध्ययनंदानमिति, गृहस्थाश्रमस्य,तपश्शब्देन का-यक्लेशवाचिना तपःप्रधानयोः वैखानसपारिव्राज्ययोः, ब्रह्मचर्यशब्देन ब्रह्म-चारिधर्मवाचकेन ब्रह्मचारिणश्च, ग्रहणस्य आवश्यकत्वेन आश्रमविशेषस-द्भावस्य प्रामाणिकत्वात् ब्रह्मसंस्थशब्दस्य ब्रह्मणिसंस्थायस्येति व्युत्पत्त्या-सर्वाश्रमिसाधारणत्वाच्च ॥

विधिर्वाधारणवत् ॥२०॥

'उपरिहिदेवेभ्यो धारयती'त्यत्र अप्राप्तस्य उपरिधारणस्य अनुवाद-सजातीयवाक्येन विधानवत् आश्रमांतरविधायकमेव त्रयोधर्मस्कंधाइति वाक्यमिति ऊर्ध्वरेतसांब्रह्मविद्याविधानात् विद्यायाः गृहस्थाश्रमधर्मांगत्वा भावेन पृथक् फलसाधनत्वेन विद्यातः पुरुपार्थसिद्धिरिति भावः ॥

इति पुरुपार्थाधिकरणम् ॥१॥

स्तुतिमात्रमुपादानादितिचेन्नापूर्वत्वात् ॥२१॥

'स एप रसानां रसतमः परमः पराध्योंऽष्टमो यदुद्गीथ'इति वाक्यानि क्रत्ववयवोद्गीथादिस्तुतिमात्रपराणिवा उद्गीथादिपु रसतमत्वादिदृष्टिविधाय-कानिवेति चिंतायां क्रत्वङ्गभूतोद्गीथादिग्रहणपूर्वकं रसतमत्वकथनात् 'इयमेव जुहूः स्वर्गो लोकआहवनीय'इत्यस्य जुह्वादीनां पृथिव्यादित्वप्रतिपादकस्य स्तुतिपरत्ववत् 'स एप रसानां रसतम'इति वाक्यस्यापि स्तुतिमात्रपरत्वमिति चेन्न । अपूर्वत्वात् । अप्राप्तत्वात् । उद्गीथादीनां रसतमत्वस्य प्रमाणान्तरा प्राप्तत्वेन विधेयत्वेन तत्प्राप्तस्त्यबुद्धिजननार्थं अनुवादासम्भवात् उद्गीथा-दिपु क्रतुवीर्यवत्तरत्वरूपफलविशेपसिध्यर्थं रसतमत्वादिदृष्टिविधानस्यैव उ-चितत्वात् । 'इययेव जुहू'रित्यत्र कर्मविधिप्रकरणसान्निध्यात् 'सम्भवत्येक-वाक्यत्व'इति न्यायेन तदेकवाक्यत्वस्यैव उचितत्वेन स्तुतिरूपत्वसम्भवेऽपि उद्गीथविधेः भिन्नप्रकरणस्थत्वेन एकवाक्यत्वासम्भवात् रसतमादिवाक्यस्य दृष्टिविधिपरत्वमेव उचितमिति ॥

भावशब्दाच्च ॥ २२ ॥

'उपासीते'त्यादि उपासनाविधायकविधिप्रत्यययुक्तक्रियाशब्दसत्वाच्च उपासनविधिपरत्वमेव न्याय्यम् ॥

इति स्तुतिमात्राधिकरणम् ॥२॥

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥२३॥

वाजसनेयके–' अथ ह याज्ञवल्क्यस्य द्वे भार्ये बभूवतु'रित्याद्याख्यानानां 'सर्वाण्याख्यानानि पारिप्लवेशंसंती'ति अश्वमेधगतपारिप्लवनामकशंसने विनियुक्तत्वात् पारिप्लवार्थान्याख्यानानि न तु विद्योपयोगीनीतिचेन्न । विशेषितत्वात् । न सर्वाण्याख्यानानि पारिप्लवार्थानि भवितुमर्हंति । सर्वाण्याख्यानानि पारिप्लवेशंसन्तीति विधाय 'मनुर्वैवस्वतो राजे'त्यादिना केषांचिदाख्यानानामेव विशेषितत्वात् वाक्यशेषपठितानामेव आख्यानानां पारिप्लवे विनियोगः । न सर्वेषां । अतो विद्यासन्निधिपठितानां याज्ञवल्क्याद्याख्यानानां तत्तद्विद्यागतपरमात्मविषयत्वादिविशेषप्रतिपादनोपयुक्तत्वमेव ।

तथाचैकवाक्योपबन्धात् ॥२४॥

यथा 'तेनोवै घृतं, सोऽरोदी'दित्येवमादीनां 'अक्ताश्शर्करा उपदधाति, तस्माद्बर्हिषि न देय'मित्यादिविधिनिषेधैकवाक्यतया विधिनिषेधस्तुतिनिंदाद्युपयोगित्वं, तथैव 'आत्मावा अरे द्रष्टव्य'इति विधिना आख्यानानामेकवाक्यतोपबन्धात् विधेयविद्याविशेषोपयोगित्वमवश्याभ्युपगन्तव्यमिति भावः । ननु 'आत्मावाअर'इति वाक्ये द्रष्टव्यइति न विधिः । दृशिधातोः चाक्षुषज्ञानवाचितया चाक्षुषज्ञानस्य 'न चक्षुषादृश्यत'इति अचाक्षुषतया प्रतिपन्ने ब्रह्मण्यसम्भवात् । नापि श्रोतव्य इति विधिः । स्वाध्यायस्य अर्थपरत्वेन अधीतवेदः पुरुषः प्रयोजनवदर्थदर्शनात् तन्निर्णयाय स्वयमेव गुरुमुखात् न्याययुक्तार्थग्रहणलक्षणे श्रवणे प्रवर्तत इति श्रवणस्य प्राप्तत्वात् अनुवादः । स्वात्मनि एवमेवेति श्रुतार्थप्रतिष्ठापनलक्षणमननस्य श्रवण-

प्रतिष्ठार्थत्वेन प्राप्तत्वात् मन्तव्यइतिचानुवादः। निदिध्यासनस्य स्मृतिरूपतया श्रुतार्थविषयत्वात् निदिध्यासितव्य इतिचानुवादः। अतो विध्यसम्भवात् न विध्येकतापन्नानि आख्यानानीति चेन्न। 'क्षीयन्तेचास्य कर्माणि तस्मिन्दृष्टे परावर'इति दर्शनस्यापि मोक्षाव्यवहितसाधनत्वश्रवणात् दृशिधातुना दर्शनसमानाकारकविशदं ज्ञानमभिधीयते। तथा 'स्मृतिलम्भे सर्वग्रंथीनां विप्रमोक्ष'इति ध्यानस्य मोक्षाव्यवहितकारणत्वश्रवणात् ध्यानमपि विधीयते। अत उभयोरेकार्थत्वस्य वक्तव्यत्वात् द्रष्टव्यो निदिध्यासितव्य इत्याभ्यां दर्शनसमानाकारत्वविशिष्टं ध्यानं विधीयते। 'आर्षेयं वृणीते त्रीन् वृणीत'इत्याभ्यां त्रित्वविशिष्टार्षेयवरणविधानवदिति द्रष्टव्यम्। न च निदिध्यासनस्य स्मृतिरूपतया प्राप्तत्वं शक्यम्। 'निदिध्यासितव्य'इति अनवरत भावनारूपस्य ध्यानस्य विधानात् अनवरतभावनारूपत्वस्य अप्राप्तत्वात्। न च सन्श्रुतिवैयर्थ्यं, उपायदशाप्रभृतिभगवद्ध्यानस्य अनुकूलत्वसूचनाय सन्नन्तपदेन निर्देशसम्भवात्। अतो 'नवा अर'इति वाक्यस्य विधायकत्वसम्भवात् विध्येकवाक्यतापन्नानि विधेयविद्याविशेषोपयोगीन्येवेति सर्वं सुस्थं।

इति पारिप्लवार्थाधिकरणम् ॥३॥

अतएवचाग्नींधनाद्यनपेक्षा ॥२५॥

ऊर्ध्वरेतसः यज्ञाद्यभावात् तदंगिकाविद्यानसंभवतीति पूर्वपक्षे प्राप्त उच्यते—

अतएवचाग्नींधनाद्यनपेक्षा। एतमेव प्रव्राजिनोलोकमिच्छन्तः प्रव्रजन्ति, यदिच्छन्तोब्रह्मचर्यंचरंति, येचेमेरण्येश्रद्धांतपइत्युपासते' इति वाक्यैः ऊर्ध्वरेतस्सुब्रह्मविद्यायाः प्रमाणप्रतिपन्नत्वात् तेषु ब्रह्मविद्या अग्न्याधानलक्षणाग्नींधनपूर्वकाग्निहोत्राद्यनपेक्षैव।

इति अग्नींधनाद्यधिकरणम् ।४।

सर्वापेक्षाचयज्ञादिश्रुतेरश्ववत् ॥२६॥

यदि ब्रह्मविद्या यज्ञाद्यनपेक्षा तदा गृहस्थेष्वपि सा अग्नींधनाद्यनपेक्षैव। न च विविदिषावाक्यात् यज्ञादीनां तादर्थ्यप्रतीतिरिति वाच्यं। तेनैव वाक्येन यज्ञादीनां विविदिषार्थत्वोपलम्भेऽपि विद्यार्थत्वाप्रतीतेरिति पूर्वपक्षे प्राप्त उच्यते। सिद्धान्तस्तु— यथा गमनसाधनभूतोऽश्वः परिकरबन्धसापेक्षः तथा गृहस्थेषु विद्या यज्ञादिसर्वकर्मापेक्षैव 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति श्रुतेः। यथा 'अश्वेन जिगमिषती'त्यादिसनन्तपदप्रयोगे प्रकृत्यर्थगमनसाधनत्वप्रतीतिदर्शनेन यज्ञेन विविदिषन्तीत्यत्रापि यज्ञादौ वेदनसाधनत्वप्रतीतेः। यद्यपि प्रकृतिप्रत्यययार्थयोः प्रत्ययार्थस्य प्राधान्यमित्युत्सर्गः। तथाऽपि 'अश्वेन जिगमिषती' त्यादिसनन्तपदप्रयोगस्थले प्रकृत्यर्थप्राधान्यस्यैव व्युत्पत्तिसिद्धत्वात् अत्रापि प्रकृत्यर्थभूतवेदनसाधनत्वमेव वेदानुवचनादीनां तृतीयया प्रतिपाद्यतइति द्रष्टव्यम्॥

इति सर्वापेक्षाधिकरणम्॥५॥

गृहस्थस्य बाह्याभ्यन्तरकरणव्यापाररूपकर्मानुष्ठानस्यावश्यकत्वात्, शमादीनाञ्च तद्विपरीतत्वात् नानुष्ठेयत्वमिति प्राप्त उच्यते—

शमदमाद्युपेतस्स्यात्तथाऽपि तु तद्विधेस्तदंगतया तेषामवश्यानुष्ठेयत्वात्॥२७॥

तथाऽपि गृहस्थस्य कर्मानुष्ठानावश्यकत्वेऽपि गृहस्थश्शमदमाद्युपेतस्स्यात्। 'शान्तोदान्तउपरतस्तितिक्षुस्समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येदि'ति विद्यांगतया शमादीनां विधानात् अशान्तचित्तस्य चित्तविक्षेपेण विद्यानिष्पत्त्यसम्भवेन दृष्टार्थतया अनुष्ठेयत्वाच्च। न च कर्मणां शमादीनां च विरोधः, भिन्नविषयत्वात्। विहितेषु व्यापारः इतरेषु तदुपरमरूपश्शम इति। न च करणव्यापाररूपकर्मसु वर्तमानस्य वासनानुवृत्त्या शमादिकं न सम्भवतीति वाच्यं। परमपुरुषाराधनरूपकर्मणां वासनोच्छेद एव हेतुत्वादिति स्थितम्॥

इति शमदमाद्यधिकरणम्॥६॥

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥२८॥

'न ह वा एवंविदि किञ्चनानन्नं भवती'ति छान्दोग्ये 'नास्यानन्नं जग्धं भवती'ति वाजसनेयके च श्रवणाद्वामदेव्योपासनानिष्ठस्य प्रार्थ्यमानसर्वयोषिदपरिहारानुमतिवत् सर्वान्नानुमतिः प्राणविद्यानिष्ठस्य सर्वदा क्रियत इति पूर्वपक्षे प्राप्त उच्यते—

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ प्राणात्यय एव प्राणविदस्सर्वान्नानुज्ञानं न सर्वदा । ब्रह्मविदोऽप्युषस्तः प्राणात्यय एव इभ्योच्छिष्टाशनस्य दर्शनेन प्राणविदस्सर्वान्नानुमतेरापद्विषयत्वस्य किं पुनर्न्यायसिद्धत्वात् ॥

अबाधाच्च ॥ २९ ॥

'आहारशुद्धौ सत्त्वशुद्धि'रिति शास्त्राबाधार्थमप्येवमेव न्याय्यं, इतरथा तस्य बाधस्स्यात् ॥

अपि स्मर्यते ॥ ३० ॥

'प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः । लिप्यते न स पापेन पद्मपत्रमिवाम्भसे'ति स्मरणाच्च सर्वान्नीनत्वमापद्विषयम् ॥

शब्दश्चातोऽकामकारे ॥३१॥

'तस्माद्ब्राह्मणस्सुरां न पिबति पाप्मना नोत्सृजा' इति संहितायां कामकारप्रतिषेधकशब्ददर्शनात् । पाप्मना संसृष्टो नभवानीति मत्वा ब्राह्मणस्सुरां न पिबतीति हि तस्याश्श्रुतेरर्थः । ननु ब्रह्मविद उषस्तेः प्राणात्यये सर्वान्नीनत्वदर्शनात् प्राणविदस्सर्वान्नीनत्वस्यापद्विषयत्वं कैमुत्यन्यायेन सिध्यतीत्यनुपपन्नम् । वामदेव्योपासननिष्ठस्य सर्वयोषिदपरिहारवत् प्राणविद्यानिष्ठस्य वचनबलात् सर्वान्नीनत्वमिति वदन्नं प्रश्नेतस्यानुत्तरत्वादिति चेन्न। वामदेव्योपासनस्य 'न काञ्चन परिहरेत्तद्व्रत' मिति सर्वयोषिदपरिहारेऽपि स्पष्टविधिश्रवणात् । प्रकृते च 'न ह वा एवंविदि किंचनानन्नं भवती'त्यत्र सर्वान्नभक्षणविधेः कल्प्यत्वात्, प्रत्यक्षनिषेधविरोधे च विधिकल्पनानुदये-

नार्थवादत्वस्यैव युक्तत्वात्, सर्वप्राण्यन्ने 'यत्किंचिदिदमाश्वभ्य आशकुनिभ्य' इति विहितस्य प्राणान्नत्वचिंतनस्य स्तुतिमात्रं क्रियते 'न ह वा एवंविदि किंचनानन्नं भवती' ति। नचैवंसति निषेधशास्त्रविरोधात् 'एवंविदि पापं कर्म न श्लिष्यत' इत्यादेरपि स्तुतिमात्रत्वप्रसङ्ग इति वाच्यम्। पाप्मनामश्लेषाभावे अनिर्मोक्षप्रसङ्गेन सकलपापाश्लेषस्य मोक्षविधिशास्त्रापेक्षितत्वेन फलविधित्वस्य वक्तव्यत्वात्। प्राणविद्यायाश्च ज्येष्ठत्वश्रेष्ठत्वादिफलकत्वेन फलाकांक्षाया अभावादिति ॥

इति सर्वान्नानुमत्यधिकरणम् ॥७॥

विहितत्वाच्चाश्रमकर्मापि ॥३२॥

'यावज्जीवमग्निहोत्रं जुहोती' ति नित्यतया विहितानामग्निहोत्रादीनामनित्यकामनाविषयब्रह्मविद्यार्थत्वे नित्यानित्यसंयोगविरोधात् आश्रमकर्मापेक्षया विद्यार्थानि कर्माणि भिन्नानीति पूर्वपक्षे प्राप्ते यथैकस्यैव खदिरत्वस्य 'खादिरो यूपो भवति, खादिरं वीर्यकामस्य यूपं कुर्या' दिति वचनद्वयेन क्रतौ फले च पृथग्विनियोगदर्शनात् क्रत्वर्थतया नित्यस्यापि खदिरत्वस्यानित्यकामनाविषयवीर्यार्थत्वाविरोधः, तद्वत् 'यावज्जीवमग्निहोत्रं जुहोती'ति नित्यतयाऽग्निहोत्रादीनां विहितत्वादाश्रमकर्मत्वमप्यस्ति ॥

सहकारित्वेन च ॥३३॥

विविदिषावाक्येन विद्यासहकारितया विहितत्वाद्विद्यार्थत्वमप्यस्तीति स्थापितम् ॥

नन्विह यथा कुण्डपायिनामयने 'मासमग्निहोत्रं जुहोती' ति श्रुतं मासाग्निहोत्रं नैयमिकाग्निहोत्राद्भिद्यते, तथा विविदिषावाक्येन विद्यार्थतया विधीयमानं नित्यादग्निहोत्रादेरन्यदेवास्तु तत्राह—

सर्वथाऽपि त एवोभयलिङ्गात् ॥३४॥

विद्यार्थत्वे आश्रमार्थत्वेऽपि त एव यज्ञादयः प्रतिपत्तव्याः। उभयत्र यज्ञादिशब्दैः प्रत्यभिज्ञाप्यमानत्वरूपलिंगात्, 'यज्ञेने' त्यादिशब्दैः

प्रसिद्धयज्ञादिविलक्षणयज्ञादिविधाने तस्य द्रव्यदेवताद्यभावे अरूपत्वप्रसंगात्, तत्सद्भावे च देवतोद्देशेन द्रव्यत्यागत्वरूपयज्ञशब्दप्रवृत्तिनिमित्तेन यज्ञशब्दमुख्यार्थतया मासाग्निहोत्रवद्गौण्यावृत्त्या कर्मान्तरं विधीयत इति वक्तुमशक्यत्वात्, न तन्न्याय इह प्रवर्तते । अतः 'यज्ञोऽध्ययनं दानमिति प्रथमः, यज्ञानां जपयज्ञोऽस्मि, भोक्तारं यज्ञतपसा' मित्यादिष्विव प्रसिद्धयज्ञपरत्वमेव युक्तम् ॥

अनभिभवं च दर्शयति ॥३५॥

'धर्मेण पापमपनुदती' त्यादिश्रुतिश्च तानेव यज्ञादिधर्मान्निर्दिश्य तैर्विद्याया अनभिभवं पापकर्मभिरुत्पत्तिप्रतिबन्धाभावं दर्शयति । ततश्च प्रसिद्धस्यैवाग्निहोत्रादेर्धर्मस्य विद्योत्पत्तिप्रतिबन्धकपापापनोदहेतुत्वात्तस्यैव विद्यांगत्वमिति स्थितम् ॥

इति विहितत्वाधिकरणम् ॥८॥

अन्तराचापि तु तद्दृष्टेः ॥३६॥

अनाश्रमिणां विधुरादीनामाश्रमधर्माभावात्तदंगिका विद्या न सम्भवतीति पूर्वपक्षे प्राप्तउच्यते—

अन्तराचापि तु तद्दृष्टेः । तुशब्दः पक्षव्यावर्तकः । चशब्दोऽवधारणे । आश्रमानन्तरावर्तमानानां अनाश्रमिणामिति यावत् । तेषामपि विद्यायामधिकारोऽस्त्येव । तादृशानामपि भीष्मरैक्वसंवर्तादीनां ब्रह्मविद्यादर्शनात्, 'यज्ञेन दानेन तपसाऽनाशकेने' ति आश्रमानियतदानतपआदिभिरपि विद्यानुग्रहस्य श्रुतत्वात् ॥

अपि स्मर्यते ॥ ३७ ॥

'जप्येनापि च संसिध्येत् ब्राह्मणो नात्र संशयः' इति हि स्मर्यते । संसिध्येत्--जपाद्यनुगृहीतया विद्यया सिद्धोभवतीत्यर्थः ॥

विशेषानुग्रहश्च ॥३८॥

'तपसा ब्रह्मचर्येण श्रद्धया विद्ययाऽऽत्मानमन्विष्यादित्यमभिजयन्ती' ति आश्रमानियततप आदिधर्मविशेषैरनुग्रहः श्रूयते ॥

अतस्त्वितरज्ज्यायो लिंगाच्च ॥३९॥

तुशब्दोऽवधारणे । अतः अनाश्रमित्वादितरत् आश्रमित्वमेव ज्यायः । अनाश्रमित्वमापद्विषयम् । शक्तस्यत्वाश्रमित्वमेवोपादेयम् । भूयोधर्मकाल्पधर्मकयोरतुल्यकारित्वात । 'लिंगाच्च' । लिंगं हि स्मृतिः । स्मर्यते हि– 'अनाश्रमीनतिष्ठेत्तु दिनमेकमपि द्विज' इति । असति वैराग्ये दारालाभ आपत् । सति वैराग्ये सन्यासस्वीकारसम्भवात् । नचाविरक्तस्य ब्रह्मविद्याधिकारः कथमुच्यत इति शंक्यम् । अग्निहोत्राद्यनुतिष्ठासया दारपरिग्रहरागसम्भवेऽपि दारादिषु भोग्यतातिशयबुद्धिकृतरागाभावेन ब्रह्मविद्याधिकारसम्भवात, देहान्तरोपभोग्यब्रह्मव्यतिरिक्तफलाशाभावेन मुमुक्षौपयिकवैराग्यसम्भवाच्च । एवमेव व्यासार्यैरुक्तत्वाच्च न दोषः ॥

इति विधुराधिकरणम् ॥९॥

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः ॥ ४० ॥

नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि विधुरादिवत् जपादिभिः विद्यानुग्रहसम्भवात् अस्त्यधिकारइति पूर्वपक्षे प्राप्तउच्यते-

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमात्तद्रूपाभावेभ्यः । तुशब्दः पक्षव्यावृत्त्यर्थः । तद्भूतस्य नैष्ठिकादिभूतस्य अतथाभावः प्रच्युत्य स्थितिः न सम्भवत्येव । कुतः–तद्रूपनिवृत्तिभ्यइशास्त्रैर्नियमात् । नियच्छंति हि शास्त्राणि 'अत्यन्तमाचार्यकुलेऽवसादय'न्निति नैष्ठिकब्रह्मचारिणं, अरण्यमियात्ततो न पुनरेयादिति वैखानसं, 'सन्यस्याग्निं न पुनरावर्तये'दिति सन्यासिनञ्च । अतस्तेषां प्रच्युत्य स्थित्यभावात् विद्यानधिकारः । जैमिनेरप्यविगीतोऽयम् ॥

नचाधिकारिकमपि पतनानुमानात्तदयोगात् ॥४१॥

आधिकारिकं 'अवकीर्णी पशुश्च तद्व' दित्यधिकारलक्षणोक्त प्रायश्चित्तमपि नैष्ठिकस्य न सम्भवति । प्रच्युतनैष्ठिकादीनां पतनस्मृतेःप्रायश्चित्तासम्भवात् । तेषां पतनञ्च 'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः। प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे' ति प्रायश्चित्ताभाववचनेन स्मर्यते । अवकीर्णिप्रायश्चित्तं उपकुर्वाणब्रह्मचारिविषयम् ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥४२॥

उपपातकत्वात् मध्वशननिषेधतत्प्रायश्चित्तवत् आधिकारिकसद्भावं मन्यन्ते ॥ तदुक्तं स्मृतिकारैः– 'उत्तरेषाञ्चैतदविरोधी'ति । गुरुकुलवासिनः विहिता धर्माः प्रायश्चित्तञ्च स्वाश्रमाविरोधीनि उत्तरेषामाश्रमिणां सम्भवन्तीत्यर्थः । ब्रह्मचर्यभ्रंशे प्रायश्चित्तसम्भवात् ब्रह्मविद्याधिकारस्सम्भवत्येव ॥

बहिस्तूभयथाऽपि स्मृतेराचाराच्च ॥४३॥

उभयथापि उपपातकत्वे महापातकत्वेवा ब्रह्मविद्याधिकारिभ्यो बहिष्कृता एवैते– 'प्रायश्चित्तं न पश्यामि येन शुध्येत्स आत्महे' ति स्मृतेः। शिष्टबहिष्काराच्च । यद्यपि कल्मषनिर्हरणाय कैश्चिद्वचनैः प्रायश्चित्ताधिकारप्रतिपादनेऽपि कर्माधिकारापादिनी शुद्धिस्तेषां न सम्भवतीत्येवाभिप्रायः। अतएव तेषां ब्रह्मविद्याधिकाराभावः ॥

इति तद्भूताधिकरणम् ॥१०॥

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

ऋत्विक्परिक्रयस्याङ्गानुष्ठानमात्रार्थत्वादङ्गावबद्धोपासननाच्च 'तन्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फल' मिति सूत्रोक्तन्यायेनानङ्गत्वाच्छ्रुतफलं प्रयोक्तरीति न्यायेन यजमानगामिफलसाधनभूतोपासनस्य यजमानेनैव कर्तव्यत्वात् । 'गोदोहनेन पशुकामस्य प्रणयेत्' इति श्रुतपश्वर्थगोदोहनादेरनङ्गत्वेऽपि ऋत्विक्कर्तृकप्रणयननिर्वर्तकस्य गोदोहनस्य यज-

मानेनोपादातुमशक्यतयार्त्विक्कर्तृकत्वेऽप्युद्गातृकर्तृकउद्गीथे यजमानस्योपासन सम्भवादुपासनं याजमानमेव । औद्गात्रसमाख्यानं तु शास्त्रफलं प्रयोक्तरीति न्यायेन विरोधादुपेक्षणीयम् । अतः फलस्य स्वामिगतत्वात्फलस्वामियजमानकर्तृकमेवोपासनमिति पूर्वपक्षे प्राप्त उच्यते— सिद्धान्तस्तु ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते ॥४५॥

उपासनान्यपि ऋत्विक्कर्माण्येव स्युः । प्रयोगाङ्गस्यर्त्विजः प्रयोगांतःपात्युद्गीथाद्युपासनेऽपि कर्तृत्वसम्भवात् । 'तगँ्ह बको दाल्भ्यो विदांचकार सह नैमिषीयाणामुद्गाता बभूव सहस्मैभ्यः कामानागायति' इत्युद्गातृदाल्भ्यगतविद्याया यजमानकामसम्पादकत्वदर्शनलिंगाच्चर्त्विक्कर्तृकमेवोपासनम् । न चर्त्विक्कर्तृकोपासनस्य फलमृत्विग्गतमेव स्यादिति शक्यशङ्कम् । ऋत्विजां परार्थतया तेषां वचनमन्तरेण फलसम्बन्धानुपपत्तेः । 'यां वै कांचन यज्ञऋत्विज आशिषमाशासते यजमानायैवैतामाशिषमाशासते' इति श्रुतेश्च 'तस्मादुहैवंविदुद्गाता ब्रूयात् कंते काममागायानीति' इति ऋत्विग्गतविज्ञानस्य यजमानगामिफलकत्वावेदनलिंगाच्च न शास्त्रफलं प्रयोक्तरीति न्यायावतारः । ततश्च परिक्रयविधिबलादुत्सृष्टम्यर्त्विक्कर्तृकस्य याजमानसमाख्यापादकाभावाल्लिंगानुग्रहादौद्गात्रसमाख्यानाच्चार्त्विज्यमेवोपासनमिति ॥

इति स्वाम्यधिकरणम् ॥ ११ ॥

सहकार्यंतरविधिः पक्षेणतृतीयं तद्वतोविध्यादिवत् ४६

'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेद्बाल्यञ्च निर्विद्याथ मुनि' रित्यत्र मुनिशब्देन पाण्डित्यशब्दविहितं ज्ञानमेवानूद्यते, न ततोऽर्थान्तरं ज्ञानं विधीयते, प्रमाणाभावादिति पूर्वपक्षे प्राप्त उच्यते—

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् । विधीयत इति कर्मसाधनो विधिशब्दः । सहकार्यन्तरञ्च तद्विधिश्च सहकार्यन्तरविधिः । तद्वतः विद्यावतस्तृतीयं बाल्यपांडित्यापेक्षया तृतीयं मौनं वि-

द्यायास्सहकार्यन्तरं विधीयत इत्यर्थः । न च मुनिशब्दार्थस्य पाण्डित्यशब्देनैव प्राप्तत्वाद्विधेयत्वानुपपत्तिरिति वाच्यम् । पक्षेण प्रकृष्टमननशीले व्यासादौ मुनिशब्दप्रयोगात् प्रकृष्टं मननमेव मुनिशब्दार्थः । तच्च पांडित्यशब्दितादौपदेशिकार्थाधिगमात्, श्रवणप्रतिष्ठार्थान्मननाच्च, अर्थान्तरभूतमालम्बनसंशीलनात्मकमिति तस्याप्राप्तत्वेन विधानार्हत्वाद्विधेयत्वं युज्यते । पक्षः परिग्रहः । 'पक्षपरिग्रह' इति धातुः । आदर इति यावत् । तत्कृतप्रकर्षयुक्तं मननं मौनम् । तदेव मुनिशब्देन विधीयते । सादरमननमालम्बनसंशीलनं विधीयत इत्यर्थः । विध्यादिवत् । अत्रापि विधिशब्दः कर्मसाधनः । विधिश्चासावादिश्चेति समासः । विधेयादिवदित्यर्थः । प्रस्तुतमननापेक्षया आदिर्यो विधेयः प्राक्तनोविधेयः पाण्डित्यबाल्यलक्षणः । ततश्चायमर्थः । विद्याङ्गतया यथा बाल्यपाण्डित्ये विधीयेते, एवमेव मुनिशब्देनापि आलंबनसंशीलनलक्षणं सादरं मननं सहकारि विधीयतइत्यर्थः । यद्वा विध्यादिवदित्यत्र विधिशब्देन विधेयं यज्ञदानाद्युच्यते । आदिपदग्राह्यं रागप्राप्तं श्रवणं मननञ्च । सहकार्यन्तरविधिरित्यत्र च सहकार्यन्तरेति पृथक्पदं लुप्तविभक्तिकम् । ततश्चायमर्थः । तृतीयं मौनं यत् तद्यजनश्रवणमननवत् बाल्यपाण्डित्यापेक्षया सहकार्यन्तरं सत् अर्थान्तरं सद्विध्यर्हमित्यर्थः । पांडित्याभिन्नत्वेऽप्यनुवाद्यता स्यादित्यर्थः।ननु बाल्यपाण्डित्यमौनशमादिनानाश्रमधर्मभूतयज्ञाद्यङ्गिकाया विद्यायास्सर्वेष्वाश्रमेषु सम्भवात्, छान्दोग्ये– 'अभिसमावृत्य कुटुम्बे शुचौदेश' इत्यारभ्य 'सखल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते' इति गार्हस्थ्यधर्मेणोपसंहारः कथमित्यत्राह ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥४७॥

तुशब्दः पक्षं व्यावर्तयति । कृत्स्नेस्वाश्रमेषु ब्रह्मविद्यायास्सद्भावात् छान्दोग्ये गृहस्थेनोपसंहारः उपलक्षणार्थः । यथा छान्दोग्ये गृहस्थधर्मकीर्तनमितराश्रमधर्मोपलक्षणार्थं, एवं बृहदारण्यके– 'भिक्षाचर्यं चरन्ती' ति सन्यासिधर्मकीर्तनमाश्रमधर्मान्तरोपलक्षणार्थमित्याह ॥

मौनवदितरेषामप्युपदेशात् ॥४८॥

अत्र मौनशब्देन मौनसमभिव्याहृतसन्न्यासिधर्मभूतभिक्षाचरणादिकं लक्ष्यते । मौनवत् सन्यासिधर्मवदितरोऽप्याश्रमधर्मो विद्याङ्गमित्यर्थः । इतरेषामप्याश्रमिणां 'ब्रह्मसंस्थोऽमृतत्वमेती' ति ब्रह्मविद्याया मोक्षस्यचोपदेशादिति ॥

इति सहकार्यन्तरविध्यधिकरणम् ॥१२॥

अनाविष्कुर्वन्नन्वयात् ॥४९॥

'बाल्येन तिष्ठासे' दित्यत्र बाल्यशब्दस्य भावकर्मसाधारणत्वेऽपि वयोविशेषलक्षणबालभावस्य इच्छया सम्पादितुमशक्यत्वेनाविधेयत्वात् कर्मैव विधेयम् । तत्र कामचारकामवादकामभक्षत्वादिकं यद्बालस्य कर्म, यच्च डम्भादिराहित्यलक्षणं स्वमाहात्म्यानाविष्करणरूपं कर्म तत्सर्वं बाल्यशब्देन विधेयं, अविशेषात् । न च निषिद्धस्य कामचारादेर्विधानमयुक्तमिति वाच्यम् । वामदेव्योपासनांगतया प्रार्थयमानसर्वयोषिदपहारलक्षणनिषिद्धकर्मविधानवद्विद्यांगतया निषिद्धस्यापि कामचारादेर्विधानसम्भवादिति पूर्वपक्षे प्राप्ते उच्यते—

अनाविष्कुर्वन्नन्वयात् ॥ स्वमाहात्म्यमनाविष्कुर्वन्नेव विद्वान्वर्तेत स्वमाहात्म्यानाविष्करणलक्षणबाल्यस्यैव विद्यायामन्वयसम्भवात् । 'नाविरतो दुश्चरितान्नाशान्तो नासमाहितः । नाशान्तमानसोवाऽपि प्रज्ञानेनैनमाप्नुया' दिति विशिष्य विद्यायामपि प्रतिषिद्धस्य कामचारादेर्विद्यांगतयाऽन्वयासम्भवात् ॥ इति अनाविष्काराधिकरणम् ॥१३॥

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥५०॥

मुक्तिव्यतिरिक्तफलकोपासनानामुद्गीथविद्यारहितयज्ञादि कर्मनिष्पाद्यानामपि यज्ञादिरूपसाधननिष्पत्तौ सत्यां विलंबे हेत्वभावात् इह जन्मन्येव निष्पत्तिरिति पूर्वपक्षः—

सिद्धान्तस्तु— मुक्तिव्यतिरिक्तफलकमुपासनं अप्रस्तुतप्रतिबन्धे प्रतिबन्धाभावे ऐहिकं इहैव जन्मनि सम्भवति । सति प्रतिबन्धे जन्मान्तरे । न च प्रतिबन्धासम्भवश्शङ्कनीयः । 'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवती'ति उद्गीथविद्यायाः प्रबलकर्मान्तराप्रतिबद्धफलत्वावेदनेन प्रबलकर्मान्तरप्रतिबन्धस्यानुज्ञातत्वात् । न च 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ती'ति यज्ञादेर्वेदनसाधनत्वश्रवणात् कारीर्यभिचारादिवत् नियतैहिकत्वमेव किं न स्यादिति वाच्यम् । शुष्यच्छालिसम्पत्तिवैरिविशेषविपत्तिफलकत्वेन विहितानां तेषां नियतैहिकत्वेऽपि विद्यासाधनयज्ञादिकर्मणां तज्जन्मनि विद्योद्देशेन अविहिततया पश्वादिफलकचित्रेष्ट्यादिवन्नियतैहिकत्वाभावात् पूर्वतन्त्रे चतुर्थाध्याये योगसिध्यधिकरणे तथा निर्णीतत्वादिति ॥   इति ऐहिकाधिकरणम् ॥१४॥

एवंमुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः॥

यक्षानुरूपो बलिरिति न्यायेन बलवत्कर्मसाध्यानां मुक्तिफलकब्रह्मोपासनानां प्रबलकर्मान्तरप्रतिबन्धासम्भवात् नियतैहिकत्वमेवेति पूर्वपक्षः ।

सिद्धान्तस्तु मुक्तिफलकविद्यानामपि ऐहिकत्वनियमो नास्ति. अप्रस्तुतप्रतिबन्धस्वरूपावस्थाया अविशेषेण तत्राप्यवधृतत्वात् । तत्रापि प्रबलानां ब्रह्मविदपचारादिप्रतिबन्धकानां सम्भवात् । द्विरुक्तिरध्यायपरिसमाप्त्यर्था ॥

इति मुक्तिफलाधिकरणम् ॥१५॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताविरुदाञ्चितैः श्रीमद्रंगरामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां तृतीयाध्यायस्य चतुर्थः पादः ॥

॥ तृतीयोऽध्यायस्समाप्तः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

चतुर्थोऽध्यायः ॥

॥ चतुर्थस्याध्यायस्य प्रथमः पादः ॥

—*—

आवृत्तिरसकृदुपदेशात् ॥१॥

'ब्रह्मविदाप्नोति पर' मित्यादिषु मोक्षसाधनं वेदनं सकृत्कृतमेव शास्त्रार्थः । 'सयोहवै तत्परंब्रह्म वेद ब्रह्मैव भवती' ति ब्रह्मवेदनस्य परप्राप्त्युपायत्वश्रुतेः सकृत्कृतेऽपि वेदने शास्त्रार्थनिर्वृत्तेः असकृदावृत्तौ ज्योतिष्टोमादेरिव फलभूम्नः कल्पनीयतया अपुनरावृत्तिलक्षणमोक्षरूपफलभेदस्याभावाच्चेति पूर्वःपक्षः । सिद्धान्तस्तु आवृत्तिरसकृदुपदेशात् । असकृदावृत्तं वेदनमित्यर्थः । 'विद्यादुपासीते' ति विद्युपास्योरुपक्रमोपसंहारयोर्व्यतिकरेण उपदेशात् 'ब्रह्मविदाप्नोति परं निदिध्यासितव्य' इति वेदनध्यानयोश्च व्यतिकरेण उपदेशात् वेदनध्यानोपासनादिशब्दानामभिन्नार्थत्वात् स्मृतिसंतानरूपध्यानात्मकवेदनस्य आवृत्तिमन्तरेण ध्यानरूपत्वानुपपत्तेः वेदान्तविहितस्य आप्रयाणादनुवर्तनीयस्य एकोपायत्वेन फलभेदकल्पनानुपपत्तेश्च असकृदावृत्तं वेदनमेव शास्त्रार्थः ॥

लिङ्गाच्च ॥२॥

लिंगं-स्मृतिः । स्मर्यते-मां ध्यायन्त उपासते । अव्यक्तं पर्युपासते । तद्रूपप्रत्यये चैकासन्ततिश्चान्यनिस्पृहा-तद्ध्यानमित्यादिना ॥

इति आवृत्त्यधिकरणम् ॥१॥

आत्मेतितूपगच्छन्ति ग्राहयंतिच ॥३॥

'पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेती' ति जीवेश्वरपृथक्त्वज्ञानस्यामृतत्वसाधनत्वश्रवणात् स्वात्मानंप्रत्यपृथक्सिद्धविशेष्य-

त्वलक्षणमात्मत्वं ब्रह्मणो नास्त्येव । अतएव 'आत्मेत्येवोपासीते' तीति करणेन दृष्टिविधित्वं सूच्यते। तादृशी च दृष्टिर्न मोक्षार्थोपासनाविषया। ततश्च मोक्षोपासने तात्त्विकविषयत्वावश्यम्भावेनातस्मिंस्तदारोपरूपदृष्टिविधेरयुक्तत्वात् पृथक्त्वेनैवानुसन्धानं कार्यं। नत्वपृथक्सिद्धविशेष्यत्वरूपात्मत्वेनेति पूर्वपक्षे पठति–

आत्मेतितूपगच्छन्ति ग्राहयन्तिचेति। 'त्वं वा अहमस्मि भगवो देवतेअहं वै त्वमसि भगवोदेवते' इति पूर्वेउपासितारः आत्मत्वेनोपगच्छंति उपासतइत्यर्थः। 'य आत्मनि तिष्ठन्नि' त्यादीनि च शास्त्राणि प्रत्यगात्मापेक्षया आत्मतां ग्राहयन्ति। न च पृथक्त्वानुसन्धानस्य विरोधश्शंक्यः। किंचिज्ज्ञत्वसर्वज्ञत्वादिलक्षणभेदकाकारस्य पारमार्थिकत्वात् भेदरूपं पृथक्त्वमस्त्येव। नियमेनाधारत्वलक्षणमपृथक्सिद्धविशेष्यत्वरूपमात्मत्वमप्यस्त्येव। नहीदृशमात्मत्वं भेदविरोधि। अतः 'आत्मेत्येवोपासीते' ति विधिवशादात्मत्वेनैवोपासनं कर्तव्यमिति स्थितम्॥

इति आत्मत्वोपासनाधिकरणम्॥२॥

न प्रतीके न हि सः॥ ४॥

'मनोब्रह्मेत्युपासीते'ति प्रतीकोपासनस्यापि ब्रह्मोपासनत्वाविशेषात् ब्रह्मणश्च उपासितुरात्मत्वेन आत्मत्वेनैवोपासनं कार्यमिति पूर्वपक्षे प्राप्तउच्यते।

न प्रतीकेन हि सः। मनोविशेष्यकब्रह्मविशेषणकोपासने ब्रह्मणः दृष्टिविशेषणत्वेन विशेष्यभूतमनसः उपासकंप्रत्यात्मत्वासम्भवेन अब्रह्मणि मनसि ब्रह्मदृष्ट्यानुसन्धानमेवेदम्॥

ननु अत्रापि ब्रह्मण एवोपास्यत्वमस्तु अचेतनस्य अल्पशक्तेर्मनआदेरुपास्यत्वासम्भवात् मनसः दृष्टिविशेषणत्वमंगीकृत्य ब्रह्मणएवोपास्यत्वस्य न्याय्यत्वादित्यत्राह–

ब्रह्मदृष्टिरुत्कर्षात्॥५॥

मनआदिषु ब्रह्मदृष्टिरेव न्याय्या । उत्कृष्टेराज्ञिभृत्यदृष्टेरिव उत्कृष्टे ब्रह्मणि मनआदिदृष्टेरन्याय्यत्वात् । न च अचेतनानां कथमुपास्यत्वमिति वाच्यम् । मनआदिशब्दानामभिमानिदेवतावाचकत्वेन उपास्यत्वसंभवात् ।

इति प्रतीकाधिकरणम् ॥३॥

आदित्यादिमतयश्चांगउपपत्तेः ॥६॥

'य एवासौ तपति तमुद्गीथमुपासीते'त्यत्र कर्मांगभूतउद्गीथे आदित्यदृष्टिः कर्तव्या, उतादित्ये उद्गीथदृष्टिरिति विशये 'ब्रह्मदृष्टिरुत्कर्षा'दिति सूत्रोक्तन्यायेनोत्कृष्टदृष्टेरेवापकृष्टे कर्तव्यत्वात्, कर्मांगस्योद्गीथस्य कर्मोपकारकत्वेनोत्कृष्टतया तद्बुद्धिरेवादित्ये कर्तव्येति पूर्वपक्षे प्राप्ते उच्यते–

आदित्यादिमतयश्चाङ्गउपपत्तेः । अत्र चशब्दोऽवधारणे । अंगएवादित्यादिमतयः कार्याः । कर्माराध्यतया आदित्यादीनामेवोत्कृष्टत्वस्योपपत्तेरिति ॥ इति आदित्यादिमत्यधिकरणम् ॥४॥

आसीनस्सम्भवात् ॥७॥

आसीन एव उपासीत । तस्यैव उपासनस्य सम्भवात् तिष्ठतो गच्छतश्च यत्नसापेक्षत्वात् शयानस्य निद्राप्रसक्तेश्च उपासनस्य ध्यानरूपत्वाच्च एकाग्रचित्ततावश्यम्भावात् चित्तैकाग्र्यस्यासनसापेक्षत्वाच्चासीन एव कुर्यात् ॥

ध्यानाच्च ॥ ८ ॥

सजातीयप्रत्ययान्तराव्यवहितचिंतालक्षणध्यानलक्षणत्वादुपासनस्य तत्र च चित्तैकाग्र्यावश्यम्भावेन तत्सिद्ध्यै आसीनत्वस्यापेक्षितत्वाच्च ॥

अचलत्वञ्चापेक्ष्य ॥९॥

'ध्यायतीव पृथिवी ध्यायतीवान्तरिक्ष'मित्यादिषु निश्चलत्वधर्मेण ध्यातृसाम्यव्यपदेशदर्शनात ध्यातृनिश्चलत्वस्यापेक्षितत्वात् निश्चलत्वस्यचासिकामन्तरेणासम्भवात आसीन एव कुर्यात् ॥

स्मरन्ति च ॥१०॥

'उपविश्यासने युंज्याद्योगमात्मविशुद्धये' इति ध्यानांगतया आसीनता स्मर्यते । अतो ध्याने चित्तैकाग्र्यस्य अत्यावश्यकत्वात्तदर्थमासीनत्वमपेक्षितम् ॥

यत्रैकाग्रता तत्राविशेषात् ॥११॥

'यत एव चित्तैकाग्र्यं प्रधानहेतुः अतएव यस्मिन्देशे चित्तैकाग्र्यं भवति स देशोऽपेक्षितः । देशविशेषनियमस्यापि चित्तैकाग्र्यसिध्यर्थत्वात् चित्तैकाग्र्यविरोधे सोऽपि नादर्तव्यः । 'समे शुचौ शर्कराबह्निवालुकाविवर्जिते' इत्यविशेषेण एकाग्रतानुकूलदेशविशेषस्यैवांगत्वकीर्तनात् तेनैवचन्यायेन एकाग्रतानुकूलआसनस्यापेक्षितत्वमस्तीति अवसीयत इति ॥

इति आसीनाधिकरणम् ॥५॥

आप्रयाणात्तत्रापि हि दृष्टम् ॥१२॥

इदमपवर्गसाधनमुपासनं एकस्मिन्नेवाहनि कार्यं शास्त्रार्थस्य तावतैव कृतत्वादिति पूर्वपक्षे प्राप्ते उच्यते—

आप्रयाणात्तत्रापि हि दृष्टम् । उपासनं आमरणमनुवर्तनीयं । 'स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते' इति उपासनस्य यावदायुषमनुवर्तनीयत्वविधानात् ॥

इति आप्रयाणाधिकरणम् ॥६॥

तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्॥

'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपी' ति भोगादेव कर्मक्षयश्रवणात् अश्लेषविनाशश्रुतिः कथञ्चित् विद्यास्तुत्यर्थतया नेयेतिप्राप्तउच्यते—

तदधिगमउत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् । उपासने प्रारब्धे तत्सामर्थ्यादेव पूर्वाघविनाशः उत्तराघाश्लेषश्च भवति । तद्व्यपदेशात् । 'एवंहास्य सर्वे पाप्मानः प्रदूयन्ते । एवमेवंविदि पापं कर्म न श्लिष्यत' इति

श्रुतेः । न च 'नाभुक्तं क्षीयते कर्मे'ति वचनविरोधः । तस्य प्रारब्धफलकर्मणां फलजननसामर्थ्यदार्ढ्यविषयत्वात् अश्लेषविनाशश्रुत्योश्च तद्भिन्नकर्मणां तत्सामर्थ्यनिवारणशक्तिप्रतिपादनपरत्वात् । अन्यथा कर्ममात्रस्य भोगैकनाश्यत्वाभ्युपगमे भोगंविना कर्म न नश्यतीति भोगार्थं शरीरमवर्जनीयं तस्मिन्नपि शरीरे पापार्जनं भवतीति अनिर्मोक्षप्रसङ्गइति मोक्षशास्त्रैरेव पापाश्लेषविनाशयोरपेक्षितत्वादिति ॥

इति तदधिगमाधिकरणम् ॥७॥

इतरस्याप्येवमसंश्लेषः पाते तु ॥१४॥

पुण्यकर्मफलस्य सुखरूपत्वेन विदुषोऽनिष्टत्वाभावात् नाश्लेषविनाशाविति पूर्वपक्षे प्राप्त उच्यते—

इतरस्याप्येवमसंश्लेषः पाते तु । विदुषः पुण्यस्यापि मोक्षविरोधित्वेन अनिष्टफलत्वसाम्यादेव अश्लेषविनाशौ । विद्यानुगुणस्य वृष्ट्यन्नारोग्यफलस्य शरीरपाते सति अनिष्टत्वादश्लेषः ॥

इति इतराधिकरणम् ॥८॥

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥१५॥

'सर्वे पाप्मानः प्रदूयन्त' इति सर्वकर्मप्रदाहश्रवणात् ब्रह्मविद्योत्पत्त्यनन्तरमेव सर्वकर्मणां नाशः । देहस्थितिस्तु चक्रभ्रमणादिवत्संस्कारवशादप्युपपद्यत इति प्राप्ते उच्यते—

अनारब्धकार्ये एव तु पूर्वे तदवधेः । विद्योत्पत्तेः प्राचीने अनारब्धकार्ये एव सुकृतदुष्कृते नश्यतः न त्वारब्धकार्ये । 'तस्य तावदेव चिरं यावन्न विमोक्ष्य' इति शरीरपातविलम्बावधिश्रवणाद्यावच्छरीरधारणं प्रारब्धकर्मानुवृत्तेरवश्यम्भावात्, कर्मव्यतिरिक्तस्य देहधारकसंस्कारस्य सद्भावे प्रमाणाभावादित्युक्तम् ॥ इति अनारब्धकार्याधिकरणम् ॥९॥

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥१६॥

विद्योत्पत्त्यनन्तरभाविनामाश्रमधर्माणां सुकृतत्वाविशेषेण विद्योत्पत्तिकार्यार्थत्वाभावेन च अनारब्धकार्यस्य विद्याननुगुणकारीर्यादिकर्मवदश्लेषस्यैव वक्तव्यत्वात् आश्रमकर्मत्वेनानुष्ठानेऽपि विद्यार्थतया अननुष्ठानमेव युक्तमिति प्राप्तेऽभिधीयते—

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् । अग्निहोत्राद्याश्रमकर्मविद्योत्पत्त्याख्यकार्यायैव आप्रयाणादनुष्ठेयमेव । 'तमेतं वेदानुवचनेने' त्यादिना विद्योत्पत्तिकार्यार्थत्वदर्शनात् । न च विद्याया निष्पन्नतया न तदर्थमनुष्ठानमावश्यकमिति वाच्यम् । आप्रयाणादनुवर्तनीयाया अहरहरभ्यासाधेयातिशयाया विद्याया अहरहरुत्पत्त्यर्थमनुष्ठानस्यावश्यकत्वात् ॥

नन्वेवमग्निहोत्रादिसाधुकृत्या विद्योत्पत्त्यर्था । तदतिरिक्ता साधुकृत्या अनुभूतफलाप्रारब्धफलावा । तर्हि 'सुहृदस्साधुकृत्या'मिति वचनस्य को विषय इत्यत्राह—

अतोऽन्यापिह्येकेषामुभयोः ॥१७॥

विद्योत्पादिकाया अग्निहोत्रादिसाधुकृत्याया अन्या विद्यायाः पूर्वोत्तरकालानुष्ठिता प्रबलकर्मप्रतिबद्धफला अनन्ता साधुकृत्या सम्भवत्येव । तद्विषया सुहृदस्साधुकृत्यामिति श्रुतिः अश्लेषविनाशश्रुतिश्च।अतो न विरोधः।

यदेव विद्ययेति हि ॥१८॥

'यदेव विद्यया करोती'ति उद्गीथविद्यायाः क्रतुफलप्रतिबन्धफलत्वप्रतिपादनेन अनुष्ठितस्य कर्मणः फलप्रतिबन्धसूचनात् अनुष्ठितप्रतिबद्धफलविषयत्वं 'सुहृदस्साधुकृत्या'मिति वचनस्येति पृथग्ध्यप्रतिबन्धः फलमिति सूत्रप्रतिपादितोऽर्थः अनेन सूत्रेण स्मारितः ॥

इति अग्निहोत्राद्यधिकरणम् ॥१०॥

भोगेनत्वितरे क्षपयित्वाऽथ सम्पद्यते ॥११॥

'तस्य तावदेवचिरं यावन्नविमोक्ष्येऽथ सम्पत्स्य'इति विद्यायोनिशरीरपातमात्रस्यैवान्तरायत्वश्रवणात् प्रारब्धयोः पुण्यपापकर्मणोस्सत्त्वेऽपि विद्यायोनिशरीरावसान एव मोक्षइति प्राप्तउच्यते--

भोगेनत्वितरे क्षपयित्वाऽथ सम्पद्यते। तुशब्दः पक्षव्यावृत्त्यर्थः। आरब्धकार्ये पुण्यपापे फलभोगेन क्षपयित्वा ब्रह्म सम्पद्यते। ते च प्रारब्धपुण्यपापे विद्यायोनिशरीरमात्रोपभोग्यफलेचेत् विद्यायोनिशरीरावसाने, अनेकशरीरभोग्यफलेचेत् तदवसाने, सम्पद्यते। भोगेनैव क्षपयितव्यत्वादारब्धपुण्यपापकर्मणोः। 'तस्य तावदेवचिरं यावन्नविमोक्ष्य'इत्यत्र न तच्छरीरविमोक्षउच्यते। अपितु देहारम्भककर्मविमोक्षएवेति निष्कर्षः॥

इति इतरक्षपणाधिकरणम् ॥११॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रतानिरुद्धाचितैः श्रीमद्रंगरामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां शारीरकशास्त्रार्थदीपिकायां चतुर्थस्याध्यायस्य प्रथमः पादः॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः॥

॥ श्रीः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः॥

॥ चतुर्थाध्यायस्य द्वितीयः पादः॥

वाङ्मनसि दर्शनाच्छब्दाच्च ॥१॥

'वाङ्मनसि सम्पद्यते' इति श्रूयमाणा वाचो मनस्सम्पत्तिर्वाग्वृत्तिविषया नतु वाग्विषया। वाचो मनःप्रकृतिकत्वाभावेनाप्रकृतिभूते मनसि

वाचः साक्षाल्लयासम्भवात् । न च वाग्वृत्तेरप्यप्रकृतिभूते मनसि सम्पत्ति-शब्दितो लयो न सम्भवतीति वाच्यम् । मनसि स्थितेऽपि वाग्व्यापाराभावमात्रेण सम्पद्यतइत्युपपत्तेः । विद्यमानायास्तु वाचस्तादात्विकाभावस्याप्यभावेन सम्पत्तिश्रुतेरत्यन्तासम्भवादिति पूर्वपक्षे प्राप्त उच्यते—

वाङ्मनसि दर्शनाच्छब्दाच्च । वाक्स्वरूपमेव मनसि सम्पद्यते । वागिंद्रिये उपरतेऽपि मनःप्रवृत्तिदर्शनात् । 'वाङ्मनसि सम्पद्यत' इति शब्दाच्च वागेव मनसि सम्पद्यते । यद्यपि मनसो वाक्प्रकृतित्वं नास्ति । तथाऽप्यनुपरतव्यापारेऽपि मनसि वाच उपरतव्यापारत्वदर्शनात् वाङ्मनसि सम्पद्यतइवेत्युच्यते । वृत्तिपक्षेऽपि सम्पद्यत इत्यस्य गौणत्वावश्यम्भावात् । ततश्च वाचो निर्व्यापारताहेतुभूतो मनसा संयोगविशेषस्सम्पत्तिशब्दार्थ इति द्रष्टव्यम् ॥

अतएव सर्वाण्यनु ॥२॥

'यतोवाचो मनसा संयोगमात्रं सम्पत्तिः, अतएव 'तस्मादुपशांततेजाः पुनर्भवमिंद्रियैर्मनसि सम्पद्यमानै'रिति वाचमनु सर्वेषामिंद्रियाणां सम्पत्तिश्रुतिरपि तदर्थिकैवेत्यर्थ इति ॥

इति वागधिकरणम् ॥१॥

तन्मनःप्राणउत्तरात् ॥३॥

'मनःप्राणे'इत्यत्र मनोवृत्तेरेव प्राणे अप्ययउच्यते, मनश्शब्दस्य मनोवृत्तिष्वपि प्रचुरप्रयोगसत्त्वात् । न तु पूर्वोक्तरीत्या संयोगविशेषस्सम्पत्तिशब्दार्थ इति प्राप्ते उच्यते—

तन्मनःप्राणउत्तरात् । मनसो निर्व्यापारताहेतुभूतः प्राणेन संयोगविशेष एव इहापि सम्पत्तिशब्दार्थः । ततश्च मन एव प्राणे सम्पद्यते 'मनःप्राण' इत्युत्तरवाक्यादित्यर्थः । मनश्शब्दस्य मनोवृत्तिपरत्वेऽपि सम्पत्तिश्रुतेर्गौणत्वावश्यम्भावेन मनश्शब्दस्य गौणत्वाश्रयणस्यान्याय्यत्वादिति ॥

इति मनोधिकरणम् ॥२॥

सोऽध्यक्षे तदुपगमादिभ्यः ॥४॥

'प्राणस्तेजसी' ति श्रुतेः प्राणस्तेजसि सम्पद्यत इति प्राप्ते उच्यते—

सोऽध्यक्षे तदुपगमादिभ्यः । सः इन्द्रियसहितः प्राणः अध्यक्षे जीवे सम्पद्यते । 'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ती' ति प्राणानां जीवोपगमस्य, तेन सहोत्क्रान्तेश्च श्रवणाज्जीव एव सम्पद्यते, गंगया संयुज्य सागरं गच्छन्त्यां यमुनायां यमुनासागरं गच्छतीति प्रयोगवज्जीवद्वारा प्राणस्य तेजस्सम्पत्तावपि 'प्राणस्तेजसी' त्युक्तिरुपपद्यते । न च प्राणस्य तेजोद्वारेणैव जीवोपगमोऽस्त्विति वाच्यम् । निरध्यक्षस्य प्राणस्य तेजसि स्थितेरसम्भवादिति स्थितम् ॥

इति अध्यक्षाधिकरणम् ॥३॥

भूतेषु तच्छ्रुतेः ॥ ५ ॥

'प्राणस्तेजसी' ति जीवयुक्तस्य प्राणस्य तेजोमात्र एव सम्पत्तिश्रवणान्नसर्वभूतसम्पत्तिरिति प्राप्ते उच्यते—

भूतेषु तच्छ्रुतेः । स जीवः प्राणस्संहतेषु सर्वेषु भूतेषु सम्पद्यते । 'पृथिवीमय आपोमयस्तेजोमय'इति सञ्चरतो जीवस्य सर्वभूतमयत्वश्रवणेन सर्वभूतसम्पत्तेर्वक्तव्यत्वात् ॥

नैकस्मिन्दर्शयतो हि ॥६॥

एकस्मिन्तेजोमात्रे न सम्पद्यते, एकैकस्य भूतस्य कार्याक्षमत्वं, 'अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति तासां त्रिवृतं त्रिवृतमेकैकां करवाणी' ति 'नानावीर्याः पृथग्भूता स्ततस्ते संहतिं विना । नाशक्नुवन्प्रजास्स्रष्टुमसमागम्य कृत्स्नशः ॥ समेत्यान्योन्यसंयोगं परस्परसमाश्रयाः । महदाद्या विशेषान्ता ह्यण्डमुत्पादयंति ते'इति श्रुतिस्मृती दर्शयत इत्यर्थः ॥

इति भूताधिकरणम् ॥४॥

समानाचासृत्युपक्रमादमृतत्वञ्चानुपोष्य ॥७॥

'अत्रब्रह्मसमश्नुत'इत्यत्रैव विदुषो ब्रह्मभावश्रवणात् नोत्क्रांतिरितिप्राप्तेउच्यते-

समानाचासृत्युपक्रमादमृतत्वञ्चानुपोष्य । आसृत्युपक्रमात् आगत्युपक्रमात् । नाडीप्रवेशात् प्रागुत्क्रान्तिर्विद्वदविदुषोस्समाना । 'शतञ्चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेती'ति विदुषोऽपि नाडीविशेषेणोत्क्रमणश्रवणादुत्क्रान्तिरवर्जनीयैव । 'अथ मर्त्योऽमृतोभवत्यत्र ब्रह्मसमश्नुत' इति विदुषोऽत्रैव श्रूयमाणं यदमृतत्वं तदनुपोष्य शरीरेन्द्रियसम्बन्धमदग्ध्वैव उत्तरपूर्वाघाश्लेषविनाशरूपममृतत्वमुच्यते । 'अत्र ब्रह्मसमश्नुत' इतिचोपासनकालब्रह्मानुभवाभिप्रायम् ॥

तदापीतेस्संसारव्यपदेशात् ॥८॥

अवश्यं च तत् अमृतत्वमदग्धदेहसम्बन्धस्यैव वक्तव्यम् । कुतः ? आपीतेस्संसारव्यपदेशात् । अपीतिः अप्ययः । आब्रह्माप्ययं संसारो हि व्यपदिश्यते । 'तस्य तावदेव चिरं यावन्नविमोक्ष्ये अथ सम्पत्स्य' इति, 'अश्वइव रोमाणि विधूय पापं चन्द्रइव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी' ति व्यपदेशात् ॥

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥९॥

देवयानेन पथा गच्छतोऽपि विदुषः 'तं प्रतिब्रूयात्सत्यं ब्रूया'दिति चन्द्रमस्संवादस्य प्रमाणप्रतिपन्नत्वाच्च सूक्ष्मं शरीरमामोक्षमनुवर्ततइत्यभ्युपगन्तव्यम् । नह्यशरीरस्य चन्द्रमसा संवादस्सम्भवति ॥

नोपमर्देनातः ॥१०॥

अतः 'अथमर्त्योऽमृतो भवती'ति श्रूयमाणममृतत्वं शरीरेन्द्रियसम्बन्धानुपमर्देनैवोत्तरपूर्वाघाश्लेषविनाशरूपमंगीकर्तव्यम् ॥

अस्यैवचोपपत्तेरूष्मा ॥११॥

अस्य सूक्ष्मशरीरस्य क्वचिदुपसंहृतत्वादेव विदुषोऽपि म्रियमाणस्य क्वाचित्कऊष्मोपलभ्यते ॥

प्रतिषेधादितिचेन्न शारीरात्स्पष्टोह्येकेषाम् ॥१२॥

ननु 'योऽकामो निष्काम आप्तकाम आत्मकामो नतस्य प्राणा

उत्क्रामन्ती'ति विदुषो देहादुत्क्रान्तिः प्रतिषिद्धा । नचेदं शारीरापादानकोत्क्रमणनिषेधपरमिति वाच्यम् । 'यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहोने' त्यार्तभागप्रश्ने 'नेतिहोवाच याज्ञवल्क्यः सउच्छ्वयत्याध्मायत्याध्मातोमृतश्शेते' इति उच्छूनत्वादीनां शरीरधर्माणां प्रतिपादनेन शरीरापादानकोत्क्रमणप्रतिषेधस्यैव युक्तत्वात् । न हि शारीरस्योच्छूनत्वमाध्मातत्वं शयितृत्वं वा युज्यते । अतश्शरीरापादनकोत्क्रमणनिषेधान्नोत्क्रान्तिर्विदुष इति चेन्न । शारीरादेवोत्क्रमणं प्रतिषिध्यत एकेषां माध्यंदिनानामाम्नाये विस्पष्टं 'योऽकामोनिष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ती' ति शारीरापादानकोत्क्रमणप्रतिषेधात् । काण्वशाखायान्तु 'न तस्य प्राणा' इति षष्ठी नटस्य शृणोतीतिवदपादानत्वलक्षणसम्बन्धपरा । 'उदस्मात्प्राणाः क्रामन्त्याहो नें' त्यार्तभागप्रश्ने तु विदुषोऽप्रस्तुतत्वेनाविद्वद्विषयत्वावश्यंभावेनाविदुषश्च शरीरादुत्क्रान्तेः प्रतिषेद्धुमशक्यतया तत्रापि शारीरापादानकोत्क्रमणप्रतिषेधपरत्वस्यैव युक्तत्वात् । न च तत्र वाक्यशेषश्रुतानामुच्छूनत्वादीनामात्मन्यनुपपत्तिः, शरीरापादानकोत्क्रान्तिप्रतिषेधवादिनापि 'आत्मकामो न तस्मात्प्राणा उत्क्रामन्ती' ति माध्यन्दिनशाखावाक्ये अभेदोपचारस्यावश्याश्रयणीयत्वात् । न च प्राणानां शारीरादुत्क्रान्तेरप्रसक्ततया प्रतिषेधो न युक्त इति वाच्यम् । वृक्षादुड्डीयमानविहङ्गमसङ्घवद्यथायथं गमनसम्भवात्, 'तस्य तावदेव चिरं यावन्नविमोक्ष्येऽथ संपत्स्य' इति देहवियोगानन्तरब्रह्मसम्पत्तिवचनेन तदानीमेव शारीरात् प्राणोत्क्रमणस्य प्रसक्तत्वाच्च । तथा च सूक्ष्मशरीरसाध्यार्चिरादिगत्यभावे ब्रह्मसंपत्तेः तत्साध्याया अनुपपत्तिरिति शङ्कापरिहाराय 'न तस्य प्राणा उत्क्रामन्ती' त्युच्यत इति निरवद्यम् । अतो विद्वदविदुषोरुत्क्रान्तिस्समानेति ॥

स्मर्यते च ॥१३॥

'ऊर्ध्वमेकस्स्थितस्तेषां यो भित्वा सूर्यमण्डलम् । ब्रह्मलोकमतिक्रम्य तेन याति परां गति' मिति मूर्धन्यनाड्या विदुषोऽप्युत्क्रान्तिः स्मर्यते ॥

इति आसृत्युपक्रमाधिकरणम् ॥१॥

तानि परे तथाह्याह ॥१४॥

'तेजःपरस्यां देवताया' मित्यत्र जीवपरिष्वक्ततेजश्शब्दितभूतसूक्ष्माणां परदेवतासम्पत्तौ प्रयोजनाभावात् 'तेजःपरस्यां देवताया' मिति श्रुतिः स्तुतिमात्रपरेति पूर्वपक्षे प्राप्त उच्यते–

तानि परे तथाह्याह । तानि जीवसंसृष्टानि भूतसूक्ष्माणि परे परमात्मनि सम्पद्यन्ते । कुतः; तथाह्याह श्रुतिः– 'तेजःपरस्यां देवताया'मिति। श्रुतिवशाच्च सुषुप्तिप्रळययोरिव परमात्मसम्पत्तेः सुखदुःखोपभोगायासविश्रमः प्रयोजनत्वेन परिकल्प्यत इति स्थितम् ॥

इति परसम्पत्त्यधिकरणम् ॥६॥

अविभागो वचनात् ॥१५॥

तथा सेयं परमात्मनि जीवस्य सम्पत्तिः प्राकृतलयवत्कारणापत्तिरूपैव । सर्वात्मनः सर्वोपादानत्वात् । न तु वागादेर्मनआदिष्विवाविभागमात्रमिति पूर्वपक्षेप्राप्ते उच्यते–

अविभागोवचनात् । अत्रापि पृथग्भावानर्हसंसर्गविशेषलक्षणाविभागएव संपत्तिशब्दार्थः । 'वाङ्मनसि संपद्यत' इत्यत्र सतस्संपद्यत इति शब्दस्यैवेहाप्यनुपद्यमानतया अभिधानवैरूप्याश्रयणस्यान्याय्यत्वादिति स्थितम् ।

इति अविभागाधिकरणम् ॥७॥

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया

कठवल्ल्यां श्रूयते– 'शतञ्चैका च हृदयस्य नाड्य स्तासां मूर्धानमभिनिस्सृतैका । तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ती'ति। अत्र मूर्धन्यनाड्यैव विदुषो गमनं अन्याभिरविदुषां गमनमिति नियमो नोपपद्यते । नाडीनां भूयस्त्वादतिसूक्ष्मत्वाच्च दुर्विवेचतया पुरुषेणोपादातुमश-

क्यत्वात् 'तयोर्ध्वमायन्नमृतत्वमेती'तिश्रुतिःयादृच्छिकीमुत्क्रान्तिमनुवदतीति प्राप्त उच्यते—

तदोकोग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया। विद्वान् शताधिकया मूर्धन्ययैव नाड्या उत्क्रामति। न च नाड्या नानात्वाद्विदुषो दुर्विवेचत्वं। विद्वान्हि परमपुरुषाराधनभूतात्यर्थप्रियविद्यासामर्थ्यात् विद्याशेषभूततया आत्मनः अत्यर्थप्रियगत्यनुसन्धानयोगाच्च प्रसन्नेन हार्देन परमपुरुषेण अनुगृहीतो भवति। तदोकः तस्य जीवस्य स्थानं हृदयं अग्रे ज्वलनं प्रकाशनं यस्य तदिदमग्रज्वलनं। तत्प्रसादात् परमपुरुषप्रसादात् प्रकाशितद्वारो विद्वान् तां नाडीं विजानातीति तया विदुषो गतिरुपपद्यते॥

इति तदोकोऽधिकरणम् ॥८॥

रश्म्यनुसारी ॥१७॥

'अथयत्रैतदस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रमत' इति प्रतिपादितस्य विदुषोरश्मिगमनस्य निशिम्मृतेविदुष्यसंभवात् रश्मिभिरेवगमनमिति ननियमः, अथैतैरेवरश्मिभिरिति वचनन्तुपक्षप्राप्तविषयं। एवकारस्तु अत्यन्तायोगव्यवच्छेदार्थ इति प्राप्रउच्यते—

'रश्म्यनुसारी' विद्वान् नियमेनरश्मीननुसृत्यैवगच्छति। 'एतैरेव रश्मिभि'रित्येवकारस्य क्रियासंगतैवकारत्वाभावेन अत्यन्तायोगव्यवच्छेदार्थकत्वाभावेन अन्ययोगव्यवच्छेदार्थकत्वस्यैव वक्तव्यत्वात्। यदुक्तं निशिरश्म्यसंभवात् रश्मीननुसृत्य गमनं नोपपद्यत इतितन्न। निदाघसमयेरात्रावपि ऊष्मोपलंभात् हेमन्तादौ तु हिमाभिभवात् दुर्दिनइव ऊष्मानुपलम्भः। श्रूयते च नाडीरश्मीनां सर्वदाऽन्योन्यान्वयः। 'तद्यथा महापथ आतत उभौ ग्रामौ गच्छतीमञ्चामुञ्च एवमेवैत आदित्यस्य रश्मय उभौ लोकौ गच्छन्तीमञ्चामुञ्च अमुष्मादादित्यात्प्रतायन्ते त आसु नाडीषु सृप्ताः आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ता' इति॥

इति रश्म्यनुसाराधिकरणम् ॥९॥

निशिनेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयतिच ।

'दिवाच शुक्लपक्षश्च षण्मासा उत्तरायणम् । मुमूर्षतां प्रशस्तानि विपरीतन्तु गर्हित'मिति निशामरणस्य निंदितत्वावेदनेनाधोगतिहेतुत्वप्रतीतेः निशि मृतस्य ब्रह्मप्राप्तिर्नास्तीति पूर्वपक्षे प्राप्त उच्यते—

निशिनेतिचेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च । तस्यायमर्थः । कर्मसम्बन्धाभावे शरीरान्तरपरिग्रहासम्भवाद्यावद्देहं कर्मसम्बन्धो वक्तव्यः । निशि मृतस्यापि ब्रह्मविदः प्रारब्धव्यतिरिक्तकर्मणां विद्यया नष्टत्वात् अवशिष्टप्रारब्धस्य भोगेन नष्टत्वात्, 'तस्य तावदेव चिर'मिति प्रारब्धकर्मार्जितशरीरपातमात्रस्यैवान्तरायत्वश्रवणाच्च प्रारब्धकर्मार्जितशरीरनाशे पुनश्शरीरान्तराप्रसक्तेः निशि मृतस्यापि ब्रह्मविदोऽस्त्येव ब्रह्मप्राप्तिः ॥

इति निशाधिकरणम् ॥१०॥

अतश्चायनेऽपि दक्षिणे ॥१९॥

'दिवाच शुक्लपक्षश्चे'त्येतस्त्वब्रह्मविद्विषयमिति पूर्वाधिकरण एव स्थितत्वात् कथमस्याश्शङ्काया उत्थितिरिति चेत्, सत्यम् । दक्षिणायनमृतस्य चन्द्रप्राप्तिश्रवणात्, चन्द्रंप्राप्तस्य पुनरावृत्तिश्रवणाच्च भीष्मादीनां ब्रह्मविदां उत्तरायणप्रतीक्षादर्शनाच्च दणिणायनमृतस्य न ब्रह्मप्राप्तिरिति अधिकाशङ्काया मुच्यते—

अतश्चायनेऽपि दक्षिणे । अयनेऽपि दक्षिणे मृतस्य पूर्वाधिकरणोक्तयुक्त्याऽस्त्येव ब्रह्मप्राप्तिः । चन्द्रं प्राप्तस्यापि विदुषः 'तस्माद्ब्रह्मणो महिमानमाप्नोती'ति वाक्यशेषे ब्रह्मप्राप्तिश्रवणाच्चन्द्रप्राप्तिर्विश्रमहेतुमात्रं । चन्द्रंप्राप्तस्य पुनरावृत्तिवचनं अब्रह्मविद्विषयम् । भीष्मादीनां स्वच्छन्दमरणानां उत्तरायणप्रतीक्षणमुत्तरायणप्राशस्त्यप्रदर्शनार्थम् ॥

ननु 'यत्र कालेस्वनावृत्तिमावृत्तिञ्चैव योगिनः । प्रयाता यान्ति तं कालं वक्ष्यामि पुरुषर्षभ ॥ अग्निर्ज्योतिरहश्शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्मब्रह्मविदो जनाः ॥ धूमो रात्रिस्तथा कृष्णष्षण्मासा

दक्षिणायनम् । तत्र चांद्रमसं ज्योतिर्योगी प्राप्य निवर्तते ॥ शुक्लकृष्णे गती ह्येते जगतश्शाश्वते मते । एकया यात्यनावृत्तिमन्यया वर्तते पुन' रिति स्मरणं कथमुपपाद्याम् । तत्राह–

योगिनः प्रतिस्मर्यैते स्मार्तेचैते ॥२०॥

अस्मिन्प्रकरणे अर्चिरादिगतिः धूमादिगातिरित्येते द्वे गती स्मार्ते स्मर्तव्यत्वेन योगिनइति स्मर्येते । न तु मुमूर्षतां कालविशेषोऽभिधीयते । 'नैते सृती पार्थजानन् योगी मुह्यति कश्चने' त्युपसंहारात् । यत्र 'काले-त्वनावृत्ति' मित्यस्य यत्कालाभिमानिदेवताभिरतिवाहितः ब्रह्मप्राप्नोति तं मार्गं वक्ष्यइत्येवार्थः । अतो योगिनो गतिद्वयविधानार्थोऽयं संरंभ इति ॥

इति दक्षिणायनाधिकरणम् ॥११॥

इति चतुष्पष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतन्त्रताविरुदांचितैः श्रीमद्रंग-रामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां शारीरकशास्त्रार्थदीपिकायां चतुर्थस्याध्यायस्य द्वितीयः पादः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ श्रीः ॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

॥ चतुर्थाध्यायस्य तृतीयः पादः ॥

अर्चिरादिना तत्प्रथितेः ॥१॥

छान्दोग्ये पञ्चाग्निविद्यायां 'वेत्थपथोर्देवयानस्य पितृयाणस्य च व्यावर्तना'इति चतुर्थं प्रश्नं प्रतिपाद्य तद्य 'इत्थंविदुर्येचेमेऽरण्ये श्रद्धातपइत्यु-पासते तेऽर्चिषमभिसम्भवन्ती'ति श्रुतम् । अत्र तच्छब्देन प्राक्प्रस्तुतं सं-

सारिजीवस्वरूपं परामृश्यते– तत्प्रत्यगात्मस्वरूपं ये इत्थं उक्तप्रकारेण द्युपर्जन्यपृथिवीपुरुषयोषित्सु श्रद्धासोमवृष्ट्यन्नरेतश्शरीरकतया देहादिलक्षणप्रकृतिवियुक्ततया च उपासतइत्यर्थः। उत्तरवाक्ये श्रद्धाशब्दो द्वितीयांतः। वाजसनेयके समानप्रकरणे 'श्रद्धांसत्यमुपासत'इति श्रवणात्। सुपांसुलुगिति द्वितीयाया लुक्। तपश्शब्दोऽपि ब्रह्मपरः। 'परमं यो महत्तप' इत्यादिषु दर्शनात्। एवकारश्चात्राध्याहर्तव्यः। ततश्च अरण्ये स्थित्वा श्रद्धां पुरस्कृत्य तपएव ब्रह्मैव ये उपासते त उभयेऽपि अर्चिषमभिसम्भवन्ति प्राप्नुवन्त्येवेत्यर्थः। 'अर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान्मासेभ्यस्संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्सएनान् ब्रह्मगमयती'ति। अत्र अर्चिरादिशब्दास्तत्तदभिमानिदेवतापराः। तत्पुरुषः वैद्युतः पुरुषः अमानवः असंसारी। ब्रह्मलोकादागत्य एनान् पूर्वोक्तद्विविधोपासकान् ब्रह्मलोकं प्रापयतीत्यर्थः। 'अमानवस्सएत्य ब्रह्मलोकान् गमयती'ति श्रुत्यन्तरे श्रवणात्। 'एष देवयानः पंथा' इति। स्पष्टोऽर्थः। अत्र अर्चिरादिरेकएव मार्गः उत मार्गान्तरमप्यस्तीतिसंशये 'यावत्क्षिप्येन्मनस्तावदादित्यंगच्छती'ति त्वरावचनेन वैलक्षण्यप्रतीतेः मार्गभेदोऽप्यस्तीति पूर्वपक्षे प्राप्ते उच्यते–

अर्चिरादिना तत्प्रथितेः। नानाशाखासु तस्यैव मार्गस्य प्रथितेः प्रत्यभिज्ञानात् अर्चिरादिरेकएव मार्गः। त्वरावचनन्तु काश्मीरापेक्षया मगधान् क्षिप्रं गच्छतीतिवदुपपत्तेः स्वर्गगमनाद्यपेक्षया आदित्यगमनस्य शैघ्र्येण न तस्माद्वैलक्षण्यसिद्धिः॥

इति अर्चिराद्यधिकरणम्॥१॥

वायुमब्दादविशेषविशेषाभ्याम्॥२॥

वाजसनेयके 'यदावै पुरुषोऽस्माल्लोकात्प्रैति सवायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छती'ति। स ब्रह्मवित् छान्दोग्योक्तार्चिर्दिनपूर्वपक्षषडुदङ्मासाब्दद्वारेण

वायुमागच्छतीत्यर्थः । स वायुः तस्मै आगताय ब्रह्मविदे । विजिहीते आत्मावयवान् विगमयति,। छिद्रीकरोति स्वात्मानमित्यर्थः । ब्रह्मविदो नगमनप्रतिरोधक इति भावः । कियत्परिमाणं छिद्रमित्याह– यथा रथचक्रस्य खं रथचक्रमध्यवर्ति रन्ध्रं यत्परिमाणं तत्परिमाणछिद्रं करोति तेन छिद्रेण ऊर्ध्वं गत्वा स आदित्यलोकमागच्छतीत्यर्थः । ' तस्मै स तत्र विजिहीते यथा आडम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छति तस्मै स तत्र विजिहीते यथा दुन्दुभेः खं तेन स ऊर्ध्वमाक्रमते स लोकमागच्छत्यशोकमहिमं तस्मिन्वसति शाश्वतीस्समा ' इति । स्पष्टोऽर्थः ॥

नच ' देवलोकादादित्य ' मिति श्रुतेः अस्याश्श्रुतेश्च विरोध इति वाच्यं । ' योयं पवत एष देवानां ग्रह ' इति श्रुतेः वायोरेव तत्र देवलोकशब्दवाच्यत्वात् । इतरथा देवलोकादादित्यमिति आदित्यानन्तरपूर्वपर्वतया देवलोकनिर्देशकस्यास्यवाक्यस्य 'स वायुमागच्छति स आदित्यमागच्छती'ति वायोरादित्यसमनन्तरपूर्वपर्वत्वप्रतिपादकश्रुतिविरोधप्रसङ्गात् । अतो देवलोकवायुशब्दयोरेकार्थत्वं वक्तव्यम् ॥

वायुं अब्दात् संवत्सरात् ऊर्ध्वमधिगच्छेत् । अविशेषविशेषाभ्यां सामान्यविशेषाभ्यां । देवलोकशब्दो हि सामान्यशब्दः । वायुशब्दो विशेषशब्दः । अतो वायुरेव देवलोक इति ॥

इति वाय्वधिकरणम् ॥२॥

तटितोऽधिवरुणस्सम्बन्धात् ॥३॥

' स एतं देवयानं पन्थानमापद्याग्निलोकमागच्छति स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं' । सः ब्रह्मवित् देहवियोगकालएव सुकृतदुष्कृते विधूय देवयानमार्गं आपद्य अवलम्ब्य अग्निलोकमागच्छति । 'तेऽर्चिषमभिसम्भवन्ती'ति अर्चिश्शब्दितस्याग्नेः देवयानमार्गप्रथमपर्वत्वश्रवणात् प्रथमतः अग्निलोकप्राप्तिरुपपन्ना । स वायुलोकं-यद्यप्यत्राग्निलोकानन्तरं वायुलोकश्श्रूयते । तथाऽपि श्रुत्यन्तरे– ' अर्चिषोऽहरह्न आपूर्यमा-

णपक्षं आपूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एति मासेभ्यो देवलोक' मिति देवलोकनिर्दिष्टस्य वायुलोकस्य उदगयनादूर्ध्वं श्रवणात् उदगयनादूर्ध्वमेव वायुलोको निवेश्यः। तत्राप्युदगयनादूर्ध्वं छान्दोग्ये— 'मासेभ्यस्संवत्सर'मिति श्रवणात् अधिककालानां न्यूनकालादूर्ध्वं निवेशस्य 'अह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षण्मासानुदङ्ङादित्य एती'त्यत्र दृष्टत्वात् उदगयनापेक्षया अधिककालस्य संवत्सरस्य तदूर्ध्वनिवेशस्सिद्धः। "स वायुलोकं स वरुणलोकं स आदित्यलोकं स इन्द्रलोकं स प्रजापतिलोक' मितीदं वाक्यं अर्चिरादिपादे चिंतितम्। 'संवत्सरादादित्यमादित्याच्चन्द्रमस' मिति छान्दोग्ये "यदा वै पुरुषोऽस्माल्लोकात् प्रैति स वायुलोकमागच्छति स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति तस्मै स तत्र विजिहीते यथा डम्बरस्य खं तेन स ऊर्ध्वमाक्रमते स चन्द्रमसमागच्छती'ति बृहदारण्यके च श्रुतत्वात् संवत्सरादूर्ध्वं चंद्रमसः प्रागादित्यस्य निवेशस्सिद्धः। तत्र च वरुणेन्द्रप्रजापतीनामपि पठितानां पाठार्थवत्त्वाय क्वचिन्निवेशे कर्तव्ये वायुलोकं वरुणलोकमिति पाठक्रमानुसारेण वायोरूर्ध्वं वरुणो निवेशयितव्यः। इन्द्रप्रजापतीअपि तदनन्तरं निवेशयितव्यौ। न च 'आदित्यलोकं इन्द्रलोकं प्रजापतिलोकमि'ति पाठक्रमादादित्यादूर्ध्वं चन्द्रात्प्रागेव निवेशोऽस्त्विति वाच्यम्। 'आदित्याच्चन्द्रमस' मिति आदित्यादूर्ध्वं चन्द्रस्य श्रवणेन तत्क्रमबाधप्रसङ्गात्। न च चन्द्रादूर्ध्वं तयोर्निवेशोऽस्त्विति वाच्यम्। 'चन्द्रमसो विद्युत'मिति श्रुतिक्रमबाधप्रसङ्गात्। ननु देवलोकादादित्यमिति देवलोकशब्दितवायोरादित्यस्य च क्रमस्य श्रुतत्वात् तत्रेन्द्रप्रजापत्योर्निवेशे तत्क्रमभंगस्स्यादितिचेन्न। वाय्वादित्ययोरन्तराळे वरुणस्य निवेशनीयतया तेनैव वाय्वादित्ययोरानन्तर्यस्य भग्नतया तत्रैवेन्द्रप्रजापत्योरपि निवेशः। अतश्च वरुणेन्द्रप्रजापतीनां त्रयाणामपि वाय्वादित्ययोरन्तराळ एव निवेशोऽस्त्विति प्राप्त उच्यते—

तटितोऽधिवरुणस्सम्बन्धात्। तटित ऊर्ध्वं वरुणस्य निवेशः। कुतः। सम्बन्धात्। विद्युद्वरुणयोर्द्वयोरपि मेघोदरवर्तित्वरूपसम्बन्धसत्त्वात्।

विद्युत ऊर्ध्वं वरुणस्य निवेशः । ततः परस्तात् इन्द्रप्रजापत्योर्निवेशः । तथाहि सति 'देवलोकादादित्यं आदित्याच्चन्द्रमसं चन्द्रमसो विद्युत'मिति निबद्धोऽपि क्रमो न बाधितो भवति । नचैवं विद्युतऊर्ध्वं वरुणेन्द्रप्रजापतीनां निवेशे तेषामेव ब्रह्मगमयितृत्वेन 'तत्पुरुषोऽमानवस्स एनान् ब्रह्मगमयती'ति वैद्युतपुरुषस्य गमयितृत्वं श्रुतं विरुध्येतेति वाच्यम् । वरुणेन्द्रप्रजापतीना-मगमयितृत्वेऽपि वैद्युतपुरुषस्याप्यनुग्राहकतया गमयितृत्वसम्भवादिति ॥

इति वरुणाधिकरणम् ॥३॥

आतिवाहिकास्तल्लिंगात् ॥४॥

लोके ग्रामादिगन्तृणामिमं वृक्षं गत्वा इमां नदीं गत्वा स ग्रामो गन्तव्य इति तत्तद्देशिकोपदेशसरूपत्वादस्यापि वाक्यस्यार्चिरादयो मार्गचिह्नभूताः । अथवा 'अग्निलोकमागच्छति स वायुलोक' मिति लोकशब्दश्रवणादर्चिराद्या भोगभूमय इत्येवं पूर्वपक्षे प्राप्ते उच्यते—

आतिवाहिकास्तल्लिंगात् । विदुषामतिवाहे परमपुरुषेण नियुक्ताः देवताविशेषाः आतिवाहिकाः । गन्तृणां गमयितारइतियावत् । तल्लिंगात् । 'तत्पुरुषोऽमानवस्सएनान् ब्रह्म गमयती'ति वैद्युतपुरुषस्य गमयितृत्वासिद्धवत्कारेण ब्रह्मगमयितृत्वमात्रविशेषप्रतिपादनपरेण वाक्येनेतरेऽपि गमयितारइति प्रतीतेः, अर्चिरादिशब्दानां च 'अभिमानिव्यपदेशस्तु विशेषानुगतिभ्या' मिति सूत्रेण तदभिमानिदेवतापरत्वसम्भवात् ॥

ननु वैद्युतपुरुषस्यैव ब्रह्मगमयितृत्वे ऊर्ध्वं कौषीतकिवाक्यानुसारेण निवेशितानां वरुणेन्द्रप्रजापतीनां कथं सम्बन्धः । तत्राह—

वैद्युतनैव ततस्तच्छ्रुतेः ॥५॥

ततः विद्युत उपरि वैद्युतेनैव ब्रह्मप्राप्त्यतिवाहनं 'स एनान्ब्रह्म गमयती'ति श्रुतेः । वरुणादयोऽपि तदनुग्राहका भवन्तीति द्रष्टव्यम् ॥

इति आतिवाहिकाधिकरणम् ॥४॥

कार्यं बादरिरस्य गत्युपपत्तेः ॥६॥

कार्यं हिरण्यगर्भमुपासीनानेव अर्चिरादिर्गणो नयतीति बादरिराचार्यो मन्यते। परिच्छिन्नप्राप्त्यर्थं हि गतिरुपपद्यते, नापरिच्छिन्नपरब्रह्मप्राप्तये। नह्याकाशं प्रेप्सता देशविशेषो गन्तव्यो भवति ॥

विशेषितत्वाच्च ॥७॥

'पुरुषोऽमानव एत्य ब्रह्मलोकान्गमयती' ति गन्तव्यस्य बहुवचनान्तलोकशब्देन विशेषितत्वात्, परब्रह्मण एकत्वेन बहुत्वासम्भवात्, लोकशब्दस्य देशविशेष एव मुख्यत्वाच्च, न परब्रह्मणोऽर्चिरादिप्राप्यत्वम् ॥

ननु 'स एनान् ब्रह्म गमयती' ति नपुंसकलिंगब्रह्मशब्देन चतुर्मुखस्य कथं निर्देश इत्यत्राह—

सामीप्यात्तु तद्व्यपदेशः ॥८॥

'यो ब्रह्माणं विदधाति पूर्वं' मिति हिरण्यगर्भस्य प्रथमजत्वेन ब्रह्मसामीप्यात् ब्रह्मशब्देनामुख्यया वृत्त्या चतुर्मुखस्य निर्देशउपपद्यत इतिभावः।

ननु हिरण्यगर्भस्य द्विपरार्धावसाने नाशात् तं प्राप्तस्य पुनरावृत्तेरवर्जनीयत्वात् 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्त' इत्यनावृत्तिप्रतिपादकश्रुतिविरोधः। तत्राह—

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥९॥

'ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे' इत्यभिधानात् कार्यस्य ब्रह्मलोकस्यात्यये तदध्यक्षेण ब्रह्मणासह अतः ब्रह्मलोकात् परंब्रह्मप्राप्नोति। अतश्चानावृत्तिश्रुतिरुपपद्यतइति भावः ॥

स्मृतेश्च ॥ १० ॥

'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परंपद' मिति स्मृत्या कार्योपासकस्यैव अर्चिरादिप्राप्तिप्रतिपादनात् तदनुसार्येव बादरेर्मतम् ॥

परं जैमिनिर्मुख्यत्वात् ॥१२॥

नपुंसकलिंगब्रह्मशब्दस्य परस्मिन्ब्रह्मण्येव मुख्यत्वात् परमेव ब्रह्मार्चिरादिः प्रापयतीति जैमिनिराचार्यो मन्यते । तस्य परिपूर्णत्वेऽपि 'परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति श्रुत्यनुसारेण निश्शेषाविद्यानिवृत्तेर्देशविशेषविशिष्टब्रह्मप्राप्तिसापेक्षत्वात देशविशेषविशिष्टब्रह्मप्राप्तये गतिरुपपद्यते । लोक्यतइति व्युत्पत्त्या लोकशब्दोऽपि ब्रह्मण्युपपन्नः । बहुवचनमप्येकस्मिन्नुपचारात् प्रयुज्यते ॥

दर्शनाच्च ॥१२॥

दर्शयति च श्रुतिर्ब्रह्मप्राप्तेर्गतिसापेक्षत्वं 'एष सम्प्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत' इति ॥

ननु 'प्रजापतेस्सभां वेश्म प्रपद्य' इति अर्चिरादिना गतस्य कार्यप्रजापतिविषयाभिसन्धिर्दृश्यते, तत्राह—

न च कार्ये प्रत्यभिसन्धिः ॥१३॥

नायं प्रत्यभिसन्धिः कार्यहिरण्यगर्भविषयः, अपि तु परब्रह्मविषयः। तस्यैव प्रजापतिशब्दमुख्यवाच्यत्वात्, उत्तरत्र 'यशोऽहं भवामि ब्राह्मणानां यशोराज्ञां यशोविशा' मिति सर्वाविद्याविमोकपूर्वकसर्वात्मभावाभिसन्धानात्, 'अश्व इव रोमाणि विधूय पापं चन्द्रइव राहोर्मुखात् प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवानी' ति ब्रह्मलोकस्याकृतत्वेन विशेषितत्वाच्च, परमेव ब्रह्मार्चिरादिर्नयतीति जैमिनिराचार्यो मन्यते॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥१४॥

अब्रह्मभूतं नामादिकं ये ब्रह्मत्वेनोपासते ते प्रतीकालम्बनाः । तद्भिन्नान् प्रकृतिवियुक्तं प्रत्यगात्मानं ब्रह्मात्मकत्वेन ये पञ्चाग्निविद उपासते, ये च केवलं परंब्रह्मोपासते, उभयविधानपि तान्नयतीति बादरायण आचार्यो

-मन्यते। केवलं परमेवोपासीनान्नयनीति पक्षे, कार्यमुपासीनान्नयतीति पक्षे च 'तद्य इत्थंविदुर्येचेमेऽरण्ये' इति श्रुतिविरोधप्रसंगात्। ननु पञ्चाग्निविद्यायाः ब्रह्मात्मकप्रत्यगात्मविद्यात्वे किं प्रमाणम्। तत्राह– तत्क्रतुश्चेति। पञ्चाग्निविद्याया ब्रह्मविद्यात्वाभावे अर्चिरादिगतिर्वा, तया गत्या ब्रह्मप्राप्तिर्वा न स्यात्, तत्क्रतुन्यायविरोधप्रसंगात्। ब्रह्मविद्यात्वे तु तत्क्रतुन्यायोऽप्यनुगृहीतो भवति। इयांस्तु विशेषः। पञ्चाग्निविद्या ब्रह्मात्मकस्वात्मविद्या। दहरादिविद्यास्तु प्रत्यगात्मशरीरकपरमात्मविद्याः। विशेषणविशेष्यभावे परं व्यत्यासः। अयं तु भगवतो बादरायणस्य सिद्धान्तः॥

विशेषञ्च दर्शयति ॥१५॥

'यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवती'त्यादिकया श्रुत्या नामादिप्राणपर्यन्तप्रतीकोपासननिष्ठानां गत्यनपेक्षं परिमितफलविशेषप्रतिपादनात् परब्रह्मोपासकान् प्रकृतिवियुक्तब्रह्मात्मकस्वात्मोपासकांश्च अर्चिरादिरातिवाहिकगणो नयतीति॥

इति कार्याधिकरणम् ॥९॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतंत्रताबिरुदाञ्चितैः श्रीमद्रंगरामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां श्रीशारीरकशास्त्रार्थदीपिकायां चतुर्थाध्यायस्य तृतीयः पादः॥

श्रीमते रङ्गरामानुजमहादेशिकाय नमः॥

॥ श्रीः ॥

॥ श्रीमते हयवदनपरब्रह्मणे नमः ॥

॥ चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

संपद्याविर्भावः स्वेन शब्दात् ॥१॥

'स्वेन रूपेणाभिनिष्पद्यत' इति देवादिरूपवत् साध्येन रूपेणाभिनिष्पत्तिरुच्यते। अभिनिष्पत्तिशब्दस्यागन्तुकधर्मोत्पत्तिपरत्वात् स्वशब्दः स्वात्मीयवचनः। आगन्तुकस्यापि रूपस्यात्मीयत्वात् स्वेन रूपेणेत्युपपद्यते। न तु 'स्वेन रूपेणाभिनिष्पद्यत' इत्यत्र स्वशब्दस्यात्मार्थकत्वं वा निष्पत्तिशब्दस्याविर्भावार्थकत्वं वा युक्तं, स्वरूपस्य नित्यत्वेन तत्प्राप्तेरपुरुषार्थत्वप्रसङ्गादिति पूर्वपक्षे प्राप्ते उच्यते— **सम्पद्याविर्भावः स्वेन शब्दात्।**

परंज्योतिरुपसम्पद्य स्वस्य रूपस्यैवाविर्भावः। नत्वागन्तुकात्मीयधर्मोत्पत्तिः। तथाहिसति 'स्वेनरूपेणाभिनिष्पद्यत' इत्यत्र स्वेनशब्दवैयर्थ्यप्रसंगात्। अतः स्वशब्दोनात्मीयवचनः, अपित्वात्मवचनएव। आविर्भावेऽप्यभिनिष्पत्तिशब्दो दृश्यते— युक्त्याऽयमर्थो निष्पन्नः, इदमेकं सुनिष्पन्न मित्यादिषु। नन्वात्मनः पूर्वसिद्धत्वात् कथं तस्य पुरुषार्थत्वं तत्राह-

मुक्तःप्रतिज्ञानात् ॥२॥

'स्वेनरूपेणाभिनिष्पद्यत' इत्यस्य मुक्तोभवतीत्यर्थः। निवृत्ताविद्यातिरोधानो भवतीति यावत्। कथमिदमवसीयत इतिचेत्, प्रतिज्ञानात् जागराद्यवस्थात्रयकलुषितं जीवं प्रस्तुत्य 'एतंत्वेव ते भूयोऽनुव्याख्यास्यामि नो एवान्यत्रैतस्मा' दिति तस्यैव अशरीरत्वलक्षणमुक्तत्वं 'मघवन्मर्त्यं वा इदं शरीर' मित्यादिना चतुर्थेन पर्यायेण प्रतिपादयिष्यामीति प्रतिज्ञानात्। निवृत्ताविद्यातिरोधानस्य स्वेन रूपेण साध्यत्वमस्त्येवेति न पुरुषार्थत्वहानिः।

ननु निवृत्ततिरोधानस्याप्यात्मस्वरूपस्य कथंचित्साध्यत्वसम्भवेऽपि तस्य न पुरुषार्थत्वे प्रमाणमस्तीत्यत्राह ॥

आत्माप्रकरणात् ॥३॥

'य आत्माऽपहतपाप्मे' त्यादिवाक्यसन्दर्भप्रतिपाद्यापहतपाप्मत्वादिगुणाष्टकविशिष्टतयाऽत्यन्तानुकूलत्वेन परमपुरुषार्थभूतोऽयमात्मा। अपहतपाप्मत्वादीनां कथं जीवसम्बन्धित्वमित्यत्राह प्रकरणादिति। अवस्थात्रयकलुषितं जीवं प्रकृत्यैवापहतपाप्मत्वादिगुणानामाम्नानादित्यर्थइति ॥

इति सम्पद्याविर्भावाधिकरणम् ॥१॥

अविभागेन दृष्टत्वात् ॥४॥

किमयं मुक्तः परंज्योतिरुपसम्पन्नः स्वात्मानं परमात्मनः पृथग्भूतमनुभवति, उत परमात्मप्रकारतया परमात्मनः अविभागेन अनुभवतीति विशये 'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता, परमं साम्यमुपैति, मम साधर्म्यमागता' इत्यादिश्रुतिस्मृतिभ्यां मुक्तस्य परेण साम्यसाहित्यसाधर्म्यप्रतिपादनात् तेषां भेदगर्भत्वात् पृथग्भावेनैवानुभवतीति पूर्वपक्षे प्राप्तउच्यते—

अविभागेन दृष्टत्वात् । परब्रह्मणः स्वात्मानं अविभागेन अनुभवति । परब्रह्मोपसम्पत्त्या निवृत्ताविद्यस्य स्वात्मनः परमात्मापृथक्सिद्धविशेषणत्वेन साक्षात्कृतत्वात् । साम्यसाधर्म्यादिशब्दानां ब्रह्मापृथक्सिद्धविशेषणस्य प्रत्यगात्मनः देवादिप्राकृतरूपप्रहाणेन ब्रह्मसमानशुद्धिप्रतिपादकत्वेनाविरोधात् ॥

इति अविभागेन दृष्टत्वाधिकरणम् ॥२॥

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥५॥

'स्वेन रूपेणाभिनिष्पद्यत' इत्युच्यमानं स्वरूपं किमित्याकांक्षायां अस्मिन्प्रकरणे अपहतपाप्मत्वादिगुणानामेवोपन्यासात्, सत्यसङ्कल्पत्वकार्यजक्षणादिभ्यश्च, ब्रह्मसम्बन्धिना अपहतपाप्मत्वादिगुणलक्षणेन रूपेणाविर्भवतीति जैमिनिराचार्यो मन्यत इति ॥

चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥६॥

'प्रज्ञानघन एव, विज्ञानघनएवे' ति ज्ञानैकरसत्वाज्ज्ञानेन निर्धर्मकत्वप्रतिपादनात् ज्ञानमात्रस्वरूपेणाविर्भवतीति ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥७॥

तस्यचायमर्थः । एवमपि विज्ञानघनत्वेऽपि अपहतपाप्मत्वाद्युपन्यासेन 'ब्राह्मेण जैमिनिरुपन्यासादिभ्य' इति पूर्वसूत्रोक्तब्रह्मरूपस्यापि संभवात् सैन्धवघनस्य कृत्स्नस्य रसनेन्द्रियावगतरसघनत्वस्य, चक्षुराद्यवगतरूपका-

ठिन्यादेश्चाविरोधवत् मानान्तरावगतब्राह्मरूपस्य च, मानान्तरावगतविज्ञानघनत्वस्यचाविरोध इति बादरायणआचार्यो मन्यते । ‘ विज्ञान घन एवे ’ त्येवकारस्य स्वप्रकाशत्वाव्याप्तांशनिषेधमात्रपरत्वादिति ॥

इति ब्राह्माधिकरणम् ॥३॥

संकल्पादेव तच्छ्रुतेः ॥८॥

सत्यसङ्कल्पत्वेन व्यवह्रियमाणानामपि राजादीनामभिलषितसृष्टेः प्रयत्नान्तरसापेक्षत्वदर्शनात् मुक्तस्यापि सिसृक्षितपितृलोकादिसृष्टिः सङ्कल्पव्यतिरिक्तप्रयत्नान्तरसापेक्षैवेति प्राप्त उच्यते—

सङ्कल्पादेव तच्छ्रुतेः । सङ्कल्पमात्रादेव सृष्टिः । न प्रयत्नान्तरसापेक्षा । कुतः । ‘सङ्कल्पादेव पितरस्समुत्तिष्ठन्ती’ति एवकारश्रुतेः । न च एवकारस्य अयोगव्यवच्छेदकत्वमत्यन्तायोगव्यवच्छेदकत्वं वाऽर्थः । विशेषणक्रियासंगतयोरेव एवकारयोरयोगात्यन्तायोगव्यवच्छेदार्थकत्वेन एतस्यचातथात्वेन अन्ययोगव्यवच्छेदपरत्वस्यैव न्याय्यत्वात् ॥

अतएवचानन्याधिपतिः ॥९॥

अतएव-सत्यसङ्कल्पत्वादेव, अनन्याधिपतिः-अन्याधिपतित्वं विधिनिषेधयोग्यत्वं विधिनिषेधयोग्यत्वे प्रतिहतसङ्कल्पत्वं भवेत् । अतः सत्यसङ्कल्पत्वश्रुत्यैवानन्याधिपतित्वं च सिद्धम् । अतएव ‘सस्वराड्भवती’त्युच्यते । अकर्मप्रतिहतज्ञानो मुक्तः विकारलोकान् ब्रह्मविभूतिभूताननुभूय स यथाकामं तृप्यतीति सर्वेषु लोकेषु कामचारो भवतीति वाक्येनोच्यते ॥

इति सङ्कल्पाधिकरणम् ॥४॥

अभावं बादरिराहह्येवम् ॥१०॥

शरीरेन्द्रियाणामभावं बादरिराचार्यो मन्यते । ‘ न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ती’त्येवं श्रुतिराहेत्यर्थः ॥

भावं जैमिनिर्विकल्पामननात् ॥११॥

मुक्तस्य देहेन्द्रियादिसद्भावं जैमिनिराचार्यो मन्यते । कुतः । विकल्पामननात् । विविधः कल्पः विकल्पः । वैविध्यमित्यर्थः । 'स एकधाभवति त्रिधाभवति पंचधासप्तधे' त्यादिश्रुतेः । आत्मनएकस्याच्छेद्यस्यानेकधाभावासम्भवात् त्रिधाभावादयश्शरीरनिबन्धना इत्यवगम्यते । अशरीरत्ववचनं तु कर्मकृतशरीराभावपरम् ॥

द्वादशाहदुभयविधं बादरायणोऽतः ॥१२॥

'सङ्कल्पादेवे'ति पूर्वनिर्दिष्टस्सङ्कल्पोऽतश्शब्देन परामृश्यते । अतः सङ्कल्पवशादेव मुक्तस्य सशरीरत्वाशरीरत्वलक्षणविधाद्वयमप्यस्ति । सङ्कल्पवशात्सशरीरोऽशरीरश्च भवतीति भगवान् बादरायणो मन्यते इत्यर्थः, द्वादशाहवत् । यथा 'द्वादशाहमृद्धिकामा उपेयुः, द्वादशाहेन प्रजाकामं याजये'दिति उपेतियजतिचोदनाभ्यां द्वादशाहस्य सत्रत्वाहीनत्वरूपविधाद्वयवत्त्वं, एवमित्यर्थः ॥

तन्वभावे सन्ध्यवदुपपत्तेः ॥१३॥

मुक्तस्य स्वतनुप्रभृतिभोगोपकरणसृष्टिसंकल्पाभावे स्वप्ने परमात्मसृष्टैर्भोगोपकरणैर्यथा भोगान् भुंक्ते एवं मुक्तस्सत्यसंकल्पोऽपि परमात्मसृष्टैर्भोगोपकरणैर्भोगाननुभवति ॥

भावेजाग्रद्वत् ॥१४॥

मुक्तस्य स्वभोगोपकरणतनुभवनादिसृष्टिसंकल्पसत्त्वे यथा जाग्रत्पुरुषः स्वार्जितैर्भोगोपकरणैर्भोगाननुभवति, एवंमुक्तोऽपि स्वसंकल्पसृष्टैर्भोगोपकरणैर्भोगाननुभवति ॥

नन्वणुपरिमाणस्य जीवस्य कथमनेकशरीरेष्वात्माभिमानसंभवः? तत्राह-

प्रदीपवदावेशस्तथाहिदर्शयति ॥१५॥

यथा प्रदीपस्यैकदेशस्थितस्य स्वप्रभया देशान्तरव्याप्तिः, एवमेकदेशस्थितस्यात्मनः धर्मभूतज्ञानादहमित्यात्माभिमानानुगुणा सर्वदेशेषु व्या-

प्तिरुपपद्यते । तथा हि दर्शयति श्रुतिः । 'वालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवस्स विज्ञेयस्सचानन्त्याय कल्पते' इति । आनंत्याय धर्मभूतकृतानन्त्यायेत्यर्थः । इयांस्तु विशेषः । बद्धस्य कर्माधीनश्शरीरपरिग्रहः मुक्तस्य स्वेच्छायत्तइति ॥

ननु 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेदनान्तर'मिति मुक्तस्य ज्ञानाभावप्रतिपादनात् कथमनेकशरीरेष्वात्माभिमानानुगुणज्ञानव्याप्तिः तत्राह ॥

स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥

'न बाह्यं किंचनवेद' इति ज्ञानाभावश्रुतेस्सुषुप्तिमरणान्यतरविषयत्वात्सुषुप्तिमरणयोर्निस्सम्बोधत्वस्य 'नाहखल्वयमेवं सम्प्रत्यात्मानं जानाति' विज्ञानघन एवैतेभ्यो भूतेभ्यस्समुत्थाय तान्येवानुविनश्यति' इति श्रुतिभ्यामाविष्कृतत्वात् । अनुविनश्यति-न पश्यतीत्यर्थः । मुक्तस्य 'मनसैतान्कामान्पश्यन्रमते' इति सार्वज्ञ्यस्याविष्कृतत्वाच्चेति ॥

इति अभावाधिकरणम् ॥५॥

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥१७॥

मुक्तस्य ऐश्वर्यं किं जगद्व्यापारसहितं । उत तद्रहितं अनुभवमात्रविषयमिति संशये जगद्व्यापारसहितमेवेति पूर्वपक्षः । 'निरञ्जनः परमंसाम्यमुपैती' ति परमसाम्यप्रतिपादिकया श्रुत्या सत्यसंकल्पत्वश्रुत्या च मुक्तस्य जगन्नियमनस्यापि सिद्धेः । न हि जगन्नियमनमन्तरा परमसाम्यसत्यसंकल्पत्वे सिध्यतः । अतस्तदन्यथानुपपत्त्या जगन्नियमनरूपैश्वर्यस्याप्यावश्यकत्वादिति ॥ सिद्धान्तस्तु—

जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च । निखिलचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदनियमनरूपजगदैश्वर्यस्य परब्रह्मासाधारणत्वेन तल्लक्षणत्वात् मुक्तसाधारणत्वे ब्रह्मलक्षणत्वासम्भवात् 'यतोवा इमानी' त्यादिश्रुतिभिः तत्तत्प्रकरणे ब्रह्मण एव जगन्नियमनरूपैश्वर्यप्रतिपादनात् तादृश-

श्रुतिषु मुक्तस्य असन्निधानाच्च जगद्व्यापारवर्जं मुक्तस्यैश्वर्यमिति । ननु अनाद्यनन्तकल्पानुवृत्तसर्वप्रपञ्चजन्मादिकारणत्वं ब्रह्मलक्षणम् । मुक्तानान्तु स्वमुक्तिप्राचीनकालवर्तिप्रपञ्चकर्तृत्वाभावात् न लक्षणत्वविरोध इति चेन्न । जगत्सृष्ट्यादिषु वर्तमानानां मुक्तानामैकमत्यनियमाभावात् कस्यचित् सिसृक्षायामन्यस्य संजिहीर्षापि भवेदिति किमिपि कार्यं न निवर्तेत । न च सर्वेऽपि परमात्माधीना एव जगत्सर्गादौ प्रवर्तन्त इति ऐकमत्यमुपपद्यत इति वाच्यम् । तर्हि तदधीनत्वेन तत्साम्याभावेन साम्यश्रुतेस्संकोचनीयत्वावश्यम्भावात्, 'भोगमात्रसाम्यलिंगाच्चे' ति वक्ष्यमाणसूत्रन्यायेन भोगमात्रसाम्यमादायापि तुलाधृतयोस्सुवर्णशिलाशकलयोर्गुरुत्वसाम्येनाप्यत्यन्तसाम्यव्यवहारवत् साम्यव्यवहारस्य जगत्कारणत्वमन्तरेणाप्युपपत्तेः, न मुक्तस्य जगद्व्यापारप्रवृत्तिरिति भावः ॥

प्रत्यक्षोपदेशान्नेतिचेन्नाधिकारिकमण्डलस्थोक्तेः॥ १८॥

'ननु स स्वराड्भवति, सर्वेषु लोकेषु कामचारो भवति, कामान्नी कामरूप्यनुसञ्चर' न्निति श्रुतिभिः कामान्नित्वकामरूपित्वसर्वलोकसञ्चारप्रतिपादनात् कामान्नित्वादीनां जगतः मुक्ताधीनत्वमन्तरा असम्भवात् जगद्व्यापारोऽपि मुक्तस्य स्यादिति चेन्न । मुक्तस्य उभयविभूतिविशिष्टब्रह्मानुभवे आधिकारिकहिरण्यगर्भादिलोकस्थभोगस्यापि अन्तर्गतत्वेन तन्मात्रविषया उपात्तश्रुतयः । न तु जगद्व्यापारपरा इति ॥

विकारावर्ति च तथा हि स्थितिमाह ॥१९॥

विकारे जन्मादिकेन वर्तत इति विकारावर्ति । विकारशब्देन हेयसामान्यमुपलक्षितम् । ब्रह्मैव विशेष्यम् । निखिलहेयप्रत्यनीककल्याणैकतानस्य सविभूतिकस्य ब्रह्मण एव मुक्तानुभाव्यत्वात् तादृशविभूत्यन्तर्गतत्वेन विकारवर्तिलोकानामपि मुक्तभोग्यत्वम् । 'यदाह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दतेऽथसोऽभयं गतो भवति, रसं ह्येवायं लब्ध्वानन्दीभवती' त्यादिका श्रुतिः सविभूतिकब्रह्मानुभवितृत्वेन

मुक्तस्य स्थितिं दर्शयति । सर्वलोककामचारादिश्रुतीनामत्रैव तात्पर्यं । न जगद्व्यापारे । अतो न मुक्तस्य सृष्ट्यादिविषयं जगदैश्वर्यम् ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥२०॥

'भीषास्माद्वातःपवते । एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः, विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । मयाऽध्यक्षेण प्रकृतिस्सूयते स चराचर'मित्यादिश्रुतिस्मृतिभिः सकलजगन्नियमनरूपजगदैश्वर्यस्य परब्रह्मासाधारणत्वप्रतिपादनात् सत्यसंकल्पत्वपरमसाम्ये जगद्व्यापारवर्जं सम्भवतः ॥

भोगमात्रसाम्यलिंगाच्च ॥२१॥

'सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेती'ति श्रुत्या ब्रह्मानुभवरूपभोगमात्रसाम्यप्रतिपादनलिंगाच्च जगद्व्यापारवर्जमैश्वर्यं मुक्तस्येति प्रप्रतीयते– सामान्यतः साम्यप्रतिपादकश्रुतेः सामान्यविशेषन्यायेन भोगसाम्यपरत्वावश्यकत्वात् ॥

अनावृत्तिश्शब्दादनावृत्तिश्शब्दात् ॥२२॥

मुक्तैश्वर्यस्य सर्वेश्वरसंकल्पाधीनत्वे स्वातंत्र्यान्मुक्तस्य पुनरावृत्तिशंकायामिदं सूत्रम् ॥

मुक्तस्य पुनरावृत्तिहेतुत्वेन सम्भावितानां स्वेच्छाकर्मभगवत्संकल्पानां मध्ये कस्यापि पुनरावृत्तिहेतुत्वं न सम्भवति । तथा हि निरवधिकातिशयानन्दब्रह्मानुभवसागरनिमग्नस्य मुक्तस्य निरयतुल्यभोगान्तरापेक्षाया अप्रसक्तिः । सर्वबन्धविनिर्मुक्तस्य पुनरावृत्तिहेतुभूतकर्मविशेषस्य अप्रसिद्धत्वेन कर्माधीना पुनरावृत्तिर्नसंभवति— भगवतस्सत्यसंकल्पत्वेन मुक्तान् पुनर्नावर्तयिष्यामीति संकल्पविशेषस्य अन्यथाभावासम्भवेन भगवतः निरतिशयप्रियमुक्तविषये कदाचिदपि न प्राथमिकसंकल्पविरोधिपुनरावृत्तिसंकल्पोदयस्सम्भवतीति । तथैव प्रतिपादयंति श्रुतिस्मृतयः— 'सखल्वेवं

वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते न च पुनरावर्तते न च पुनरावर्तते । मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् । नाप्नुवंति महात्मानस्संसिद्धिं परमां गता' इत्यादिकाः ॥

सूत्राभ्यासश्शास्त्रपरिसमाप्तिद्योतकः ॥

इति जगद्व्यापारवर्जाधिकरणम् ॥ ६ ॥

इति चतुष्षष्टिप्रबंधनिर्माणसंसूचितसर्वतंत्रस्वतन्त्रताबिरुदांचितैः श्रीमद्रंगरामानुजमुनिभिरनुगृहीतायां श्रीशारीरकब्रह्मसूत्रव्याख्यायां शारीरकशास्त्रार्थदीपिकायां चतुर्थस्याध्यायस्य चतुर्थः पादः ॥

अध्यायश्च समाप्तः ॥

शास्त्रञ्च परिसमाप्तम् ॥

समुदिताधिकरणसंख्या १५६. समुदितसूत्रसंख्या ५४५.

येनोपनिषदां भाष्यं रामानुजमतानुगम् ।
रम्यं कृतं प्रपद्ये तं रंगरामानुजं मुनिम् ॥
श्रीमते रङ्गरामानुजमहादेशिकाय नमः ॥

